सं० ४९५०

नाम- रुद्रयामलतंत्रम्

कर्ता —

पत्र संख्या- ~~३२२~~ ६६२ पत्राणि सं० — ×

विषयः — तंत्रम्

रुद्रयामलतंत्रम्

४४५०

वला ७

३६

रुद्रयामल तन्त्रम्

ॐ नमः परायै ॥

भैरव उवाच ॥

पुरा श्री परमेशानी-वदनाम्भोजनिःसृतम् ।
श्रीजामलं महातन्त्रं स्वतन्त्रं विष्णुयामलं ॥
शक्तिजामलमाख्यातं ब्रह्मरन्ध्रदिहेवुना ।
ब्रह्मजामलवेदाङ्गं सर्वञ्च कथितं प्रिये ॥
इदानीमुत्तराकाण्डं वद श्रीरुद्रजामलं ।
यदि भाग्यवशाद्देवि तव श्रीमुखपङ्कजात ॥
यानि यानि स्वतन्त्राणि सन्ति तानि महीतले ।
प्रकाशाय महातन्त्रं नान्यतन्त्रेषु दृष्टिमान ॥
सर्ववेदान्तवेदेषु कथितव्यं ततः परं ।
तदा ते भक्तवर्गाणां सिद्धिः सम्भवते ध्रुवं ॥
यदि भक्ते दया भद्रे वदन्ति पुरसुन्दरि ।
महाभैरववाक्यं च पङ्कजायतलोचना ॥
श्रुत्वा सा च महाकाली कथयामास भैरवं ।

भैरव्युवाच ॥

शम्भो मन्मथदर्पघ्न कामहीन कुलाकुल ।
चन्द्रमण्डलशीर्षाद्य हालाहलनिषेवण ॥
आद्वितीयघोरमूर्ते रक्तवर्णाग्निखोज्ज्वल ।

महाऋषिपते देव सर्व्वेषांच नमोनमः ॥
सर्व्वेषां प्राणमथन शृणुस्वानन्दभैरव ।
आदौ वाला भैरवीणां साधनं षटकलात्मकं ॥
पश्चात कुमारीललितासाधनं परमाद्भुतं ।
कुरुकुल्ला विप्रचित्तासाधनं शक्तिसाधनं ॥
योगिनी खेचरीयक्षकन्यकासाधनं ततः ।
उन्मत्तभैरवी विद्या कालविद्यादिसाधनं ॥
पञ्चमुद्रासाधनञ्च पञ्चवाणादिसाधनं ।
प्रत्यङ्गिरासाधनं च कलौ साक्षातकरं परं ॥
हरितालिका स्वर्णविद्या धूम्राविद्यादिसाधनं ।
आकाशगङ्गा विबुधकन्यका साधनं ततः ॥
भूलतासाधनं सिद्धसाधनं तदनन्तरं ।
उल्काविद्यासाधनञ्च पञ्चतारादिसाधनं ॥
कालिकासाधनं कौलसाधनं ततः ।
चण्डिकासाधनं पश्चात धनसाधनम् ॥
विमलासाधनं रौद्री त्रिपुरासाधनं ततः ।
सम्मतप्रदा सप्तकूटासाधनं चोदसाधनं ।

* चर्चिकासाधनमित्यपि पाठः ।
* त्रिकूटासाधनं ततः । २)

शाक्तिकूटादिषट्कूटा नवकूटादिसाधनं ॥
कनकाख्या काञ्चनाभा वन्ध्याभासाधनं ततः ।
वज्रकूटा पञ्चकूटा सकलासाधनं ततः ॥
तारिणीसाधनं पश्चात् षोडशीसाधनं स्मृतं ।
छिन्नादि उग्रचण्डाख्या साधनं सुमनोहरं ॥
उल्कामुखी रक्तमुखी साधनं वीरसाधनं ।
नानाविधाननिर्माणं शवसाधनमेव च ॥
कत्यादेवीसाधनञ्च कत्याह्वासाधनं ततः ।
नक्षत्रविद्यापटलं कालीपटलमेव च ॥
श्मशानकालिकादेवीसाधनं भूतसाधनं ।
रतिक्रीडासाधनंच सुन्दरीसाधनं तथा ॥
महामालासाधनंच महामायादिसाधनं ।
भद्रकालीसाधनंच नीलासाधनमेव च ॥
भुवनेशीसाधनञ्च दुर्गासाधनमेव च ।
कामाख्यासाधनं भद्रा भानुमत्याश्च साधनं ॥
महारात्रिसाधनञ्च सप्तमीसाधनं तथा ।
पञ्चमी रोहिणीकृष्णासाधनं साभिचारकम् ॥
अष्टमी विषमा षष्ठी कौशल्यासाधनं ततः ।
विजयासाधनं मुद्रादेवीसाधनमेव च ॥

वाराही नारकुड़ी चान्द्रीसाधनं परमाद्भुतं ।
ब्रह्माणीसाधनं पश्चात हंसीसाधनमुत्तमम्।
माहेश्वरीसाधनञ्च कौमारी साधनं तथा ।
वैष्णवीसाधनं धात्रीधनदारतिसाधनंम् ॥
पश्चात्भावनि पूर्णास्यानारसिंहीसुसाधनं ।
ऐन्द्री घोरतरा विद्यासाधनं यतिसाधनं ॥
वज्रज्वालासाधनञ्च चण्डदुर्गादिसाधनं ।
महाविद्यासाधनञ्च लक्ष्मीसाधनमेव च ॥
शाकम्भरीसाधनञ्च भ्रामरीसाधनं तथा ।
रक्तदन्ता महाविद्या पूर्णाविद्यादिसाधनम ॥
कालिन्दीकाकामरीविद्या राधाविद्यादिसाधनं ।
गोपीश्वरी पद्मनेत्रा पद्ममालादिसाधनम ॥
मुण्डमालासाधनञ्च भृङ्गारीसाधनं ततः ॥
सकलाकर्षिणी विद्याकपालिन्यादिसाधनम ।
गुह्यकालीसाधनञ्च वगलामुखी साधनम ॥
महाबालासाधनञ्च कलाविद्यादिसाधनम ।
कुलजाकुलिकाकन्दाकुक्कुटीसाधनं महत ॥
✝ चिन्चादेवीसाधनञ्च शाङ्करी गूढ़साधनम ।
प्रफुल्लाजमुखी विद्या✱ काकिनीसाधनं ततः ॥

↑ बल्यादिसाधनं (२) ↑ छिन्ना (२)
✱ मन्त्रादिसाधनं (२)

कुब्जिकासाधनं विद्या सरस्वत्यादिसाधनम् ।
धूर्लेखा शाम्भ मुकुट*१ उग्रकाल्यादिसाधनम् ॥
मणिद्वीपेश्वरीधात्रीसाधनं यक्षसाधनम् ।
केतकीकमलाकालीप्रभामैव्यादिसाधनम् ॥
शूलीश्वरीमहाविद्या अन्नपूर्णादिसाधनम् ।
वज्रदन्ता रक्तमयी मन्दारीसाधनं तथा ॥
हस्तिनी हस्तिकर्णाद्या मातङ्गीसाधनं ततः ।
परानन्दानन्दमयीसाधनं गतिसाधनं ॥
कामेश्वरी महालज्जा ज्वालिनीसाधनं वसोः ×२ ।
गौरी वेतालकंकाली वासवीसाधनं तथा ॥
चन्द्रास्या सूर्यकिरणा रटन्तीसाधनं ततः ।
किंकिनी पावनी विद्या अवधूतेश्वरी ततः ॥
एतासां सिद्धविद्यानां साधनाद्रुद्र एव सः ।
अलकाकालयोगस्था शाक्तिशंका*३दिसाधनम् ॥
हारिणीमोहिनीक्षिप्रा हर्षा×४दिसाधनं तथा ।
अट्टहासा घोरनादा महामेघादिसाधनम् ॥
वल्लवी कौरवीर्याादिसाधनं परमाद्भुतं ।
किंकिनीसाधनं पश्चात नन्दकन्यादिसाधनम् ॥

१ मुकुटान्ततद्विद्यापरं | ३ शाक्तिकंकादिसाधनं (२)
(२) मन्त्र इति पाठः | ४ [illegible]साधनम (२)

मान्दिरासाधनं कात्यायनीसाधनमेव च ।
रजनी रजती गोलासाधनं तालसाधनं ॥
पादुकासाधनं चिन्तासाधनं रविसाधनम् ।
मुनिनाथेश्वरी शान्तिवल्लभासाधनं तथा ॥
मादिरासाधनं वीरभद्रासाधनमेव च ।
मुण्डाली फालिनी दैत्यदंशिनीसाधनं ततः ॥
प्रविष्टवर्णालघिमाभीनादिसाधनं महत् ।
फेतकारी[1]साधनं भल्लातकीसाधनमद्भुतं ॥
उड्डीयानेश्वरी पूर्णगिरिजासाधनं तथा ।
सौकरी[2] राजसरसी दीर्घजंघादिसाधनम् ॥
अयोध्यापूजिता देवी द्राविरीसाधनं शुभम् ।
ज्वालामुखीसाधनञ्च कृष्णजिह्वादिसाधनं ॥
पञ्चवक्त्रप्रियाविद्यानन्तविद्यादिसाधनम् ।
श्रीविद्याभुवनेशानीसाधनं कायसाधनं ॥
रक्तमाला महाचण्डी महाज्वालादिसाधनम् ।
प्रदीप्तामालिकाव्यासपूजिता भक्तिसाधनम् ॥
श्वासस्थावायवी शान्तालेलिहानादिसाधनम् ।
भैरवीललिता पृथ्वी नाटुकीसाधनं तथा ॥

[1] फेत्कीसाधनं (२) | [2] कौमारीराजसरसी (२)

गजास्या माङ्गली मौलीन्द्रा पत्तनामन्त्रसाधनम् ।
कुलावतीकुलादि प्रारतिचीनादिसाधनम् ॥
शिवाक्रीडादितरुणीनायिकामन्त्रसाधनम् ।
साधनं शैलवासिन्या अकस्मात् सिद्धिवर्द्धनम् ॥
मन्त्रयन्त्रस्वतन्त्रादि पूज्यमानाः परात् पराः ।
एताः सर्व्वाः कलियुगे कालिका इवकोमलाः ॥
मन्त्रोक्ता येन सिध्यन्ति सत्यं सत्यं न संशयः ।
महाकाल शिवानन्द परमानन्दपारगः ॥
भक्तानामनुरागेण विद्याखलं पुनः शृणु ।
आदौ वै भावदेवस्य मन्त्राणां नित्यसाधनं ॥
तदन्ते मङ्गलं मन्त्रसाधनं परमाद्भुतं ।
अकस्माद्धिहिता सिद्धिर्येन सिध्यति भूतले ॥
बालभैरवयोगीन्द्रसाधनं शिवसाधनम् ।
महाकालसाधनं च तथा रामेश्वरस्य च ॥
अघोरमूर्त्तेरमलं साधनं शृणु यत्नतः ।
क्रोधराज भूतराज एकचक्रादिसाधनम् ॥
गिरीन्द्रसाधनं पश्चात् कुलनाथस्य साधनम् ।
वटुकेशादिश्रीकण्ठेशादिसाधनमेव च ॥
उन्मत्तभैरवस्यापि तथा पञ्चास्यकस्य च ।

मृत्युञ्जयस्य रौद्रस्य कालान्तकहरस्य च ॥
कैलासेशस्य शम्भोश्च तथा शूलिन एव च ।
भार्गवेशस्य सर्वस्य महाकालस्य साधनम् ॥
स्मरान्तकस्य पूर्णस्य तथा शंकरसाधनम् ।
हरिद्रागणनाथस्य वरदेश्वरमालिनः ॥
ऊर्द्ध्वकेशस्य धूम्रस्य जटिलस्यापि साधनम् ।
आनन्दभैरवस्यापि बाणनाथस्य साधनम् ॥
कवीन्द्रस्य शुभाङ्गस्य हिल्लोलमर्दकस्य च ।
पुष्पनाथेश्वरस्यापि वृषनाथस्य साधनम् ॥
कपिलेशस्य रुद्रस्य तथा पिङ्गाक्षकस्य च ।
दिगम्बरस्य सूक्ष्मस्य उपेन्द्रपूजितस्य च ॥
अवधूतेश्वरस्यापि अणुधारस्य साधनम् ।
अष्टमूर्तेः कालमूर्तेः चन्द्रशेखरसाधनम् ॥
त्र्यम्बकस्याप्यघोरस्य कुबेराराधितस्य च ।
त्रिपुरान्तकमन्त्रस्य कामनाख्यकसाधनम् ॥
इत्यादिसिद्धमन्त्राणां मन्त्रार्थं विविधं मुदा ।
उदितं तद्विशेषेण सुविचार्य्य शृणुष्व तत् ॥
इन्द्रादिदेवताः सर्व्वा येन सिध्यन्ति भूतले ।

१ जलेशस्यापि साधनमित्यपि पाठः ।
२ पूर्णनाथेश्वरस्य इत्यपि पाठः ।

तत्प्रकारं महादेव सावधानावधारय ॥
उपविद्यासाधनं च मन्त्राणि विविधानि च ।
नानाकर्म्माणि धर्म्माणि षट्कर्म्मसाधनानि च ॥
श्रीरामसाधनं यज्ञसाधनं योगसाधनम् ।
सर्व्वविद्यासाधनञ्च वह्निज्वालादिसाधनम् ॥
मन्त्रसिद्धिप्रकारंच हनुमत्साधनादिकम् ।
विषज्वालासाधनञ्च पाताललोकसाधनम् ॥
भूतलिविप्रकारञ्च तत्तत्साधनमेव च ।
नवकन्यासाधनञ्च अष्टसिद्धिप्रकारकम् ॥
आसनानि च अङ्गानि साधनानि बहूनि च ।
कात्यायनीसाधनानि चिटीसाधनमेवच ॥
कृष्णमार्जारसिद्धिश्च खड्गसिद्धिस्ततः परम् ।
पादुकाजंघासिद्धिश्च निजजिह्वादिसाधनम् ॥
संस्कारगुटिकासिद्धिः खेचरीसिद्धिरेव च ।
भूप्रवेशप्रकारञ्च नित्यतुङ्गादिसाधनम् ॥
स्तम्भनं मारणं पश्चादाकर्षणमवैरपि ।
नानाविधानि देवेश औषधादीनि यानि च ॥
हरितालादिसिद्धिश्च रसपारदसाधनम् ।
नानारससमुद्भूतरसभस्मादिसाधनम् ॥

वृद्धस्य तरुणाकारसाधनं परमाद्भुतम् ।
वैजयन्तीसाधनञ्च चरित्रं बालकस्य च ॥
शिवाचरित्रमश्वस्य चरितं वायसस्य च ।
कुमारीणां प्रकारन्तु वस्त्राणां वारणं तथा ॥
सम्पत्तिसाधनं देशसाधनं कालसाधनम् ।
गुरुपूजाविधानञ्च गुरुसन्तोषसाधनम् ॥
निजदेवाराधनञ्च निजसाधनमेव च ।
वारुणी पैष्टिकी गौड़ी कैतकी माध्वीसाधनम् ॥
स्वदेहगमनं स्वर्गे मर्त्ये मर्त्यैश्च दुर्लभम् ।
शरीरवर्द्धनञ्चैव कष्टभावस्य साधनम् ॥
नयनाकर्षणञ्चैव कालसर्पस्य दर्शनम् ।
रणक्षोभप्रकारञ्च पञ्चेन्द्रियनिवारणम् ॥
योगविद्यासाधनञ्च मन्त्रप्रस्थनिरूपणम् ।
चान्द्रायणव्रतञ्चैव शृणु तद्योगसिद्धये ॥
यामलाग्रेण प्रंसन्ति यानि सर्वाणि कानि च ।
ब्रह्माण्डे तानि वस्तूनि सर्वत्र दुर्लभं शिव ॥
येऽभ्यस्यन्ति महातन्त्रं बलाद्वा यत्नतोऽपि वा ।
जामलं मम वक्त्राम्भोरुहसुन्दरसम्भवं

अतिगुह्यं महागुह्यं गुह्यगुह्यं निराकुलम् ।
नानासिद्धिसमुद्राणां गृहं योगमयं शुभम् ॥
मन्त्रजालस्य सारं हि नानामन्त्रमयं प्रियम् ।
वाराणसीपुरपतेः सदामोदसुखास्पदम् ॥
सरस्वतीदैवतं यत कालीसुप्रिस्वरेष्टतम् ।
महामोक्षद्वारमोक्षं सर्वसङ्केतशोभितम् ॥
वाञ्छाकल्पद्रुमं तन्त्रं शिवसंस्कारसंस्कृतम् ।
अप्रकाश्यं क्रियासारं सहस्रस्तुतिराजितम् ॥
अष्टोत्तरशतं नाथ सहस्रनाममङ्गलम् ।
नानाद्रव्यसाधनादिनिर्धूताञ्जनरञ्जितम् ॥
कालीप्रत्यक्षकथनं कालीषोढादिसम्पुटम् ।
महाचमत्कारकरं स्थितिसंहारपालनम् ॥
अष्टादशप्रकारश्च षोढायां सौख्यमुक्तये ।
ये जानन्ति महाकालजामलं कलिपावनम् ॥
आब्रह्मस्तम्ब पर्यन्तं करे तस्य न संशयः ।
ततप्रकारमहं वक्ष्ये निगमागममङ्गलम् ॥
यस्माद्रुद्रो भवेत ज्ञानी नानातन्त्रार्थपारगः ।
यामिनीविहितं कर्म कुलतन्त्राभिसाधितम् ॥
मकरानिहितं यस्मात पञ्चतत्वस्वरूपकं ।

१ ततकालीसुप्रिस्वाष्टतम् (२) पाठः
२ संकुलमिति ।

लंघनं नास्ति मे नाथ अस्मिन तन्त्रे सुगोपनम ॥
ततो यामलमाख्यातं चन्द्रशेखर शङ्कर ।
रुद्रादि साधनोतकृष्टं शतयोगफलप्रदम ॥
मनोः सन्तोष विपुलं यामलं परिकीर्तितम ।
रुरुकादि भैरवाणां आही देव्यादि साधनम ॥
जाम्बूनद तुलाकोटि हेमराशि साधनं यतः ।
मनसा साधनं यत्र लक्ष्मी लक्ष्मी प्रसाधनम ॥
देवतानाञ्च कवचं नानाख्यानाश्रितं महत ।
अष्टाङ्ग योग विधानानि कालिकाल फलानि च ॥
भान्ति यत्र प्रभाकारं प्रायश्चित्त विमर्षणं ।
पटल त्रिंशताख्यातं ये पठन्ति निरन्तरम ॥
अवश्यं सिद्धिमाप्नोति यद्यदिच्छन्ति भूतले ।
कर्म्मणा मनसा वाचा महातन्त्रस्य साधनम ॥
करोति कमलानाथ करपद्म निषेवितम ।
ज्ञात्वा सर्व्वधरं तन्त्रं सम्पूर्णं लोकमण्डले ॥
प्राप्नोति साधकः सिद्धिं मासादेव न संशयः ।
नानाचक्रस्य माहात्म्यं नानाङ्कं मण्डलाश्रितम ॥
सर्व्वज्ञ सिद्धि शतकं खण्डकाली कुलाकुलम ।
तरुणादित्य संकाशं वनमाला विभूषितम ॥

दैवतं परमं हंसं कालकूटाशिनं प्रभुम् ।
आदौ ध्यात्वा पूजयित्वा नमस्कुर्यात् कुलेश्वरं
प्रथमारुणसंकाशं रत्नालङ्कारलंकृतम् ।
वरदं वारुणीमत्तं परहंसं नमाम्यहं ॥

भैरव उवाच ॥

यदि नो पठ्यते तन्त्रं जामलं सर्व्वशंकरम् ।
तदा केन प्रकारेण साधकः सिद्धिभाग्भवेत् ॥
केषाञ्चित् क्षीणबुद्धिश्च मेधाहीनाश्च के जनाः ।
मन्दभाग्याश्च धूर्त्ताश्च मूढाः सर्व्वापदावृताः ॥
प्राप्नुवन्ति कथं सिद्धिं दयाजाता कथं तव ।
तेषु मूर्खेषु हीनेषु शास्त्रार्थवर्जितेषु च ॥
ज्ञानं भवति केनैव निर्म्मलं द्वैतवर्ज्जितम् ।
तत्प्रकारं वद स्नेहात् लोकानां पुण्यहेतवे ॥

भैरव्युवाच ।

कर्म्मसूत्रं यश्छिनत्ति प्रत्यहं तत्त्वसंस्थितः ।
स पश्यति जगन्नाथ मम श्रीचरणाम्बुजम् ॥
विषयावेशसंस्काराभिन्नबुद्धिः क्रियान्वितः ।
अतो मां नहि जानाति नानाकार्य्यैतकष्टावृतः ॥
तेषां शरीरं गृह्णाति कालदूतो भयानकः ।

(१) सुखवृद्ध्यै इति पाठान्तरं ।

13

यः करोति महायोगत्यागमत्यागधर्मजान ।
मन्दभाग्यः पशोर्योनिं प्राप्नोति मां विहाय सः ।
मयि भावं यः करोति दुर्लभो जनवल्लभः ।
भगवन् लभते सर्व्वं भावेन देवदर्शनम ।
भावेन परमं ज्ञानं तस्मात भावावलम्बनम ।
भावश्च सर्व्वशास्त्राणां गूढं सर्व्वेन्द्रियास्थितम ।
सर्व्वेषां मूलभूतश्च देवीभावं यदा लभेत ।
तदैव सर्व्वसिद्धिश्च तदाध्यानदृढो भवेत ।
अकलङ्की निराहारी निराशारतमानसः ।
नित्यस्नानाभिपूताङ्गो भावी भावं मुदा लभेत ।
क्रियादक्षो महाशिक्षो निपुणो विजितेन्द्रियः ।
सर्व्वशास्त्रनिगूढार्थवेतालस्य विवर्जितः ।
तेषां हस्तगतं भावं भवेत् भावं यथा तनौ ।
भावात परतरं नास्ति येनानुग्रहवान भवेत ।
भावादनुग्रहप्राप्तिरनुग्राहान्महासुखी ।
सुखात पुण्यप्रभावः स्यात पुण्यादच्युतदर्शनम ।
यदाच्युतस्य चरणाम्भोजदर्शनमंगलम ।
योगी भूत्वा सूक्ष्मपदं योगिनामपदर्शनम ।

१ लौहिताग्रैः

पश्यत्येव महाविद्या पदाम्भोरुहपावनम् ।
गुरूणां परहंसानां वाक्यं त्रैलोक्यपावनम् ।
श्रुत्वा साधकसिद्ध्यर्थी योगी योगमवाप्नुयात् ।
पञ्जरे शुकसारङ्ग-पतगाः पक्षियोनयः ।
गृह्णन्ति साधुसंसर्गान् मन्त्रामङ्गलं महत् ।
यावदज्ञानसञ्चारं तावत्कालं कुलेश्वर ।
साधकानां च साधूनां निकटस्थो भवेन्नरः ।
विद्याभ्यासी न पतति यदि बुद्धिपरो भवेत् ।
नहि चेत् जन्मवैयर्थ्यं नानाशास्त्रार्थमागमम् ।
स्वरज्ञानं विना किञ्चित् नहि सिध्यति भूतले ।
मन्त्रश्रीकार्यसिद्धिश्च कथं भवति भैरव ।
साङ्ख्यज्ञानं वेदभाषा विधिज्ञानं तथागमम् ।
शक्तिं विना यथा शाक्तं स्वरज्ञानं विना हि सः ।
अहिताचारसम्पत्तिर्दरिद्रस्य गृहे यथा ।
साधकस्य गृहे शक्तिर्ज्ञानाचारविरेचना ।
जायते यदि सायुज्यपदनाशाय केवलम् ।
यद्यज्ञानविशिष्टा सा स्वशक्तिः शिवकामिनी ।
तदा न कुर्यात् ग्रहणं शक्तिसाधनमेव च ।
यदि कुर्यादसंस्कारात् संसर्गं साधकोत्तमः ।
असंस्कृतादिदोषेण सिद्धिहानिः प्रजायते ।

शास्त्रः प्राधान्यं भावानां त्रयाणां साधकस्य च।
दिव्यवीरपशूनां च भावत्रयमुदाहृतम्।
पशुभावे ज्ञानसिद्धिः पश्चाचारनिरूपणम्।
वीरभावे क्रियासिद्धिः साक्षाद्रुद्रो न संशयः।
दिव्यभावे वीरभावे विभिन्नमेकभावतः।
अन्तःपूर्णं सर्व्वगतं दिव्यभावस्य लक्षणम्।
दिव्यभावे देवताया दर्शनं परिकीर्तितम्।
वीरभावे मन्त्रसिद्धिरद्वैताचारलक्षणम्।
आदौ भावं पशोः प्राप्य रात्रिकर्म्म विवर्ज्जयेत्।
दिवसे दिवसे स्नानं पूजानित्यक्रियान्वितः।
पुरश्चरणव्रतकार्य्ये शुचिभावेन सिध्यति।
पशुभावं विना वीरः को वशी भवति ध्रुवम्।
इन्द्रियाणां च दमनं दमनं शमनस्य च।
योगशिक्षानिविष्टाङ्गो याति योगपरायणः।
सर्व्वक्षणाभ्यसतः प्रभाताविधि मात्रम्।
सर्व्वकालं प्रकर्तव्यो योगः सर्व्वसुखप्रदः।
वाञ्छाकल्पतरुं नित्यं तरुणं पातकापहम्।
साधयेत् स्वहितं मन्त्री पशुभावस्थितो यदि।
योगभाषाविधिज्ञानं सर्व्वभावेषु दुर्लभम्।

16

17

तथापि पशुभावेन शीघ्रं सिध्यति निश्चितम् ।
गुरूणां श्रीपदाम्भोजे यस्य भक्तिर्दृढा भवेत् ।
स भवेत् कामनात्यागी भावमात्रोपलक्षणम् ।
वीरभावो महाभावो न भवेद्दुष्टचेतसां ।
भावं मन्त्रगतं सूक्ष्मं रुद्रमूर्त्या प्रसिध्यति ।
भ्रष्टाचारं महागूढं त्रैलोक्यमङ्गलं शुभम् ।
पञ्चतत्त्वादिसिद्ध्यर्थं महामोदमदोद्भवम् ।
सर्व्वपीठकुलाचारं हठादानन्दसागरम् ।
कारुण्यवारिधिर्वीरसाधने भक्तिःकेवलम् ।
ज्ञानीभूत्वा पशोर्भावं वीराचारस्ततः परम् ।
वीराचारात् भवेद्रुद्रोऽन्यथा नैव च नैव च ।
भावद्वयस्थितो मन्त्री दिव्यभावं विचारयेत् ।
महाशुचिर्दिव्यभावमाचरेत् सुसमाहितः ।
देवतायाः प्रियार्थं च सर्व्वकर्म्मकुलेश्वरः ।
यद्यत् तत्सकलं विद्धि यस्मात् धर्म्मोदयं शुभं ।
देवतातुल्यभावश्च देवतायाः क्रियापरः ।
तद्विद्धि देवताभावं दिव्यभावं प्रकीर्त्तितम् ।
सर्व्वेषां भाववर्गाणां भक्तिर्मूलं न संशयः ।
भक्तिं केन प्रकारेण प्राप्नोति साधकोत्तमः ।

18

ज्ञानादेव शरीरस्य निजकार्य्यानुसाधनात् ।
ज्ञानञ्च त्रिविधं प्रोक्तं आगमाचारसम्भवम् ।
शब्दब्रह्ममयं तद्धि ज्ञानमार्गेण पश्यति ।
पठित्वा सर्व्वशास्त्राणि स्वकर्म्मगायनानि च ।
कलाविवेकमालम्ब्य नित्यं ज्ञानी च साधकः ।
विवेकसम्भवं ज्ञानं शिवज्ञानप्रकाशकम् ।
लोचनद्वयहीनञ्च वाह्य[१]भाव विवर्जितम् ।
लोकानां परिनिर्म्मुक्तं कालाकाल विलोड़नम् ।
नित्यज्ञानं परं ज्ञानं तद्विद्धि प्राणगोचरम् ।
मानुषं सफलं जन्म सर्व्वशास्त्रेषु गोचरम् ।
चतुरशीतिलक्षेषु शरीरेषु शरीरिणाम् ।
न मानुष्यं विनान्यत्र तत्वज्ञानन्तु विद्यते[२] ।
कश्चिल्लभते जन्म मानुष्यं पुण्यसञ्चयात् ।
सोपानभूतं मोक्षस्य मानुष्यं जन्म दुर्लभम् ।
मानुषेषु च सम्प्राप्ति[३] सिद्धयः स्युः प्रधानिकाः ।
अणिमादिगुणोपेतस्तस्मादेव नरोत्तमः ।
विना देहेन कस्यापि पुरुषार्थो न लभ्यते ।

१ वाह्यवागदृष्टिवर्जितम् इति ख. पाठः ।
२ तत्तज्ञानन्तु लभ्यते । ख. पाठः ।
३ मानुषेषु च संप्राप्ति

तस्माद्गुरीरं संवर्द्ध्य नित्यज्ञानं प्रसाधय ।
मानुष्यं ज्ञाननिकरं ज्ञानात्मानं परं विदुः ।
मुनयो मौनशीलश्च मुनितत्त्वादिगोचरम् ।
मानुषः सर्वगामी च नित्यस्थाननिराकुलः ।
मन्त्रजापं योगजापं कृत्वा पापनिवारणम् ।
परं मोक्षमवाप्नोति मानुषो नात्र संशयः ।
मयोक्तानि च तन्त्राणि मदुक्ताये पठन्ति च ।
पठित्वा कुरुते कर्म्म कृत्वा मतसान्निधिं व्रजेत् ।
मदुक्तानि च शास्त्राणि न ज्ञात्वा साधको यदि ।
अन्यशास्त्राणि सम्बोध्य कोटिवर्षेण सिध्यति ।
शुक्तौ रजतविभ्रान्तिर्यथा जायेत भैरव ।
तथान्यदर्शनेभ्यश्च भुक्तिमुक्तिं च काङ्क्षति ।
यत्र भोगस्तत्र मोक्षः द्वयं कुत्र न सिध्यति ।
मम श्रीपादुकाम्भोज सेवको भोगमोक्षगः ।
बाह्यदृष्ट्या प्रगृह्णाति आकाशस्थिततेजनम् ।
ब्रह्माण्डं ज्ञानदृष्ट्या च दर्पणान्तस्थं प्रपश्यति ।
घटप्रत्यक्षसमये आलोको व्यञ्जको यथा ।
विना घटत्वयोगेन न प्रत्यक्षो यथा घटः ।
इतरादभिद्यमानेऽपि न भेदमुपगच्छति ।

पुत्रमेरौव भेदोऽस्ति विना शक्तिं कथञ्चन ।
शक्तिहीनो यथा देही निर्बलो वागविवर्जितः ।
ज्ञानहीनस्तथात्मानं न पश्यति पदद्वयम् ।
स्वभावं नाभिगच्छन्ति संसारज्ञानमोहिताः ।
अभिपश्यति सल्लोको यद्भावं परिभाव्यते ।
ईश्वरस्यापि दूतस्य यमराजस्य बन्धनम् ।
निधनञ्चानुगच्छन्ति दृष्ट्वा च तत्क्षणं धनम् ।
लोको मोहसुरां पीत्वा नवेत्ति हितमात्मनः ।
सम्पदः स्वप्नमेव स्यात् यौवनं कुसुमोपमम् ।
तडिच्चपलमायुश्च कस्याप्यज्ञानतो धृतिः ।
शतं जीवति मर्त्यश्च निद्रा स्यादर्द्ध हारिणी ।
अर्द्धं हरति कामिन्यासक्तिबुद्धिप्रतापिनी ।
असत्सङ्गश्च मूढानां हन्त्यायुश्च महर्निशम् ।
बाल्यरोगजरादुःखै रर्द्धं तदपि निष्फलम् ।
स्त्रीपुत्रपितृमात्रादिसम्बन्धः केन हेतुना ।
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः ।
अस्य त्यागः कृतो येन स सुखी नात्र संशयः ।
सुखदुःखपरित्यागी कर्मणा किं न लभ्यते ।
लोकाचारमयार्थं हि यः करोति क्रियाविधिं ।

निरामः

ब्रह्मज्ञानादहमखिले ये वदन्ति निरादराः।
सांसारिकसुखासक्तं ब्रह्मज्ञोऽस्मीति वादिनम्।
त्यजेत् तं सततं वीरश्चाण्डालमिव दूरतः।
गृहारण्यसमालोके गतव्रीडा दिगम्बराः।
चरन्ति गर्दभाद्याश्च व्रतिनस्ते भवन्ति किम्।
तृणपर्णोदकाहाराः सततं वनवासिनः।
हरिणादिमृगाश्चैव तापसास्ते भवन्ति किम्।
शीतवातातपसहा भक्ष्याभक्ष्यसमा अपि।
चरन्ति शूकराद्याश्च व्रतिनस्ते भवन्ति किम्।
आकाशे पक्षिणः सर्वे भूतप्रेतादयोऽपि च।
चरन्ति रात्रिगाः सर्वे खेचराः किं महेश्वराः।
आजन्ममरणान्तं च गङ्गादितटिनीस्थिताः।
मण्डूकमत्स्यप्रमुखा व्रतिनस्ते भवन्ति किम्।
एते ज्ञानविनिःशङ्का यदि गच्छन्ति पण्डिताः।
तथापि कर्मदोषेण नरकस्था भवन्ति हि।
कौटिल्यालससंसर्गवर्जिता ये भवन्ति हि।
प्राप्नुवन्ति मम स्थानं मम भक्तिपरायणाः।
ऊर्द्ध्वं व्रजन्ति भूतानि शरीरमातिवाहिकम्।
निजदेहाभिशापेन नानारूपी भवेन्नरः।
शरीरजैः कर्मदोषैः याति स्थावरतां नरः।

इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा ।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम् ।
गुरुपादविहीना ये ते नश्यन्ति ममाज्ञया ।
गुरुर्मूलं हि तन्त्राणां गुरुमूलं परं तपः ।
गुरोः प्रसादमात्रेण सिद्धिरेव न संशयः ।
अहं गुरुरहं देवो मन्त्रार्थोऽहं न संशयः ।
भेदका नरकं यान्ति नाना शास्त्रार्थवर्जिताः ।
सर्व्वासामेव विद्यानां दीक्षामूलं यथा प्रभो ।
गुरुर्मूलं स्वतन्त्रस्य गुरुरात्मा न संशयः ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मना क्रियते कर्म्म भावसिद्धिस्तदा भवेत् ।
हीनाङ्गः कपटी रोगी बह्वाशी शीलवर्ज्जितः ।
ममोपासनमास्थाय उपविद्यां सदाभ्यसेत् ।
धनं धान्यं सुतं वित्तं राज्यं ब्राह्मणभोजनम् ।
शुभार्थी सम्प्रयोक्तव्यमन्यथा चेत् वृथा भवेत्[1] ।
नित्यश्राद्धरतो मर्त्यो धर्म्मशीलो नरोत्तमः ।
महीपालप्रियाचारः पीठभ्रमणतत्परः ।
पीठे पीठे महाविद्यादर्शनं परिलभ्यते ।
तदा तस्य करे सर्व्वाः सिद्धयो व्यक्तमण्डलाः ॥

१ चेत् वृथा फलम् इत्यपि पाठः

अकस्माज्जायते सिद्धिः महामायाप्रसादतः।
महावीरो महाधीरो दिव्यभावस्थितोऽपि वा।
अथवा पशुभावस्थो मन्त्री पीठं विवासयेत।
क्रियायाः फलदं प्रोक्तं भावत्रयमनोरमम्।
तथा च युगभावेन दिव्यवीरेण भैरव।
प्रपश्यन्ति महावीराः पशवो हीनजातयः।
न पश्यन्ति कलियुगे शास्त्राभिभूतचेतसः।
अपि वर्षसहस्रेण शास्त्रान्तं नैव गच्छति।
तर्काद्यनेकशास्त्राणि अल्पायुर्विघ्नकोटयः।
तस्मात सारं विजानीयात क्षीरं हंस इवाम्भसि।
कलौ च दिव्यवीराभ्यां नित्यं तद्गतचेतसः।
महाभक्ताः प्रपश्यन्ति महाविद्यापरं पदम्।
साधवो मौनशीलाश्च सदा साधनतत्पराः।
दिव्यवीरस्वभावेन पश्यन्ति मत्पदाम्बुजम्।
भावद्वयं ब्राह्मणानां महासत्फलकाङ्क्षिणाम्।
अथवाचावधूतानां भावद्वयमुदाहृतम्।
भावद्वयप्रभावेन महायोगी भवेन्नरः।
मूर्खोऽपि वाक्पतिःश्रेष्ठो भावद्वयप्रसादतः।
ये जानन्ति महादेव मम तत्त्वार्थसाधितम्।
भावद्वयं हि वर्णानां ते रुद्रा नात्र संशयः।
भावको भक्तियोगेन्द्रः सर्व्वभावज्ञसाधनः।

१ सहेति शेषः

उन्मत्तजड़वन्नित्यं निजतत्वार्थपारगः।
शिरोवहति पुष्पाणि गन्धं जानाति नासिका।
पठन्ति तत्र शास्त्राणि दुर्लभा भावबोधकाः।
प्रज्ञाहीनस्य पठनमन्धस्यादर्शदर्शनम्।
प्रज्ञावतो धर्मशास्त्रं बन्धनायोपकल्पते।
तत्त्वमीदृगिति भवेदिति शास्त्रार्थनिश्चयः।
अहं कर्त्ता ब्रह्मात्मा च सर्व्वव्यापी निराकुलः।
मनसेति स्वभावश्च चिन्तयत्यतिवाक्पतिः।
सौदामनी तेजसो वा सहस्रचयकं यदा।
प्रपश्यति महाज्ञानी एकचन्द्रसहस्रकम्।
कोटिवर्षशतेनापि यत्फलं लभते नरः।
एकक्षणं मदङ्घ्रि वा ध्यात्वा तत्फलमश्नुते।
विचरेद्यदि सर्व्वत्र केवलानन्दवर्द्धनम्।
कामरूपं महापीठं त्रिकोणाधारतेजसम्।
जलबुद्बुदशब्दान्तमनन्तमङ्गलात्मकम्।
स भवेन्मम दासेन्द्रो गणो शम्भुर्हवताप्रियः।
कङ्कालास्या साट्टहासा विकटास्यादिपीठकम्।
विचरेत्साधकश्रेष्ठो मत्पादाब्जं यदीच्छति।
ज्वालामुखीमहापीठं ममप्रियमतर्कवत्।
यो भ्रमेत् मम तुष्ट्यर्थं स योगी भवति ध्रुवम्।
भावद्व्यादिनिकरं ज्वालामुख्यादिपीठकम्।

श्रमन्ति ये साधकेन्द्रास्ते सिद्धा नात्र संशयः।
भावात् परतरं नास्ति त्रैलोक्ये सिद्धिमिच्छताम्।
भावो हि परमं ज्ञानं ब्रह्मज्ञानमनुत्तमम्।
कोटिकन्याप्रदानेन वाराणस्यां शताटनैः।
किं कुरुक्षेत्रगमने यदि भावो न लभ्यते।
गयायां श्राद्धदानेन नानापीठाटनेन किम्।
नानाहोमक्रियाभिः किं यदि भावो न लभ्यते।
भावेन ज्ञानमुत्पन्नं ज्ञानात् मोक्षमवाप्नुयात्।
आत्मनो मनसा देव्या गुरोर्वाक्यरसं युतः।
ध्यानं संयोजनं प्रोक्तं मोक्षमात्ममनोलयम्।
गुरोः प्रसादमात्रेण प्रीतितोषो महान् भवेत्।
प्रीतिसन्तोषमात्रेण मोक्षमाप्नोति साधकः।
गुरुमूलं जगत् सर्वं [illegible] गुरुमूलं परं तपः।
गुरोः प्रसादमात्रेण मोक्षमाप्नोति संवशी।
न लंघयेत गुरोराज्ञामुत्तरं न वदेत्तथा।
दिवारात्रौ गुरोराज्ञां दासवत् परिपालयेत्।
उक्तानुक्तेषु कार्येषु नोपेक्षां कारयेद्बुधः।
गच्छतः पृष्ठतो गच्छेत गुरोश्छायां न लंघयेत।
न शृणोति गुरोर्वाक्यं शृणुयाद्वा पराङ्मुखः।
अहितं वा हितं वापि रौरवं नरकं व्रजेत।

आज्ञाभंगं गुरोर्देव ! यः करोति विबुद्धिमान् ।
प्रयाति नरकं घोरं शूकरत्वमवाप्नुयात ।
आज्ञाभंगं तथा निन्दां गुरोरप्रियदर्शनम् ।
गुरुद्रोहञ्च यः कुर्यात तत संसर्गं न कारयेत ।
गुरुद्रव्याभिलाषी च गुरुस्त्रीगमनानि च ।
पातकं च भवेत्तस्य प्रायश्चित्तं न कारयेत ।
गुरुं दुष्कृत्य विपुवन्निर्गत्य परिवादतः ।
अरण्ये निर्जले देशे स भवेत ब्रह्म राक्षसः ।
पादुकावसनं वस्त्रं शयनं भूषणानि च ।
दृष्ट्वा गुरोर्नमस्कृत्य आत्मभोगं न कारयेत ।
सदा च पादुकामन्त्रं जिह्वाग्रे यस्य वर्तते ।
अनायासेन धर्मार्थकाममोक्षं लभेन्नरः ।
श्रीगुरोश्चरणाम्भोजं ध्यायेच्चैव सदैवतम् ।
भुक्तये मुक्तये वीर नान्यभक्तिं ततोऽधिकम् ।
एकग्रामे स्थितः शिष्यः त्रिसन्ध्यं प्रणमेद्गुरुम् ।
एकदेशे स्थितः शिष्यो गत्वा वतसन्निधिं मुदा ।
स प्रयोजन विस्तीर्णं मासैकं प्रणमेद्गुरुम् ।
श्रीगुरोश्चरणाम्भोजं यस्यां दिशि विराजते ।
तस्यां दिशि नमस्कुर्यात कायेन मनसा धिया ।

(१) गुरोरप्रियवर्णनम् इति द्वितीयः ।

विद्यांगमासनं मन्त्रं मुद्रातन्त्रादिकं प्रभो।
सर्व्वं गुरुमुखाल्लब्धं सफलं नान्यथा भवेत्।
कम्बले कोमले वापि प्रासादे संस्थिते तथा।
दीर्घकाष्ठेऽथवा पृष्ठे गुरोश्चैकासनं त्यजेत्।
श्रीगुरोः पादुकामन्त्रं मूलमन्त्रं स्वपादुकाम्।
शिष्याय नैव देवेशि प्रवदेद्यस्य कस्यचित्।
यद्यदात्महितं वस्तु तद्द्रव्यं नैव वञ्चयेत्।
गुरोर्लब्धमेकवर्णं तस्य तस्यापि सुव्रत।
भक्त्या वित्तानुसारेण गुरुमुद्दिश्य यत्कृतम्।
द्वयोरपि महत्तुल्यं तुल्यमाढ्यदरिद्रयोः।
सर्व्वस्वमपि यो दद्यात् गुरुभक्तिविवर्जितः।
नरकान्तरमाप्नोति भक्तिरेव हि कारणम्।
गुरुभक्त्या च शक्रत्वमभक्त्या शूकरो भवेत्।
गुरुभक्तेः परं नास्ति भक्तिशास्त्रेषु सर्व्वतः।
गुरुपूजां विना नाथ कोटिपुण्यं वृथा च यम्।
अतः सर्व्वजनख्यातं गुरुणा सिद्धिमाप्नुयात्।
गुरुस्त्रीपुत्रबन्धूनां दोषं नैव प्रकाशयेत्।
भक्षयेन्नैव तद्द्रव्यं दत्तं नैव परित्यजेत्।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्व्वविद्यानुष्ठाने सिद्धिमन्त्रप्रकरणे भैरवीभैरवसंवादे

॥प्रथमः पटलः॥

१ स्वल्पैः....

देव्युवाच।

अथातः सम्प्रवक्ष्यामि सर्व्वदर्शनविद्यया।
सर्व्वज्ञ परमानन्दोद्भवबीज भयङ्कर।
शृणुष्वैकमनाः शम्भो कुलाचारविधिं शृणु।
पशूनां व्रतभङ्गादौ विधिं प्रथमतः प्रभो।
व्रतभङ्गे नियमभङ्गे नित्यपूजादिकर्म्मणि।
सहस्रं प्रजपेन्मन्त्री व्रतदोषोपशान्तये।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्।
देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्।
गुरोराज्ञापालनञ्च देवतानित्यपूजनम्।
पशुभावस्थितो मर्त्यो महासिद्धिलभेत ध्रुवम्।
पशूनां प्रथमं भावं वीरस्य वीरभावनम्।
दिव्यानां दिव्यभावस्तु भिन्ना भावास्त्रयः स्मृताः।
कुलाचारविहीनो यः साधकास्थिरमानसः।
निष्फलार्थी भवेत् क्षिप्रं कुलाचारप्रभावतः।

भैरव उवाच।

केनोपायेन भवतीचरणाम्भोजदर्शनम्।
प्राप्नोति पद्मवदने पशुभावास्थितो नरः।
तत्प्रकारं सुविस्तार्य्य कथ्यतां कुलकामिनि।
यदि भक्तिः सुगूढास्ति यदि स्नेहोऽस्ति मां प्रति।

29

महाभैरव उवाच

प्रभाते च समुत्थाय अरुणोदयकालतः ।
निशाशेषदण्डपर्यन्तं पशूनां भावईरितः ।
प्रातःकृत्यादिकं कृत्वा पुनः शय्यास्थितः पशुः ।
गुरुं सञ्चिन्तयेत् शीर्षाम्भोजे सहस्रके दले ।
तरुणादित्यसङ्काशं तेजोबिम्बं महागुरुं ।
अनन्तानन्दमहिमसागरं शशिशेखरम् ।
महाशुक्लं भास्वराङ्गं द्विनेत्रं द्विभुजं गुरुम् ।
आत्मोपलब्धि विषयं तेजसा शुक्लवाससम् ।
आज्ञाचक्रोर्द्ध्व निकरं कारणं जगतां सुखम् ।
धर्मार्थकाममोक्षाङ्गं वराभयकरं परम्[1] ।
प्रफुल्लकमलारूढं सर्वज्ञं जगदीश्वरम् ।
अन्तःप्रकाशचपलं वनमालाविभूषणम् ।
रत्नालङ्कारभूषाढ्यं देवदेवं सदा भजेत् ।
अन्तर्यागक्रमेणैव पद्मपुष्पैः समर्चयेत्[2] ।
एकान्तभक्त्या प्रणमेत् आयुरारोग्यवृद्धये ।
आद्यमध्ये जपेन्मन्त्रं आद्यन्तप्रणवेण च ।
मध्ये वाग्भवमायोज्यं गुरुणा स ततः परम् ।

(१) वराभयकरं प्रभुमिति क्वि- पाठः
(२) पद्मपुष्पैः प्रपूजयेत् ।

आनन्दनाथ शब्दान्ते गुरुं ङेन्तं समुद्धरेत्।
ऐं ह्रीं श्रीं अमुकानन्दनाथगुरवे नमः ह्रीं ऐं
नमः पदं ततो ब्रूयात प्रणवं सर्वसिद्धिदम्।
महागुरोर्मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्।
वाक्सिद्धिर्वदनाम्भोजे गुरुमन्त्रप्रभावतः।
शतमष्टोत्तरं नित्यं सहस्रं वा तथाष्टकम्।
प्रजप्य परमं माकल्प्य प्राणायामत्रयं चरेत्।
वाग्भवेन ततः कुर्य्यात प्राणायामविधिं सुधीः।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।
देवताया दर्शनस्य कारणं करुणानिधिम्।
सर्वसिद्धिप्रदातारं श्रीगुरुं प्रणमाम्यहम्।
वराभयकरं नित्यं श्वेतपद्मनिवासिनं।
महाभयनिहन्तारं गुरुदेवं नमाम्यहम्।
महाज्ञानाकारादिदाङ्गं नराकारं वरप्रदम्।
चतुर्वर्गप्रदातारं स्थूलसूक्ष्मदयान्वितम्।
सदानन्दमयं नित्यं नित्यानन्दं निरं[illegible]जनम्।

शुद्धसत्त्वमयं शुक्लं नित्यकालं कुले ध्रुवम् ।
ब्रह्मरन्ध्रे महापद्मे तेजोबिम्बे निरकुले ।
योगिभिर्ध्यानगम्ये च चारुशुक्लविराजिते ।
सहस्रदलसंकाशे कर्णिकामध्यमध्यके ।
महाशुक्लभास्वरार्ककोटिकोटिमहौजसम् ।
सर्वपीठस्थममलं परहंसं परात्परम् ।
वेदोद्धारकरं नित्यं काम्यकर्मफलप्रदम् ।
सदा मनः शक्तिमायालयस्थानपदद्वयम् ।
शरज्ज्योत्स्नाजालमालाशोभेन्दुकोटिवन्मुखम् ।
वाञ्छातिरिक्तदातारं सर्वसिद्धीश्वरं गुरुम् ।
भजामि तन्मयो भूत्वा हंसमध्ये परिस्थितम् ।
आत्मानं सुनिराकारं साकारं ब्रह्मरूपिणम् ।
महाविद्यामहामन्त्रदातारं परमेश्वरम् ।
सर्वसिद्धिप्रदातारं गुरुदेवं नमाम्यहम् ।
कायेन मनसा वाचा ये नमन्ति निरन्तरम् ।
अवश्यं श्रीगुरोः पादाम्भोरुहे ते वसन्ति हि ।
प्रभाते कोटिपुण्यं च प्राप्नोति साधकोत्तमः ।
मध्याह्ने दशलक्षं च सायाह्ने कोटिपुण्यदम् ।

(१) गुरुपादे

प्रातःकाले पठेत् स्तोत्रं ध्यानन्याससमन्वितः।
तदा सिद्धिमवाप्नोति नात्र कार्या विचारणा।
शिरःस्थित सुपङ्कजे तरुणकोटिचन्द्रप्रभम्
वराभयकराम्बुजं सकलदेवतारूपिणम्।
भजामि वरदं गुरुं किरणचारुशोभोज्ज्वलम्
प्रकाशितपदद्वयाम्बुजमलक्तकोटिप्रभम्॥१
जगद्भयनिवारणं भुवनभोगमोक्षास्पदम्
गुरोः पदयुगाम्बुजं जयति यत्र योगेजयम्।
भजामि परमं गुरुं नयनपद्ममध्यस्थितम्
भवाब्धिभयनाशनं शमनरोगकामत्रयम्॥२
प्रकाशितसुपङ्कजे सुदलषोडशास्ये प्रभुम्
परापरगुरुं भजे सकलराज्यभोगप्रदम्।
विशालनयनद्वयाम्बुजतडित्प्रभाभास्वलम्
कडारमणिपाटलं वरधरमन्त्रविन्दूत्तकम्॥३॥
महौजसमुमापते विगतदलभागे हृदि
प्रभाकरशतोज्ज्वलं सुविमलेन्दुकोट्याननम्।
भजामि परमेश्वरं गुरुकगभीरणकोज्ज्वलम्।
चलाचलकलेवरं प्रचपले दले द्वादशे॥४॥
गुर्वं द्विजं सुभ्रुअं मदननिर्दहनं हेमभञ्जीरसारम्,

नानाशब्दाप्लुताच्छादित परिरचनाचारुचक्रं त्रिभंगम् ।
नित्यं ध्यायेत प्रभातेऽप्यरुणशतघटी शोभनं योगगम्यं
नाभौ पद्मेऽतिकान्ते दशदललालिते भाव्यते योगिभिर्यत् ॥
या मायायमदानवादिषु भुजा निर्म्माणसीमापुरे
स्वाधिष्ठाननिकेतने रसदले वैकुण्ठमूले मया ।
जन्मोद्धारविकारया वहवनी वेद प्रभा भाव्यते
कन्दर्पार्पित शान्ति योनिजननी विष्णुप्रिया शाङ्करी ॥
या भाषानल कुण्डली दलपथोद्धा मा प्रपूर्णो भाकरी
मूले पद्म चतुर्दले कुलवती निःश्वास देशाश्रिता ।
साक्षात काङ्क्षित कल्पवृक्षलतिका सुप्रास्वयम्भूप्रिया
नित्या योगिभयापहा विषहरा गुर्व्वाम्बिका भाव्यते ॥
ऊर्द्ध्वाम्भोरुहनिःसृता मृतघटा मोदोल्वणाप्लाविता
गुर्व्यम्बा परिपातु सूक्ष्मपथगा तेजोमयी भास्वती ।
सूक्ष्मा साधनगोचरामृतमयी मूलादिशीर्षाम्बुजे
पूज्या चेतसि भाव्यते मुनिकदा मातासदोर्द्ध्वोद्भमा ॥
स्थिति पालनयोगेन ध्यानेन पूजनेन वा ।
यः पठेत प्रत्यहं प्राप्य स देवो न तु मानुषः ॥
कल्याणं धनधान्यञ्च कीर्तिमायुर्यशः श्रियम्
सायाह्ने च प्रभाते च पठेद्यादि सुबुद्धिमान ॥

(१) मयदानवादिषु ।

सम्भवेत् साधकश्रेष्ठः कल्पद्रुमकलेवरः ।
सर्वस्यास्य प्रसादेन वागीशत्वमवाप्नुयात् ।
पशुभावस्थिता ये च तेऽपि सिद्धा न संशयः ।
आदौ साधकदेवश्च सदाचारमतिः सदा ।
पशुभावस्थितो वीरः सायाह्ने दिव्यभाववान् ।
एतेषां भाववर्गाणां गुरुर्वेदान्तपारगः ।
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ।
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो वशी मन्त्रार्थसाधकः ।
नीरोगी निरहङ्कारो रोगाधिकाररहितो महान् ।
पण्डितो वाक्पतिः श्रीमान् सदायज्ञविधानकृत् ।
पुरश्चरणकृत् सिद्धो हिताहितविवर्जितः ।
सर्वलक्षणसंयुक्तो महज्जनगणावृतः ।
प्राणायामादिसिद्धान्तज्ञानी मौनी विरागवान् ।
तपस्वी सत्यवादी च सदाध्यानपरायणः ।
आगमार्थविशिष्टज्ञो निजधर्मपरायणः ।
अव्यक्तलिङ्गचिह्नस्थो भावको भद्रदानवान् ।
लक्ष्मीवान् धृतिमान् नाथो गुरुरित्यभिधीयते ।

(१) महज्जनगणार्चितः

शिष्यस्तु तादृशो भूत्वा सद्गुरुं पर्युपाश्रयेत् ।
वर्जयेच्च परानन्दरहितं रूपवर्जितम् ।
क्रूरं महापातकिनं निन्दितं रोगिणं गुरुम् ।
अष्टप्रकारकुष्ठेच गलत्कुष्ठिनमेव च ।
श्वित्रिणं ज्ञानहिंसार्थं सदार्थग्राहिणं तथा ।
स्वर्णविक्रयिणं चौरं सुरवध्वीगमनं तथा ।
श्यावदन्तं कुलाचाररहितं शान्तिवर्जितम् ।
सकलङ्कं नेत्ररोगपीडितं परदारगम् ।
असंस्कारप्रवक्तारं स्त्रीजितं चाधिकाङ्गकम् ।
कपटिनमनाचारं विशिष्टं बहुजल्पकम् ।
बह्वाशिनं हि कृपणं मिथ्यावादिनमेव च ।
दोषजालैः पूरिताङ्गं पूजयेन्न गुरुं विना ।
गुरौ मनुष्यबुद्धिस्तु मन्त्रेषु लिपिभावनम् ।
प्रतिमायां शिलारूपं विभाव्य रौरवं व्रजेत् ।
जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः ।
गुरुर्विशेषतः पूज्यो धर्म्माधर्म्मप्रदर्शकः ।
गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
गुरोर्हितं प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः ।

आहिंवाचरणाद्देवि विष्ठायां जायते कृमिः ।
मन्त्रत्यागात् भवेन्मृत्युः गुरुत्यागाद्दरिद्रता ।
गुरुमन्त्रपरित्यागात् रौरवं नरकं व्रजेत् ।
गुरौ सन्निहिते यस्तु पूजयेदन्यदेवताम् ।
प्रयाति नरकं घोरं सा पूजा विफला भवेत् ।
गुरुवद्गुरुपुत्रेषु गुरुवत् तत्सुतादिषु ।
अविद्यो वा सविद्यो वा गुरुरेव तु दैवतम् ।
अमार्गस्थोऽपि मार्गस्थो गुरुरेव तु दैवतम् ।
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम् ।
गुरुदेवं विना चास्मिन् शास्त्रे मन्त्रे कुलाकुले ।
नाधिकारी भवेन्नाथ श्रीगुरोः पादभावकः ।
गुरुर्माता पिता स्वामी बान्धवः सुहृदः शिवः ।
इत्याध्याय मनो नित्यं भजेत् सर्वात्मना गुरुम् ।
एकमेव परं ब्रह्म स्थूलसूक्ष्ममणिप्रभम् ।
सर्वकार्यनियन्तारं गुरुमात्मानमाश्रयेत् ।
आश्रयेत् सर्वभावानां भावमेकं न संशयः ।
निःसन्दिग्धं गुरोर्वाक्यं संशयात्मा विनश्यति ।
निःसंशयी गुरुपदे सर्वत्यागपदं व्रजेत् ।

खेचरत्वमवाप्नोति मासादेव न संशयः।
सद्गुरुः स्वाश्रितं शिष्यं वर्षमात्रं प्रतीक्षयेत्।
सगुणं निर्गुणं वापि ज्ञात्वा मन्त्रं प्रदापयेत्।
शिष्यस्तु लक्षणं सर्वं शुभाशुभविवेचनम्।
अन्यथा विप्रदोषेण सिद्धपूजाफलं दहेत्।
कामुकं कुटिलं लोकनिन्दितं सत्यवर्जितम्।
अविनीतमसमर्थं प्रज्ञाहीनं रिपुप्रियम्।
सदा पापक्रियायुक्तं विद्याशून्यं जडात्मकम्।
कलिदोषसमूहाङ्गं वेदक्रियाविवर्जितम्।
आश्रमाचारहीनञ्चाशुद्धान्तःकरणोद्यतम्।
सदाश्रद्धाविरहितमधैर्य्यक्रोधिनं अधमम्।
असत्यवित्तं विगुणं परदारातुरं सदा।
असद्युक्तिसमूहोग्रमभक्तं द्वैतचेतसम्।
नानानिन्दारताङ्गञ्च तत शिष्यं वर्जयेद्गुरुः।
यदि न त्यजते वीरो धनादिदानहेतुना।
नारकी शिष्यवत् पापी तद्विशिष्टमवाप्नुयात्।
तस्मादादिगुरुः समवेत शिष्यदोषादिपातकैः।
अकस्मान्नरकं प्राप्य कार्य्यनाशाय केवलम्।
विचार्य्य यत्नात् विधिवत् शिष्यसंग्रहमाचरेत्।

अन्यथा शिष्यदोषेण नरकस्थो भवेद्गुरुः।
न पत्नीं दीक्षयेत भर्त्ता न पिता दीक्षयेत सुतान्।
न पुत्रं च तथा भ्राता भ्रातरं नैव दीक्षयेत्।
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत्।
शक्तित्वेन महेशानि न च सा पुत्रिका भवेत्।
मन्त्राणां देवता ज्ञेया देवता गुरुरूपिणी।
तेषां भेदो न कर्त्तव्यो यदीच्छेत् सुखमात्मनः।
एकग्रामस्थितः शिष्यः त्रिसन्ध्यं प्रणमेत गुरुम्।
क्रोशमात्रे स्थितो भक्त्या गुरुं प्रति दिनं नमेत्।
अर्द्धयोजनतः शिष्यः प्रणमेत पञ्च पर्वसु।
एकयोजनमारभ्य योजनद्वादशावधि।
दूरदेशस्थितः शिष्यो भक्त्या तत्सान्निध्ययोगतः।
तत्र योजनसंख्योक्तमासेन प्रणमेद्गुरुम्।
न मैकेन भवेद्योग्यो विप्रो गुणसमन्वितः।
वर्षद्वयात्तु राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः।
चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता।
यदि भाग्यवशेनैव सिद्धमन्त्रं लभेत प्रभो।
महाविद्यान्विशत्याश्च गृह्णीयात्तत्क्षणाद्ध्रुवम्।
गुरोर्विचारं सर्वेन तातमाता महं विना।

प्रमादाच्च वृथाज्ञानात् शम्भो मन्त्रं समाचरेत् ।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ।
सावित्री मन्त्रजाप्यञ्च लक्षं जाप्यं जगत्पतेः ।
विष्णोर्वा प्रणवं लक्षं प्रायश्चित्तमिति स्मृतम् ।
असक्तश्चेन्महादेव चायुतं प्रजपेन्मनुम् ।
दशसाहस्रजाप्येन सर्वकल्मषनाशिनी ।
गायत्री छन्दसां माता पापराशितुलानला ।
मम मूर्तिप्रकाशाच्च पशुभावविराजिता ।
फलोद्भवप्रकारेण श्रृणु नाथ पशोर्विधिम् ।
यदि भाग्यवशादेव सिद्धिमन्त्रं गुरुं तथा ।
तद्देवतां लभेत श्रेष्ठ ध्याय केवलम् ।
निर्बीजञ्च पितुर्मन्त्रं शैवशाक्तेन दुष्यति ।
ज्येष्ठपुत्राय दातव्यं कुलीनैः कुलपण्डितैः ।
कुलयुक्ताय दान्ताय महामन्त्रं कुलेश्वर ।
तदैव मुक्तिमाप्नोति सत्यं सत्यं न संशयः ।
कनिष्ठश्च रिपुश्चापि सोदरं वैरिपक्षगम् ।
मातामहञ्च पितरं यतिञ्च वनवासिनम् ।
नानाश्रमकुसंसर्गी स्वकर्म*त्यागिनं तथा ।

* स्वकुलत्यागिनम् ।

वर्जयित्वा च शिशिरो दीक्षाविधिमुपाचरेत् ।
अन्यथा तद्विरोधेन कायनाशो भवेद् ध्रुवम् ।
सिद्धमन्त्रं च गृह्णीयात् दुष्कुलादपि भैरव ।
यद्गुरौ भावनेच्छानुरूपे रूपधरे शुभे ।
तत्र दीक्षा समाकुर्वन् सर्वैश्वर्य्यफलं लभेत् ।
स्वप्ने तु नियमो नास्ति दीक्षासु गुरुशिष्ययोः ।
स्वप्नलब्धे स्त्रिया दत्ते संस्कारेणैव शुद्ध्यति ।
साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ।
सर्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ।
सर्वलक्षणसम्पन्ना जापिका पद्मलोचना ।
रत्नालङ्कारसम्पन्ना स्वर्णालङ्कारभूषिता ।
शान्ता कुलीना कुलजा चन्द्रास्या सर्ववृद्धिगा ।
अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया ।
गुरुरूपा शक्तिदात्री शिवज्ञाननिरूपिणी ।
गुरुयोग्या भवेत् सा हि विधवा परिवर्जिता ।
स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता ।
पुत्रिणी विधवा ग्राह्या केवलानन्दरूपिणी ।
सिद्धमन्त्रं यदि भवेत् गृह्णीयात् विधवामुखे ।
केवलं सफलं तत्र मातुरष्टगुणं [illegible] ध्रुवम् ।

सधवा स्वप्नविलये ददाति यदि सन्मनुम् ।
मत्रास्त्ग्गुरा मामाप्नोति यदि सा पुनरगी सती ।
यदि माता स्वीयमन्त्रं ददाति तनुजाय च ।
तदाष्टसिद्धिमाप्नोति भक्तिमार्गे न संशयः ।
तदैव दुर्लभं देव यदि माता प्रदीयते ।
आदौ भक्तिं ततो मुक्तिं संप्राप्य कालरूपधृक् ।
सहस्रकोटिविद्यार्थं जानाति[1] नात्र संशयः ।
स्वप्ने तु मन्त्रा यदि वा ददाति शुद्धमन्त्रकम् ।
पुनर्दीक्षां सोऽपि कृत्वा दानवलमवाप्नुयात् ।
यदि भाग्यवशेनैव जननी छानुवर्तिनी ।
तदा सिद्धिमवाप्नोति तत्र मन्त्रं विचारयेत् ।
स्वीयमन्त्रोपदेशे तु न कुर्यात् गुरुचिन्तनम् ।
तथा श्रीललिता काली महाविद्या महामती ।
सर्वसिद्धियुतो भूत्वा वतसरात्तां प्रपश्यति ।
काली कल्पलता देवी महाविद्यादिसाधने ।
गुरुचिन्ता न कर्तव्या यो जानाति गुरुश्च सः ।
यदि मन्त्रं विचार्याथ गृह्णाति साधकोत्तमः ।

(१) प्राप्नोति नात्र संशयः ।

अनन्तकोटिपुण्यस्य द्विगुणं भवति ध्रुवम् ।
विचार्य्य चक्रसारञ्च मन्त्रं गृह्णाति यो नरः ।
वैकुण्ठनगरे वासस्तस्य जन्मशते अपि ॥

इतिश्रीरुद्रयामले उत्तरतन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे द्वितीयः पटलः ॥०२॥ २। *

इति श्रुत्वा महादेवो महादेव्याः सरस्वतीं ।
उवाच[1] परमानन्दपुलकोल्लासविग्रहः ।
ज्ञातुं चक्रं षोडशञ्च चक्रहस्तं वरप्रदम् ।
अत्यद्भुतफलोद्भूतं धर्मार्थकाममोक्षदम् ।

॥ श्रीभैरव उवाच ॥

कथयस्व महादेवि कुलसद्भावपण्डिते ।
यदि मे सुकृपादृष्टिर्वर्तते स्नेहसागरे ।
त्वत्प्रसादात् भैरवोऽहं कालोऽहं जगदीश्वरः ।
भक्तिमुक्तिप्रदाताहं योगयोग्यो दिगम्बरः ।
इदानीं सर्व्वविद्यानां दीक्षार्थं चक्रमण्डलम् ।
अकालकुलहीनञ्च कालीकुलकुलार्णवे ।

महाभैरव्युवाच

शृणु नाथ प्रवक्ष्यामि त्वं योग्योऽसि सुरद्रुमः ।

(१) उवाच पुनराद्—

* पुस्तकान्तरे अत्र पटलसमाप्तिर्नास्ति।

नानाविद्याविशेषज्ञः सावधानोऽवधारय।
श्रादाकडमं प्रोक्तं श्रीचक्रञ्च कुलाकुलम्।
ताराचक्रं कूर्मचक्रं राशिचक्रं तथापरम्।
शिवचक्रं विष्णुचक्रं ब्रह्मचक्रं त्रिलक्षणम्।
देवचक्रस्य साधाविमुलकाचक्रं ततः परम्।
वामाचक्रं चतुश्चक्रं सूक्ष्मचक्रं ततो वदेत्।
तथा कथहचक्रं च कथितं योऽकथम्प्रभो।
एतद्दुतीर्णमन्त्रं च एकान्ते येन योत्तमाः।
तेषामसाध्यं जगति न कुत्र वर्तते मनुः।
किमन्यत् कथयामीश देवतादर्शनं लभेत्।
सर्वत्रगामी सभवेत् चक्रराजप्रसादतः।
सर्वचक्रविचारञ्च न जानाति द्विजोत्तमः।
यज्जानाति तद्विचार्य्यं देवताप्रीतिकारकम्।
तारशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च।
राशिशुद्धिस्त्रैपुरस्य गोपालेऽकडमः स्मृतः।
अकडमो नामभे च गणेशे हरचक्रतः।
कोष्ठचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम्।
नामादिचक्रे सर्वेषां भूतचक्रे तथैव च।
त्रैपुरं तारचक्रे च शुद्धमन्त्रो भजेद्बुधः।

वैशवं राशिसंयुक्तं शैवे चाकडमं स्मृतम्
कालिकायाश्च ताराया हरचक्रं शुभं भवेत्।
चण्डिकाया भवेत् कोष्ठे गोपाले सूक्ष्मचक्रम्।
हरचक्रे सर्व्वमन्त्रान् ऋणाधिकेन चाश्रयेत्।
धनाधिके शुभं विद्यात् धनाधिक्ये चलो विधिः।
दोषान् संशोध्य गृह्णीयात् मध्यदेशे तु साधकः।
पितृमातृकृतं नाम त्यक्त्वा शर्म्मादिदैवकान्।
श्रीवर्णं च ततो विद्या चक्रेषु योजयेत् क्रमात्।
क्रमेण शृणु तत्सर्व्वं शुभाशुभफलप्रदम्।
जापकानां भावकानां शुद्धा सिध्यति तत्क्षणात्।
मन्त्रमात्रं प्रसिद्धेत भक्तानामिति निश्चितम्।
कुलीनकुलजातीनां ध्यानयोगार्थशायिनाम्।
महाविद्यामहामन्त्रमशुद्धमपि सिध्यति।
सिद्धमन्त्रप्रकरणे यद्यदुक्तं महेश्वर।
तत्सर्व्वं यदि गृह्णीयान्महामन्त्रोत्तमोत्तमम्।
अष्टसिद्धिः करे तस्य सायुज्यपदमाप्नुयात्।
चक्रं षोडशवर्णाख्य सर्व्वेषां मन्त्रसिद्धये।
विचार्य सर्व्वमन्त्रं च यन्मया गदितं हितम्।
आदौ बाला भैरवी सा मकडमं स्मृतं मया।

कुमारीललितादेव्याः कुरुकुल्लादिसाधने ।
श्रीचक्रं फलदं प्रोक्तं सर्व्वचक्रफलप्रदम् ।
योगिन्यादिसाधने च ताराचक्रं महत्फलम् ।
उन्मत्तभैरवी विद्यादिकसाधननिर्म्मले ।
राशिचक्रं कोटिफलं नानारत्नप्रदं शुभम् ।
प्रत्यङ्गिरसाधने च उल्काविद्यादिसाधने ।
शिवचक्रं महापुण्यं सर्व्वचक्रफलप्रदम् ।
कालिकाचार्चिकामन्त्रे विमलाद्यादिसाधने ।
सम्पत्प्रदा भैरवीणां मन्त्रग्रहणकर्म्मणि ।
विद्याचक्रं कोटिशतफलं प्राप्नोति मानवः ।
छिन्नादिउग्रविद्याया कल्यादेव्यादिसाधने ।
नक्षत्र विद्या कामाख्या ब्रह्माण्यादिषु साधने ।
ब्रह्मचक्रं महापुण्यं सर्व्वविद्याफलप्रदम् ।
कोटिजाप्येन यत्पुण्यं ग्रहणे तत्फलं लभेत् ।
वज्रज्वाला महाविद्या साधने मन्त्रजापने ।
गुह्यकाली महाविद्या कुब्जिकामन्त्रसाधने ।
शैवचक्रं शुभं प्रोक्तं वाक्यसिद्धिप्रदायकम् ।
कामेश्वरी हट्टहासा मन्त्रसाधनकर्म्मणि ।
(१) वाक्यसिद्धिप्रदायकम् ।

मङ्गलश्री मन्दिरा देवी मादिरामन्त्रसाधने ।
करिणीयानि महामन्त्रं विचार्य्य सर्व्वसिद्धिदम् ।
श्रीविद्या भुवने शानी भैरवी साधने तथा ।
पृथ्वी कुलवती चीना साधने वामने मनौ ।
उल्काचक्रं महापुण्यं मङ्गलफलदं शुभम् ।
शिवादिनायिकामन्त्रे बालाचक्रे सुखप्रदम् ।
फेतकारी मन्त्रजाप्ये च उड्डीयाने श्वरी मनौ ।
चतुश्चक्रं शतफलं महामन्त्र फलप्रदम् ।
श्राविसीदीर्घजङ्घादिज्वालामुख्यादिसाधने ।
नारसिंही साधने च सूक्ष्मचक्रं फलाङ्कुरः ।
हरिणी मोहिनी कात्यायनी साधनकर्म्मणि ।
वैष्णवे च तथा शैवे[1] देवीमन्त्रे च भैरव ।
श्रकथहं महाचक्रं विचार्य्य यत्नपूर्व्वकम् ।
यो गृह्णाति महामन्त्रं स शिवो नात्र संशयः ॥१०॥

इतिश्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्व्वचक्रानुष्ठाने महारुद्रप्रकरणे भावनिर्णये भैरवभैरवीसंवादे तृतीयः पटलः ॥३॥ * ॥

(१) वैष्णवे च तथा सौरे

* पुस्तकान्तरे द्वितीयः पटलः ।

47

॥चतुर्थः पटलः॥

श्रीभैरव उवाच

अथ चक्रं प्रवक्ष्यामि कालाकालविचारकम्।
यमाश्रित्य महावीरो दिव्यो वा पशुभाववान्।
चक्रराजं सुविचार्य्य सिद्धमन्त्रं न चालयेत्।
प्रणवस्य प्रचण्डस्य प्रसादस्य महामनोः।
शक्तिकूटादिमन्त्राणां सिद्धादीन्नैव शोधयेत्।
वराहार्कनृसिंहस्य तथा पञ्चान्तरस्य च।
स्त्रीदत्तस्य तथा [illegible]स्य प्रलब्धस्य च महामनोः।
एकाक्षरस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत्।
एकाद्व्यादिबीजस्य सिद्धमन्त्रस्य वैदिके।
हंसाद्यक्षरमन्त्रस्य सिद्धादीन्नैव शोधयेत्।
मालामन्त्रस्य कालस्य चन्द्रचूडस्य सन्मनोः।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत्।
विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः।
सूर्य्यमन्त्रस्य योगस्य कल्यामन्त्रस्य शाङ्कर।
शब्दबीजस्य वेदस्य सिद्धादीन्नैव शोधयेत्।
चक्रेश्वरस्य चन्द्रस्य वरुणस्य महामनोः।
कालीतारादिमन्त्रस्य सिद्धादीन्नैव शोधयेत्।

प०४


तथापि शोधयेन्मन्त्रं प्रशंसापरमेव तत् ।
यत्र प्रशंसा परमं तत् कार्य्यं दैवतं स्मृतम् ।
प्रशंसा यत्र नास्त्येव तत्कार्य्यं नैव कारयेत् ।
अत्यन्तफलदं मन्त्रं गृह्णीयात्कुलवर्त्मना ।
धनिमन्त्रं न गृह्णीयात् अकुलस्य तथैव च ।
गृहीत्वा निधनं याति कोटिजप्येन सिध्यति ।
मननं विश्वविज्ञानं त्राणं संसारबन्धनात् ।
यतः करोति संसिद्धौ मन्त्र इत्यभिधीयते ।
प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाजयसंज्ञकम् ।
पितुर्मन्त्रं तथा मातुर्मन्त्रं सिद्धिप्रदं शुभम् ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ।
अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत् ।
देवदीक्षाविहीनस्य नासिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ।
विचारं चक्रराजस्य करणीयमवश्यकम् ।
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ।
तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकीम् ।

49

दीक्षापूर्व्वदिने कुर्य्यात सुविचारं प्रयत्नतः ।
तत प्रकारं प्रयत्नेन कार्य्यं पर्व्वतपूजित ।
आद्यावकडमे सिद्धिमन्त्रं संचारयेत बुधः ।
रेखाद्वयं पूर्व्वपरे मध्ये रेखाद्वयं लिखेत ।
चतुष्कोणे चतूरेखा कडमं चक्रमण्डलम् ।
भ्रामयित्वा महाष्टत्वं निर्म्मायवर्णमालिखेत ।
अकारादि क्षकारान्तान् वर्णांश्च विलिखेत्ततः ।
एकैकक्रमतो लेख्यान मेषादिषु स्वमात्रकान ।
नामावर्त्तेन गणयेत क्रमशो वीरवल्लभ ।
मन्त्रमार्गेण गणयेत नामादिवर्णकादिकान ।
मेषादितोऽपि मीनान्तं क्रमशः शास्त्रपारगत: ।

(१)

॥ अकडमचक्रम ॥




सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके।
सुसिद्धास्त्रिमरौ रुद्रे वेदाष्टद्वादशे रिपुः।
एतत् ते कथितं नामाकडमादिकमुत्तमम्।

श्रीचक्रम्

पद्माकारं महाचक्रं दलाष्टकसमन्वितम्।
अआवर्णद्वयं पूर्वे द्वितीये च द्वितीयके।
तृतीये वर्णयुग्मं च चतुर्थे नासिकाद्वयम्।
पञ्चमे लयुगं प्रोक्तं षष्ठे ओष्ठाधरं तथा।
सप्तमे दन्तयुग्मं च अष्टमे षोडशस्वरम्।
कवर्गं च पूर्वदले द्वितीये च चवर्गकम्।
तृतीये च टवर्गश्च चतुर्थे च तवर्गकम्।
पवर्गं पञ्चमे प्रोक्तं यादिवान्तं च षष्ठके।
सप्तमे त्रिसमालख्यं हलन्तमष्टमे दले।
सुखं राज्यं धनं विद्यां यौवनायुष्यमेव च।
विचार्य चक्रं प्राप्नोति पुत्रबलञ्च जीवनम्।
जीवनामाक्षरं ज्ञात्वा यत्र देवाक्षरं तथा।
एकस्थानं युगस्थानं विरोधं द्विविधं स्मृतम्।
जीवनं मरणं तत्र अकारादिषु पद्मके।

लिखित्वा गणयेन्मन्त्री मरणं वर्जयेत् सदा ।
यत्रास्ति मरणं तत्र जीवनं नास्ति निश्चितम् ।
परस्परविरोधेन सिद्धिर्मन्त्रं च मृत्युदम् ।
जीवने जीवनं ग्राह्यं सर्वत्र मरणं त्यजेत् ।

श्रीचक्रम् (२)



कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह ।
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ।
पञ्चह्रस्वाः पञ्चदीर्घाः बिन्दुन्ताः सन्धिसम्भवाः ।

कादयः पञ्चशः प्रोक्ता लसहान्ताः समीरिताः ।
साधकस्याक्षरं पूर्व्वं मन्त्रस्यापि तथाक्षरम् ।
यद्येकभूतदैवत्यं जानीयात् स्वकुलं हितम् ।
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम् ।
मारुतं पार्थिवानां च शत्रुराग्नेयमम्भसाम् ।
ऐन्द्रवारुणयोः शत्रुर्मारुतः परिकीर्त्तितः ।
पार्थिवे वारुणं मित्रं तैजसं शत्रुरीरितं ।
नाभसं सर्व्वमित्रं स्याद्धिरुद्धं नैव शीलयेत् ।
रेखाषट्कं हि पूर्व्वांशं रेखैकादश मध्यतः ।
दक्षिणोत्तरभागेन दक्षिणावधि मालिखेत् ।

(कुलाकुलचक्रम्) ॥ ३

वायुः	अग्निः	भूमिः	जलम्	आकाशः
अ	इ	उ	ऋ	ऌ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ल	स	ह

53

कुलाकुलञ्च कथितं ताराचक्रं शृणु प्रिये ।
दक्षिणोत्तर[illegible]देशे च रेखाचतुष्टयं लिखेत् ।
दश रेखाः पश्चिमाग्राः कर्त्तव्या वरदायक ।
अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः ।
वक्ष्यमाणक्रमेणैव तन्मध्ये वर्णकान् लिखेत् ।
युग्ममेकं तृतीयञ्च वेदमेकैकयुग्मकम् ।
एकं युग्मं भुजैकञ्च युगलं युगलं युगम् ।
एकं युग्मं त्रयश्चैव चन्द्रानलविधुं विधुम् ।
चन्द्रं युग्मं चन्द्रयुग्मं रामं वेदं गृहे शुभे ।
वर्णाक्रमात् स्वरस्थौ तु रेवत्यंशगतावुभौ ।
अकारद्वयमश्विन्या देवता गणसम्भवा ।
इकारं भरणीमन्त्रं मिमुमूस्वरकात्तिकाम् ।
राक्षसीकात्तिका भूमौ सर्व्वविघ्नविनाशिनी ।
नासिकागरुडमन्त्रं च रोहिणी नरकापरणी ।
ओष्ठमध्ये मृगशिरा देवता परिकीर्तिता ।
अधरान्तमार्द्रया च मा[illegible]नुषं सर्व्वलक्षणम् ।
दन्तयुग्मं पुनर्वस्वाच्छादितं मानुषं प्रियम् ।
कः पुष्या देवताज्ञेया खगाश्लेषा च राक्षसी ।
मघा रक्षो घङनाच चः पूर्व्वा फाल्गुनी नरा ।

(२) त्रयंचैव ।

द्विजोत्तरा फाल्गुनी च मनुष्या परिकीर्तिता ।
हस्ता देवगणा दृष्ठा चित्रा च राक्षसी ।
स्वाती देवरमणी विशाखा दारुण राक्षसी ।
तथदानुराधया च शोभिता देवनायिका ।
ज्येष्ठा राक्षसी ज्ञेया मूलानपफ राक्षसी ।
पूर्व्वाषाढा मानुषी च चक्रोद्धदमालिका ।
मोत्तराषाढया मर्त्या मकारे श्रवणा मता ।
धनिष्ठा यरक्षः स्त्री लस्या शतभिषा तथा ।
वषा पूर्व्वभाद्रपदा मनुजा परिकीर्त्तिता ।
अथोत्तराभाद्रपदा मानुषी मङ्गलोद्भवा[१] ।
अंशः लक्ष रेवती च देवकन्या प्रकीर्त्तिता ।
स्वजातौ परमा प्रीति र्मध्यमा भिन्नजातिषु ।
रक्षो मानुषयोर्नाशो वैरं दानवदेवयोः ।
जन्मसम्पत् विपत् क्षेमं प्रत्यरिः साधको वधः ।
मित्रं परममित्रं च गणयेच्च पुनः पुनः ।
वर्जयेत पञ्चनक्षत्रं तृतीयं जन्मसप्तकम् ।
रसाष्टनवमर्क्षाणि युगयुग्मगतान्यपि ।
यदीह निजनक्षत्रं न जानाति द्विजोत्तमः ।

(१) मानुषी स सहोद्भवा

नामाद्यक्षरसम्भूतं स्वतारमविरोधकम् ।
विनीय गणयेन्मन्त्री शुभाशुभविचारवान् ।
प्रादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः ।
इत्येतत् कथितं नाथ ममात्मा पुरुषेश्वर ।
कुलाकुलमनन्ताख्यं ताराचक्रं मनोगुणम् ।
तारामन्त्रप्रदीपाभं वलभारक्षितामृतम् ।
विचारे चास्य महती सिद्धिरानन्दवर्द्धिनी ।

नक्षत्रचक्रम्


अश्विनी अ आ	भरणी इ नरः	कृत्तिका ई उ ऊ राक्षसः	रोहिणी ऋ ॠ ऌ ॡ नरः	मृगशिरा ए देवः	आर्द्रा ऐ नरः	पुनर्व्वसु ओ औ देवः	पुष्या क देवः	अश्लेषा ख ग राक्षसः
मघा घ ङ राक्षसः	पूर्व्वफल्गु च नरः	उत्तरफल्गु छ ज नरः	हस्ता झ ञ देवः	चित्रा ट ठ राक्षसः	स्वाति ड देवः	विशाखा ढ ण राक्षसः	अनुराधा त थ द नरः	ज्येष्ठा ध राक्षसः
मूला न प फ राक्षसः	पूर्वाषाढ़ ब नरः	उत्तराषाढ़ भ रा	श्रवणा म देवः	धनिष्ठा य र राक्षसः	शतभिष ल राक्षसः	पूर्व्वभाद्र व श नरः	उत्तरभाद्र ष स ह नरः	रेवती अं अः ळ क्ष देवः

४

राशिचक्रं प्रवक्ष्यामि सिद्धिलक्षणमुत्तमम् ।
क्रमेण देया युगला रेखा पूर्व्वपरोपगा ।
तन्मध्यतो द्वयं दद्यात् रेखोदग्दक्षिणे ततः ।
अग्निनैर्ऋतवायवीषु क्रमेण वेदरेखया ।
विलिखेत् मेषराश्यादि मीनान्तं सर्व्वकर्मकम् ।

क्रमेण विलिखेद्वीर राशिचक्रे च साधकः ।
वेदरामं रामहस्तं भुजंलोचनमेव च ।
पञ्चभूतं पञ्चभूतं पञ्चवेदादिवर्णकान् ।
कन्यागृहगतान् शादिवर्णानालिख्य यत्नतः ।
गणयेत साधकश्रेष्ठो लग्नाद्यायव्ययान्तकान् ।
स्वराशिदेवकोष्ठाना मनुकूलान भजेन्मनून ।
राशीनां शुद्धता ज्ञेया त्यजेच्छत्रुं मृतिं व्ययम् ।
स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षण ।
साध्याद्यक्षरराश्यन्तं गणयेत साधकाक्षरात् ।
एकं पञ्च नवमं बान्धवं परिकीर्तितम् ।
द्विषडदशमसंस्थाश्च सेवकाः परिकीर्तिताः ।
रामरुद्राश्च मुनयः पोषकाः परिकीर्तिताः ।
सूर्याश्वेदयुक्तास्तु घातकाः सर्वदोषदाः ।
शत्र्वादौ तु महादेव कुलचूडामणिर्यतिः ।
वर्जयेत षष्ठगेहं च अष्टमं द्वादशं तथा ।
लग्नं धनं भ्रातृबन्धु पुत्रशत्रुकलत्रकाः ।
मरणं धर्मकर्माय व्यया द्वादश राशयः ।
नामानुरूपमेतेषां शुभाशुभफलं दिशेत ।
वैशाखे तु महाशत्रोः स्थाने बन्धुः प्रकीर्तितः ।


57



कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम्।
यं ज्ञात्वा सर्व्वशास्त्रार्थं जानाति पण्डितोत्तमः।
अभेद्यभेदकं चक्रं शृणु सादरपूर्व्वकम्।
कूर्म्माकारं महाचक्रं चतुष्पादसमावृतम्।
तुण्डे स्वरा दक्षपादे कवर्गो वामपादके।

चवर्गः कीर्तितः पश्चात् अधः पादे टवर्गकः ।
तदधस्तु तवर्गः स्यात् उदरे च पवर्गकम् ॥
यवान्तं हृदये प्रोक्तं सहान्तं पृष्ठमध्यके ।
लाङ्गूले पृथ्वीबीजञ्च दकारं लिङ्गमध्यके ।
लिखित्वा गणयेन्मन्त्री चक्रं कलिमलापहम् ।
स्वरे लाभं कवर्गे श्रीश्चवर्गे च विवेकदम् ।
टवर्गे राजपदवीं तवर्गे धनवान् भवेत् ।
उदरे सर्वनाशः स्यात् हृदये बहुदुःखदम् ।
पृष्ठे च सर्वसन्तोषं लाङ्गूले मरणं ध्रुवम् ।
वैष्णवे पृष्ठदेशे तु दुःखं च वामपादके ।
विरुद्धद्वयलाभे तु न कुर्यात् चक्रचिन्तनम् ।
विरुद्धैके धर्मनाशो युग्मदोषे च मारणम् ।
यत्र देवान्तरस्यास्ति तत्र चेन्निजवर्गकम् ।
विरुद्धं चेत् त्यजेत् शत्रुमन्यमन्त्रं विचारयेत् ।
पृथक् स्थाने यदि भवेद् वर्णमाला महेश्वर ।
यदि तत् सौख्यभावं ... स्यात् तत् सौख्यं नापि वर्जयेत् ।
विभिन्नदेहे दोषश्चेत् शुभमन्त्रं च संत्यजेत् ।
इति ते कथितं देव दृष्टादृष्टफलप्रदम् ।
ये शोधयन्ति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम् ।

(कूर्मचक्रम् । (६)



शिवचक्रं प्रवक्ष्यामि महाकालकुलेश्वर ।
अवश्यं सिद्धिमाप्नोति शिवचक्रप्रसादतः*

* शिवचक्रप्रभावतः

षट्कोणमध्यदेशे तु चतुरस्रं लिखेद्बुधः।
तन्मध्ये विलिखेत् चारु चतुरस्रं सवर्णकम्।
मस्तकस्थत्रिकोणेषु शिवसंस्थानमन्त्रकम्।
दक्षिणावर्त्तमानेन गणयेत सर्व्वमन्त्रकम्।
विष्णुस्थाने स्वमन्त्रंच द्वितीयेच त्रिकोणके।
त्रिकोणे च तृतीये च ब्रह्मसंस्थानमन्त्रकम्।
शक्तिमन्त्रादिसंस्थानं त्रिकोणाधोमुखे तथा।
नायिकामन्त्रसंस्थानं तद्वामे दुर्लभं शुभम्।
स्वरस्थानं तथावर्णस्थानं शृणु महाप्रभो।
असावर्णद्वयं चैवे कवर्गं च सविन्दुकम्।
तदूर्द्ध्वं च त्रिकोणेषु भूतसंस्थानपूर्व्वकम्।
शिवाधो यक्षमन्त्रस्य संस्थानमतिदुर्लभम्।
विष्णुब्रह्मसन्धिदेशे पिशाचपदमन्त्रकम्।
त्रिकोणोपरि सर्व्वेषां मन्त्रसंस्थानमेव च।
नायिका भूतसन्धौ च कन्यासंस्थानमन्त्रकम्।
चतुष्कोणमध्यदेशे महाविद्यापदं ध्रुवम्।
स्वरस्थाने तथा वर्णस्थानं शृणु महाप्रभो।
अक्षौवर्णद्वयं चैवे कवर्गं च सविन्दुकम्।
विसौ नेत्रं चवर्गश्च टवर्गं अहारणः श्रुतिम्।


तवर्गं नासिकां शक्तौ सर्व्वमन्त्रार्थचेतनम् ।
नायिकायां पवर्गञ्च लेयुगं परिकीर्त्तितम् ।
भूते यवर्गं विलिखेदोष्ठाधरसमन्वितम् ।
प्रणवं यक्षमन्त्रे च णकारं परिकीर्त्तितम् ।
अधोदन्तं पिशाचे च संयुक्तं बिन्दुसंयुतम् ।
शिव बीजं देवमन्त्रे सकारञ्च सबिन्दुकम् ।
महाविद्यादिसंस्थाने लक्षवर्णं प्रकीर्त्तितम् ।
इति ते कथितं शम्भो शृणु वर्णाङ्कवर्णनम् ।
शिवे रुकारं शक्तिश्च द्वात्रिंशद्विगुणे रणके ।
ब्राह्मणे षोड़शाख्यं च शक्तिकूटे युगाष्टकम् ।
नायिकायां वह्निबाणं भूते सप्ताङ्गमेव च ।
यक्षे च चन्द्रवेदञ्च पिशाचेऽष्टवसुः स्मृतः ।
सर्व्वदेवे वदेद्धेदं कन्यायां षष्ठषष्ठकम् ।
मध्ये षष्ठहुताशं च महाविद्यागणे शुभे ।
साधकस्य च साध्यस्य चैकाङ्कं मध्यमन्दिरे ।
साधकाङ्कं मूर्द्धदेशे साध्याङ्कं गणयेदधः ।
भुजयुग्मं शिवे प्रोक्तं विष्णौ रामानलन्तथा ।
ऋषिचन्द्रं विधौ प्रोक्तं शक्तौ रामाष्टकं तथा ।
नायिकायां वेदबाणं भूतेऽष्टनवमं तथा ।

यत्रे युग्मं चतुर्थं च पिशाचे रन्ध्रकाष्टकम् ।
शत्रौ रसकतौ द्वौ यौ कन्यायां मुनिषष्ठकम् ।
यस्मिन् यस्मिन् गृहस्थाने देवतास्ते महाफलाः ।
स्वनामाद्यक्षरं देहस्य मन्त्रं द्विगुणं स्मृतम् ।
साध्याङ्केन योजयित्वा पूरयेत् सप्तपञ्चभिः ।
तद्देहं भावयेद्धिमान् देवताद्यक्षरं यथा ।
एकगेहस्थितं वर्णं कुर्यात्तत्रापि विवेचनम् ।
शुभं तद्वि विजानीयात् विचारमन्यतोऽपि च ।
सप्ताङ्केन हरेदङ्कं यदि किञ्चित् तिष्ठति ।
ज्ञाप्ताङ्कमिश्रितं चाङ्कं द्विगुणं देवताणिकम् ।
पश्चात्कृत्वा तदङ्कञ्च हरेद्रामेण वल्लभ ।
यदि साध्याङ्को विस्तीर्णः तदा नैव शुभं भवेत् ।
साधकाङ्को विस्तीर्णो यदि स्यान्न ज्ञायते गृहे ।
तदा सर्व्वकुलेशः स्याद्गुरुरेव न संशयः ।
द्विगुणं देवतावर्णं साधकाङ्केन योजयेत् ।
वर्णसंख्याङ्कमालिख्य गणयेत् साधकोत्तमः ।
रसवाणेन संपूर्य संहरेद्रससंख्यया ।
पश्चात् स्वीयाभिधानस्य द्विगुणं चापि योजयेत् ।
पश्चादनलसंख्याभिर्हरेत् सौख्यार्थमुक्तये ।

(१) देवताद्यक्षरद्वयम्

अङ्कं बहुतरं ग्राह्यं साधकस्य सुखावहम्।
न ग्राह्यं साध्य विस्तीर्णमिति शास्त्रार्थनिश्चितम्।
विचारादस्य चक्रस्य राजत्वं लभते ध्रुवम्।
समानाङ्कं न गृह्णीयात शून्याङ्कं वर्जयेदिह।
अवश्यं भावयेच्चक्रं गोपनीयं सुरासुरैः।

शिवचक्रम् (७)



63

विष्णुचक्रं प्रवक्ष्यामि चक्राकारं सुगोपनम् ।
सर्व्वसिद्धिप्रदं गुह्यं चक्रं चक्रतुफलप्रदम् ।
शृणु नाथ महाविष्णोः स्थानं मङ्गलदायकम् ।
लक्ष्मीप्रियमङ्गमयं नवकोणं महाप्रभम् ।
तदूर्द्ध्वे वृत्तमालिख्य तदूर्द्ध्वेऽष्टगृहं शुभम् ।
चतुष्कोणगृहं सन्धौ मूलाष्टकं लिखेत्ततः ।
तदूर्द्ध्वे वृत्तमालिख्य चक्रमेतत् कुलेश्वर ।
पूर्व्वे माहेन्द्रभवनमूर्द्ध्वदेशोल्लसत्करम् ।
मुनिरामखचन्द्राद्यमङ्कं सर्व्वसमृद्धिदम् ।
दक्षिणे वह्निभवनं रसवेदखयुग्मकम् ।
तदधो यमचक्रं च सप्तसप्तखरामकम् ।
तदधो निर्ऋतिगेहं युग्माङ्कशून्यवेदकम् ।
केवलाधो जलेशस्य मन्दिरं सुमनोहरम् ।
वामे तु शून्यबाणाद्यं तद्वामे वायुमन्दिरम् ।
भुजहस्तं खरसाद्यं प्राणवायुगतं हितम् ।
तदूर्द्ध्वे प्रीतिदं नाथ गुह्यकेश्वरमन्दिरम् ।
पञ्च पञ्च खसप्ताद्यं देवतादर्शनप्रदम् ।
तदूर्द्ध्वे शेषगेहे च महेशस्यापि मन्दिरम् ।
नवमाष्टमखाराद्यं चक्राणामीश्वरात्मकम् ।

नवकोणं मध्यदेशे पञ्चाङ्कमग्रतो लिखेत ।
तन्मध्ये रचयेद्धीमां पञ्चगेहे त्रिकोणके ।
इन्द्राधो विलिखेद्वीरो वर्णमाद्यं च सप्तकम् ।
भागे दक्षिणकोणे च ऋकारादिस्वरं लिखेत ।
ककारादिटकारान्तं तदधो विलिखेद्बुधः ।
तद्वामे डादिमान्तं च वर्णलक्षणकारकम् ।
तदूर्द्धे यादिवर्णाश्च चक्रं च गणयेत्ततः ।
पूर्वकोणपतिः शक्रो द्वितीये शौ यमानलौ ।
निर्ऋतिर्व[illegible]रुणश्चैव तृतीयमन्दिरेश्वरः ।
चतुर्थादिपतिर्वायुः कुवेरो नाथ इत्यपि ।
पञ्चगेह[illegible]स्याधिपति रीशो विश्वविदम्बरः ।
एकगेहस्थितं वर्णं देवतानिजवर्णयोः ।
तदा सिद्धिमवाप्नोति विशी भक्तिर्दृढा भवेत ।
तदान गणयेन्मन्त्री विष्णुचक्रं मनोरमम ।
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
पञ्चकोणे प्रतिष्ठन्ति पञ्चभूतालये स्थिताः ।
प्राणे स्थितिमवाप्नोति चापाने चाधिपीडनम ।
समाने सर्व्वसम्पत्तिरुदाने निधनं भवेत ।

(१) प्राणे सिद्धिमवाप्नोति

ध्याने च ईश्वरप्राप्तिरेतस्मिन् लक्षणं शुभम्।
पूर्व्वगेहे महामन्त्रमुक्तत्यागं करोति यः।
स भवेत् साधकश्रेष्ठो विष्णुमार्गेण शङ्कर।
विशेषं शृणु यत्नेन सावधानोऽवधारय।
सप्ताक्षरं त्र्यक्षरञ्च दशमाक्षरमेव च।
पूर्व्वगेहे यदि भवेद्द्वादशाक्षरसमन्वितम्।
तदा भवति सिद्धिश्च सर्व्वमेव प्रकारकम्।
षष्ठाक्षरं वेदवर्णं विंशत्यर्णं महामनुम्।
आम्नामाद्यक्षरं व्याप्तं सत्फलं गणयेद्बुधः।
तथास्मिन् यमगेहे च मन्त्रं सप्ताक्षरं शुभम्।
षष्ठाक्षरञ्च गणयेत्त्रिंशदक्षरमेव च।
आद्याक्षरसमायुक्तं साध्यसाधकयोरपि।
एकस्यापि च लाभे च मन्त्रासिद्धिरखण्डिता।
मन्त्राक्षरादिलाभश्च अवश्यं गणयेदिह।
नैर्ऋते च जले प्रास्याद्यक्षरञ्च नवाक्षरम्।
शून्यं वेदाक्षरं नाथ गणयेच्च विचक्षणः।
अथात्यक्षरं मन्त्रं पञ्चाक्षरमनुं तथा।
पञ्चदशाक्षरं मन्त्रं मन्दिरे गणयेत् शुभम्
वायुकोणे कुबेरस्य मन्दिरे गणयेत्तथा।

66

द्वाविंशत्यक्षरं मन्त्रं शून्यषष्ठमनुं तथा।
पञ्चाक्षरं तारिकायाः शिवपञ्चाक्षरं तथा।
एवसप्तमन्त्रमहेशो सफलं परिकीर्त्तितम्।
ईशानपञ्चकोणे च सफलञ्च नवाक्षरम्।
अष्टाक्षरं हि विद्याया गणयेत स्वहितं सुधीः।
एतदुक्तं च गणयेत् विरुद्धं नैव शीलयेत्।
प्राणामित्रं समानञ्च समाने यानबान्धवः।
एतत् स्थितञ्च गृह्णीयात दोषभाक् न भवेत् क्वचित्।
एकदेवपतौ प्रीतिरेकगेहे तथा प्रियम्।
गृहीत्वा विष्णुपदवीं प्राप्नोति मानवः क्षणात्।
यदि चक्रं न विचार्य्य रिपुमन्त्रं समभ्यसेत्।
निजायुष्यं छिनत्त्येव मूको भवति निश्चितम्।
विचार्य्य यदि यत्नेन सर्व्वचक्रप्रियं हितम्।
महामन्त्रं महादेव लघु सिध्यति भूतले॥


इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्व्वचक्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावानिर्णये भैरवभैरवीसंवादे चतुर्थः पटलः॥४॥

* पुस्तकान्तरे तृतीयः पटलः

67

।(विशुद्धचक्रम्)

(८)



महाभैरव्युवाच।

अथवक्ष्यामि चक्रेऽहं शृणु भैरव सादरम्।

येन हीना न सिध्यन्ति महाविद्याः वरप्रदाः।

तच्चक्रं ब्रह्मणा प्रोक्तं ब्रह्मचक्रमुदाहृतम् ।
यस्य ज्ञानात् स्वयं ब्रह्मा स्वचशेन नरं सृजेत् ।
अकालमृत्युहरणं परंब्रह्मपदप्रदम् ।
चतुष्कोणे चतुष्कोणं तन्मध्ये च चतुश्चतुः ।
मध्यगेहं वेष्टयित्वा ह्यष्टमन्दिरमुत्तमम् ।
अष्टकोणे महादेव षोडशस्वरमालिखेत् ।
अष्टकोणं वेष्टयित्वा वृत्तयुग्मं लिखेत सुधीः ।
मध्यगेह चतुष्कोणे कादिक्षान्तं च वर्णकम् ।
दक्षिणावर्तयोगेन विलिखेत साधकोत्तमः ।
तदूर्द्ध्वेऽष्टगृहे चाङ्कं विलिख्य गणयेत सुधीः ।
चतुर्गेहस्योर्द्ध्वदेशे युग्मगेहे क्रमाल्लिखेत ।
साध्यस्य साधकस्यापि मेषादिकन्यकान्तकम् ।
अधोलिखेत् तुलाद्यन्तानि तिथ्याद्यादिकं शुभम् ।
ततो लिखेत् गेहदक्षे युग्मगेहे महेश्वरः ।
तारकानाश्विनीताराद्यन्तान् दक्षिणतो लिखेत ।
वर्णक्रमेण विलिखेद्वेदमन्दिरमण्डले ।
ऊर्द्ध्वाधः क्रमतो लेख्या मङ्कमारं सुरेश्वर ।
ततो हि गणयेन्मन्त्री योजयित्वा क्रमेण तु ।
सुखं राज्यं धनं वृद्धिं कलहं कालदर्शनम् ।

69

सिद्धिर्वृद्धिमश्वकोणे विदिला च शुभाशुभम्।
गमयेद्वापि नक्षत्रं मृत्युगेहं विवर्जयेत्।
सुखे सुखमवाप्नोति राज्ये राज्यमवाप्नुयात्।
धने धनमवाप्नोति वृद्धौ वृद्धिमवाप्नुयात्। कलहे सर्व-नाशः स्यान्मरणे कालदर्शनम्।
सिद्धौ सिद्धिमवाप्नोति क्रद्धौ क्राद्धिं न संशयः।
आद्य(१)क्षरयुगस्यापि देवता इति राशयः।
मेषोवृषो मिथुनश्च कर्कटः सिंह एव च।
कन्यका देवता ज्ञेया नक्षत्राणि पुनः पुनः।
ऊर्द्ध्वयुग्मगृहस्यापि दक्षवामे च भागके।
नक्षत्राणि सन्ति यानि तानि शृणु महाप्रभो।
आश्विनी मृगशिराश्लेषा हस्तानुराधिका तथा।
उत्तराषाढ़िका तारा पूर्व्वभाद्रपदा तथा।
दक्षगेहास्थितास्तारा स्पर्शीभूताश्च देवताः।
एतासामधिपा एते राशयो ग्रहरूपिणः।
कर्कटः केशरी कन्या देवताः परिकीर्तिताः।
एतेषाञ्चापि वर्णानामधिपाश्चेति राशयः।
खकारस्य चकारस्य भकारस्य ढकारपः।
दकारस्य फकारस्य यकारस्य सकारयः।
नकारस्यापि पतयः ज्ञेयाश्च क्रमशः प्रभो।

(१) आद्यस्वरयुगस्य।

तद्वाममन्दिरस्यापि पतयः क्रमशः शृणु।
रोहिणी पुष्यका तारा तथा चोत्तरफल्गुनी।
विशाखा च तथा ज्ञेया पूर्वाषाढ़ा च तारका।
तथा शतभिषा तारा वाममन्दिरपार्श्वगाः।
एतासामधिपा एते राशयो ग्रहरूपिणः।
मेषो वृषो मिथुनश्च ईश्वराः परिकीर्तिताः।
एतद्गेहस्थितं वर्णमेते रक्षन्ति नित्यशः।
ककारस्य ङकारस्य णकारस्य उकारपः।
थकारस्य पकारस्य मकारस्य वकारपः।
हकारस्याधिपा एते काङ्क्षसौख्यफलप्रदाः।
दक्षिणाधोगृहस्यापि देवता इति राशयः।
तुला च वृश्चिकश्चैव गृहेश्वर उदाहृतः।
एतासां तारकानां च पतयो गदिता मया।
भरण्यार्द्रा मघा चित्रा ज्येष्ठा श्रवणावल्लभाः।
तथोत्तरभाद्रपदावल्लभा राशयो मताः।
अधोगेहस्थितं वर्णं शृणु नाथ मयापहम्।
गकारस्य ढकारस्य टकारस्य नकारपः।
धकारस्य वकारस्य रकारस्य सकारपः।
क्षकारपालका एते राशयः परिकीर्तिताः।

71

धनवृद्धिप्रदा नित्या नित्यस्थान निवासिनः।
वमाधोमन्दिरस्यापि वल्लभा इति वाप्यय:।
मकरः कुम्भकश्चैव मीनो राशिः कुलस्थिताः।
एतानि भानि रक्षन्ति शूल पाशासिधारकाः।
पुनर्वसुः कृत्तिकाच तथाभं पूर्वफाल्गुनी।
स्वाती मूला धनिष्ठाच रेवती वामगेहगाः।
एतासामधिपा एते जलस्था गृहदेवताः।
एतान् वर्णान प्ररक्षन्ति गृहस्थान राशयस्त्रयः।
यकारस्य जकारस्य चकारस्य तकारपः।
मकारस्य भकारस्य लकारस्य सकारपः।
कलहादि महादोषकाल दर्शनकारकाः।
राशयो लोकहा नाथ तन्मन्त्रं परिवर्जयेत।
यद्येकदेवतागेहं विभिन्नं च सुशोभनम।
चतुःस्थानं युगस्थानं सर्व्वत्रापि निसेधकम।
एकगेहस्थितं मन्त्रं बहुसौख्य प्रदायकम।
नाम्न आद्याक्षरं नीत्वा राशिनक्षत्र विस्तृतौ।
गणयेत साधकश्रेष्ठः कलहे कलहं भवेत।
रिपुश्चेन्मृत्युलाभः स्यात कलहेऽपि सुरेश्वर।
कलहं कालगेहं च वर्जयेत प्रयतः सुधीः।


चक्रोद्धारश्च कथितं फलं श्रृणु मुदान्वितः।
दीक्षाया दिवसे नाथ चक्रराजं यजन्ति ये।
ऐहिके धननाथः स्यात् परे याति परं पदम्।
नेत्रयुग्मं स्वरं पाति सिंहो हि कन्यका तथा।
कर्णयुग्मं तुला पाति करयुग्मं वृश्चिको धनुः।
ल युग्मं मकरः पाति कुम्भो मीनश्च पाति हि।
ओष्ठं च पाति च तथा अधरं मेष एव च।
दन्तयुग्मं वृषश्चैव मिथुनं शोभनौ सदा।
यस्य ये ये राशयः स्युः तस्य तत्तत् शुभं स्मृतम्।
एकराशिः शुभं नित्यं ददाति च मनोरथम्।
अन्यत्र सुखदं प्रोक्तं साधकः सिद्धिभाक् भवेत्।
भिन्नराशौ वर्जनीयं कलहं कालदर्शनम्।

श्रूयतां शैलजानाथ चक्रं श्रीत्रिदशात्मकम्।
पूर्वपश्चिमभेदेन सप्तरेखां समालिखेत्।
वामादिदक्षिणान्तं च रेखा दश समालिखेत्।
पञ्चगेहे पूरकाङ्कं सर्वाधो हारकाङ्ककम्।
तन्मध्ये रचयेन्मन्त्रं देवताग्रहसंयुतम्।
पूरकाङ्कमाद्यगेहे सप्तर्षियुक्तमालिखेत्।
तद्दक्षिणे द्वादशं च तद्दक्षे नवमं तथा।

74

ग्रहचक्रम् । (९)

अ आ ४	४।८।१२।१६।२०।२४ एतत्संख्यकनक्षत्राणि मेषः वृषः मिथुनः	२।५।९।१३।१७।२१।२५ कर्कट सिंह कन्या नक्षत्राणि	इ ई ५६
अं अः ३	कठ.ऋडथपम वह.	खचञढदफ षशल	उ ऊ ७
ओ औ २	घझढतनभलस	गछटणधवर वक्ष	ऋ ॠ ६
ए ऐ ११ १	३।७।११।१५।१९।२३।२७ मकर कुम्भ मीन नक्षत्राणि	२।६।१०।१४।१८।२२।२६ ।तुला वृश्चिक धनुः	ऌ ॡ ८



तद्बाह्ये अष्टदशार्कं तद्बाह्ये षोडशं स्मृतम्।
पूरकाङ्काः तले लेख्या इन्द्राद्यङ्काश्च दक्षतः।
इन्द्रगेहे च शतकं विधिविद्याफलप्रदम्।
धर्म्मगेहे शून्यसप्तयुगलं विलिखेद्बुधः।
अनन्तमन्दिरे नाथ शून्याष्टवसुरेव च।
कालीगेहे शून्यवेदरामाङ्कं विलिखेत्ततः।
धूमावतीमन्दिरे च शून्यखेषु निशापतिम्।
इन्द्राद्योदक्षतो लिख्या अङ्काश्चन्द्रादिदेवताः।
शून्यषष्ठं चन्द्रयुक्तं सर्व्वत्र दक्षतो लिखेत्।

तथाश्विनीकुमारौ च शून्यानलयुगात्मकौ ।

तत् पश्चात् सूर्य्यगेहं च सहस्राङ्कसमन्वितम् ।

तारिणीमन्दिरस्याङ्कं शून्यवेदषड़ात्मकम् ।

बगलामुखीगेहस्थं शून्याष्टचन्द्रसंयुतम् ।

ततश्चन्द्रगृहस्याधो वायुगेहं मनोरमम् ।

रन्ध्रवेदात्मकं गेहं सर्व्वसिद्धिप्रदायकम् ।

राहुगेहं महापापं शून्ये शून्यमुनिप्रियम् ।

पश्चादर्कगृहस्थं च खशून्ययुगलात्मकम् ।

षोड़शीमन्दिरे शून्य षष्ठ चन्द्रसमन्वितम् ।

मातङ्गीमन्दिरे शून्यरन्ध्रचन्द्रसमन्वितम् ।

वायोरधो वरुणस्य गृहं सप्तशशिप्रियम् ।

तरुणीमध्यगेहे च शून्याष्टकसमन्वितम् ।

बुधगेहास्थिताङ्कं च शून्यचन्द्रयुगात्मकम् ।

भुवनेशीमन्दिरस्थं शून्याष्टचन्द्रमण्डलम् ।

प्रत्याङ्गिरामन्दिरस्थं शून्यषष्ठशशिप्रियम् ।

वरुणाधः कुबेरस्य गृहस्थं षष्ठयुग्मकम् ।

आनन्दभैरवीगेहे दशकं परिकीर्त्तितम् ।

धरणीगृहमध्ये च शून्ययुग्मेन्दुसंयुतम् ।

भैरवीगृहमध्यस्थं शून्यं युगलचन्द्रकम् ।

वारुणीगृहस्थं शून्यर्षिचन्द्रमण्डलसंयुतम् ।
कुवेराधोमुखं चक्रस्थिताङ्कं सर्व्वसिद्धिदम् ।
ईश्वरस्य गृहस्थंच सप्तशून्ययुगात्मकम् ।
तिरस्कारिण्यागेहस्थं सहस्राङ्कसमन्वितम् ।
किङ्किनीमन्दिरं पश्चात् अष्टचन्द्रसमन्वितम् ।
छिन्नमस्तागृहं पश्चात शून्याष्टचन्द्रमण्डलम् ।
वागीश्वरीगृहं पश्चात खसप्तचन्द्रमण्डलम् ।
महाफलप्रदातारं धर्मः दारति तस्य न ।
ईश्वरस्य अधोगेहे वटुकस्य गृहं ततः ।
शून्याष्टमाङ्कं खगृहं धर्म्मार्थकाममोक्षदम् ।
तत्पश्चाड्डाकिनीगेहं खशून्यमुनिसंयुतम् ।
हन्ति साधकमुख्यं हि दशादेवन संशयः ।
खगृहे स्वीयमन्त्रस्य फलदं परिकीर्त्तितम् ।
भीमादेवीगृहं पश्चात खसप्तचन्द्रमण्डलम् ।
भयदं सर्व्वदेशे तु वर्जयेत् गृहान्तरम् ।
लववर्णं लिखेत शेष गृहे वै पण्डितोत्तमः ।
इन्द्रगेहावधि धीरः ककारादिकवर्णकम् ।
हकारान्तं लिखेत्तत्र गणयेत् साधकस्ततः ।

(१) गृहे द्वे पण्डितोत्तमः

पूरकाङ्कं मूर्द्धदेशे हारकाङ्कमधोलिखेत ।
निजनामाक्षरं यत्र तत्कोष्ठाङ्कं महेश्वर ।
नीलाच पूरयेद्विद्वान स्वस्वगेहोर्द्धदेशगैः ।
अङ्कैस्ततो हरेन्नाथ अधोऽङ्के हार्य्यशेषकम ।
विस्तरं चेद्दैवताङ्कं तदङ्कः शुभदः स्मृतः ।
अल्पाङ्कः शुभदः प्रोक्तः साधकस्य शुभावहः ।
एकाक्षरे महासौख्यं तत्रापि गणयेन्नच ।
स्त्रीयाङ्कः शून्यगामी चेद्दैवताङ्कस्तथा प्रभो ।
तदानैव शुभं विद्यात न शुभाय प्रकल्पते ।
एके धनमवाप्नोति द्वितीये राजवल्लभः ।
तृतीये ज्ञानसिद्धिः स्यात चतुर्थे मरणं ध्रुवम् ।
पञ्चमे पञ्चनाशः स्यात् षष्ठे दुःखौतकदानिच ।
शैवानां शाक्तवर्गाणां इत्यङ्कः परिकीर्त्तितः ।
वैष्णवानां निषेधैकं पञ्चमाङ्को निषेधकः ।
येषां यासां देवतानां इच्छा तिष्ठति चेतसि ।
तन्मन्त्रग्रहणादेव अष्टैश्वर्य्ययुतो भवेत ।
यद्दैवताश्रिताये तु तद्गृहाङ्कं हरन्ति ते ।
ऊर्द्ध्वाङ्केन पूरयित्वा अधोऽङ्कं न हरेत सदा ।

दैवचक्रम् । (२०)

२६	२८	६	२२	७
धूमावती ङ ०।०।५।२	काली घ ०।४।३	अनन्तः ग ०।८।८	धर्म्मः ख ०।०।२	इन्द्रः क १००
बगलामुखी ञ ०।८।२	तारिणी झ ०।४।६	सूर्यः ज २०००	अश्विनीकु छ ०।३।२	चन्द्रः च ०।६।२
मातंगी रा ०।८।२	भीरुणी ढ ०।६।२	अर्को ड ०।०।३	राहुः ठ ०।०।७	वायुः ट ०।८।४
प्रत्यंगिरा न ०।६।२	भुवनेशी थ ०।८।२	बधः ई ०।२।२	तरुणाति थ ०।८	वरुणः त ३।२
वाराही म	भैरवी भ	धनदाति न	अग्निः फ	कुबेरः प ६।०।२
वागीश्वरी श	छिन्नमस्ता व	किंकिनी ल	तिरस्कारिणी: र	द्वेष्वरी य
द	ल	श्रीमादि क्षी ह	डाकिनी स	वटुकः ष
२६	२८	६	२२	७

अथाधुना महत्चक्रं वक्ष्यामि शृणु तत्त्वतः
दर्शनादेव कौलस्य जानाति पूर्वजन्मगम् ।
देवं बहुतराकृत्यं ज्ञात्वा सिद्धीश्वरो भवेत् ।

78

निजसेव्यां महाविद्यां गृहीत्वा मुक्तिमाप्नुयात्।
कोष्ठशुद्धं च मन्त्रं च ये गृह्णन्ति द्विजोत्तमाः।
तेषां दुःखानि नश्यन्ति ममाज्ञाबलवत्तरा।

कोष्ठशुद्धं महामन्त्रं फलं यच्छति भैरव।
नदातव्यं महामन्त्रं सद्गुरुप्रियदर्शनात्।
तत्र कोष्ठं न विचार्यं चेज्जानाति विचार्यकम्।
महाविद्या महामन्त्रं विचार्य्य कोटिपुण्यभाक्।
अविचारेचोक्तफलं ददाति कामसुन्दरी।
कोष्ठान्येकादशान्येव वेदेन पूरितानि च।
अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित्।
प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण च।
द्वयं द्वयं लिखेत् तत्र विचारे खलु साधकः।
शेषेष्वेकैकशो वर्णान् क्रमतस्तु लिखेत् सुधीः।
अश्वावर्णाद्वयस्योर्द्ध्ववाधिस्तु क्रमशोऽङ्कक:।
आद्यमन्दिरमध्ये तु मस्त्वाङ्कं विलिखेद्बुधः।
द्वितीये मस्त्वाचिह्नञ्च तृतीयेच गृहे तथा।
चतुर्थे गगनाङ्कंच पञ्चमेचत्रयं तथा।

षष्ठगेहे चतुर्थञ्च सप्तमे च चतुर्थकम्।
अष्टमे गगनाङ्कं च नवमे दशमे तथा।
शेषमन्दिरमध्ये तु त्रयाङ्कं विलिखेत्ततः।
एते नाथ साध्यवर्णाः कथिताः क्रमशो ध्रुवम्।
कथयामि साधकार्णं सकलार्थनिरूपणम्।
आद्यगेहे द्वितीयञ्च द्वितीये च द्वितीयकम्।
तृतीये पञ्चमं प्रोक्तं गगनं वेदपञ्चके।
षष्ठे युगलमेवं हि सप्तमे चन्द्रमण्डलम्।
अष्टमे गगनं प्रोक्तं नवमे च चतुर्थकम्।
वेदञ्च दशमे प्रोक्तं चन्द्रमेकादशे तथा।
साधकानां स्मृता एते वर्णमण्डलमध्यगाः।
साध्यवर्णान्महादेव स्वरव्यञ्जनमेदकान्।
एवं हि सर्व्वमन्त्राङ्कान षष्ठाद्यङ्कैः परिपूरयेत्।
एकं कृत्य हरेदष्टसंख्याभिः कुलवल्लभ।
यद्यङ्केह स्थितं वर्णं तद्वेतव्यं मनौ शुभे।
साधकाभिधानवर्णान स्वरव्यञ्जनमेदकान्।
पृथक् पृथक् संस्थितांश्च व्यक्तं शृणु पुनः पुनः।
द्वितीयाद्यङ्कचन्द्रान्तैः संपूर्यायाशामिमाहरेत्।
मन्त्रो यद्याधिकांकः स्यात् तदा मन्त्रं जपेत सुधीः।

समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके ।
शून्ये मृत्युं विजानीयात् तस्माच्छून्यं विवर्जयेत् ।
द्वितीयाद्यङ्कजालं च वैष्णवे शुभदं स्मृतम् ।
द्वितीयाद्यङ्कजालं च तथा चैव प्रकीर्त्तितम् ।
इन्द्राद्यङ्कं तथा नाथ शैवे शाक्ते शुभप्रदम् ।
तथाऽधिकसंख्यकाद्यंकं साधकस्य शुभप्रदम् ।

81

तदङ्कं शृणु यत्नेन पूर्ववत् सकलं स्मृतम् ।
स्थानश्चैवं विभिन्नाङ्कमूर्द्धाधश्च क्रमेण च ।
साध्याङ्कान् साधकाङ्कांश्च पूरयेद्रुद्रसंख्यया ।
गुणिते तु हृतेऽष्टाभिर्यत् शेषं जायते स्फुटम् ।
तदङ्कं कथयाम्यत्र रकारादष्टरहास्थितम् ।
इन्द्रतावायुगंबारतिथि षड्वेददाहनाः ।
अष्टवसुनवाङ्कस्थाः साध्यार्णा गुणिता इति ।
दिग्भूगिरिश्रुतिगजवाह्निपर्वतपञ्चमाः ।
वेदषष्ठानलाङ्कांश्च गणयेत् साधकाक्षरान् ।
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम् ।
त्रिधा कला स्वरैर्भिन्नं तदन्याद्विपरीतकम् ।
हृतशेषाधिकं ज्ञेयं ऋणं शेषं धनं भवेत् ।
साधकाक्षरमारभ्य यावन्मन्त्राक्षरं भवेत्

प०५

ततसंख्यं च त्रिधाकृत्वा सप्तभिः संहरेद्बुधः।
अधिकश्च ऋणं प्रोक्तं ततश्शेषं धनमुच्यते।
अथवान्य प्रकारं च कृत्वा मन्त्रं समाश्रयेत।
मन्त्राद्यक्षरमारभ्य यावत् साधकवर्णकम्
तावत्संख्यं सप्तगुणं कृत्वा नामैर्हरेद्बुधः।
श्रीविद्येतरविद्यायां गणना परिकीर्तिता।
अथवान्यप्रकारश्च सकलान् साधकाक्षरान्।
स्वरव्यंजनभेदेन द्विगुणीकृत्य साधकः।
साध्ययुक्तं ततः कृत्वा स्वरव्यञ्जनभेदकम्।
अष्टभिः संहरेदंकं शृणु संहारविग्रह।
पूर्वोक्तमाचरेत् सम्यक् सर्वत्रापि शुभाशुभम्।
अस्य विचारमात्रेण सिद्धिः सर्वार्थसाधिका।
पूर्वजन्माराधिता या तां प्राप्नोति हि देवताम्।

अथान्यत्संप्रवक्ष्यामि सावधानोऽवधारय।
उल्काचक्रं सर्वसारं मन्त्रदोषादिनिर्णयम्।
मत्स्याकारमूर्द्धमुखं सर्वमन्त्रादिविग्रहम्।
स्कन्धदेशावधि नाथ पृष्ठपर्यन्तमेव च।
एकान्तरादि मन्त्रादि द्वादशाक्षरान्तरम्।

(१) द्वादशाक्षरान्तराधिकम्।

82

83


(आणिधानिक चक्रम् (२२)

६	६	६	०	३	४	४	०	०	०	३
२४	५४	६	४८	७५	३६	२८	२४	७२	८०	९
२४	२७	२	२२	२५	६	४	३	८	८	९
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
१०	१	७	४	८	३	७	५	४	६	३
१०	२	१२	१६	४०		३९	४०	२६	६०	६६ ३२
२	२	५	०	०	२	१	०	४	४	१

विलिखित पृष्ठदेशे च शुभाशुभविशुद्धये ।
त्रयोदशान्तरं नाथ एकविंशान्तरात्मकम् ।
नेतव्यं साधकैर्मन्त्रं पृष्ठस्थमुदरस्थकम् ।
तथा श्रीशुभदं प्रोक्तं कण्ठादि पुच्छकान्तकम् ।
द्वाविंशादिचतुस्त्रिंशदन्तरान्तं मनुं शुभम् ।
पुच्छस्थं नापि गृह्णीयात मुखस्थं च तथा शुभम् ।
शीर्षस्थं चापि गृह्णीयात तदन्तरं शृणु प्रभो ।
पञ्चत्रिंशादि द्विचत्वारिंशद्वर्णान्तमेव च ।
मस्तकस्थं शुभं प्रोक्तं मुखवर्णान् शृणु प्रभो ।
त्रिचत्वारिंशद्वर्णादि एकपञ्चाशद्वर्णकम् ।
मुखस्थं मन्त्रमशुभं न गृह्णीयात् कदाचन ।
पुच्छस्थं शृणु यत्नेन निरर्थकमहाश्रमम् ।
श्रमगात्रस्य पीडा मे दैवता कुप्यतेऽनिशम् ।
द्विपञ्चाशदन्तरादि एकषष्ठितमान्तकान् ।
वर्णान् पुच्छस्थितान् प्रोक्तान् नेत्रस्थान् शृणु वल्लभ ।
द्विषष्ठितमवर्णादि चतुःषष्ठ्यन्तरान्तकम् ।
अङ्गलोचनमन्त्रं च ततोऽन्यं रसनास्थितम् ।
तत्सर्वं शुभदं प्रोक्तं एतदन्यतमं स्तवम् ।
वैष्णवानाञ्च शैवानां शैवेशानां मन्त्रजापने ।
शाक्तानां मन्त्रजापने

ततोऽन्यदेवभक्तानां भक्तिमुक्तिप्रदं नृणाम् ।

(उल्काचक्रम)(२२)



अथ वक्ष्ये महादेव चक्रसारं सुदुर्लभम् ।
बाला चक्रं महाविद्या सर्व्वमान्त्रिमेव च ।
सर्व्वसिद्धिप्रदं मन्त्रं निजनामस्वमाश्रयेत ।
तदैव सिद्धिमाप्नोति सत्यं सत्यं महेश्वर ।

तत्प्रकारं शृणु क्रोध भैरव प्राणवल्लभ ।
नवाङ्कान् प्रलिखेद्विद्वान् वामदक्षिणभागतः ।
तन्मध्ये क्रमशो दद्यात् तथा सप्तदशाङ्ककान् ।
दक्षिणादिक्रमेणैव मुक्तिन्यासमालिखेत् ।
अकारादिक्षकारान्तं सर्व्वस्मिन् मन्दिरे लिखेत् ।
बालादिदेवताः सर्व्वा आमध्यन्ताश्च देवताः ।
युग्माकाष्ठविधौ गेहे सन्ति नित्यं फलप्रदाः ।
पुनर्विलोममार्गेण क्षादिकान्ताणि मन्दिरे ।
रक्तदन्तादिश्रीविद्यामन्त्रान्तं विलिखेद्बुधः ।
ककाराद्यनुलोमेन क्षकारान्तं लिखे[illegible]ततः ।
पुनस्तत्शेषविद्याश्च शेषगेहे लिखेत् सदा ।
कायसाधनमुख्यादि शैलवासिनिमन्त्रकम् ।
पञ्चविंशतिगेहस्थं गणयेत् साधकस्ततः ।
गृहस्थमङ्कं वक्ष्यामि शृणु योगेशवल्लभ ।
बालागृहादिशेषान्तं मुनिहस्तविधौ गृहे ।
क्रमेण शृणु तं सर्व्वं सावधानोऽवधारय ।
दक्षिणावर्तयोगेन गणयेत् क्रमशो बुधः ।
वसुसप्तमपञ्चेषुवह्निवेदानलास्तथा ।
वह्निवेदानलावेदावाणर्षिवसुयष्टकाः ।

पञ्चाग्निवसुबाणाश्च वेदपञ्चमषट्‌ककाः।
वह्न्यग्निरन्ध्रवसवः सप्ताष्टनगास्तथा।
पञ्चवेदानलाङ्काश्च वेदवेदानलास्तथा।
मुनिषष्ठाश्च वेदाश्च सप्तेषुमुनयस्तथा।
पञ्चवेदेषु व[illegible]सवो वेदेषु वह्नयस्तथा।
वह्निवेदाश्च सम्प्रोक्ता आकाशं तदनन्तरम्।
आकाशानन्तरे गेहे अनलं परिकीर्त्तितम्।
ततपश्चात सर्वगेहेषु सर्वाङ्कं दत्ततः शृणु।
वह्निवह्निवेदवह्निवेदवह्नय एव च।
ऋत्वग्निवेदबाणाश्च वेदेषु पञ्चकास्तथा।
रुद्राष्टसप्तमाः प्रोक्ता वह्न्यग्नीषुमुनिस्तथा।
मुनीषुबाणवेदाश्च मुन्यग्निवह्नयस्तथा।
वह्निवेदबाणसप्त अष्टाङ्गवेदबाणकाः।
पञ्चसप्तानलाग्निश्च वह्नीषुबाणबाणकाः।
बाणवेदकाण्डवेदकाण्डश्रुतिचतुर्थकाः।
मार्गर्षिमुनिषष्ठाश्च सप्तषुबाणवेदकाः।
वेदसप्ताष्टवसवो नवमाष्टमसप्तमाः।
वह्न्यग्निवेदबाणाश्च वस्वष्टानलवेदकाः
सप्ताष्ट[illegible]माश्च सम्प्रोक्ता रुद्राङ्काः परिकीर्त्तिताः।

87

१ वह्न्यग्नीषुमुनिः---

येषां मनसि या विद्या सदा तिष्ठति भावने ।
तामाश्रित्य जपेद्विद्वान् तदा सिध्यति निश्चितम् ।
स्वनामदेवतानाम पूरयेत् षोड़शाङ्कैः ।
हरेदग्निग्रहस्थेन चाङ्केन साधकोत्तमः ।
हतशेषं बहुतरं शुभं देवस्य निश्चितम् ।
अल्पाङ्कं साधकस्यापि सौख्यमेव न संशयः ।
उक्तक्रमेण गणयेत साधकः स्थिरमानसः ।
महाविद्यानायिकादि यक्षभूतादि साधने ।
सम्प्रोक्तं चक्रसारञ्च सर्वतन्त्रेषु गोपितम् ।
एतच्चक्रविचारेण सिद्धिमाप्नोति साधकः ।

(२३)

अः ५	अं ८	औ ८	ओ ७	ऐ ५	ए ४	ॡ ३	ऌ ४	ॠ ३	ऋ ३	ऊ ४	उ ५	ई ५	इ ५	आ ७	अ ७
त ३	श ४	ठ ५	ड ६	ढ ८	ट ७	भ ५	क्ष ८	ञ ३	ह ३	क ४	ङं ५	घ ६	ग ५	ख ८	क २
स ५	ष ४	ष ८	व ५	ल ४	र ५	ष ७	म ५	भ ७	ब ४	फ ८	प ६	न ७	घ ३	द ४	थ ४
भ ४	म ५	य ४	र ३	ल ४	ज ३	श ४	व ३	म ४	ह ३	हा २	२ २	० ०	२ १	ड ३	ढ ३
ज ३	झ ३	म ७	ट ४	ठ ५	ड ५	ढ ७	ण ७	त ५	भ ३	द ३	ध ७	न ४	प ७	फ ५	भ ५
ऌ ५	लृ ५	लृ ५	म ६	ये ३	ओ ३	औ ५	अं ५	अः ५	क ४	ख ६	ग ८	झ ५	ङ ५	च ४	छ ३
यव ४		दथ ४	लग ५	वध ५	मत ७	चट ६	सह ७	हक्ष ३	श्र ४	आ ४	द ५	ड ४	उ ५	ऊ ४	ऋ ५
८	७	४	३	८	८	५	४	३	३	७	८	९	६	६	७

। बालादिचक्रम् ।

चतुश्चक्रं प्रवक्ष्यामि शृणुष्व पार्व्वतीपते ।
वामदक्षिणयोगेन रेखापञ्चकमालिखेत ।
पूर्व्वपश्चिमभेदेन पञ्चरेखाः समालिखेत ।
चतुष्कोष्ठदलभागे चतुष्कोष्ठे च मन्लावित ।
तदधश्च चतुष्कोष्ठे तद्वामस्थे चतुर्गृहे ।
प्रलिखेत क्रमणश्चाद्ये चतुर्मन्दिरमध्यगे ।
स्निग्धं च शीतलं जप्तं सिद्धञ्चापि ततः परम ।
अकारञ्च उकारञ्च ऌमोङ्कारं ततः परम ।
स्निग्धस्थमिति वर्णांच शीतलस्थं शृणु प्रभो ।
आकारञ्च ऊकारञ्च ॡमौंकारं ततः परम ।
तदधो जप्तगेहस्थं वर्णं शृणु महाप्रभो ।
इकारञ्च ऋकारञ्च एकारञ्च ततः परम ।
सिद्धगेहस्थितं वर्णं शृणु सर्व्वसुखप्रदम ।
तद्दक्षिणचतुर्गेहस्थितान वर्णान वदामि तान ।
आह्लादं चापि प्रत्यायं सुखं च शुद्धमित्यपि ।
एतत कुलस्थान सर्व्वान हि शुभाशुभफलप्रदान ।
ककारञ्च खकारञ्च भकारञ्च नकारकम ।
आह्लादस्थमिति प्रोक्तं प्राप्तिमात्रेण सिद्धिदम ।
प्रत्यायस्थं गकारञ्च घकारं टठमित्यपि ।

मुखस्थं च ङकारञ्च चकारं ङकमित्यपि।
मुद्रस्थं छकारं च जकारं यातमित्यपि
तदधस्थं चतुर्गेहं लौकिकं सात्विकं तथा।
मानसिकं राजसिकं चतुर्गेहास्थितत्विमम।
लौकिकस्थं खकारञ्च दकारञ्च गकारकम।
सात्विकस्थं धकारं च नकारं च यकारकम।
मानसिकस्थं श्रृणु भो पकारं फरमित्यपि।
श्रृणु राजसिकस्थं च भकारं बलमित्यपि।
तद्वामस्थ चतुर्गेहं श्रृणु पञ्चानन प्रभो।
सुप्तं त्रिप्तं च लिप्तं च दुष्टमन्त्रं प्रकीर्तितम।
एतद्गेहास्थितान वर्णमन्त्रान गृह्णाति यो नरः।
वर्जयित्वा सुप्तमन्त्रं त्रिप्तं लिप्तं च दुष्टकम।
ऐहिके सिद्धिमाप्नोति परे मुक्तिमवाप्नुयात।
यद्य भाग्यवशात सुप्तादिषु गेहेषु लभ्यते।
तदा मन्त्रं शोधयेद्वै सुप्तस्तम्भितकीलितैः।
वर्द्धितैर्दीप्तजालस्थैः शुभं भूतशुद्धये।
भूतलिप्या पुटीकृत्य जप्त्वा सिद्धिं ततो लभेत।
नतु वा वर्जयेद्गेहं चतुष्कं वर्णगेहस्थितम।
सुप्तगेहास्थितं वर्णं श्रृणु पञ्चमानन।

बकारश्च हकारश्च तलोऽप्य गृहसंस्थितम्।
शकारश्च लकारश्च क्षिप्तगेहे स्थितं द्वयम्।
षकारश्च दकारश्च लिप्तगेहस्थितं द्वयम्।
दुष्टगेहस्थितं नाथ सकार गगनं तथा।
निजस्वभावयुक्तं तन्मन्त्रं समुपाश्रयेत्।

चतुष्चक्रम्। (२४)

आद्रद

क्रोध	अ उ लृ औ	कखभझ	लौकिक थदम	सुप्त बह
शीतल	आ ऊ लॄ औ	प्रत्याय गघठठ	सात्विक धनय	क्षिप्त पृल
जप्त	इ ऋ ए	मुख्य ङचडढ	मानसिक पफब	लिप्त षद
सिद्ध	ई ऐ ॠ	शुद्ध छजणत	राजसिक भवल	दुष्ट स ०

सूक्ष्मचक्रं प्रवक्ष्यामि हिताहित फलप्रदम्
एतदुक्तादरं शम्भो गृहीत्वा जपमाचरेत्।
वामदक्षिणमारभ्य सप्तरेखाः समालिखेत्।
भित्वा तदं[illegible]कान मन्त्रीच रेखाचतुष्टयं लिखेत्।

दलित्रादिक्रमेणैव वह्निमन्दिरमध्यके।
मन्त्राक्षरराशिं विलिखेदङ्कचारेण साधकः।
तदङ्कं शृणु यत्नेन नराणां भुक्तिमुक्तिदम्।
प्रथमे मन्दिरे नाथ भुजाङ्कं विलिखेत्ततः।
विष्णुमन्त्रादिगेहे च वेदाङ्कं विलिखेत्ततः।
ततपश्चाद्दशमांकं च भुजाधः षष्ठमेव च।
तद्वेदं शङ्कस्यादि ततपश्चाद्दशमे गृहे।
ततपश्चाद्द्वादशांकं च नायिकास्थलमेव च।
षष्ठाधो युगलांकं च ततपश्चाद्दशमं [illegible] तथा।
तद्वेदं प्रभुनाव्याप्तं ततपश्चाद्दशमं तथा।
युगलाधो गृहे चापि चतुर्दशान्तरं तथा।
तद्दक्षिणे सुप्ति गेहे चतुर्दशान्तरं तथा।
ततपश्चात् षोडशांकं च पुनरङ्कं शृणु प्रभो।
चतुर्दश गृहाधश्च षोडशांकं लिखेत्ततः।
तद्दक्षिणे वेदवर्णी ततपश्चाद्दशमान्तरम्।
ब्रह्ममन्दिरमेवं तत षोडशाधः पुनः शृणु।
अष्टमांकं ततो युग्ममष्टादशान्तरं ततः।
प्रथमस्थं द्वितीयस्थं गृह्णीयात् तच्छ्रुतं स्मृतम्।
तृतीयस्थं महापापं सर्वमन्त्रेषु कीर्तितम्।

द्वितीये प्रथमं दुःखं द्वितीयं सर्व्वभाग्यदम्।
तृतीयं च तथा नाथ गृह्णीयाद् निजसिद्धये।
तृतीये प्रथमं भद्रं द्वितीयं दुःखदायकम्।
तृतीयं च तथा प्रोक्तं महादारग्रहं भयम्।
चतुर्द्दशाक्षरे भद्रं सूर्य्यमन्त्रं द्वितीयकम्।
तृतीयस्थं षोडशांकं महाकल्याणदायकम्।
अथो मुक्तिषोडशांके चतुर्थे शत्रुसेवनम्।
तृतीये मध्यगेहस्थं ब्रह्मकल्याणदायकम्।
वसुदारं सर्व्वशेष गृहमध्यस्थमेव च।
अष्टमं च महाभद्रं युग्मं चित्तभयप्रदम्।
अष्टादशांकं शुभदं शेषगेहत्रये तथा।
शेषं यदक्षराणां च मन्त्रं चेतसि वर्त्तते।
एतत् शुभाशुभं ज्ञात्वा मन्त्रमार्गं तदभ्यसेत्।
विष्णुस्थितं तथा मन्त्रं नायिकास्थं शिवस्थितम्।
सूर्य्यसंस्थं ब्रह्मसंस्थं गृह्णीयाज्ज्ञातमेव च
वैष्णवे विष्णुमन्त्रार्थी शैवः शिवमुपाश्रयेत्।
नायिकामन्त्रजापी च नायिकार्थं सदाभ्यसेत्।
सूर्य्यमन्त्रविचारार्थी सूर्य्यमन्त्रं समाश्रयेत्।
एकस्थं च युगस्थानं तृतीयस्थानमेव च।

93

ज्ञात्वा मन्त्रं प्रगृह्णीयात् अन्यथा चाशुभं भवेत्।
एतदन्यत् संमन्त्रं दिव्यवीरेषु गीयते।
एतच्चक्रं पशोरुक्तं सर्व्वसिद्धिप्रदं शुभम्।
एतच्चक्रप्रसादेन पशुर्वीरोपमः स्मृतः।
सर्व्वसिद्धियुतो भूत्वा वत्सराच्च प्रपश्यति।

विष्णुः (२५)

२ शुभद	४ शुभद	८ पाप
७ शुद्ध	२० भाग्यद	१२ नायिका सिद्धिद
२ भद्र	८ शिव दःख	८ भयद
२४ भद्रद	२७ भद्रग	२६ महा कल्याणद
२६ मुक्तिद	४ शत्रु	८ ब्रह्म कल्यानद
८ महाभद्रद	२ भवद	१८ शुभद

(सूक्ष्मचक्रम्)

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्व्वतन्त्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावानिर्णये भैरवीभैरवसंवादे पंचमः पटलः॥ ५॥

श्रीदेव्युवाच।

महाकथहचक्रार्थं सर्व्वचक्रोत्तमोत्तमम्।

यस्य विचारमात्रेण कामरूपी भवेन्नरः।

तत्प्रकारं वीरनाथ क्रमशः क्रमशः शृणु।

चतुरस्रे लिखेद्धर्मांश्चतुःकोष्ठसमान्विते।

चतुष्कोष्ठे चतुष्कोष्ठे चतुश्चतुर्गृहान्वितम्।

मान्दिरं षोड़शप्रोक्तं सर्व्वकामार्थसिद्धिदम्।

95

चतुरस्रं लिखेत्कोष्ठं चतुःकोष्ठसमान्वितम्।

पुनश्चतुष्कं तत्रापि लिखेत धीमान् क्रमेणतु।

सर्व्वेषु गृहमध्येषु प्रादक्षिण्यक्रमेणतु।

अकारादिक्षकारान्तान् लिखित्वा गणयेत्ततः।

चन्द्रमग्निकरुद्रवर्णां नवमं युगलं तथा।

वेदमर्कं दशरसं वसुं षोड़शमेव च।

चतुर्द्दशमौतिकंच सप्तपञ्चदशेति च।

वह्नीन्दुकोष्ठगं वर्णं सङ्केताङ्कैर्मयोदितम्।

एतदङ्कास्थितं वर्णं गणयेत तदनन्तरम्।

नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम्।

चतुर्भिः कोष्ठैरेकैकम् इति कोष्ठचतुष्टयम्।

पुनः कोष्ठगकोष्ठेषु सव्यतो नाम आदितः।

सिद्धः साध्यः सुसिद्धोऽरिः क्रमशो गणयेद्वशी।

सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः ।
सुसिद्धो ग्रहमात्रेण ह्यरिर्हन्ति स्वमायुधम् ।
सिद्धार्णो बान्धवः प्रोक्तः साध्यः सेवक उच्यते ।
सुसिद्धः पोषको ज्ञेयः शत्रुर्घातक उच्यते ।
सिद्धकोष्ठस्थिता वर्णा बान्धवाः सर्वकामदाः ।
जपेन बन्धुः सिद्धः स्यात सेवकोऽधिकसेवया ।
पुष्णाति पोषकोऽभीष्टं घातको नाशयेद्ध्रुवम् ।
सिद्धसिद्धो यथोक्तेन द्विगुणं सिद्धसाधकः ।
सिद्धः सुसिद्धोऽर्द्धजपात् सिद्धारिर्हन्ति बान्धवान् ।
साध्यसिद्धो द्विगुणकः साध्यासाध्यो निरर्थकः ।
ततसुसिद्धो द्विगुणाद [illegible] साध्यारिर्हन्ति गोत्रजान् ।
सुसिद्धसिद्धोऽर्द्धजपात ततसाध्यो द्विगुणाधिकात् ।
ततसुसिद्धो महादेव सुसिद्धारिः स्वगोत्रहा ।
अरिसिद्धः सुतान् हन्यात अरिसाध्यस्तु कन्यकाः ।
ततसुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्ति साधकम् ।
यदि वैरिमनोर्हस्त स्थितः साधको भुवि ।
तदा तद्दत्तमार्थे हि कुर्यादेवं क्रियादिकम् ।
ततप्रकारं महावीर शृणुष्व गिरिजापते ।
वटपत्रे लिखित्वा विमन्त्रं स्रोतसि निःक्षिपेत् ।

एवं मन्त्राद्विमुक्तः स्यात् ममाज्ञावलहेतुना ।
पुनः प्रकारं विप्रेन्द्रो गवां क्षीरे मुदान्वितः ।
द्रोणमिति जपेन्मन्त्रमष्टोत्तरसमन्वितम् ।
पीत्वा क्षीरं मनो मध्ये ध्यात्वा मन्त्रं समुच्चरन् ।
संत्यजेन्नीरमध्ये तु वैरिमन्त्रप्रमुक्तये ।
पुनः प्रकारं वक्ष्यामि त्रिरात्रमेकवासरम् ।
उपोष्य विधिनानेन पूजां कृत्वा शनौ कुजे ।
सहस्रं वा शतं वापि अष्टोत्तरसमन्वितम् ।
जपित्वा संत्यजेन्मन्त्री क्षीरसागरमण्डले ।
अथवा तद्गुरोः स्थाने चान्यस्थाने च वा पुनः ।
विचार्य मन्त्रवर्णं च गृहीत्वा मोक्षमाप्नुयात् ।
स्वप्ने यदि महामन्त्रं प्राप्नोति साधकोत्तमः ।
तदा सिद्धिमवाप्नोति सत्यं सत्यं कुलेश्वर ।
तन्मन्त्रं कौलिके नाथ गुरौ यत्नेन संग्रही ।
तदा भवति सिद्धः स्यात् तत्क्षणान्नात्र संशयः ।
अरिश्चेद्देवदेवेश यदि विग्राहयेत् मनुम् ।
अन्यमन्त्रं विचार्येव विष्णोश्चैव शिवस्य च ।
शक्तिमन्त्रं यदि रिपुं तदा एवं प्रकारकम् ।
आदावन्ते च मध्ये च ओंबौ वट स्वाहान्वितम् ।

कलाजप्त्वा महासिद्धिं कामरूपस्थितामिव ।
प्राप्नोति नात्र सन्देहो भभाज्ञावलवत्तया ।
शृणु चक्रफलं नाथ विचाराचारमङ्गलम् ।
प्रसादं च महामन्त्रं सद्गुरोर्मुखपङ्कजात् ।
लभ्यते यदि भाग्येन सिद्धिरेव न संशयः ।
तदभावे सिद्धमन्त्रं दृष्टादृष्टफलोन्मुखम् ।
महाचमत्कारकरं हृदयाश्वासवर्द्धनम् ।
स्वप्ने वा सद्गुरोः स्थाने प्राप्तिमात्रेण मुक्तिभाक् ।
तन्मन्त्रं वर्जयित्वा तु घोरान्धाकाररौरवे ।
वसन्ति सर्व्वकालं च भभाज्ञावलभागिनी ।
तत्रैव चक्रसारादि विचारं व्यर्थभाषणम् ।
शरमन्त्रं महापुण्यं सर्व्वमन्त्रोत्तमोत्तमम् ।
कोटिजन्मार्ज्जितैः पुण्यैः महाविद्याश्रयी भवेत् ।
स्वप्ने कोटिकुलोत्पन्नैः पुण्यकोटिफलैरपि ।
प्राप्नोति साधको मन्त्रं भुक्तये मुक्तये ध्रुवम् ।
तत्र चक्रं न विचार्य्यं विचार्य्य मरणं भवेत् ।
किन्तु चक्रं विचार्य्यं च यदि स्वप्ने च यत्कृतम् ।
एतेषां चक्रवर्गाणां विचारादृष्टसिद्धिदम् ।
राज्यं रत्तिं धनं योगसिद्धिमर्द्धिं सुखं शुभम् ।

धर्मं देहपवित्रं च अकालमृत्युहारणम् ।
वाञ्छाफलप्रदं गौरीचरणाम्भोजदर्शनम् ।
मुक्तिं भुक्तिं स्वस्थानं प्राप्नोति नात्र संशयः ।
एषां चक्रादिकानां च क्रमशो गदितं फलम् ।
यदि सर्व्वविचारं च करोति साधकोत्तमः ।
तदा सर्व्वफलं नित्यं प्राप्नोति नात्र संशयः ।
महाप्रेम विवेकं च विचाराल्लभ्यते ध्रुवम् ।
अकस्मात सिद्धिमाप्नोति चक्रराजविचारतः ।
सर्व्वदेवाः चक्रमन्त्रार्चितं जर्नम
राज्यसिद्धिर्भवेत् क्षिप्रं प्राणायामादि सिद्धिभाक् ।
सर्व्वेषां प्राणवत् भूमौ विचरेत् साधकोवली ।
इति ते कथितं नाथ चक्रषोड़श मंगलम् ।
चक्राणां लोकनाद्देव सायुज्यपदमाप्नुयात् ।
अतो विचारं सर्व्वत्र सर्व्वचक्रादिमङ्गलम् ।

(अकथहचक्रम्) (२६)

अकथह	उडप	आखदल	ऊचंफ
ओडव	ल्रमम	औदण	ल्मय
ईघन	ऋजभ	इगय	ऋछब
अःतस	ऐठल	अंणस	एटर

पुस्तकान्तरे अत्र पंचमपटलसमाप्तिः ।

भैरव उवाच
अथ भावं वद श्रीदे दिव्यवीरपशुक्रमात् ।
पशूनां परमं चर्य्यं भावं श्रोतुं समुत्सुकः ।
इच्छाम्याह्लादजलधौ स्थितोऽहं जगदीश्वरि ।
यदि भाग्यवशात् सारात्सारं चिन्तयसि क्षमे ।
श्रीभैरव्युवाच
पशुनाथ दिव्यनाथ वीरनाथ कृपानिधे ।
प्रकाशहृदयोल्लास चन्द्रशेखरवत् शृणु ।
कालीकल्पलतासारं तपस्याद्व्यसङ्कृतिः ।
पशुभावस्थितां नाथ देवतां शृणु विस्तरात् ।
दुर्गापूजां विष्णुपूजां शिवपूजां पशूत्तमः ।
अवश्यं हि यः करोति स उत्तमः पशुः स्मृतः ।
केवलं शिवपूजां च करोति यदि साधकः ।
पशूनां मध्यमः श्रीमान् शिवया सहचोत्तमः ।
केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः ।
भूतानां देवतानां च पूजां कुर्वन्ति ये सदा ।
पशूनामधमाः प्रोक्ता नरकस्थानसंशयः ।
लतसेवां मम सेवां च विष्णुब्रह्मादिसेवनम् ।
कृत्वा च सर्वभूतानां नायिकानां महाप्रभो ।

101

यक्षिणीनां भूतिनीनां [illegible] ततः सेवा शुभप्रदा ।
पशवो ग्रहकन्याद्य सेवां कुर्व्वन्ति ये सदा ।
तथा श्रीतारकब्रह्म सेवन्ते ते नरोत्तमाः ।
तेषामसाध्यभूतादिदेवताः सर्व्वकामदाः ।
वर्ज्जयेत पशुमार्गेण विष्णुपूजापरो जनः ।
प्रवक्तव्यं च पटले तेषां तेषां न संशयः ।
विधिना विधिना नाथ क्रमशः शृणु वल्लभ ।
अथ प्रातः समुत्थाय पशुरुत्तमपंडितः ।
गुरूणां चरणाम्भोजे मङ्गले शीर्षपंकजे ।
विभाव्य पुनरेवं हि श्रीपदं भावयेद्धृदि ।
तामेव कुण्डलीरूपां पुनर्मूले विचिन्तयेत् ।
त्रैलोक्यं तेजसा व्याप्तां मण्डलस्थां महोत्सवाम् ।
तडित्कोटिप्रभादीप्तां चन्द्रकोटिसुशीतलाम् ।
सार्द्धत्रिवलयाकारां स्वयम्भुलिङ्गवेष्टिताम् ।
महारक्तसर्पराजसदृशीं ज्ञान[illegible] । योगिनीम्
सदावायुस्तम्भकर्त्रीं कारणोल्लासवर्द्धिनीम् ।
सुप्तां योगिभिराभाव्यां शी[१]र्णावेददलोपरि ।
योगिज्ञेयां सूक्ष्मविद्यां भाविनीमुन्मनोन्मयीम् ।

(१) सोमवेददलोपरि

श्वासोच्छ्वासादुच्छलन्तीं द्वादशान्तस्वरूपिणीम् ।
योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम् ।
चतुर्वर्गस्वरूपां तां वकारादिकसान्तकाम् ।
कोटिकोटिसहस्रार्ककिरणोज्ज्वलमोहिनीम् ।
महासूक्ष्मपथप्रान्तरान्तरान्तरगामिनीम् ।
त्रैलोक्यराजितां राज्यदेवता शब्दरूपिणीम् ।
महासिद्धिप्रदां देवीं सहस्रदलगामिनीम् ।
महासूक्ष्मपथे तेजोमयीं मृत्युस्वरूपिणीम् ।
कालरूपां सर्व्वरूपां सर्व्वत्र सर्व्वचिन्मयीम् ।
ध्यात्वा पुनः शीर्षपद्मे सुधाब्धौ विनिवेशिताम् ।
सुधापानं कारयित्वा पुनस्थाने समानयेत् ।
समानयनकाले तु सुसुम्नामध्यमध्यके ।
अमृताभिप्लुतां कृत्वा पुनः स्थानेषु पूजयेत् ।
ऊर्द्ध्वगमनकाले तु महातेजोमयीं स्मरेत् ।
प्रतिप्रयाणकाले तु सुधाधाराभिराप्लुताम् ।
महाकुलकुण्डलिनीममृतानन्दविग्रहाम् ।
ध्यात्वा ध्यात्वा पुनर्ध्यात्वा सर्व्वसिद्धीश्वरो भवेत् ।
तस्मिन्स्थाने महादेवीं विभाव्य किरणोज्ज्वलाम् ।
अमृतानन्दमूर्त्तिं तां पूजयित्वा शुभां मुदा ।

मानसोच्चारवीजेन मायां वाकामवीजकम् ।
पश्चाच्छब्दमयी मालाभिः अनुलोमगतपथा ।
विलोमेन पुनर्जप्त्वा सर्व्वत्र ज्ञानदं स्तवम् ।
पठित्वा सिद्धिमाप्नोति तत्स्तोत्रं शृणु भैरव ।
जन्मोद्धारनिरोधकारिणी हतकरी वेदादिवीजादिमा
नित्यं चेतसि भाव्यते भुवि सदा सद्भावसञ्चारिणी ।
मां पातु प्रियदा सदा सविपदं संहारयित्री धरे !
धात्री त्वं स्वयमादिदेववनिता दीनातिदीनं पशुम् ॥१॥
रक्ताभ्रामृतचन्द्रिका लिपिमयी सर्पाकृतिर्निद्रिता
जाग्रद्धर्मसमाश्रिता भगवती त्वं मां समालोकय ।
मांसोद्गन्ध प्रफुल्लदोषजडितं वेदादिकार्यान्वितम्
संपाल्यामल- कोटिचन्द्रकिरणै नित्यं शरीरं कुरु ॥२॥
सिद्धार्थी निजदोषवित् स्खलगतिर्व्याढीयते विद्यया
कुण्डल्याकुलमार्गयुक्तनगरी मायाद्भमार्गाश्रिया ।
यद्येवं भजति प्रभातसमये मध्याह्नकालेऽथवा
नित्यं यः कुलकुण्डली निजपदाम्भोजं स सिद्धो भवेत् ॥३॥
वाग्वाकाग्र चतुर्द्दलेऽतिविमले वाञ्छाफलोन्मूलके ।
नित्यं सम्प्रति नित्यदेहघटिता सांकेतिता भाविता ।
विद्याकुण्डलमालिनी स्वजननी मारक्रिया भाव्यते

103

प०६

यैस्तैः सिद्धकुलोद्भवैः प्रणतिभिः सद्योगिभिः शम्भुभिः ॥४

माता शङ्करमोहिनी त्रिशरणच्छाया पटोद्गामिनी ।
संसारादिमहासुखप्रहननी नेत्रास्थिता योगिनी ।
सर्व्वग्रन्थिविभेदिनी सुभुजगा सूक्ष्मातिसूक्ष्मा परा,
ब्रह्मज्ञानविनोदिनी कुलकुटी या डाकिनी भाव्यते ॥५॥

वन्दे श्रीकुलकुण्डलीं त्रिवलिभिः साङ्गैः स्वयम्भुप्रियाम्
प्रावेशासुखसारचित्तचपलावालावला निष्कला ।
या देवी परिभाति वेदवदना संभावना भावना
तामिष्टां शिरसि स्वयंभुवनितां सम्भावयामि क्रियाम् ॥६

वाणीकोटिमृदङ्गनादमदना निःश्रोणिकोटिध्वनिः
प्राणेशी शषवाः समूलकमलोल्लासैकपूर्णानना ।
आषाढोद्भवमेघवृजनियुतध्वान्तानवस्थायिनी,
माता सा परिपातु सूक्ष्मपथगा मां योगिनं संकुरु ॥७॥

त्वामाश्रित्य नरा व्रजन्ति सहसा वैकुण्ठकैलासयो-
रानन्दैकविलासिनी शशिशतानन्दाननाकारणा ।
मातः श्रीकुलकुण्डलि प्रियकरे कालीकुलोद्दीपने
भूतस्थां प्रणमामि मद्भवनिते मामुद्धरत्वं पशुम् ॥८॥

कुण्डली शक्तिमार्गस्थं स्तोत्राष्टकं महाफलम् ।
यः पठेत् प्रातरुत्थाय स योगी भवति ध्रुवम् ॥

तस्मादेव हि पाठेन कविनाथो भवेदिह।
पवित्रीकुण्डली योगाभ्यासशीलो भवेद्विद्वान्।
इति ते कथितं नाथ कुण्डलीकोमलस्तवम्।
एतत्स्तोत्रप्रसादेन देवेषु गुरुर्गीष्पतिः।
सर्व्वे देवाः सिद्धियुताः अस्याःस्तोत्रप्रसादतः।
द्विपरार्द्धं चिरञ्जीवी ब्रह्मा सर्व्वसुरेश्वरः।
त्वं चापि मम निकटस्थितो भगवतीपतिः।
मां विद्धि परमां शक्तिं स्थूलसूक्ष्मस्वरूपिणीम्।
सर्व्वप्रकाशकरणीं विन्ध्यपर्व्वतवासिनीम्।
हिमालयसुतां सिद्धां सिद्धमन्त्रस्वरूपिणीम्।
वेदान्तशक्तिमन्त्रस्थां कुलमन्त्रार्थगामिनीम्।
रुद्रयामलमध्यस्थां स्थितिस्थापकभावनाम्।
पञ्चमुद्रास्वरूपां च शाक्तयामलमालिनीम्।
रत्नमालाकलाढ्यां चन्द्रसूर्य्यस्वरूपिणीम्।
सर्व्वभूतमहाऋद्धिदायिनीं दनवापहाम्।
स्थित्युत्पत्तिलयकरीं करुणासागरस्थिताम्।
महामोहनिरासाढ्यां दामोदरशरीरगाम्।
छत्रचामररत्नाढ्यां महाशूलकरां पराम्।
ज्ञानदां ऋद्धिदां विद्यारत्नमालाकुलप्रदाम्।

सर्व्वतेजः स्वरूपां तामनन्तकोटिविग्रहाम् ।
दरिद्रधनदां लक्ष्मीनारायणमनोरमाम् ।
सदा भावय शम्भोस्त्वं योगनायकपण्डित ।
पुनर्भावं पशोरेव शृणु सादरपूर्व्वकम् ।
अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः ।
वैकुण्ठनगरे याति चतुर्भुजकलेवरः ।
शंखचक्रगदापद्महस्तो गरुड़वाहनः ।
महाधर्म्मस्वरूपोऽसौ महाविद्याप्रसादतः ।
पशुभावं महाभावं भावानां सिद्धिदं पुनः ।
आदौ भावं पशोः कृत्वा पश्चात् कुर्य्यादवश्यकम् ।
वीरभावं महाभावं सर्व्वभावोत्तमोत्तमम् ।
ततपश्चादतिसौन्दर्यं दिव्यभावं महाफलम् ।
फलाकाङ्क्षी मोक्षगामी सर्व्वभूतहिते रतः ।
विद्याकांक्षी धनाकांक्षी राज्याकांक्षी च यो नरः ।
कुर्य्याद्भावत्रयं दिव्यं भावसाधनमुत्तमम् ।
भावेन लभते राज्यं धनं रत्नं महाफलम् ।
कोटिब्राह्मणभोज्येन कोटिगोभोजनेन च ।
कोटिगोदानजैः पुण्यैः कोटिशालग्रामदानजैः ।
वाराणस्यां कोटिलिङ्गपूजनेन च यत् फलम् ।

तत् फलं लभते मर्त्यः तत्क्षणादेव न संशयः ।
आदौ दण्डमदण्डे तु पशुभावमथापि वा ।
मध्याह्ने दण्डदण्डे तु वीरभाव उदाहृतः ।
सायाह्ने दण्डदण्डे च दिव्यभाव शुभप्रदः ।
अथवा पशुभावस्थो यजेदिष्टादिदेवताम् ।
जन्मावधि यजेन्मन्त्री महासिद्धिमवाप्नुयात् ।
सर्वेषां गुरुरूपः स्यादैश्वर्यं च दिने दिने ।
यदि शुद्धस्वभावः स्यात्तदा मधुमतीं लभेत् ।
विवेकी यदि नि[illegible]याति महाबल निवासवान् ।
ब्रह्मचर्य्यव्रतस्थो वा अथवा शुद्धभाववान् ।
पीठभ्रमणमात्रेण महापीठाश्रयेण च ।
पशुभावस्थितो मन्त्री सिद्धिस्थकमवाप्नुयात् ।
यदि पूर्वापरस्थां च महाकौलिकदेवताम् ।
कुलमार्गस्थितो मन्त्री सिद्धिमाप्नोति निश्चितम् ।
यदि विद्याः प्रसीदन्ति वीरभावं तदा लभेत् ।
वीरभावप्रसादेन दिव्यभावमवाप्नुयात् ।
दिव्यभावं वीरभावं ये गृह्णन्ति नरोत्तमाः ।
वाञ्छाकल्पद्रुमलतापतयस्ते न संशयः ।
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।

(0)

भूत्वा भ्रमेन्महापीठं साक्षाद्रुद्रो भवेद्यतिः ।
किमन्येन फलेनापि यदि भावादिकं लभेत् ।
भावग्रहणमात्रेण महाज्ञानी भवेन्नरः ।
वाक्यसिद्धिर्भवेत् क्षिप्रं वाणी हृदयगामिनी ।
नारायणं प्रविशाय लक्ष्मीस्तिष्ठति मन्दिरे ।
मम पूर्णोत्तमादर्शस्तस्य देहे न संशयः ।
अवश्यं सिद्धिमाप्नोति सत्यं सत्यं सदाशिव ।

महाभैरव उवाच

सूचितन्तु महादेवि कथयस्वानुकम्पया ।
सर्व्वतन्त्रेषु विद्यासु भावसङ्केतमेव च ।
अथापि शक्तितन्त्रेषु विशेषात् सर्व्वसिद्धिदम् ।
भावविद्याविधिं विद्ये विस्तार्य भावसाधनम् ।

आनन्दभैरवी उवाच

भावस्तु त्रिविधो देव दिव्यवीरपशुक्रमात् ।
गुरवश्च त्रिधाचार तथैव मन्त्रदेवताः ।
दिव्यभावे महादेव श्रेयसं सर्व्वसिद्धिदम् ।
द्वितीयो मध्यमः प्रोक्तः तृतीयः सर्व्वनिन्दितः ।
बहुजापात् तथा होमात् कायक्लेशादिविस्तरैः ।
न भावेन विना देव तन्त्रमन्त्रफलप्रदा ।

किं वीरसाधनेनैव मोहाविद्याकुलेन किम् ।
किं पीठपूजनेनैव किं कन्याभोजनादिभिः ।
सुयोषित प्रीतिदानेन किं परेषां तथैव च ।
किं जितेन्द्रियभावेन किं कुलाचारकर्म्मणा ।
यदि भावविशुद्धात्मा न स्यात कुलपरायणः ।
भावेन लभते मुक्तिं भावेन कुलवर्द्धनम् ।
भावेन गोत्रवृद्धिः स्यात भावेन कुलसाधनम्[२] ।
किं तथा पूजनेनैव यदि भावेन कश्चन ।
केन वा पूज्यते विद्या केन वा जप्यते मनुः ।
फलाभावश्च देवेश भावाभावात प्रजायते ।
एतद्द्रव्यस्य कथने शंकते मम मानसम् ।
त्रिलोकं संजयेत प्राज्ञः सर्व्वयन्त्र[१] समागमः ।
आवीक्ष्य निर्जनं कुर्य्यात कथं तत कथयामि ते ।

आनन्दभैरव उवाच

त्वत प्रसादान्महादेवि विद्यास्वप्नप्रबोधनी ।
सर्व्वमायाप्रपञ्चानां दीक्षा देया महेश्वरि ।
यद्यतो देवि सर्व्वेषां भूतानां स्वापकारणाम् ।
करोति कथयत्वं मां भावमार्गोत्तमोत्तमाम् ।

१४ सर्व्वयन्त्रसमागतः । (२) कुलशोधनम्

॥ महाभैरव्युवाच ॥

प्रथमं दिव्यभावस्तु कौलिकेश शृणु यत्नतः।
सर्व्वदेवार्चितां विद्यां तेजःपुञ्जप्रपूरिताम्।
तेजोमध्ये जगत्सर्व्वं विभाव्य मूर्त्तिकल्पनाम्।
तत्तन्मूर्तिमयैः श्रेयैः स्वेन स्वेनैव वा पुनः।
आत्मानं तन्मयं कृत्वा सर्व्वभावं तथैव च।
तत्सर्व्वां योषितां ध्यात्वा पूजयेद्यतमानसः।
अशेषकुलसम्पन्नां नानाजातिसमुद्भवाम्।
नानादेशोद्भवां वापि सद्रूपां तस्य सम्मताम्।
द्वितीयवत्सरादूर्द्ध्वं यावत् स्यादष्टमाब्दकम्।
तावज्जप्त्वा पूजयित्वा कन्यां सुन्दरमोहिनीम्।
दिव्यभावस्थितः साक्षात् तत्तन्मन्त्रफलं लभेत्।
कुमारीपूजनादेव कुमारीभोजनादिभिः।
एकद्वित्र्यादिबीजानां फलदा नात्र संशयः।
ताभ्यः पुष्पफलं दत्वा अनुलेपादिकं तथा।
बालप्रियं च नैवेद्यं दत्वा तद्भावभावितम्।
मुदा तदङ्गमात्मानं बालभावविचेष्टितः।
ताभिः प्रियकथालापक्रीडाकौतूहलान्वितः।
यथार्थं तत्प्रियं तत्र कृत्वा सिद्धीश्वरो भवेत्।

कन्या सर्व्वसमृद्धिः स्यात कन्या सर्व्वपरन्तपः ।
होमं मन्त्रार्चनं नित्य क्रियां कौलिकसत क्रियाम ।
नाना फलं महाधर्म्मं कुमारीपूजनं विना ।
तत्तदर्द्धफलं नाथ प्राप्नोति साधकोत्तमः ।
फलं कोटिगुणां वीरः कुमारीपूजयालभेत ।
कुसुमाञ्जलिपूर्णं च कन्यायां कुलपण्डितः ।
ददाति यदितत पुण्यं कोटिमेरुहिरण्यवत ।
तद्दानजं महापुण्यं क्षणादेव समालभेत ।
कुमारी भोजिता येन त्रैलोक्यं तेन भोजितम ।
एकवर्षा भवेत सन्ध्या द्विवर्षा च सरस्वती ।
त्रिवर्षा च त्रिधामूर्त्तिः चतुर्वर्षा च कालिका ।
सूर्य्यमा पञ्चवर्षा तु षड्वर्षा च भवेदुमा
सप्तभिर्मालिनी साक्षादष्टवर्षा तु कुब्जिका ।
नवभिः कालगन्धर्व्वा दशभिश्चापराजिता ।
एकादशे च रुद्राणी द्वादशेऽब्देतु भैरवी ।
त्रयोदशे महालक्ष्मी र्द्विसप्ता पीठनायिका ।
क्षेत्रज्ञा पञ्चदशभिः षोड़शे चाम्बिका मता ।
एवं क्रमेण संपूज्या यावत पुष्पं न विद्यते ।
प्रतिपदादि पूर्णिमान्तं वृद्धिभेदेन पूजयेत ।

महापर्व्वसु सर्व्वेषु विशेषाश्च पवित्रके ।
महानवम्यां देवेश कुमारीश्च प्रपूजयेत ।
तस्मात षोड़शपर्य्यन्तं युवती ति प्रचक्षते ।
तत्रभावप्रकाशः स्यात स भावः परमो मतः ।
रक्षितव्यं प्रयत्नेन अक्षतां तां प्रकारयेत ।
महापूजादिकं कृत्वा वस्त्रालङ्कारभूषणैः ।
पूजयेन्मन्दभाग्योऽपिलभते जयमङ्गलम ।
अन्येषां कथने नाथ प्रयोजनमहाफलम ।
विधिना पूजयेद्यस्तु दिव्यवीरपशुस्थितः ।
भावत्रये महासौख्यं दिव्ये सतकर्म्मसतफलम ।
। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्य्युपचर्य्याविन्यासे सिद्धमन्त्रप्रकरणे भावनिर्णये षष्ठः पटलः ॥

अथ पूजां प्रवक्ष्यामि कुमार्य्याश्चातिदुर्लभाम ।
व्याधिवर्ण विहीनानां सिद्धं सिध्यति भूतले ।
तत प्रकारं महादेव वीराणामधिपाधिप ।
पूजास्थानं महापीठं देवालयमथापि वा ।
सुन्दरीं परमानन्दवर्द्धिनीं जयदायिनीम ।
कालरात्रीस्वरूपां श्रीं गौरीं रक्ताङ्गरागिणीम ।

112

कन्यां देवकुलोद्भूतां राक्षसीं वा नरोत्तमाम ।
नटीकन्यां हीनकन्यां तथा कापालिकन्यकाम ।
रजकस्यापि कन्यां च तथा नापितकन्यकाम ।
गोपालकन्यकां चैव ब्राह्मणस्यापि कन्यकाम ।
शूद्रकन्यां वैश्यकन्यां तथा राजकन्यकाम ।
चाण्डालकन्यकां वापि यत्र कुत्राश्रमस्थिताम ।
सुहृद्वर्गस्य कन्यां च समानीय प्रयत्नतः ।
पूजयेत परमानन्दैरात्मध्यानपरायणः ।
क्रमशः शृणु देवेन्द्र वरहस्त निवेशित ।
परमानन्द सौन्दर्यकारणानन्द विग्रह ।
मम पूजां यः करोति प्रत्यहं शुद्धभक्तितः ।
तस्यावश्यं कुमारीणां पूजनं भोजनं रवेः ।
तेजोरूपं विधोश्चाग्नेः सर्व्वभावे प्रशस्यते ।
तत पूजनात्तदालापाद्भोजनादपि तत शुभम ।
मम प्रीतिर्भवेत साक्षात देवता गुप्तसंस्थिता ।
बाल भैरवदेवस्य कामिनी वटुकस्य च ।
मत पुत्रस्य सर्व्वलोकपूजितस्य महौजसः ।
पूजाभिर्विविधैर्द्रव्यैः कुमारी देवपूजिता ।
कुमारी कन्यका प्रोक्ता सर्व्वज्ञा जगदीश्वरी ।

पूजार्थं सर्व्वलोकस्य समानीय सुरेश्वर ।
पूजयन्ति महादेवीं ग्रुप्तभाव विनाशिनीम् ।
महा भोजनवाञ्छाढ्यामल्पसन्तुष्टहासिनीम् ।
वृथा न रौति सा देवी कुमारी देवनायिका ।
सरस्वतीस्वरूपा सा पूज्यते सर्व्वनायकैः ।
शैवभक्तैर्विष्णुभक्तैस्तथान्यदेवप्रपूजकैः ।
सर्व्वलोकैः पूजिता सा चावश्यं पूज्यते बुधैः ।
पूजयालभते पूजां पूजयालभते श्रियम् ।
पूजया धनमाप्नोति पूजयालभते महीम् ।
पूजयालभते लक्ष्मीं सरस्वतीं महौजसम् ।
महाविद्याः प्रसीदन्ति सर्व्वदेवा न संशयः ।
वालमैरवब्राह्मेन्द्रा ब्राह्मणा ब्रह्मवादिनः ।
रुद्राश्च देववर्गाश्च वैष्णवा विष्णुरूपिणः ।
अवताराश्च द्विभुजा विष्णवः सत्वशोभिनः ।
अन्ये दिक्पालदेवाश्च चराचरगुरुस्तथा ।
नानाविद्यायुताः सर्व्वे दानवाः कूटशालिनः ।
अपवर्गस्थिता ये ये ते ते तुष्टा न संशयः ।
ययहं तुष्टिरूपा हि अन्ये लोके च का कथा ।
कुमारीपूजनं कृत्वा त्रैलोक्यं वशमानयेत् ।

महाशान्तिर्भवेत् क्षिप्रं सर्व्वपुण्यफलप्रदम् ।
ततन्मन्त्रसमुल्लेखात् दानात पुण्यायुतंलभेत ।
मन्त्रेण पुटितं कत्वा जप्वा सिद्धीश्वरो भवेत ।
यद्यत प्रकारमुच्चार्य्यं वदामि सुरसुन्दर ।
त्ततत कार्य्यमवश्यं च भिन्नबुद्धिं न कारयेत ।

महाभैरव उवाच

अथवीज प्रभेदञ्च वद शङ्करपूजिते ।
यदि मां स्नेहपुञ्जोऽस्ति मतकुलार्थं प्रवेशिनी ।
वदस्व परमानन्द भैरवि प्राणवल्लभे ।

आनन्द भैरव्युवाच

शृणु नाथ कुलार्थं मे कुमारीपूजने मनुम ।
महामन्त्रं महातन्त्रं सिद्धमन्त्रं न संशयः ।
एतन्मन्त्र प्रसादेन जीवन्मुक्तो भवेत सुधीः ।
अन्तो देवी पदं याति सत्यमानन्द भैरव ।
ऐहिके सुखसम्पत्तिं मद्युमत्याः प्रसादनम ।
अवश्यं प्राप्नुयान्म र्त्यो विश्वासं कुरु शङ्कर ।
वाग्भवेन पुरःक्षोभं मायाबीजे गुणाष्टकम ।
श्रियो बीजे श्रियो लाभो मायाबीजे रिपुक्षयः ।

भैरवे ण तु बीजेन खेचरत्वं सुरादिभिः।
कुमारिकाह्वयं नाथ सदात्वं हि कुमारकः।
अष्टोत्तरशतं वापि एकां वा परिपूजयेत।
पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यवमानिताः।
कुमारी योगिनी साक्षात कुमारी परदेवता।
असुरा अष्टनागाश्च ये ये दुष्टग्रहा अपि।
भूतवेतालगन्धर्व्वा डाकिन्यो यक्षराक्षसाः।
याश्चान्या देवताः सर्व्वा भूर्भुवः स्वश्च भैरव।
पृथिव्यादीनि च सर्व्वाणि ब्रह्माण्डं सचराचरम्।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ते तुष्टाः सर्व्वे तु शाश्च यस्तु कन्यां प्रपूजयेत।
विधियुक्तं कुमारीं तु भोजयेच्चैव भैरव।
पाद्यमर्घ्यं तथा धूपं कुमकुमं चन्दनं शुभम।
भक्तिभावेन संपूज्य कुमारीभ्यो निवेदयेत।
प्रदक्षिणात्रयं कुर्यात आदौ मध्ये तथान्ततः।
पश्चाच्च दक्षिणा देया रजतस्वर्णमौक्तिकैः।
दक्षिणां विधिवत दत्वा कुमारीभ्यः क्रमेण तु।
विवाहयेत स्वयं कन्यां ब्रह्महत्या विनश्यति।
यो यश्च पुण्यकाले तु कन्यादानं प्रकल्पयेत।

भुक्तिमुक्तिफलं तस्य सौभाग्यं सर्व्वसम्पदम् ।
रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान हरः ।
तीर्थकोटिसहस्राणि अश्वमेधशतानि च ।
तत फलं लभते सद्यो यस्तु कन्यां विवाहयेत ।
वालुकासागरे ज्ञेया तावदब्दसहस्रकम ।
एकैकं कुलमुद्धृत्य रुद्रलोके महीयते ।
तत्तदिष्टदेवतानां प्रीतये तुष्टये सुधीः ।
कन्यादानं समाकृत्य मुक्तिमाप्नोति भैरव ।
तत्तद्वर्णीयकन्यायास्तत्तद्रूपाञ्च साधकः ।
विभाव्य शिवरूपत्वं सम्प्रदानीयकालके ।
पूर्णरूपं शिवं ध्यात्वा वरं सर्व्वाङ्गसुन्दरम ।
तेजोमयं यशःकान्तं बालभैरवरूपिणम् ।
वटुकेशं महादेवं वरयेत साधकाग्रणीः ।
भैरवीं बालरूपां च त्रैलोक्यसुन्दरीं वराम् ।
नानालङ्कारकन्याङ्गीं भद्रविद्याप्रकाशिनीम ।
चारुहास्यां महानन्दहृदयां शुभदां शुभाम् ।
ध्यात्वा द्वादशपत्राब्जे पूर्णचन्द्रनिभाननाम ।
सम्प्रदाने समानीय तत्तन्मन्त्रेण दापयेत ।
एतत श्रुत्वा महावीरो बालरूपी निरञ्जनः ।

पुनर्जिज्ञासयामास परमानन्दभैरवीम् ।

आनन्दभैरव उवाच ।

कुमारीकुलतत्त्वार्थं मन्त्रार्थं जपनक्रमम् ।
यजनादिप्रकारं च भोजनादिक्रमं तथा ।
होमादिप्रक्रियां तस्मात् स्तोत्रं प्रत्येकमेव हि ।
कवचञ्च कुमारीणां वदस्व क्रमशः प्रिये ।
येन क्रमेण सा विद्या कुमारी परदेवता ।
निर्ज्जने साधकस्याग्रे महावाक्यं स्वयं वदेत् ।
बालिका चारुनयना केन हेतोः प्रसीदति ।
तत्प्रकारं वद स्नेहादानन्दभैरवप्रिये ।

श्रीआनन्दभैरव्युवाच

शृणु शम्भो प्रवक्ष्यामि कुमारीकुलमन्त्रकान् ।
येन विज्ञातमात्रेण धरणीशो नरोत्तमः ।
सर्व्वेषां गुरुरूपः स्यात् कुमारीयजनेन च ।
एकवर्षावधि सन्ध्यादिकानां स्तवमुत्तमम् ।
षोड़शाब्दान्तरूपाणां मन्त्रं शृणु महाप्रभो ।
क्रमादिकं च सर्व्वासां चैतन्यं सिद्धिसत्क्रियाम् ।
आनीय सुन्दरीं नारीं कुमारीं वरनायिकाम् ।
रत्नालङ्कारसंयुक्तां शंखवस्त्रादिशोभिताम् ।

वाग्भवेन जलं नाथ तन्नाम्ना परिदापयेत ।
देवीं बुद्ध्वा सदा ध्यात्वा पूजयेत् साधकोत्तमः ।
मायाबीजेन तन्नाम्ना पाद्यं दद्यात्तथा प्रभो ।
लक्ष्मीबीजेन चार्घ्यन्तु कूर्चबीजेन चन्दनम ।
मायाबीजेन पुष्पाणि कुमार्यै (१४) दापयेत सुधीः ।
सदाशिवेन मन्त्रेण धूपदीपौ नगोत्तमौ ।
दत्वा च षडङ्गमन्त्रेण पूजयेद्देवनायकः ।
तत्प्रकारं महादेव शृणु ध्यानन्द रूपधृक ।
महातेजोमयं शुभ्रं हृदयं हृस्तदाक्षिणैः ।
विभाव्य प्रपठेत श्रुत्वा तन्मन्त्रं शृणु शंकर ।
आदौ वाग्भवमुच्चार्य मायां लक्ष्मीन्तु कूर्चकम ।
(हंसौं) प्रेतबीजं ततो ब्रूयात सविसर्गेन्दु बिन्दुकम ।
कुलशब्दं समुच्चार्य कुमारिके ततो वदेत ।
हृदयाय नमः प्रोच्य ततः शिरसि भावयेत ।
शुक्रवर्णं सत्वमयं बीजमुच्चार्य संन्यसेत ।
हकारं वाग्भवाद्यं च वकारं वाग्भवात्मकम ।
मायां लक्ष्मीं च वाग्भवं च द्विठान्तं (४२) शिरसे पदम ।
वह्निजायावधिर्मन्त्रो न्यसेच्छिरसि साधकः ।

119

(१४) प्रापयेत सुधीः । (४२) स्वाहान्त......

शिखामध्ये कृष्णवर्णां नीलाञ्जनचयप्रभम् ।
विभाव्य संन्यसेन्मन्त्री कुमारीकुलसिद्धये ।
आदौ प्रणवमुद्धृत्य तदन्ते त्रिपुरसुन्दरीम् ।
शिखायै पदमुद्धृत्य वषट्कारं ततो वदेत् ।
ततः श्रीकवचमध्ये च लमवर्णां सुतेजसम् ।
प्रथमारुणसंकाशं ध्यात्वा चारुकलेवरम् ।
वाग्भवञ्च समुच्चार्य्य कुलशब्दं ततो वदेत् ।
वागीश्वरी पदं पश्चात् कवचाय ततो वदेत् ।
तारकब्रह्मशब्दं च कवचन्यासजालकम् ।
ततो नेत्रत्रयं ध्यात्वा महाबीजं महाप्रभम् ।
रक्तवर्णां कोटिकोटिजवामण्डलमण्डितम् ।
विराजितं कोटिपुण्यार्जिततेजसि भास्वरे ।
वाग्भवं हि समुच्चार्य्य कुलेश्वरी पदं ततः ।
नेत्रत्रयाय शब्दान्ते वौषट् लोचनमन्त्रकम् ।
ततः साधनमन्त्री च वामहस्ततले तथा ।
मध्यमा-तर्जनीभ्यां च तालत्रयमुपाचरेत् ।
तन्मन्त्रं कोटिसूर्य्याग्रे ज्योत्स्नाजालसमप्रभम् ।
महाकालोद्भवशब्दं महोग्रपरिपीडनम् ।
मायाबीजं तथास्त्राय पदमुद्धृत्य यत्नतः ।
पान्तं मान्तं समुद्धृत्य महामन्त्रं प्रकीर्तितम् ।
ततस्तथा हृन्नलिने ध्यात्वा च परिवारकान् ।

× रूपसंकाशं ......(२)

पूजयेद्यत्नतो मन्त्री तेजसामृत धारया ।
तर्पयेत पूजयेद्धत्वा भैरवं वालभैरवम् ।
देवताभिः पूजयित्वा परिवारक्रमेण तु ।
ततो वाग्भवमुच्चार्य्य सिद्धिजयाय शब्दतः ।
पश्च पदं समुच्चार्य्य वक्त्राय नम ईरितम् ।
ततो वाग्भव मुच्चार्य्य जयाय पदमुद्धरेत् ।
उत्तरवक्त्र मुद्धृत्य चतुर्थ्यन्तं नमः पदम् ।
ततो वाग्भव मायाश्रीवीजान्युच्चार्य्य यत्नतः ।
कुब्जिके पश्चिमान्ते च वक्त्राय नम ईरितम् ।
ततोवाग्भव मुच्चार्य्य कालिके पदमुच्चरेत् ।
दक्षवक्त्राय शब्दान्ते नमो मन्त्रं प्रकीर्त्तितम् ।
एतन्मन्त्रादन्तरं नाथ समुच्चार्य्य कुलेश्वरम् ।
पूजयित्वाक्रमेणैव भास्करं परिपूजयेत् ।
चन्द्रं दिक्पालदेवञ्च सन्ध्यादीन् परिपूजयेत् ।
वीरभद्रां महाकन्यां जैमिनीं कुलगामिनीम् ।
अष्टादशभुजां कालीं चण्डदुर्गां प्रपूजयेत् ।
नैवेद्यादीन समानीय नानाभोजनराजितम् ।
दुग्धं घनावृतं क्षीरं पक्वान्नं पक्वसतफलम् ।
यद्यत् कालोप[illegible]मयामिश्रितम् ।

पञ्चतत्त्वं कुलद्रव्यं निजकल्याणवर्द्धनम् ।
नानाद्रव्यं च नैवेद्यं स्वस्वकल्पोक्तसाधितम् ।
कुमारीभ्यो निवेद्यैवं नानासौरभशोभितम् ।
शीतलं जलमानीय दद्यात् ताभ्यो महासुधीः ।
ततो हितं महामन्त्रं कुमार्याश्च सुदुर्लभम् ।
अथवा स्वीयमूलस्य जप्त्वा सिद्धीश्वरो भवेत् ।
समर्थ प्राणवायूनां धारणां कारयेत् स्वयम् ।
अष्टाङ्गादिप्रणामं च कुर्व्वन् स्तोत्रं पठन्वसेत्
नमामि कुलकामिनीं परमभाग्यसन्धायिनीम्
कुमाररतिचातुरीं सकलमन्त्रसानन्दिनीम् ।
प्रवालगुटिकास्रजां रजतरागवस्त्रान्विताम्,
हिरण्यगुणभूषणां भुवनवाककुमारीं भजेत् ॥
इति मन्त्रेण संन्यस्य भाविनीं परिपूरयेत् ।
शिवं गणेशं सम्पूज्य प्रणामं साधकोत्तमम् ॥ ०॥
॥ इति श्रीरुद्रयामले उत्तरतन्त्रे सर्व्वतन्त्रोद्दीपने कुमार्युपचर्या विद्यायां सिद्धविद्याप्रकरणे दिव्यादिभावनिर्णये

सप्तमः पटलः ॥

अथ वक्ष्ये महादेव कुमारीजपहोमकम् ।
लक्षसंख्यं जपं कला भायां नानाभवं वनाम् ।

कालीवीजं वापि नाथ चाथवा कामवीजकम् ।
सदाशिवेन पुटितं विन्दुचन्द्रविभूषितम् ।
अथवा प्रणवेनापि पुटितं त्रिदशेश्वर ।
लक्षसंख्यं क्रमेणैव जप्त्वा सिद्धीश्वरो भवेत् ।
अथवा मूलमन्त्रं च लक्षसंख्याविधानतः ।
तद्दशांशं महाहोमं घृताक्तं विल्वपत्रकैः ।
अथवा श्वेतपुष्पैश्च कुन्दपुष्पैर्महाफलम् ।
एवं क्रमेण जुहुयात् करवीरप्रसूनकैः ।
घृताक्तैः केवलैर्वापि चन्दनागुरुमिश्रितैः ।
हविष्याशी दिवाभागे रात्रौ पूजापरो भवेत् ।
निजपूजागणेशाद्यान्तु कुलद्रव्यैः प्रपूजयेत् ।
दिवासंख्यं जपेत् परमानन्दरूपधृक् ।
जपान्ते जुहुयान्मन्त्री सद्रक्तद्रव्यसंयुतैः ।
ततः प्राणात्मकं वायुं शोधयित्वा पुनः पुनः ।
प्राणायामत्रयं कृत्वा चाष्टाङ्गैः प्रणमेन्मुदा ।
प्रणामसमये नाथ इदं स्तोत्रं पठेद्यतिः ।
कवचं च तथा पाठ्यं कुमारीणामथापि वा ।
निजदेव्या महास्तोत्रं पीठाङ्गकवचं तथा ।

पठेदिङ्कवचं तथा।

कुमारीणां महादेव सहस्रनामसारकम् ।
पठित्वा सिद्धिमाप्नोति नात्रकार्या विचारणा ।
तदशक्तौ निजदेव्याः सहस्रनाममङ्गलम् ।
अष्टोत्तरशतं नाथ सिद्धाकांदी न संशयः ।
तासां स्तोत्रं दिव्यनाथ शृणु सर्वत्र मङ्गलम् ।
अकस्मात् सिद्धिमाप्नोति पठित्वा साधकोत्तमः ।
अग्रे संस्थाप्य ताः सर्वा रक्तकोटिसुशीतलाः ।
ततस्तोत्रं पठेद्धीमान् समाहितमनावशी ।
महादिव्याचाररतो वीरभावोत्वणोऽपिवा ।
एवं क्रमेण प्रपठेत् भक्तिभावपरायणः ।
महाविद्या महासेवा भक्तिश्रद्धापुताषितः ।
महाज्ञानी भवेत् क्षिप्रं वाञ्छासिद्धिमवाप्नुयात् ।

॥ आनन्दभैरव उवाच ॥

देवेन्द्रादय इन्दुकोटि किरणां वामानसीवासनीम्
विद्यावभवकामिनी त्रिनयनां सूक्ष्मा क्रियायामिनीम् ।
वक्षोद्वेगनिकन्तनीं त्रिजगतां धात्रीं कुमारीं वराम्
मूलाम्भोरुहवासिनीं शशिमुखीं संपूजयन्ति प्रिये ॥१॥
भाव्यां देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकाम् ,
सन्ध्यां नित्यगुणोदयां द्विजगणैः श्रेस्तोदयां साधकाम् ।

124

शुक्लाभां परमेश्वरीं शुभकरीं भद्रां विशालाननीम् ।
गायत्रीं गणमातरं दिनगतिकर्षां च रुद्रां भजे ॥ २ ॥
बालां बालकपूजितां गणयुतां विद्यावतां मोक्षदाम् ,
धात्रीं शुक्लसरस्वतीं नरवरां वाग्वादिनीं चण्डिकाम् ।
स्वाधिष्ठानहरिप्रियां प्रियकरीं वेदान्तविद्याप्रदां
नित्यां मोक्षद्वितीययोगवपुषा चैतन्यरूपां भजे ॥ ३ ॥
नानारत्नसमूहनिर्मितगृहे पूज्यां सुरैर्बालिकाम्
वन्दे नन्दनकानने मनसि सिद्धान्तैकबीजानने ।
अर्थं देहि निरर्थकायवपुषो हित्वा कुमारीं कलाम्
मह्यं मान्यकुमारिके त्रिविधमूर्त्याकाश तेजोमयीम् ॥ ४ ॥
उद्यल्लालसकालिकां कुलपथोल्लासैकबीजोद्भवाम् ,
भांसामोदकपालिनीं हि भजतां कामातिरिक्तप्रदाम् ।
बालोऽहं बटुकेश्वरस्य चरणाम्भोजाश्रितोऽहं सदा
हित्वा बालकुमारिके शिरसि शुक्लाम्भोरुहे संभजे ॥ ५ ॥
सूर्याह्लादबलाङ्कि(१)नीं कालिमहापापादिपापापहाम् ,
तेजोगां भुवि सूर्यगां भयहरां तेजोमयीं बालिकाम् ।
वन्दे हृतकमले सदा रविदले बालेन्द्रविद्यां सतीम्
साक्षात् सिद्धिकरीं कुमारि विमले नामाद्यरूपेश्वरीम् ॥ ६ ॥
नित्यं श्रीकुलकामिनीं कुलवतीं कौलामुमामाम्बिकाम् ।
नानायोगनिवासिनीं सुरमणीं नित्यं तपस्यान्विताम् ।

(१) बलाह्लादिनी

125

वेदान्तार्थविशेषदोषरसना मायाविशेषस्थिताम्
वन्दे पर्व्वतराजराजतनयां कालप्रिये त्वामहम् ॥ ७ ॥
कौमारीं कुलपालिनीं रिपुगणक्षोभाग्निसन्दीपिनीं
रक्ताङ्गां नयनांशुभां परशिवां सन्मार्गमुक्तिप्रदाम् ।
भार्य्यां भागवतीं मतिं भुवनभङ्गामोदपञ्चाननां
पञ्चास्यप्रियकामिनीं भयहरां सर्पादिहारां भजे ॥ ८ ॥
चन्द्रास्यां वरवाद्ययाम्बुजमहाशोभाविनोदीं नदीम्
मोहादित्रयकारिणीं वरकरां श्रीकुब्जिकां सुन्दरीम् ।
ये नित्यं परिपूजयन्ति सहसा राजेन्द्रचूडामणीं
सम्पादं धनमायुषं प्रजयतो वाच्येश्वरत्वं जगुः ॥ ९ ॥
योगीशं भुवनेश्वरं प्रियकरं श्रीकालसन्दर्भया
शोभासागरगामिनं शुभतरं वाञ्छाफलोद्दीपनम् ।
लोकानामघनाशनाय शिवया श्रीसंज्ञया विद्यया
धर्मप्राणसदैवतं प्रणमतां कल्पद्रुमं भावये ॥ १० ॥
विद्यां नामपराजितां मदनभावामोदमत्ताननां
हृत्पद्मस्थितपादुकां कुलकलां कात्यायनीं भैरवीम् ।
ये ये पुण्यधियो भजन्ति परमानन्दाब्धिमध्ये सदा
सर्वाच्छादिततेजसा भयकरीं मोक्षाय सत्कीर्त्तये ॥ ११
रुद्राणीं प्रणमामि पद्मवदनां कोट्यर्कतेजोमयीं
नानालङ्कृतभूषणां कुलभुजामानन्दसन्दायिनीम् ।

श्रीमायाकमलान्वितां हृदिगतां सन्तानबीजक्रियाम्
वन्दे वाग्भवरूपिणीं कुलवधूं हुङ्कारबीजोद्भवाम् ॥ १२ ॥
नमामि वटभैरवीं क्षितितलाघकालानलाम्
मृणालकुसुमाकृतिं भुवनदोषसंशोधनीम् ।
जगद्भयहरां हरति या च योगेश्वरी
महापदसहस्रकं सकलभोगदात्री महम् ॥ १३ ॥
साम्राज्यं प्रददाति या च भवतीं विद्यामहालक्षणां
साक्षादष्टसमृद्धिदा भुवि महालक्ष्मी कुलाढ्या महा ।
स्वाधिष्ठानसुपङ्कजे वसमिते विष्णोरनन्तप्रिये
वन्दे राज्यपदप्रदां शुभकरीं कौलेश्वरीं शाङ्करीम् ॥ १४ ॥
पीठानामधिपाधिपत्यसुवहां विद्यां शुभां नायिकां
सर्वालङ्कार न्वितां त्रिजगतां शोभापदां वारुणीम् ।
वन्दे पीठगणाधिकां त्रिभुवनच्छायाभिराच्छादितां
सर्वेषां हितकारिणीं जयवतीमानन्दरूपेश्वरीम् ॥ १५ ॥
शेवज्ञां मदविह्वलां कुलवतीं सिद्धिप्रियां प्रेयसीं
शम्भोः श्रीवटुकेश्वरस्य महतामानन्दसञ्चारिणीम् ।
साक्षादात्मपरीरूपां निजमनःशोभापदां साकिनीं
वाक्यार्थप्रकटां महं रजतभां वन्दे महाभैरवीम् ॥ १६ ॥
प्रणामफलदायिनीं सकलराज्यवश्यां गुणां

नमामि परमालिकां विषयदोषसंहारिणीम् ।
सुपूर्णविधुवन्मुखीं कमलमध्यसञ्चारिणीम्
शिरोदशशते दलेऽमृतमहाब्धिधाराधराम् ॥ १७॥
साक्षादहं त्रिभुवनेऽमृतपूर्णदेहां
सन्ध्यादिदेवकमलां कुलपाणितेन्द्राम् ।
नत्वा भजे दश शते दलमध्यमध्ये
कौलेश्वरीं सकलदिव्यजनाश्रयं त्वाम् ॥ १८
विश्वेश्वरीं सुरकुलेवरवालिके त्वम्
सिद्धासने प्रतिदिनं प्रणमामि भक्त्या ।
भक्तिं धनं जयपदं यदि देहि दास्यं
तस्मिन् महामधुमतीलघुगेहता स्यात् ॥ १९
एतत्स्तोत्रप्रसादेन कविता वाक्पतिर्भवेत् ।
महासिद्धीश्वरो दिव्यो वीरभावपरायणः ।
सर्वत्रजयमाप्नोति सहिस्याद्देववल्लभः ।
वाचामीशो भवेत् क्षिप्रं कामरूपी भवेन्नरः ।
पशुरेव महावीरो दिव्यो भवति निश्चितम् ।
क्रमशोऽप्यष्टसिद्धिः स्यात् वाग्मी भवति निश्चितम् ।
सर्वविद्याः प्रसीदन्ति तुष्टाः सर्वे दिगीश्वराः ।
वह्निः शीतलतां याति जलस्तम्भं स कारयेत् ।
धनवान् पुत्रवान् राजा इहकाले भवेन्नरः ।

128

परेव याति वैकुण्ठे कैलासे शिवसन्निधौ ।
मुक्तिरेव महादेव योनित्यं सर्व्वदा पठेत ।
महाविद्यापदाम्भोजं सहि पश्यति निश्चितम ।
शृणु नाथ प्रवक्ष्यामि कुमारीतर्पणादिकम ।
यासां तर्पणमात्रेण कुलसिद्धिर्भवेद्ध्रुवम ।
कुलबालां मूलपद्मस्थितां कामविहारिणीम ।
शतधा मूलमन्त्रेण तर्पयामि भवप्रिये ।
मूलाधारमहातेजो जटामण्डलमण्डिताम ।
सन्ध्यादेवीं तर्पयामि कामबीजेन मे शुभे ।
मूलपङ्कजयोगाङ्गीं कुमारीं श्रीसरस्वतीम ।
तर्पयामि कुलद्रव्यै स्तवसन्तोषहेतुना । ३
चारुमूलाधारपद्मे त्रिमूर्त्तिं बालनायिकाम
सर्व्वकल्याणदां देवीं तर्पयामि परामृतैः ॥ ४ ॥
स्वाधिष्ठाने महापद्मे षड्दलान्तप्रकाशिनीम ।
श्रीबीजेन तर्पयामि भोगमोक्षायकेवलम ॥ ५ ॥
स्वाधिष्ठानकुलोल्लासे विष्णुसंकेतगामिनीम ।
कालिकां निजबीजेन तर्पयामि कुलामृतैः ॥ ६ ॥
स्वाधिष्ठानाख्यपद्मस्थां महातेजोमयीं शिवाम ।
सूर्य्यगां शीर्षमधुना तर्पयामि कुलेश्वरीम ॥ ७ ॥

मणिपुराब्जमध्ये तु मनोहरकलेवराम् ।
उमादेवीं तर्पयामि मायाबीजेन पार्वतीम् ॥ ८ ॥
मणिपुराम्भोजमध्ये त्रैलोक्यपरिपूजिताम् ।
मणिपुरस्थितां रौद्रीं परमानन्दवर्द्धिनीम् ।
[illegible]
अकाशगामिनीं देवीं कुब्जिकां तर्पयाम्यहम् ॥ ९ ॥
तर्पयामि महादेवीं सदासाधनतत्पराम् ।
योगिनीं कालसन्दर्भां तर्पयामि कुलाननाम् ॥ १० ॥
शक्तिमन्त्रप्रदां रौद्रीं लोलजिह्वासमाकुलाम् ।
अपराजितां महादेवीं तर्पयामि कुलेश्वरीम् ॥ ११ ॥
महाकौलप्रियां सिद्धां रुद्रलोकसुखप्रदाम् ॥
रुद्राणीं रुद्रकिरणां तर्पयामि हरप्रियाम् ॥ १२ ॥
षोडशस्वरसंसिद्धिं महारौरवनाशिनीम् ।
महामद्यपानहितां भैरवीं तर्पयाम्यहम् ॥ १३ ॥
त्रैलोक्यवरदां देवीं श्रीबीजमालयास्थिताम् ।
महतीं सर्वैश्वर्यदायिनीं तर्पयाम्यहम् ॥ १४ ॥
लोकानां हितकर्त्रीं च हिताहितजनप्रियाम् ।
तर्पयामि रमाबीजां पीठाद्यां पीठनायिकाम् ॥ १५ ॥
जयन्तीं वेदवेदाङ्गमातरं जय×मातरम् ।

* सूर्यमातरम्

130

तर्पयामि सुधाभिरद्य त्रैवद्यां मायया वृताम् । १६
तर्पयामि कुलानन्द पारगां परमाननाम् ।
तर्पयाम्यम्बिकां देवीं मायालक्ष्मीहृदिस्थिताम् ॥ १७॥
सर्व्वासां चरणाद्वयाम्बुजतलं चैतन्यविद्यावताम्
सौख्यार्थं शुभषोडशस्वरयुतं श्रीषोडशी संकुलम् ।
आनन्दार्णवपद्मरागखचिते सिंहासने शोभिताम्
नित्यें तां परितर्पयामि सकलं श्वेताब्जमध्यासने ॥ १८॥
ये नित्यं प्रपठन्ति चारुसकलं स्तोत्रां गमन्तर्पणम्
विद्यावत्तनिदानमोक्षपरमं मायामयं यान्ति तम् ।
नश्यन्ति क्षितिमण्डलेषु विगणाः सर्व्वे विपत्कारकाः
राजानं वशयन्ति योगसकलं नित्या भवन्ति क्षणात् ॥ १९
तर्पणात्मकमोक्षाख्यं पठति यदि मानुषः ।
अष्टैश्वर्य्ययुतो भूत्वा वत्सरान्तां प्रपश्यति ॥
महायोगी भवेन्नाथ मासादभ्यासतः प्रभो ।
त्रैलोक्यं क्षोभयेत्त्रित्रिं वाञ्छाफलमवाप्नुयात् ।
भूमध्ये राजराजेशो लभते वरमङ्गलम् ।
शत्रुनाशे तथोच्चाटे बन्धने व्याधिसंकटे ।
चतुरङ्गे तथा घोरे भये दुःस्वप्नदर्शने ।
पठित्वा सिद्धिमाप्नुयात्
यः पठेदेकमासेन स तर्पणफलं लभेत् ।

पूजाफलमवाप्नोति कुमारीस्तोत्रपाठतः ।
योऽन्नकुर्य्यात कुमार्य्यर्चां स्तोत्रं च नित्यमङ्गलम् ।
स भवेत पाशवः कलौ मृत्युस्तस्य पदे पदे ॥ ० ॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्य्युपचर्य्याविन्यासे मन्त्रसिद्धिप्रकरणे दिव्यभावनिर्णये ऽष्टमः पटलः ॥ ८

आनन्दभैरव्युवाच

अथातः संप्रवक्ष्यामि कुमारीकवचं शुभम् ।
त्रैलोक्यमङ्गलं नाम महापातकनाशनम् ।
पठनाद्धारणालोका महासिद्धिप्रभाकराः ।
शक्रो देवाधिपः श्रीमान् देवगुरुर्बृहस्पतिः ।
महातेजोमयो वह्निर्धर्मराजो भयानकः ।
वरुणो देवपूज्यो हि जलानामधिपः स्वयम् ।
सर्व्वहर्त्ता महावायुः कुबेरः कुञ्जरेश्वरः ।
धनाधिपः प्रियः शम्भोः सर्व्वदेवादिगीश्वराः ।
त्वमेव प्रभुरेकात्मा सर्व्वेशो निर्म्मलोऽद्वयः ।
सततकवचपाठेन सर्व्वे भूपा धनाधिपाः ।
प्रणवो मे शिरः पातु माया सन्ध्यात्मिका सती ।
ललाटोर्द्ध्वं महामाया पातु मे श्रीसरस्वती ।
कामाख्या वटुकेशानी त्रिमूर्तिर्भालमेव मे ।

चामुण्डावीजरूपा च वदनं कालिका मम ।
पातु मे सूर्य्यगा नित्यं तथा नेत्रद्वयं मम ।
कर्णयुग्मं कामवीजं स्वरूपो मातपास्विनी ।
रसनाग्रं तथा पातु वाग्देवी मालिनी मम ।
डामरस्था कामरूपा दन्ताग्रं कुब्जिका मम ।
देवी प्रणवरूपा सा पातु नित्यं शिवा मम ।
ओष्ठाधरं शक्तिवीजात्मिका स्वाहा स्वरूपिणी ।
पायान्मे कालसन्दर्भा पञ्चरश्मि स्वरूपिणी ।
गलदेशं महारौद्री पातु मे चापराजिता ।
क्लौं वीजं मे तथा कण्ठं रुद्राणी स्वाहयान्विता ।
हृदयं भैरवी पातु षोडशी पातु सुस्वरा ।
द्वौ बाहू पातु सर्व्वत्र महालक्ष्मी प्रधानिका ।
सर्व्वमन्त्रस्वरूपा मे चोदरं पीठनायिका ।
पार्श्वयुग्मं तथा पातु कुमारी वाग्भवात्मिका ।
कौशोरी कटिदेशं मे मायावीजस्वरूपिणी ।
जंघायुग्मं जयन्ती मे योगिनीकुलकाश्रिता ।
सर्व्वाङ्गमम्बिकादेवी पातु मन्त्रार्थगामिनी ।
केशाग्रं कमलादेवी नासाग्रं नरमोहिनी ।

चिवुकं चण्डिकादेवी कुमारीपातु मे सदा ।
हृदयं ललिता देवी पृष्ठं पर्व्वतवासिनी ।
त्रिशक्तिः षोड़शी देवी लिङ्गं गुह्यं सदावतु ।
श्मशाने चाम्बिकादेवी गङ्गागर्भे च वैष्णवी ।
शून्यागारे पञ्चमुद्रा मन्त्रयन्त्रप्रकाशिनी ।
चतुष्पथे सदा पातु मामेव वज्रधारिणी ।
शवाननगता चण्डा मुण्डमाला विभूषिता ।
पातु मामेकलिङ्गे च वैरवी शक्तिरूपिणी ।
*रणे पातु महावाला महारण्ये रणप्रिया ।
महाजले तड़ागे च शत्रुमध्ये सरस्वती ।
महाकाशपथे पृथ्वी पातु मां शीतलासदा ।
रणमध्ये लक्ष्मीरूपा कुमारी कुलकामिनी ।
अर्द्धनारीश्वरा पातु मम पादतलं मही ।
नवलक्ष महाविद्या कुमारिरूपधारिणी ।
कोटिसूर्य्यप्रतीकाशा चन्द्रकोटिसुशीतला ।
पातु मां वरदावाणी वटुकेश्वरकामिनी ।
इति ते कथितं नाथ कवचं परमाद्भुतम् ।
कुमार्य्याः कुलदायिन्याः पञ्चतत्वार्थपारगः ।
यो यजेत पञ्चतत्वेन स्तोत्रेण कवचेन च ।

*वने ।

आकाशगामिनी सिद्धिर्भवेत्तस्य न संशयः।
नग्नदेही भवेत् क्षिप्रं कवचस्य प्रपाठतः।
सर्व्वसिद्धीश्वरो योगी ज्ञानी भवति यः पठेत्।
विवादे व्यवहारे च संग्रामे कुलमण्डले।
महापथे श्मशाने च योगपीठाभयेषु च।
पठित्वा जयमाप्नोति सत्यं सत्यं कुलेश्वर।
वशीकरणकवचं सर्व्वत्र जयदं शुभम्।
पुण्यव्रती पठेन्नित्यं यतिः श्रीमान् भवेद्ध्रुवम्।
सिद्धिविद्या कुमारी च ददाति सिद्धिमुत्तमम्।
यः पठेत् शृणुयाद्वापि स भवेत् कल्पपादपः।
भक्तिमुक्तितुष्टिपुष्टिं राजलक्ष्मीं सुसम्पदम्।
प्राप्नोति साधकश्रेष्ठो धारयित्वा भवेज्जयी।
असाध्यं साधयेद्विद्वान् पठित्वा कवचं शुभम्।
कुलीनानां महासौख्यं धर्म्मार्थकाममोक्षदम्।
यो वशी दिवसे नित्यं कुमारीं पूजयेन्निशि।
उपचारविशेषेण त्रैलोक्यं वशमानयेत्।
पललेनासवेनापि मत्स्येन मुद्रया सह।
नानाभक्ष्येण भोज्येन गन्धद्रव्येण साधकः।
माल्येन स्वर्णरजतालङ्कारेण सुचेलकैः।

पूजयित्वा जपित्वा च तर्पयित्वा वराननाम ।
यज्ञदानतपस्याभिः प्रयोगेण महेश्वर ।
स्तुत्वा कुमारीं कवचं यः पठेदेकभावतः ।
तस्य सिद्धिर्भवेत् क्षिप्रं राजराजेश्वरो भवेत् ।
वाञ्छाफलमवाप्नोति यद्यन्मनसि वर्तते ।
भूर्जपत्रे लिखित्वा च कवचं धारयेद्यदि ।
शनिमङ्गलवारे च नवम्यामष्टमीदिने ।
चतुर्दश्यां पौर्णमास्यां कृष्णपक्षे विशेषतः ।
लिखित्वा धारयेद्विद्वान् उत्तराभिमुखो भवन् ।
महापातकयुक्तोऽपि मुक्तः स्यात् सर्व्वपातकैः ।
योषिद्वामभुजे धृत्वा सर्व्वकल्याणमालभेत ।
बहुपुत्रान्विता कान्ता सर्व्वसम्पत्तिसंयुता ।
तथा श्रीपुरुषः श्रेष्ठो दक्षिणो धारयेद्भुजे ।
ऐहिके दिव्यदेहः स्यात् पञ्चाननसमप्रभः ।
शिवलोके परे याति वायुवेगी निरामयः ।
सूर्य्यमण्डलमाभिद्य परं मोक्षमवाप्नुयात् ।
लोकनामपि सौख्यदं भयहरं श्रीपादभक्तिप्रदम्,
मोक्षार्थं कवचं शुभं प्रपठतामानन्दसिन्धूद्भवम् ।
पार्थानां कलिकालघोरकलुषध्वंसैकहेतुं जयम्,

ये लोकाः प्रपठन्ति धर्म्ममतुलं मोक्षं व्रजन्ति क्षणात् ५०५

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्य्याविन्यासे कुमारीकवचोल्लासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये भैरवभैरवीसंवादे नवमः पटलः॥

आनन्दभैरव उवाच

वद कान्ते सदानन्दस्वरूपानन्दवल्लभे ।
कुमार्य्या देवतामूर्त्याः परमानन्दवर्द्धनम् ।
अष्टोत्तरसहस्राख्यं नाममङ्गलमद्भुतम् ।
यदि मे वर्तते विघ्ने दयास्नेहकलामले ।
तदा वदस्व कौमारी क्रतुकर्म्मफलप्रदम् ।
महास्तोत्रं कोटिकोटिकन्यादानं फलं यतः ।

आनन्दभैरव्युवाच

महापुण्यप्रदं नाथ शृणु सर्व्वेश्वर प्रियम् ।
अष्टोत्तरसहस्राख्यं कुमार्य्याः परमाद्भुतम् ।
पठित्वा धारयित्वा च नरो मुच्येत संकटात् ।
सर्व्वत्र दुर्लभं धर्न्यं धन्यलोकनिसेवितम् ।
अनिमाद्यष्टसिद्ध्यर्थं सर्व्वानन्दकरं परम् ।
मायायन्त्रनिरस्तांगं मन्त्रसिद्धिप्रदं नृणाम् ।
न पूजा न जपः स्नानं पुरश्चर्य्याविधिश्च न ।

अकस्मात् सिद्धिमाप्नोति सहस्रनाम पाठतः।
सर्व्वयज्ञफलं नाथ प्राप्नोति साधकः क्षणात्।
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रास्वरूपकम्।
कोटिवर्षशतेनापि फलं वक्तुं न शक्यते।
तथापि वक्तुमिच्छामि हितायजगतां प्रभो।
अस्याः श्रीकुमार्य्याः सहस्रनामकवचस्य वटुकभैरव-
ऋषिरनुष्टुप्छन्दः कुमारी देवता सर्व्वमन्त्रसिद्धिसमृद्ध-
ये विनियोगः॥

ओं कुमारी कौशिकी काली कुरुकुल्ला कुलेश्वरी।
कनकाभाकाञ्चनाभा कमला कालिकामिनी।
कपालिनी कालरूपा कौमारी कुलपालिका[1]।
कान्ता कुमारकान्ता च कारणाकारगामिनी।
कन्यकान्ता[2] कौलकान्ता क्रतुकर्म्मफलप्रदा।
कार्य्याकार्य्यप्रिया कक्षा कंसहन्त्री कुरुक्षया।
कृष्णकान्ता कालरात्रिः कर्णेषु धारिणी कया।
कामहा कपिला काला कालिका कुलकामिनी।
कुरुक्षेत्रप्रिया कौला कुन्ती कामातुरा कचा।
कलङ्कमत्ता कैकेयी काकपुच्छध्वजा कला।
कमला कामलाक्षी च कमलाननकामिनी।

(१) पालिका। (२) कल्यका।

कामधेनुस्वरूपा च कामदा कामवर्द्धिनी।
कामदा कामपूज्या च कामातीता कलावती।
कौवेरी कारणाद्या च कैशोरी कुशला कुला।
कम्बुग्रीवा करशालिदा कामराजप्रिया कृतिः।
कंकालालंकृता कंका केवला काकिनी किरा।
किरातिनी काकभक्षा करालवदना कृशा।
केशिनी केशिहा केशा काशाम्बस्था कावप्रिया।
कविनाथस्वरूपा च कटुवाणी कटुस्थिता।
कठोरा कोटराक्षी च कुटिला कटवासिनी।
कटकस्था काष्ठसंस्था कन्दर्पा केतकीप्रिया।
केलिप्रिया कम्बलस्था कालदैत्यनिवासिनी।
केतकीपुष्पशोभाढ्या कर्पूरपूर्णजिह्विका।
कर्पूराकारवाकोला कैलासगिरिवासिनी।
कुशासनस्था कादम्बा कुञ्जरेशी कुलानना। १००॥

खर्वा खड्गधरा खड्गा खलहा खलबुद्धिदा।
खंजना खररूपा च खाराम्नातितमध्यगा।
खेलना खेटकाकारा खरनाक्या खरोतकटा।
खद्योतचञ्चला खेला खद्योत खगवाहिनी।
खेटकस्था खेलनस्था खेचरी खेचरप्रिया।

खचरा खेचरप्रेमा खलाढ्या खचरानना ।
खेचरेशी खेचरोग्रा च खेचरप्रियभाषिणी ।
खर्जूररससंमत्ता खर्जूरफलभोजिनी ।
खातमध्यास्थिता खाता खाताम्बुपरिपूरणी ।
ख्यातिः ख्यातजनानन्दा खलना खंजनागतिः ।
खल्वा खरतरा खावी खरोद्वेगनिकृन्तनी ।
गगनस्था गणातीता गभीरनादिनी गया ।
गंगा गभीरा गौरी च गणनाथप्रियागतिः ।
गुरुभक्ता ग्लानिहीना गेहिनी गोपिनी गिरा ।
गोपनस्था गारापत्या गिरिजा गिरिपूजिता ।
गौकान्ता च गणस्था च गिरिकन्या गणेश्वरी ।
गाधिराजसुता ग्रीवा गुर्वी गुरुवशंकरी ।
गन्धर्वगामिनी गीता गायत्री गुणदा गुणा ।
गुग्गुलुस्था गुरोः पूज्या गीतानन्दप्रकाशिनी ।
गयासुरप्रिया गेहा गवाक्षजालमध्यगा ।
गुरुकन्या गुरोः पत्नी गहना गुरुनागिनी ।
गुल्फवायुस्थिता गुल्फा गन्धर्वी गारुडीप्रिया ।
गुह्या गुह्यगणस्था च गरिमा गौरिका गुदा ।
गुदोर्द्धस्था च गारिका गाणिका गोलका गला ।

(१) गौरिकान्ता ----

गान्धर्व्वी ज्ञाननगरी गन्धर्व्वगणपूजिता । २०० ॥
घोरनादा घोरमुखी घोराघर्म्मनिवारिणी ।
घनदा घनवर्णा च घनवाहनवाहिनी ।
घर्घरध्यानचपला घाटाघटघटाघटा ।
घटिता घट्टना घोना घनरूपा घनेश्वरी ।
घृष्यातीता घर्घरा च घोराननविमोहिनी ।
घोरनेत्रा घनकचा घोरभैरवकन्यका ।
घाता घातकहा ग्राह्या घ्राणा घ्राणेशवायवी ।
घोरान्धकारसंस्था च घसना घघना घरा ।
घोटकस्था घोटका च घोटकेश्वरवाहना ।
घननीलमणिश्यामा घर्घरेश्वरकामिनी ।
ङकारकूटसम्पन्ना ङकारचक्रगामिनी ।
ङकारीङ-ङ्शाशा ङापनीता ङकारिणी ।
चन्द्रमण्डलमध्यस्था चतुराचारुहासिनी ।
चारुचन्द्राचन्द्रमुखी चलद्धंसगतिप्रिया ।
चंचला चपला चान्द्री चेकितानाचरस्थिता ।
चलिता चालना चार्व्वी चारुभ्रमरनादिनी ।
चौरहा चन्द्रनिलया चैत्री चक्रपुरस्थिता ।
चक्रकौला चक्ररूपा चक्रस्था चक्रसिद्धिदा ।

141

चक्रिणी चक्रहस्ता च चक्रनाथकुलप्रिया ।
चक्रामेधा चक्रकुला चक्रमण्डलशोभिता ।
चक्रेश्वरप्रिया चेला चेलाजिनकुशोत्तमा ।
चतुर्वेदस्थिता चूर्णा चन्द्रकोटिसुशीतला ।
चतुर्गुणा चन्द्रवर्णा चातुरी चतुरप्रिया ।
चक्षुःस्था चक्षुवसतिः चलकाचनकप्रिया ।
चार्वङ्गी चारुनिलया चलदम्बुजलोचना ।
चर्चरीशा चारुमुखी चारुदन्ता चरस्थिता ।
चमकस्थासवा चेता चेतस्था चैत्रपूजिता ।
चातुषी चन्द्रमालिनी चन्द्रहाससमाश्रिता प्रभा । २००
छत्रस्था छत्ररूपा च छत्रच्छाया छलस्थिता ।
छलज्ञा छेद्यमा छाता छाया छिद्रप्रिया छला ।
छत्रचामरशोभाढ्या छात्रिणां छत्रधारिणी ।
छिन्नातीता छिन्नमस्ता छिन्नकेशा छलोद्भवा ।
छलहा छलदा छाला छन्ना छन्नजनाश्रया ।
छलाछन्ना छन्नवती छन्नस्वरघनिवासिनी ।
छद्मगन्धा छदाछन्ना छदवेशा छकारिका ।
छगलारक्तमध्या च छागलामेदरूपा ।
छगलशीर्षकन्या च छगलकुलकुमारिका ।

छुरिका छुरिककरा छुरिकारिविनाशिनी ।
छिन्नहस्ता छिन्ननासा छोललीला छलोदरी ।
छलोद्वेगा छाङ्गवीजमाला छाङ्गवरप्रदा ।
जटिला जठरश्रीदा जवायज्ञप्रिया जया ।
यन्त्रस्था जारजा जीवा जयदा जीवयोगदा ।
जयिनी जामलस्था च जामलोद्भवनायिका ।
जामलप्रियकन्या च जामलेशी जवाप्रिया ।
जवाकोटिसमप्रख्या जवापुष्पप्रिया जना ।
जनस्था जागविषयः जरातीता जलस्थिता ।
जीवरक्षा जीवकन्या च जनार्द्दनकुमारिका ।
जतुका जनपूज्या च जगन्नाथादिकामिनी ।
जीर्णाङ्गीजीर्णहीना च जीमूताम्बरशोभना ।
जामात्जयदा जृम्भा जृम्भनास्त्रादिधारिणी ।
जघन्या जारजप्रीता जगदानन्दवर्द्धिनी ।
जमलार्जुनदर्पाढ्या जमलार्जुनभञ्जिनी ।
जयित्री जगदानन्दा जामलोल्लाससिद्धिदा ।
जपमाला जाप्यसिद्धिर्जपयज्ञप्रकाशिनी ।
जाम्बुवती जाम्बुवतकन्यका जनपा जपा ।
जराहन्त्री जगद्बुद्धिर्जगतकर्त्री जगद्गतिः ।

जगद्‌शोभना ।

जननी जीवनी जाया जगन्माता जनेश्वरी ।
झञ्झना झंझमध्यस्था झणात्कारस्वरूपिणी ।
झलंद्[1]झणाद्बद्धिरूपा झलना झल्लरीश्वरी ।
झटिता झञ्झरा झंझाकारा झर्झरकन्यका ।
झणात्कारी झणा झन्ना झकारमालयावृता ।
झंकारी झर्झरी झिल्ली झनलवैश्वरमालिनी ।
ञकारी ञकिराती च ञकारबीजमालिनी ।
ञमोऽन्तानन्दकान्ता ञकारा ञापरेश्वरी ।
ञन्तबीजपुटाकारा ञैकनेत्रेशकामिनी ।
ञैकनेत्रा ञस्वरूपा ञहारा ञहरीतकी ।
टुंटुनी टङ्कहस्ता च टान्तवर्गा टलावती ।
टपना टानवानाख्या टकारादिनिरूपिणी ।
टलती टात्तमतीता टितकारादिकुमारिका ।
टंकास्त्रधारिणी टाना टामा टामनवासिनी ।
टंकारिनिधना टाका टका टंकारमोहिनी ।
टंकारध्वानिमोहा च ठिठिखेचरनोधिनी[2] ।
ठंठकारी ठाठरूपा ठकारबीजकारणा ।
डमरुप्रियवाद्या च डामरस्था डबीजिका ।

(१) झणत् झणद्बद्धिरूपा ।

(२) खेचरवाहिनी ।

डान्तवर्गा डमरुका डरस्था डोरडामरा ।
डमरूद्भा डलातीता डमाकर्केश्वरी डुता ।
ढाईनारीश्वरा ढामा ढंकारी ढलना ढला ।
ढाकस्था ढेकॅरसुता ढेमनाभा ढदोलना ।
णोमाकान्तेश्वरी णान्तवर्णस्था णातुलावती ।
णामोमा णांककल्याणी णादरी णादवीजिका ।
तुलसी तन्तुसूक्ष्माख्या तारस्था तैलगान्धिका ।
तपस्या तापसमुता तारिणी तरुणी तला । ५००
तन्त्रस्थतारकब्रह्म स्वरूपा तन्तुमध्यगा ।
तालभद्रा त्रिधामूर्त्तिस्तारका तैलमर्द्दिका ।
तारोग्रतारयाना च तकारा तिन्तिड़ीप्रिया ।
तपसः कालसन्दर्भा तर्ज्जयन्ती कुमारिका ।
तोकाचारा तलोद्वेगा तद्धका तद्धकप्रिया ।
तद्धकालंकृता तोषा तावद्रूपा तलप्रिया ।
तलास्त्रधारिणी तापा तपसां फलदायिनी ।
तलप्रहारनिरता तलारिगणनाशिनी ।
तुला तौली तौलका च तलस्थजनपालिका ।
तरुणाजीतप्तकुड्ड्भूक्तपोग्रधारिणी तपा ।
तन्त्रप्रकाशकरणी तन्त्रार्थदायिनी तुषा ।

॰ टेश्वरसुता ।

तुषारकिरणाङ्गी च तुषारांशुसमप्रभा ।
तोलमार्गाभिभूता च तन्त्रसिद्धिफलप्रदा ।
ताम्रवर्णा ताम्रकेशी ताम्रपात्रप्रिया तमा ।
तमोगुणप्रिया तोला तक्षकारिनिवारिणी ।
तोययुक्ता तमाख्याढ़ी तमाख्याढ़ेश्वरप्रिया ।
तुलना तुल्यरूपा च तुल्यबुद्धिस्त्रिधामतिः ।
तक्रभक्ता तालसिद्धिस्तक्रस्थानस्तगामिनी ।
तुलया तैलमांतारी तन्त्रगोपनतत्परा ।
तन्त्रमन्त्रप्रकाशा च त्रसरेणुस्वरूपिणी ।
त्रिंशदर्थप्रिया तुष्टा तुष्टिस्तुष्टजनप्रिया ।
थकारकूटदर्शीशा थदर्शीशप्रियाथवा ।
थकारादारूढाङ्गी थान्तवर्गा थकारिका ।
थान्तार्थमीश्वरी थारा थकारबीजमालिनी ।
दयादानप्रियादोषा दोषजालैरनाश्रिता ।
दशा दशनघोरा च देवी दासप्रिया दया ।
दैत्यहन्त्री दैत्यपरा दैत्यानां मर्द्दिनी दिशा ।
दान्ता दान्तप्रिया दासा दमनादीर्घकेशिका ।
दशनारक्तवर्णा च दर्वीग्रहविनाशिनी । ६००
देवमाता दुर्लभा च दीर्घाङ्गी दासकन्यका ।

× गामिनी

(५)

दशनश्री दीर्घनेत्रा दीर्घनासा च दोषहा।
दमयन्ती दलस्था च द्वेषहन्त्री दशास्थिता।
दैवाम्बिका दिशिगता दशनास्त्रविनाशिनी।
दारिद्र्यहा दरिद्रस्था दरिद्रधनदायिनी।
दन्तुरा दशभावा च देशस्था देशनायिका।
द्वेषरूपा द्वेषहन्त्री द्वेषारिगणमोहिनी।
दामोदरस्था दलना दलानां बलदायिनी।
दिग्दर्शना दर्शनस्था दर्शनप्रियवादिनी।
दामोदरप्रिया दान्ता दामोदरकलेवरा।
द्राविणी द्रविणी दक्षा दक्षकन्या दलद्दृढा।
दृढासना दोषशान्तिः द्वन्द्वयुद्धप्रकाशिनी।
दधिप्रिया दधिस्था च दधिमंगलकारिणी।
दर्पहा दर्पदा दृप्ता दर्भपुञ्जप्रिया दधिः।
दर्भस्था द्रुपदसुता द्रौपदी द्रुपदप्रिया।
धर्मार्चिता धनाध्यक्षा धनेश्वरवरप्रदा।
धनहा धनदा धन्वी धनुर्हस्ता धनुःप्रिया।
धरणी धैर्यरूपा च धनस्था धनमोहिनी।
धीरा धीरप्रिया धारा धाराधारणतत्परा।
धान्यदा धान्यबीजा च धर्माधर्मस्वरूपिणी।

धाराधरस्था धन्या च धर्म्मपुञ्जनिवासिनी ।
धन्या च प्रियकन्या च धन्यलोकैर्निसेविता ।
धर्म्मार्थकाममोक्षाङ्गी धर्म्मार्थकाममोक्षदा ।
धाराधारा धुरीशा च धवला धवलामुखी ।
धरा च धामरूपा च ध्रुवा ध्रौव्या ध्रुवप्रिया ।
धनेशी धारणास्था च धर्म्मनिन्दाविनाशिनी ।
धर्म्मतेजोमयी धर्म्मा धैर्य्योग्रभगमोहिनी ।
धारणा धौतवसना धुस्तूरफलभोगिनी । ७००
नारायणी नरेन्द्रस्था नारायणकलेवरा ।
नरनारायणप्रीता नीता नयनमोहिनी ।
निला नापितकन्या च नयनस्था नरप्रिया ।
नाम्नी नामप्रिया नारा नारायणसुता नवा ।
नवीननायकप्रीता नव्या नवफलप्रिया ।
नवीनकुसुमप्रीता नवीननीरजानुजा ।
नारी निम्नस्थिता निद्रा नन्दिनी नन्दिकन्यका ।
नवपुष्पमहाप्रीता नवपुष्पसुगन्धिका ।
नन्दनस्था नन्दकन्या नन्दमोक्षप्रदायिनी ।
नमिता नाम भेदा च नाम्ना भुवनमोहिनी ।
नवबुद्धिप्रिया नैका नाकस्था नाककन्यका ।

नवपुष्पमहाप्रीता नवपुष्पसुगन्धिका ।
निद्राहीना नवोल्लासा नाकस्थानप्रदायिनी ।
निम्बवृक्षास्थिता निम्बा नानावृक्षनिवासिनी ।
नाद्यातीता नीलवर्णा नीला नीलसरस्वती ।
नभःस्था नायकप्रीता नायकप्रियकामिनी ।
नैकवर्णा निराहारा निरीहा नीरजप्रिया ।
निम्ननाभिप्रियाकारा नरेन्द्रहस्तपूजिता ।
नलस्थिता नलप्रीता नलराजकुमारिका ।
परेश्वरी परानन्दा परापरविभेदिका ।
परमा परचक्रस्था पार्वती पर्वतप्रिया ।
परमेष्ठी पद्ममाला पुष्पमाल्यप्रिया परा ।
पराप्रिया प्रीतिदात्री प्रीतिप्रथमकारिणी ।
प्रथमा प्रथमप्रीता पुष्पगन्धप्रिया पला ।
पौर्णी पानरता पीना पीनस्तनसुशोभना ।
पयःपानरता पूषा पाशवस्था पशुप्रिया ।
पललानन्दवासिन्धा पलालधूमरूपिणी ।
पलाशपुष्पसंकाशा पलाशपुष्पमालिनी ।
प्रेमभूता पद्ममुखी पद्मरागसुमालिनी ।
पद्ममाला पापहरा पतिप्रेमविलासिनी ।

पञ्चाननमनोहारी पञ्चवक्त्रप्रकाशिका । ८००
फलमूलाशना फाली फलदा फाल्गुनप्रिया ।
फाल्गुनाग्रप्रिया फल्वी फल्गुकन्या फलोन्मुखी ।
फेतकारीतन्त्रमुख्या च फेतकारगणपूजिता ।
फेरवी फेरवसुता फलभोगोद्भवा फला ।
फलश्रीः फलदासक्ता फाल्गुनानन्ददायिनी ।
फणिभोगातुरा फेना[१] फुलाम्भोजनिवासिनी ।
वसुदेवगृहस्था च वासवी वीरपूजिता ।
विश्वभक्ता बिधुसुता बुधकारी बुधफलप्रदा ।
बृहती बृहस्पतिसुता वाचस्पतिवरप्रदा ।
वेदाचारा वैद्यपरा व्यासवक्त्रस्थिता विभा ।
वैयघ्रा वैयडास्था च वंशीवदनपूजिता ।
वक्रकान्ता वक्रगतिर्वदरीवंशवर्द्धिनी ।
भारती भारतश्रीदा भवपत्नी भवात्मजा ।
भवानी भाविनी भीमा भिषक्भार्या भुवि स्थिता ।
भूर्भुवःस्वस्वरूपा च भूपार्त्तिभेकनादिनी ।
भौमी भोगवती भीतिर्भङ्गदा भंगहारिणी ।
भर्गा भगवती भाग्या भगीरथनमस्कृता ।
भगमाला भूतनाथेश्वरी भार्गवपूजिता ।

(१) फेना ।

भृगुवंशा-भीतिहरा भूमिर्भुजग-हारिणी ।
भालचन्द्रा भलवाणा भवभूतिर्विभूतिदा ।
मकरस्था मत्तगतिर्मदमत्ता मदप्रिया ।
मदिराष्टादशभुजा मदिरामत्तगामिनी ।
मदिरा सिद्धिदा मध्या मदान्तर्गत सिद्धिदा ।
माध्वी मधुमती सिद्धिर्मधुदानरता मतिः ।
मारिणी मन्त्रचैतन्या महाकालेशवल्लभा ।
मनसा मानसचरा मीनामीनप्रियाम्बुना ।
मांसप्रिया मांसभक्षा मांसरक्तासवप्रिया ।
मीनभक्षा मीनरूपा मुद्रा मुद्राप्रिया मुदा । ६००
मूसला मुक्तिदा मूर्त्ता मूकीकरणतत्परा ।
मृगार्त्ता मृगतृष्णा च मेषभक्षणतत्परा ।
मैथुनानन्दसिद्धिश्च मैथुनाह्लादसिद्धिदा ।
महालक्ष्मी भैरवी च माहेन्द्रपीठनायिका ।
मञ्चस्था माधवीमुख्या महादेवमनोरमा ।
यशोदा याचना याम्या यमराजप्रिया यमा ।
यशोराशिविभूषाङ्गी यतिप्रेमकलावती ।
रमणी रामपत्नी च रिपुहा रीतिमध्यगा ।
रुद्राणी रूपदा रूपा रूपसुन्दरधारिणी ।

रेतःस्था रेतसः प्रीता रेतःस्थाननिवासिनी ।
रैन्यदेवसुता रैन्या रैपुवर्गान्तकप्रिया ।
रोमावलीन्द्रजननी रोमकूपजगद्गुता ।
रौप्यवर्णा रौद्रवर्णा रौप्यालङ्कारभूषणा ।
रौद्री रौकासुनिर्म्माणा हारालङ्कारभूषणा ।
रङ्गिणी रङ्गरागस्था रान्तराङ्कि कुलेश्वरी ।
लक्ष्मीर्लाङ्गलहस्ता च लाङ्गली कुलकामिनी ।
लिपिरूपा लीढपादा लूतातन्तुस्वरूपिणी ।
लुम्पन्ती लेलिहा लीला लोमशप्रियसिद्धिदा ।
लौकिकी लौकिकी सिद्धिर्लङ्कानाथकुमारिका ।
लक्ष्मणा लक्ष्महीना च लप्रिया लान्तमध्यगा ।
विवसा वसनावेशा विवस्वतकुलकन्यका ।
वातस्था वातरूपा च वेत्रमध्यनिवासिनी ।
श्मशानभूमिमध्यस्था श्मशानसाधनप्रिया ।
शवस्था शवसिद्धार्थी शववदासशोभिता ।
शरणागतपाल्या च शिवकन्या शिवप्रिया ।
षट्चक्रभेदिनी षोढान्यासजालहृदासना ।
सन्ध्या सरस्वती सूक्ष्मा सूर्य्यगा सारदासती ।
हरिप्रिया हया हाला लावमध्यस्था क्षमा क्षुधा ।

वेनहा सिद्धिदात्री च अम्बिका अपराजिता।
आद्या इन्द्रप्रिया ईशा उमा ऊढा ऋतुप्रिया।
ऋवर्णा लृस्वरावीजा लृकारानादिशुद्धिदा।
एकादशीव्रतस्था च ऐन्द्री ओषधिसिद्धिदा।
औपकारी अंशुरूपा अस्त्रवीजप्रकाशिनी। १०००

इत्येतत कथितं नाथ कुमारीणां सुमंगलम।
त्रैलोक्यफलदं नित्यं स्तोत्रसहस्रकम।
महास्तोत्रं धर्म्मसारं धनधान्यसुतप्रदम।
सर्व्वविद्याफलोल्लासं भक्तिमान यः पठेत सुधीः।
सर्व्वदा च दिवारात्रौ स भवेन्मुक्तिमार्गगः।
सर्व्वत्र जयमाप्नोति वीराणां वल्लभो भवेत।
सर्व्वे देवा वशं यान्ति वशीभूताश्च मानवाः।
ब्रह्माण्डे ये च संशान्ति ते तुष्टा नात्र संशयः।
ये वसन्ति च भूलोके देवतुल्यपराक्रमाः।
ते सर्व्वे भृत्यतुल्याश्च सत्यं सत्यं न संशयः।
ये वसन्ति च भूर्लोके देवतुल्यपराक्रमाः।
ते सर्व्वे भृत्यतुल्याश्च सत्यं सत्यं कुलेश्वर।
अकस्मात सिद्धिमाप्नोति होमेन यजनेन च।
जाप्येन कवचाद्येन महास्तोत्रार्थपाठतः।

153

विनायज्ञै र्विना जाप्यै र्विना होमैर्लभेत फलम्।
यः पठेत स्तोत्रकमलमष्टोत्तरसहस्रकम्।
तस्य शान्ति र्भवेत क्षिप्रं कन्यास्तोत्रादिपाठतः।
वारत्रयप्रंपाठेन राजानं वशमानयेत।
वारैकपाठतो मन्त्री धर्म्मार्थकाममोक्षभाक।
त्रिवारं प्रपठेद्विद्वान् यदि पुत्रं समिच्छति।
वारत्रयं क्रमेणैव वारैकं क्रमतोऽपिवा।
पठित्वा धनरत्नानामधिपः सर्व्ववित्तगः।
त्रिजगन्मोहयेन्मन्त्री वत्सराद्धप्रपाठतः।
वत्सरं व्याप्य यदिवा भक्तिभावेन यः पठेत।
चिरजीवी खेचरत्वं प्राप्य योगी भवेन्नरः।
महादूरस्थितं वर्णं पश्यति स्थिरमानसः।
महिलामण्डले स्थित्वा शक्तियुक्तः पठेद्यदि।
स भवेत साधकश्रेष्ठः क्षीरकल्पद्रुमो भवेत।
सर्व्वदा यः पठेन्नाथ भावोद्धतकलेवरः।
दर्शनात स्तम्भनं कर्त्तुं क्षमो भवति साधकः।
जलस्तम्भानिलस्तम्भवह्निस्तम्भादिसिद्धिभाक।
वायुवेगी महावाग्मी वेदज्ञो भवति ध्रुवम्।
कविनाथो महाविद्यावल्लभः पण्डितो भवेत।

सर्व्वदेशाधिपो भूत्वा देवीपुत्रः स्वयं भवेत् ।
कान्तिं श्रियं यशोरद्धिं प्राप्नोति बलवान् यतिः ।
अष्टसिद्धियुतो नाथ यः पठेदात्मसिद्धये ।
उज्जटे रणमध्ये च पर्व्वते घोरकानने ।
वने वा प्रेतभूमौ च शवोपरि महारणे ।
ग्रामभंगे गृहे वापि शून्यागारे नदीतटे ।
गंगागर्भे महापीठे योनिपीठे गुरोर्गृहे ।
धान्यक्षेत्रे देवगृहे कन्यागारे कुलालये ।
प्रान्तरे गोष्ठमध्ये वा राजादिभयहीनके ।
निर्भयादिषु देशेषु शिवालिङ्गालयेऽथवा ।
भूगर्त्ते चैकलिंगे वा शून्यदेशे निराकुले ।
अश्वत्थमूले विल्वे वा कुलवृक्षसमीपके ।
अन्येषु सिद्धदेशेषु कुलरूपी च साधकः ।
दिव्यो वा वीरभावस्थो जप्त्वा कन्याकुलाकुलैः ।
कुलद्रव्यैश्च विविधैः सिद्धद्रव्यैश्च साधकः ।
मांसासवेन जुहुयात् मदुक्तेन रसेन च ।
हुतशेषं कुलद्रव्यं ताभ्यो दद्यात् स्वसिद्धये ।
तासां मुखस्थमानीय जुहुयाद्धृकर्त्तपंकजे ।
घृणालज्जाविनिर्मुक्तः साधकः स्थिरमानसः ।

×हृत्पद्मपंकजे

पिबेन्मांसासवं मन्त्री सदानन्दो महाबली।
महामांसाष्टकं ताभ्यो मदिराकुम्भपूरितम्।
तारोमाया रमावह्निजायामन्त्रं पठन् सुधीः॥
निवेद्य विधिनानेन पठित्वा स्तोत्रमंगलम्।
स्वयं प्रसादं भुक्त्वा हि सर्व्वविद्याधिपो भवेत्।
शूकरच्छागमांसेन पीनमीनेन मुद्रया।
महासवघटेनापि दत्वा पठति यो नरः।
ध्रुवं सः सर्व्वगामी स्याद्विना होमेन पूजया।
रुद्ररूपी भवेन्नित्यं महाकालात्मको भवेत्।
सर्व्व पुण्यफलं नाथ तस्मात् प्राप्नोति साधकः।
वीराब्धिमलकोऽमेषो विपद्व्यापी च योगिराट्।
भक्त्यानन्दं दयासिन्धुं निष्कामत्वं लभेत ध्रुवम्।
महाशत्रुपीडने च महाशत्रुभयार्द्दिते।
वारैकपाठमात्रेण शत्रूणां वधमानयेत्।
शत्रून् संमर्दयेत् त्विप्र मन्धकारं यथा रविः।
उच्चाटने मारणे च भये घोरतरे रिपोः।
पठनाद्धारणात् मर्त्यो देवा वा राक्षसादयः।
प्राप्नुवन्ति झटिति शान्ति कुमारीनाम पाठतः।
पुरुषो दक्षिणे बाहौ नारी वामकरे तथा।

ध्वा पुत्रादिसम्पत्तिं लभते नात्र संशयः।
समाज्ञया मोक्षमुपैति साधको-
गजान्तकं नाथ सहस्रनामकम्।
पठेन्मनुष्यो यदि भक्तिभावतः
तदा हि सर्व्वत्र फलोदयं लभेत्॥ १॥
मोक्षं सत्फलभाविनां स्तववरं सारं परानन्ददम्।
ये नित्यं हि मुदा पठन्ति विफलध्वंसार्थचिन्ताकुलाः।
ते नित्याः प्रभवन्ति कीर्तिकमले श्रीरामतुल्यो जयी
कन्दर्पायुततुल्यरूपगुणवान् क्रोधे च रुद्रोपमः॥ २॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्य्युपचर्य्याविन्यासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये अष्टोत्तरसहस्रनाममङ्गलोल्लासो दशमः पटलः॥ ०॥ ० —— १०॥

आनन्दभैरव्युवाच।
अथातः संप्रवक्ष्यामि दिव्यभावादिनिर्णयम्।
समाश्रित्य महारुद्रो भुवनेश्वरनामधृक्।
यं ज्ञात्वा कमलानाथो देवतानामधीश्वरः।
चतुर्वेदाधिपो ब्रह्मा साक्षात् ब्रह्मसनातनम्।
बटुको मम पुत्रश्च शक्रः स्वर्गाधिदेवता।
अष्टसिद्धियुताः सर्व्वे दिक्पालाः खेचरादयः।

तत् प्रकारं महादेव आनन्दनाथ भैरव।
सुखानन्द हदानन्द ज्ञानानन्द दयामय।
शृणुष्वैकमना नाथ यदि त्वं सिद्धिमिच्छसि।
मम प्रियानन्दरूप यतो मे त्वं तनुस्थितः।
त्रिविधं दिव्यभावञ्च वेदागमविवेकजम्।
वेदार्थमधमं प्रोक्तं मध्यमञ्चागमोद्भवम्।
उत्तमं सकलं प्रोक्तं विवेकोल्लाससम्भवम्।
तत्रैव त्रिविधं भावं दिव्यवीरपशुक्रमम्।
दिव्यं विवेकजं प्रोक्तं सर्व्वसिद्धिप्रदायकम्।
उत्तमं तद्विजानीयात् आनन्दघनसागरम्।
मध्यमञ्चागमोल्लासं वीरभावक्रियान्वितम्।
वेदोद्भवं फलार्थं च पशुभावं हिताधनम्।
सर्व्वनिन्दासमायाप्तं भावानामधमं पशोः।
उत्तमे उत्तमं ज्ञानं भावसिद्धिप्रदं नृणाम्।
मध्यमे मधुमत्याश्च सतकुलागमसंभवम्।
अकालमृत्युहरणां भावानामतिदुर्लभम्।
वीरभावं विना नाथ न सिध्यति कदाचन।
अधमे अधमाख्या निन्दार्थवाचकं सदा।
अतिनिन्दां न करोति तदा तत् फलमाप्नुयात्।

पशुभावेऽपि सिद्धिः स्यात यदि वेदं सदाभ्यसेत ।
वेदार्थचिन्तनं नित्यं वेदपाठध्वनिप्रियम ।
सर्व्वनिन्दाविरहितं हिंसालस्यविवर्ज्जितम ।
लोभमोहकामक्रोध मदमात्सर्य्यवर्ज्जितम ।
यदि भावस्थितो मन्त्री पशुभावेऽपि सिद्धिभाक ।
पशुभावं महाभावं ये जानन्ति महीतले ।
किमसाध्यं महादेव श्रमाभ्यासेन यान्तितत ।
श्रमाधीनं जगत सर्व्वं श्रमाधीनाश्च देवताः ।
श्रमाधीनं महामन्त्रं श्रमाधीनं परं तपः ।
श्रमाधीनं कुलाचारं पशुभावोपलक्षणम ।
वेदार्थज्ञानमात्रेण पशुभावं कुलप्रियम ।
स्मृत्यागमपुराणानि वेदार्थविविधानि च ।
अभ्यसेत सर्व्वशास्त्राणि तत्वं ज्ञात्वा तु बुद्धिमान ।
पलालमिव धान्यार्थी सर्व्वशास्त्राणि संत्यजेत ।
ज्ञानी भूत्वा भावसारमाश्रयेत साधकोत्तमः ।
वेदवेदक्रिया कार्य्या मदुक्तवचनादृतः ।
पशूनां श्रमदाहानामितिलक्षणमीरितम ।
विवेकसूत्रसंज्ञा सा कार्य्या सुदृढ़चेतसाम ।
आगमार्थक्रिया कार्य्या मतकुलागमचेष्टया ।

वीराणामुद्धतानां च महादीनानुगायिनाम् ।
महेशशक्तिकुलतत्त्वानामिति लक्षणमीरितम् ।
सर्वत्र मम भावानां भावमात्रं हि साधनम् ।
सर्वत्र मत्पदाम्भोजसम्भवं हि चराचरम् ।
दृष्ट्वा यत्कुरुते कर्म्म चाखण्डफलसिद्धिदम् ।
अखण्डज्ञानचित्तानां इति भावं विवेकिनाम् ।
निर्म्मलानन्ददिव्यानामिति लक्षणमीरितम् ।
दिव्ये तु त्रिविधं भावं यो जानाति महीतले ।
न नश्यति महावीरः कदाचित साधकोत्तमः ।
क्रमेण दिव्यभावादिमाश्रित्य साधयेद्यदि ।
दिव्यभावे महासिद्धिं प्राप्नोति साधकोत्तमः ।
दिव्यभावं विना नाथ मत्पदाम्भोजदर्शनम् ।
य इच्छति महादेव समूढः साधकः कथम् ।
पशुभावं प्रथमके द्वितीये वीरभावकम् ।
तृतीये दिव्यभावं च दिव्यभावं त्रयं क्रमात् ।
तत्प्रकारं महादेव त्रैलोक्यपरिपालनम् ।
भावत्रयविशेषज्ञः षडाधारस्य भेदनः ।
पञ्चतत्त्वार्थभावज्ञो दिव्याचाररतः सदा ।

× निर्म्माणानन्ददिव्यानामिति लक्षणमीरितम् ।

स एव भवति श्रीमान सिद्धानामपि पारगः।
शिववद्विहरेल्लोके अष्टैश्वर्य्यसमन्वितः।
सर्व्वत्र शुचिभावेन आनन्दघनसाधनम।
प्रातःकालादिमध्याह्नकालपर्य्यन्तधारणम।
भोजनं चोक्तद्रव्येण संजयादिक्रमेण च।
यः साधयति संसिद्धो दिव्यभावे पशुक्रमात।
दिव्यभावे वीरभावं वदामि तत पुनः शृणु।
मध्याह्नादिकसन्ध्यान्तं शुचिभावेन साधनम।
जापनं धारणं वापि चित्तमाधाय यत्नतः।
एकान्तनिर्जने देशे सिद्धो भवति निश्चितम।
तत कालं वीरभावार्थं भावमात्रं हि साधनम।
भावेन लभते सिद्धिं वीरादन्यत्र कुत्रचित।
रात्रौ गन्धादिसम्पूर्णताम्बूलपूरिताननः।
विजयानन्दसम्पूर्णो जीवात्मपरमात्मनोः।
ऐक्यं चित्ते समाधाय आनन्दोद्रेकसम्भ्रमः।
यो जपेत सकलां रात्रिं गतभीर्निर्जने गृहे।
स भवेत कालिकादासो दिव्यानामुत्तमोत्तमः।
एवं भावत्रयं ज्ञात्वा यः कर्म्म साधयेत्ततः।
अष्टैश्वर्य्ययुतो भूत्वा सर्व्वतो भवति ध्रुवम।

भावत्रयाणां मध्ये तु पुरुषार्थं सिद्धिनिर्णयम् ।
शृणु नाथ प्रवक्ष्यामि सावधानोऽवधारय ।
अकस्मात सिद्धिमाप्नोति ज्ञात्वा संकेतलाञ्छितम् ।
यो जानाति महादेव तस्य सिद्धिर्न संशयः ।
द्वादशे पटले सूक्ष्मे संकेतार्थं वदामि तत ।

आनन्दभैरव्युवाच ।

एकादशेच पटले शुद्धपूजार्थ निर्णयम् ।
भावेन लभते सर्वं भावाधीनमिदं जगत ।
भावं विना महाकाल न सिद्धिर्जायते क्वचित ।
पशुभावत्रयाणांच अरुणोदयकालतः ।
दशदण्डाश्रितं कालं पूजार्थं केवलं प्रभो ।
चक्रं द्वादशराशेश्च मासे द्वादशकस्य च ।
दशदण्डे विजानीयाद्भावाभावं विचक्षणः ।
अनुलोमविलोमेन पञ्चस्वरविभेदतः ।
बाल्यकैशोरसौन्दर्यं यौवनं वृद्धसंज्ञकम् ।
अस्तामितं क्रमाज्ज्ञेयो विधिपञ्चस्वरस्वयम् ।
स्वकीयनासिकाग्रस्तं पञ्चमं परिकीर्त्तितम् ।
यन्नासापुटमध्ये तु वायुर्भ्रमति नित्यशः ।
तन्नासापुटमध्ये तु भावाभावं विचारयेत ।

आकाशं वायुरूपं हि तैजसं वारुणं प्रभो।
पार्थिवं क्रमशो ज्ञेयं बाल्यास्तादिक्रमेण तु।
वामोदये शुभा वामा दक्षिणे पुरुषः शुभः।
वायूनां गमने ज्ञेयं गगनावधिरेव च।
केवलं मध्यदेशे तु गमनं पवनस्य च।
तदाकाशं विजानीयात बाल्यभावं प्रकीर्त्तितम।
तिर्य्यग्गतिस्तु नासाग्रे वायोरुदयमेव च।
केवलं भ्रमणं ज्ञेयं सर्व्वमङ्गलमेव च।
किशोरं तद्विजानीयाद्वायौ तिर्य्यग्गतौ विभो।
केवलोर्द्ध्व नासिकाग्रे वायुर्गच्छति दण्डवत।
तत्तैजसं विजानीयात तेजसा बलवान भवेत।
यौवनं तद्विजानीयात कर्म्मसिद्धिर्भवेद्ध्रुवम।
यदाधाप्य गच्छतीह नासापुटमनाकुलम।
जलोदयं विजानीयात तदा व्यामोहमेव च।
तद्वृद्धगतभावं च विलम्बोऽधिकचेष्टया।
प्राप्नोति परमां प्रीतिं वारुणाख्योदये रुजम।
यदाधो गच्छति क्षिप्रं किञ्चिदूर्द्ध्वमगोचरम।
यदा करोति प्रश्वासं तदा रोगोऽमलोदयः।
पृथिव्या रूपं भार्य्यं रोगातपप्रपीड़नम।

163

अस्तमितं महादेव अनुलोमविलोमतः।
पवनो गच्छति क्षिप्रं वामदक्षिणभेदतः।
वामनासापुटे याति पृथिवीजलमेव च।
सदा फलाफलं दातुमुदिताकुलमण्डले।
तयोर्वै वायवीशक्तिः फलभाग्ये तदालभेत्।
यद्येवं वामभागे तु वामायाः प्रश्नकर्मणि।
यदि तत्र पुमान् प्रश्नं करोति वामगामिने।
तदा रोगमवाप्नोति कर्मणालभते ध्रुवम्।
यदि वायुरयो वामे दक्षिणे पुरुषः स्थितः।
तदा फलमवाप्नोति द्रव्यागमनदुर्लभम्।
अकस्मात् द्रव्यहानिः स्यात् मनोगतफलापहम्।
सुहृद्भंगं विवासं च मिला मित्रोदये शुभम्।
केवलं वरुणास्येन पुरुषो दक्षिणे शुभम्।
अशुभे पृथिवीदक्षे भेदोऽयं वरदुर्लभम्।
सदोदयं दक्षिणे च वायोस्तेजस एव च।
आकाशस्य विजानीयात् शुभाशुभफलं प्रभो।
यदि भाग्यवशादेव वायोर्मन्दागतिर्भवेत्।
दक्षनासामध्यदेशे तदा वामोदयं शुभम्।
तदा वामे विचारं च वायुतेजोऽम्बरस्य च।

शालोदयं विजानीयात् मिश्रे शानैः स्वरे भयम्।
एवं स्वभुवनागारे यदि गच्छति वायवी।
तस्मिन् काले पुमान् दद्याद्दक्षभागस्य संमुखः।
तदा कन्यादानफलं यथा प्राप्नोति मानवः।
तदा वायुप्रसादेन प्राप्नोति धनमुत्तमम्।
देशान्तरशुभावर्त्ता आयाति पुनसम्पदः।
बाल्यादिकं भावत्रयं राशिभेदे शुभं दिशेत्।
चतुश्चक्रे फलं तस्य राशिद्वादशचक्रके।
सूक्ष्मफलं विजानीयात् चक्रं नाम शृणु प्रभो।
आज्ञाचक्रं कामचक्रं फलचक्रं च सारदम्।
प्रश्नचक्रं भूमिचक्रं स्वर्गचक्रं ततः परम्।
तुलाचक्रं राशिचक्रं षट्चक्रं त्रिगुणात्मकम्।
सारचक्रमुल्काचक्रं मृत्युचक्रं क्रमात् प्रभो।
षट्कालं चात्र जानीयादनुलोमविलोमतः।
सर्व्वचक्रे स्वरज्ञानं सर्व्वत्र वायुसङ्गतम्।
सर्व्वप्रश्नादिसंचारं भगवन् ज्ञायते यदि।
तदा तद्दण्डमानं च ज्ञात्वा वाय्युदयं बुधः।
कुर्यात् प्रश्नविचारं च यदि कीर्त्तिमिहेच्छति।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्ना-

165

र्थबोधनिर्णये पशुभावविचारे सारसंकेते सिद्धमन्त्रप्रकरणे भैरवी-
भैरवसंवादे एकादशः पटलः ॥११॥००॥०—

श्रीआनन्दभैरव्युवाच

तद्वामसन्धिदेशस्थमष्टमांकमधो लिखेत्।
तदधःसन्धिदेशस्थं सप्तमांकं महेश्वर।
तद्दक्षिणे सन्धिभावे षडंकं कामचक्रके।
तद्दक्षिणोर्द्धसन्धौ च आकाशं सर्वशून्यकम्।
शून्याधःकामगेहे च पञ्चापि विलोमतः।
तद्वामकोणगेहे च वेदांकं विलिखेत्तबुधः। तदूर्द्धवामकोणे च तृतीयांकं लिखेत्ततः। तदूर्द्धकोणगेहे च युग्मांकं विलिखेत्ततः।
तद्दक्षिणे गृहे चैकमंकवर्णं शृणु प्रभो।
वसुभावं शून्यभावे सप्तभावं च शून्यकम्।
एतन्मध्ये नास्तिवर्णं कोणांकं च सवर्णकम्।
टतवर्गौ ऋॠ लिखेत् शारं शून्याध एव च।
वेदांकस्थौ कचवर्गौ एऐकारसमान्वितौ।
ततो यांकस्थितं वर्णं यादिक्षान्तटवर्गमौं।
तपवर्गौ युगांकस्थौ ओकारं सावधानतः।
विलिखेद्दक्षिणे तस्य गेहे चैकांकमध्यके।
उयुगं तपवर्गौ च अःकारं युग्मपूर्वके।

एतच्चक्रं कामचक्रं प्रश्नकामप्रदं ...
वामावर्त्तेन गणयेद्दशकोणस्थवर्णकान्।
अनुलोमविलोमेन पञ्चस्वरादिनामतः।
यस्मिन् गेहे स्वीयनाम प्राप्नोति वेदपारगः।
तद्गृहावधि प्रश्नार्थं गणयेद्गृहसिद्धये।
नवग्रहनवस्थानं वर्णं ज्ञात्वा सुबुद्धिमान्।
बाल्यभावादिकं ज्ञात्वा यत्र ग्रहस्थितिर्भवेत।
तन्नक्षत्रं समानीय वाराधिकारमानयेत।
विना त्रिकोणयोगेन षट्कोणं लिखेद्बुधः।
तन्मध्ये अष्टकोणं च भित्त्वा वेदगृहान्तरम्।
तन्मध्ये चापि षट्कोणं तन्मध्ये च त्रिकोणकम्।
क्रमेण विलिखेद्वर्णं दक्षिणावर्त्तयोगतः।
ऊर्द्ध्ववामदेशभागे अ आ इ च कवर्गकम्।
तद्दक्षिणे उऊयुगं टवर्गं च लिखेद्बुधः।
दक्षपार्श्वे अधोभागे ऋयुगं ऌतवर्गकम्।
तदधः ॡएऐ रूपं पवर्गं च लिखेद्बुधः।
तद्वामपार्श्वभागे च ओ औ यरलवान् लिखेत।
शेषगेहे लिखेदंअः शादिक्षान्तं हि षड्गृहे।
मध्यान्तमादिकोणे च एकाङ्कं सर्व्वमुत्तमम्।

रुद्राग्निमूर्तिममलं अग्निकोणे लिखेद्बुधः।
यजमानः पशुपतिमूर्तिं षष्ठं च दक्षिणे।
महादेवसोममूर्तिं सप्तमं नैर्ऋते लिखेत्।
जलमूर्तिं भवं युग्मं पश्चिमे विलिखेद्बुधः।
उग्रंवीरं वायुमूर्तिं वायुकोणे चतुर्थकम्।
भीमरूपाकाशमूर्तिं पञ्चमञ्चोत्तरे लिखेत्।
ईशानसूर्य्यमूर्तिं च ईशाने अष्टमं लिखेत्।
अधः षट्कोणमध्ये च षट्कोणं विलिखेत्ततः।
ऊर्द्ध्वकोणे ग्रीष्मकालं शिशिरं चापि दक्षिणे।
वर्षाकालमधस्तस्य सर्व्वाधश्च वसन्तकम्।
शरत्कालं पंचकोणे शीतकालं च षष्ठके।
त्रिकोणे चापि तन्मध्ये वह्निरूपं रकारकम्।
लिखित्वा धारयेन्मन्त्री वर्णावेदांकवह्निभिः।
एतच्चक्रं महासूक्ष्मं फलचक्रं च सारकम्।
अधुनाकालनाथेश प्रश्नचक्रं पुनः शृणु।
विना ज्ञानेन यस्यैवं प्रश्नज्ञानं न जायते।
यदि प्रश्नचक्रभावं जानाति साधकोत्तमः।
तदा निजफलं ज्ञात्वा सिद्धिमाप्नोति निश्चितम्।
षट्कोणं कारयेन्मन्त्री विना त्रिकोणसाधनैः।

तन्मध्ये च चतुष्कोणं तन्मध्ये सादिवर्णकान्।
लिखित्वा विलिखेत्तत्र षडङ्गं मध्यदेशतः।
षडङ्गं दापयेन्मन्त्री दीर्घदीर्घक्रमेण च।
तदग्रे षड्गृहं कुर्यात्तत्रांकारणान् लिखेत्सुधीः।
ऊर्ध्वं प्रथमगेहे च कवर्गं विलिखेद्बुधः।
तद्दक्षिणे मन्दिरे च चवर्गं विलिखेद्बुधः।
टवर्गं दक्षिणे चाथः सव्याधस्तु तवर्गकम्।

169

तद्वाममन्दिरे मन्दिरे नाथ पवर्गं वर्णमङ्गलम्।
तदूर्ध्वे यादिवर्णं च दक्षिणावर्त्तयोगतः।
अकारादिस्वरान्तं तन्मन्दिरे विलिखेद्बुधः।
यावत स्वरस्थितिर्याति तावत्कालं विचारयेत।
मेषादिराशिसद्भावं वर्गलेखनमानतः।
अनुलोमविलोमेन लिखेत षष्ठमन्दिरे।
यद्देहे साध्यनाम चास्ति नाथ स्वरादिकम्।
एकत्रीकत्यहरणात् यदङ्कं प्राप्यते वरम्।
षड्ङ्गेन ततो नाथ हरेदनलसंख्यया।
यदंकं प्राप्यते तत्र सवाप्तितद्दशास्य च।
आज्ञाचक्रफलं सिद्धं विद्यानाथ वदामि तत्।
येन विज्ञातमात्रेण सर्वज्ञो भवति ध्रुवम्।

अकस्मात सिद्धिमाप्नोति विद्यारत्नं वदामि तत।
रव्यादि सप्तवारं च कृते मद्रविवर्जनम।
शन्यादि सप्तवारं च त्रेतायां सौख्यवर्द्धनम।
गुर्व्वादि सप्तवारं च द्वापरे धर्मसाधनम।
शुक्रादिवासरे शश्च कलौ योगफलप्रदः।
अतः शुक्रादिपर्य्यन्तं गणानीयं विचक्षणैः।
गणयेत सप्तवारं च मध्ये चतुर्द्दले सुधीः।
पूर्व्वादिक्रमतो वारान गणयेत मद्रवित्तमः।
निजवारो यत्र पत्रे समास्ति तद्दलं च तत।
तद्वर्णान समानीय वस्तुभेदं समानयेत।
सामान्य फलमूलं च वदामि पत्रभेदतः।
ज्ञात्वा शुभाशुभं मन्त्री आज्ञाचक्रं विचारयेत।
तत फलाफल महात्म्यं शृणु संकेतपारिगत।
दले पूर्व्वभागे अकारादयइन्दु स्फुटे राज्यलाभं लकान्तशब्दम।
समानार्थ भावं विशिष्टार्थयोगं कतदीमयुक्तं तथा पुत्रलाभम॥
दयायुक्तभूपाश्रयत्वं जयत्वं समाप्नोति मर्त्यो विवाहं सुवाहुम।
सुखं नाथलोकानुरागं सुभोगं विभाधारकांगं समाप्नेरणादिम॥
पार्श्वे दलिणपत्रके प्रियपदामोदापहं भास्वरम
नानालक्षणादुःखदं शुचिपदाद्यान्दोलितं स्थैर्यकृत्म।

माहेन्द्रामृतनामयोगहननं साद्याय्यमारोपणम्।
चिन्तानां परिवञ्चलं खलगुणाह्लादेन सामोदितम्।२॥
पत्रेऽर्थलाभं यदि चाध एव प्रगच्छति क्रूरखगप्रतापः।
तथापि हन्तुं न च वर्गमध्ये त्वमः सुसिद्धं भजते दशादि॥
रसार्थप्रपूर्णं कुरुते यदि स्याद्धर्मादि चाधो ग्रहमध्यभागे।
स्वकीयइन्द्रप्रियवद्धवेद्धुवं मनोगतं सौख्यविवर्द्धनं च॥
शत्रूणां हननं तदाकुलगतं सञ्चारवार्तं सदा
रोगाणां परिमर्द्दनं प्रभुपदे भक्त्यार्थिनां ज्ञापनम्।
आह्लादं हृदयाम्बुजे सुतधनं तीर्थागमं शोकहम्
सूक्ष्मार्थं गणयेत्ततः प्रचपलावाग्देवतादर्शनम्॥३॥
आथर्व्वे पत्रमध्ये निवसति कमला कोमला राज्यदात्री
आगन्तव्यादिवार्त्तां कथयति सहसा सर्व्वदा मंगलानि।
नित्यावश्यं प्रतापं प्रियगणसहितं प्रेमभावाश्रयत्वम्।
नित्यं कान्ता मुखाम्भोरुहविमलमधुप्रेमपानाभिलाषम्॥४
मेषे त्वाप्तिमुपैति सिंह इषुभिः कुम्भेन तेषां फलम्।
लाभं कुञ्जरघातके सुव्रजतं चौरेण यद्यद्धतम्।
एवं कांश्यविहारणं प्रतिपले सूर्यो यदा तिष्ठति
प्रातःकालफलाफलं कथयति श्रीकेशरी मेषगः॥५
पश्चादेकपतं फलन्तु धनुषा व्याप्तं यदा भूतले

वित्तानां हरणं तदा जलगते मित्रस्य राज्यादिकम्।
दूरस्थादिकथागतादिसमयं शत्रोर्महापीडनम्
वाञ्छावर्गफलोदयं समुदयात् सूर्यस्य चागम्यते॥
शेषे चैव शते पले समुदितां कुम्भो महादुर्बली
दारिद्र्यस्य कथा कदा स्वविषयं विद्यार्थभूसञ्चयम्।
लाभं देशविदेशकार्य्यगमनं शीघ्रं धनाद्यागमम्
देवानां खलु दर्शनार्थकथनं व्यामोहसंनाशनम्।
वारे शुक्रे शनिगतादिने क्रूरराहौ च सूर्य्ये
नित्यं ज्ञानोदयनिजपथे आयुषां निर्णयं तत्॥
अष्टौवर्गानुदयति मुदा प्राप्य धीरो महत्वं
लोकोद्दासं प्रथमखचरे चायुषां प्रश्नमात्रम्॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने भावप्रश्नार्थबोधनिर्णये पाशवकल्पे आज्ञाचक्रसंकेते सिद्धमन्त्रप्रकरणे भैरवभैरवीसंवादे द्वादशः पटलः॥१२॥

आनन्दभैरव्युवाच।

आज्ञाप्रश्नार्थभावंच वर्णविन्यासनिर्णयम्
अधुना शृणु सर्व्वज्ञ भावज्ञानपरायण।
यदि मेषे स्वनक्षत्रं स्ववारसंयुतं शुभम्।
ज्ञात्वा शुभादिपत्रंच पलमानेन साधकः।

गणयेद्वर्णसारं च येन तत प्रश्ननिर्णयम् ।
पूर्व्वदले ककारस्य वर्णभेदं शृणु प्रभो ।
मनसि सुखसमूहं प्राणसौख्यार्थचिन्ता
वसनगमनलाभं प्रीतिपुत्रार्थयोग्यम् ।
स्थिरपदमपि देशे दर्शनं प्राणबन्धोः ।
सकलकलुषहानिश्चादिपत्रे ककारे ॥
सदानुनासिके सुखं सुखोत्वणस्य सेवनम्
सदाशिवे च भक्तिदं स्वकीयगेहसतफलम् ।
कलाधरस्य दृष्टिभिः प्रधानलोकपूजनं
हिताहितं न बाधते विवाहके विनाशनम् ॥
ऋकारं विपदांध्वंसं धैर्यविद्याविरोधनम् ।
व्याधिपीड़ा दुर्ज्जनानां पीड़ाप्रश्नं वदेत्तदा ।
उकारे वायुभावस्य वृथागमनमेव च ।
दारिद्र्यहानयो यान्ति दुरागमनदुर्लभम् ।
लृकारे द्रव्यप्रश्नं च शुभकार्य्ये गते भयम् ।
आशु धनं समाप्नोति प्राप्य निर्धनतां व्रजेत ।
पञ्चत्वाजिज्ञामनयेव सत्यं नित्यं सुखानामुदयाय चेष्टा ।
शत्रोर्विनाशाय हिताय बन्धोः पकारकूटे परचौरचेष्टा ।
मारीभीतिविरोधनं धनपतेरानन्दपुञ्जोदयम्

गोविद्याश्रियमाप्नुलाभविविधं कर्मार्थचिन्ताकुलम्।
कैवल्यादिसमापनं निजमनोदुःखापहं कामिनां
नानाभोगविनाशनं कनककौप्याराज्यप्रश्नं मके॥
वालस्य पीड्या दुःखी नराध्वंसिरपाश्रयम्।
मरणे गमने द्वीषी लौल्यं लेख्यं यचेरके।
हरिपूजाहरिध्यानं हरिपादाम्बुजे मतिः।
चौर्य्याहरणाद्रव्यस्य नहानिर्जन्महाहके।
आकारे तु तमोहानि मह्राशब्दे विनाशनम्।
आगतानां चहानिः स्यात पक्षपातं गतौ जयम्।
इषतौ निजगेहस्था उल्वणाव्याधिपीडनम्।
उतसाहध्वंसपूर्व्यं च पाठे पाण्डित्यमुल्वणम्।
दीर्घल्टकारवर्णे च लावण्यालोचनोत्टपः।
लज्जानष्टं हो मर्द्दिर्मित्रतुल्याप्रियो भवेत्।
दीर्घप्रणाव औकारे निराश्रयो न जीवति।
महदाश्रयमात्रेण सर्व्वचूर्णं करोति हि।
सिंहे कार्म्मुकमेघलग्नसमये नित्याश्रियं प्राप्नुयात,
कश्चिद्भाति पराक्रमी गतिमतां श्रेष्ठो भवेत कर्म्मणि।
कश्चिद्दोषकुलापहं नरपतेकृतसाहसंवर्द्धनम्।
क्रोधी नित्यपराक्रमी भवति सद्धीश्चाभिलासान्वितः॥

अथ वक्ष्ये महादेव वीराणामुत्तमोत्तमम् ।
सर्व्व शास्त्रार्थ भावज्ञ तत्वज्ञान परायण ।
दक्षिणास्य दलस्यापि वर्णभेदार्थ निर्गमम् ।
फलमत्यन्त निष्कर्षं वाञ्छा राज्य फलप्रदम् ।
कान्तो वीजे कमल निलया गेहभाग स्थिरा या
नानादेश भ्रमण भयदा नैव कुत्रापि सुस्था ।
चण्डोद्वेगापक्रमति खलानां च हानिः प्रवृद्धा
वाणी वश्या वसति वदने चक्रिणां ज्ञानयः स्युः ॥ १
चारु प्रभावस्य गणो गुरूणां भक्तिर्दृढा स्याद्गमनेषु चारु ।
तदागतानां नृपति प्रियाणां संप्रेरणं चारु फलं चकूटका ॥ २
ध्यानेषु कान्तावदनारविन्देषु षट्पदत्वं रमणीविलासम् ॥
आयुः दायोद्वेग विनाप्राकारणाम्
चारुर्येणां देशसुखं धनानाम ॥ ३
ढकारे धारणं देशे सुखं शेषे निशासुखम् ।
विदेशस्य धनादीनां स्यादागमनमुत्तमम् ।
दकूटमधनं विना भवति विघ्नहानिः सदा,
जयं स्वगृहकामिनी कमलनेत्रकान्ता यथा ।
सुसिद्ध करमेव हि प्रबल भावना[x]स्तो भवेत, भवेद्-
भगवती मानुषस्तु प्रश्नजिज्ञासने ॥

175

* ग्रसंगतम् ।

ख्यातं मुनिभिः फलं फलमयं काले रिपूणां सदा
लोकानां वशकारणं कुलवरो वेदागमे पारगः।
प्राप्नोति प्रियपुत्रकाञ्चनरथते रूतसाहसे कारणां
कार्ये दुर्जनपीड़नं भयसमूहानां विनाशं पके ॥१
यशसिवयसि तेजोवृद्धिरेवं यकूटे
समयफलदभूपीलासवृद्धिः समृद्धा।
यजनमपि सुराणां चौर्य्यमात्रं नभूयात
अतिशयधनवृद्धिः क्रैयविक्रैयकाले ॥२
शीतकाले धनप्राप्तिः स्वर्णरौप्यादिलाभकम।
पुत्रप्राप्तिः सुखप्राप्तिः शकूटे वदति ध्रुवम।
लक्ष्मीः प्रियधनं दातुमुदिता भूमिमण्डले।
जलेन जायते हानिर्लयं देवेन कूटके।
प्रश्नाद्यक्षरमित्यादि स्वरमूलं द्वियो नरः।
जिह्वासनं यदा कुर्य्यात तदा स्यादुत्कटं फलम।
श्रृणु तत्तत स्वरं नाथ एतत पत्रस्य भाजयम।
इकारकूटमंगले धनादिलक्षणान्वितो
विशेषधर्मलक्षणं धनं च चैत्रकं लभेत।
गतिप्रियं स्वदेवता स्वसम्पदे सदा सुखम
तथापि सूक्ष्मबुद्धिभिः परास्तमाकमोदरम॥३

ऋकारसमपराक्रियं परमभक्तसन्दर्शनम्
विदेशगमनं नहि प्रभवतीह राज्यं दया।
जगज्जनमतिप्रियं तरुणदोषसंमार्ज्जनम्
विकाररहितं सुखं सकललग्नऋग्वेदके॥ ४
ऋबीजे बहुसन्तोषं कामनाफलसिद्धिदम्।
वायूनां हरणं चैव प्राप्नोति नृपमाननाम्।
ऋमित्येकाक्षरे बीजे बीजभूते जगत्पते।
प्राप्नोति कन्यादानानि फलवस्त्रं च तैजसम्।
गोकन्या मकरे स्वगे खचरता सौन्दर्यलक्ष्मीर्भवेत्
शेषे कांचनलाभपुण्यमतुलं सन्तोषसारं गतः।
संसारे निजदारिका सुजनता बलादिकं संचयम्
सर्व्वं सञ्चयति प्रभो हितकरं प्रश्नार्थमाद्यक्षरे॥ ५
तृतीयदलमाहात्म्यं यद्यद्धर्मो विचारयेत्।
प्रश्नाद्यक्षरवर्णं वा नीत्वा च गगनं चरेत्।
तत्प्रकारं शृणु प्राणवल्लभ प्रेमधारग।
यज्ज्ञानात् प्रश्नसिद्धिः स्यात् अकालदंष्ट्रिणाम्।
दृष्ट्वा ज्ञात्वा भावराशिमुत्तमाधममध्यमम्।
लोकभावविधानज्ञो निजविद्यादिकं तथा।

४ प्रियम्।
† भक्तिमथ[illegible]दरके।

सर्व्वं विषयरूपेण भावसारं विचारयेत् ।
जबीजं मङ्गलं ज्ञेयं फलमत्यन्तभाग्यदम् ।
गतद्रव्यादिलाभंच तथा लोकवशं फलम् ।
ढकारकूटे कठिनं रिपूणां विद्रावणं धर्म्मविनाशकस्य ।
भूमीपतेर्वा मरणं विनाशं दिव्याङ्गनायावरवल्लभम् ॥
टकारे दूरगानांच दर्शनं देवदर्शनम् ।
उद्वाहः पुत्रसम्पत्तिः षष्ठमासेन लभ्यते ।
दान्तो चौरभयं नास्ति तद्द्रव्यागमनं भवेत् ।
विविधविद्याप्रकाशेन शिवे विष्णौ च भक्तिमान् ।
धकारकूटे धरणीपतित्वं व्याधेर्भयं नास्ति तथा पशोश्च ।
प्रवेशमात्रेण गतौ फलादि जीवादिसम्पत्तिमुपैति लक्ष्मीम् ॥
रवीजे सिद्धिः स्यात् खलु कुलवधूधीरगमनम्
धनं वाञ्छातुल्यं विभवमतुलं राजासिकवत् ।
प्रतापं साम्राज्यं सकलहितगोलोकवसताम्
वशं सर्व्वं लोकं प्रियमतिसुखं लाभविविधम् ॥
रकारे वह्निबीजे च जितं सर्व्वं चराचरम् ।
यथा जयेन सर्व्वत्र गमने भाग्यदं फलम् ।
षकारमध्यमे देशे वार्त्तादेशादुपैति हि ।
पत्रिकागमनं ज्ञेयं यः करोति धनं लभेत् ।

लकारे सौख्यभावं च मित्रभावं यदालभेत ।
अप्रीतिश्च भवेत्तस्मात तदा प्राणभयं नच ।
स्वराज्ये च भवेत सौख्यं प्रश्नजिज्ञासकर्म्मणि ।
रसलान्ते तथा वर्णो पाचकं देहि चादिमम ।
यदि स्यादुच्यते नाथ विपरीतफलं नच ।
दीर्घाकारे विषयघटना नाथ पादे मतिः स्यात
यद्यद्वर्णो भवति कुशलं दीर्घजीवी नरेन्द्रः ।
बालापत्यं गमयति मुदा कालदेशाधिकारी
लोकारण्ये सकलकलुषध्वंसहेतोर्मृगेन्द्रः ॥
सुखं च चारचाष्टमे महाधनेश सन्निधौ
प्रयुद्धवान भवेद्ध्रुवं विचित्रचातुरीयथा ।
महाकुवीरगाप्रभो प्रमुच्यते क्षणादपि
प्रभातसूर्य्यदर्शनादतीव धैर्य्यतां लभेत ॥
विचित्रवाग्भवे जयं जयेन सेवितं पुरा
प्रवालराज्यलाभकं जगज्जनादिसेवनम ।
हठाद्गुनागमं गमो गभीरतुल्यसतफलम
सदा हि पुण्यसागरे गुरोः पदाम्बुजं लभेत ॥
विसर्ज्जनीयसुस्वरे समाप्तिकोमलान्वितम
जनागमं भवनागमं विशालवेदनान्वितम ।

मनोगतं कुबुद्धिदं स्वकीयबन्धुवर्ज्जनम
विसर्ज्जनं कुलक्षणां भवे लभेत कुर्वंधनम ॥ ३ ॥
सकलं निष्फलं कान्तं विदुः श्रेष्ठा महर्षयः ।
हास्यमुखे हास्यफलं भावनायां भवेन्न हि ।
क्रोधक्रमेणैव तदैव चक्षुषो विकारभावेन दहेत समग्रम ।
शौर्ये करो चेत कलिकालसंमतं फलं हिनाभेरथ स्वभूषणाम ॥ २ ॥
षोये वेददले वराभयकरा हारावशब्दापहा
दूराद्गमनं लभे हि नियतं बालागणौराहतम ।
घोरापायविसर्ज्जनं जनगणाह्लादेन संमोदितम
कूपे कूटथकारवर्णलहरी भाषापभाषावपो ॥ २ ॥
जवर्गे जतुकं स्वर्गं जीवनोपायचिन्तनम ।
जराव्याधिसमाक्रान्तं जीर्णवस्त्रपहारणाम । ञ ।
चकारकूटे यदि चक्रवर्त्ती भूमण्डले स्यात पततीति निश्चितम ।
अन्तःसुखं हन्ति यदा विभागे वकारमात्रेण विपत्तिरो भवेत ।
आद्यप्रश्नादर्वनाथ तकारं तरुणाश्रयम ।
पापान्धकारपटलध्वंसाय कल्पते सदा । ठ ।
नकारमाद्ये यदि प्रश्नवाग्मी जिज्ञासमानो भुवमर्थसंचयम ।
आलापमात्रेण नरावशाः स्युः प्रवेशनं राजकुलेन्द्रसान्निधौ । न ।
भीतो भवति देशे च भयस्थाने न दुःखभाक

भुयासम्पत्तिवृत्तिश्च भकारकूटमण्डले । भ ।
लोकानुरागः सर्व्वत्र आयादरविचारतः ।
नकारस्यापि लोकेश भार्य्या दुःखं विमुञ्चति ।
मकारे मैथुनं कान्ता कुलस्य कुलवर्द्धनम् ।
धनवृद्धिर्विशवृद्धिः सरस्वती-कृपा भवेत् । म ।
वेदपत्रे मकारस्य फलमाहात्म्यनिर्णयम् ।
शृणु नाथ प्रवक्ष्यामि सावधानोऽवधारय ।
ककारादि लकारान्तं व्याप्य तिष्ठति तत्वतः ।
अकारेण विना शक्तिर्जायते कुत्र न प्रभो ।
अकारे ग्रथितं सर्व्वं चराचरकलेवरम् ।
यस्य काममाद्यभागे प्रश्नजिज्ञासने भवेत् ।
कुफलेऽपि सत्फलानां संचयं भवति ध्रुवम् ।
शत्रूणां वशहेतोश्च धनादीनां च संचये ।
अन्तर्यजनविद्यासु लोकस्यागमने तथा ।
निजदुःखानुतापे च अकारविधिरुच्यते । अ ॥
उकारफलमाहात्म्यं शृणु प्रश्नार्थपण्डित ।
उषाकाले चौर्य्यप्रश्नमुल्लासं मानसोत्तमम् ।
उत्तमस्थलवासं च उत्कृष्टभोजनादिकम् ।
उत्खण्णावुद्धिकृतपातिकमादेवीपदे मतिः । उ ।

(8)

ऋकारलक्षणं चक्षुः शास्त्रस्य वचनं भवेत ।
लोचने दर्शनं स्त्रीणां लिखनं दुरसम्भवम ।
प्राप्नोति परमां लक्ष्मीं लोकवश्याय केवलम ।
लांगलानां संचयं च भूमिलाभो भवेद्ध्रुवम । ऋ
ओकारे राज्यवृद्धिः स्यात पुत्रवृद्धिस्तथैव च ।
सदा सन्तोषमाप्नोति प्रभावः सर्व्वसिद्धिदः । ओ ।
मीने कर्कटराशिवृश्चिकतुले धर्म्माग्निभानूदये ।
गेहे वेदविचारणे शुभफलं श्रीलाभमत्युन्नतिम ।
विद्यावेदकथादिकं जयवतामानन्दसिद्धं फलं
प्राप्नोति प्रतिपत्तिसिद्धिपदवीं मर्त्यो मुदा रक्ष्यताम ॥
पत्रप्रमाणं कथितं हीनविद्याविनिर्णयम ।
पुनः शृणु महाकाल कलिकालस्य भोद्भवम ।
यद्यन्मानसस्य प्रथमे तथा चार्द्धे भवस्य च ।
दशाङ्घ्रये शुभफलं प्रथमस्य महेश्वर ।
तृतीयैकदलमात्रं विपरीतफलप्रदम ।
तत्र दशैः स्वनदात्रं यदि ते चेन्नाशुभं भवेत ।
काश्मिन्यायस्तनदात्रं पूर्व्वं प्रथमपत्रके ।
ततस्वभावं विजानीयात हृष्टदोषमुखं भवेत ।
अष्टयामादिचित्रान्तं द्वितीये दक्षिणे दले ।

तत फलं विपरीताख्यं सत फलोऽपि फलापहम्।
स्वात्यादिषष्ठनक्षत्रं तृतीयाद्योदले लिखेत।
तत स्वभावं क्रमाज्ज्ञेयं नान्यथा शुभमानयेत।
तत फलानि कुर्वासितं च विपरीत फल स्थले।
अशुभं सत फल स्थाने कुफले सुफलं भवेत।
उत्तराषाढिका तारादि रेवत्यं तमेव च।
तत फलन्तु भवेत सद्यो यदि कर्म्मपरो भवेत।
अथ वक्ष्ये महादेव अश्विन्यादि फलं प्रभो।
यज्ज्ञात्वा देवताः सर्व्वा दिग्विदिक्षु वादि वक्षकाः।
तत प्रकारं महापुण्यं देवदेव फलोद्भवम्।
त्रैलोक्ये सौख्यपुञ्जं त्रिभुवन विदितां त्रैगुणाह्लादशान्तां
सिद्धआनो विशालो वरद विदलितां वेदनाद्रोपहा भाम।
मन्दानां मन्दभाग्यापह गुणागहनां हीन दीनापदाहाम
लोकानां सत फलानां फलगतवपुषा माश्विनी मादद्याचेत॥
एवं क्रमेण देवेश तारकाणां फलाफलम्।
पुनः पुनः शृणु प्राणवल्लभ प्रेमभावक॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे आज्ञाचक्रसारसंकेते सिद्धमन्त्रप्रकरणे भैरवी भैरव संवादे त्रयोदशः पटलः॥०॥ १३॥०॥

अथातः संप्रवक्ष्यामि योगमार्गेण शंकर ।
भवस्यादि सप्तविंशनक्षत्रार्थं सुसत फलम ।
ततफला फल माहात्म्यं साक्षातकारफलाफलम ।
फलार्थं भवानीदेवं धर्म्म विद्यादि निर्णयम ।
धर्म्माचिन्तानिर्व्विरोधं गमनाभाव मंगलम ।
मकारादिवर्णजाले प्राप्नोति भवानीभक्ते । २ ।
कृत्तिकायां शादिवर्णं व्याधि संकर संक्षयात ।
आरोग्याय धनस्यार्थे तत्सुर्थेन चाचरेत । ३ ।
या रोहिणी धनवतां धनदानयोन

प्राणप्रियं गणसुरद्धि विरद्धिसिद्धिं ।

नागादिदोषशमनं क्षितिचक्रसाध्ये

राजश्रियं विबुधसिद्धिमुपैति रद्धिम ॥ ४ ॥

मृगेन्द्रशीर्षगामिनी नरेन्द्रमन्दिरे निधिं

ददाति पापनिर्म्मले जले जघन्य शून्यके ।
भयं विवाहकालके कुले सुखं शुभेक्षणात
स्वकीय किल्विषं दहेदनन्तबुद्धिसञ्चयम ॥ ५ ॥
आर्द्रा विद्रुमरूपिणी रतिकलाकोलाहलोल्लासिनी
सामर्थ्यार्पणमेव संप्रकुरुते काले फलानां फलम ।

सौख्यं मुख्यसमृद्धिपादपकुलाम्भोजकृया निष्कटा
साधीवं परिरक्षति प्रतिदिनं शान्तं नु शान्तं दहेत ॥
पुनर्व्वसुसुतादिका तरुणारूपकूपाकृपा-
विशिष्टफलभावनारहितचित्तदोषापहा।
धनंच परिमार्गणां प्रचुरशोकसंघापहा,
प्ररक्षति महाग्रहैः परमपीडितं मानुषम् ॥
पुष्यापोषणमाकरोति सहसा तेजस्विनां कान्तिदा
कान्तायाः कनकादिलाभविपदां ध्वंसेन वंशादिदा।
धारायां फलदासुगा गणपतेरानन्दतुल्यां प्रियम्
कान्तापद्ममवर्णजाललतिता पातीह पुत्रं यथा ॥
एताद्धि पूर्व्वपत्रान्ते तारामंगलदायिकाः।
प्रतिभांति यथा चक्रे ग्रहाणां क्रमशो शुभे।
विपरीतफलंनाथ प्राप्नोति पातकेबहु।
पुष्यायां सम्भवेत् क्रूरः कर्कटस्थोऽपि भास्करः।
एतासां तारकानांच राशेर्देवान् शृणु प्रभो।
मेषः सिंहो धनुश्चैव अश्विन्यादिकदेवताः।
येषां राशौ स्थितं वर्णं न हानिर्विषयास्पदे।
सर्व्वत्र जयमाप्नोति ग्रहे क्रूरेऽपि सौख्यदः।
विभिन्नराशौ संभिन्नधर्म्मा निद्राविवर्जितः।

185

अल्पजयमल्पकार्य्यं प्रधानफलसंकुलम् ।
अल्पकर्म्मापि संसक्तो हीनबुद्ध्या विशेषनम् ।
अथवा स्वस्वनक्षत्रं यदि योगादिसंयुतम् ।
तथापि फलमाप्नोति निद्राधर्म्मविवर्ज्जितः ।
स्वनक्षत्रफलं ज्ञात्वा प्रश्नार्थं कोमलं वदेत् ।
तत्तन्नक्षत्रसुफलं कुफलं वा भवेद्यदि ।
तदा वर्णविचारं च कृत्वा प्रश्नं तदा वदेत् ।
अक्षमालाक्रमेणैव तद्वर्णानां विचारतः ।
तत्तद्वर्णविचारे तु यद्यत् सौख्यं प्रवर्त्तते ।
अधिके दोषजाले तु अधिकं दुःखमेव च ।
बहुसौख्या नित्यसौख्यं प्राप्नोति साधकोत्तमः ।
एतासां तारकाणां तु वारान् शृणु यथाक्रमम् ।
रव्यादिरविवारान्तं ताराणामधिपं शुभम् ।
अशुभं च तथा रुद्र ज्ञात्वा प्रश्नार्थमावदेत् ।
तद्वारनिर्णयं वक्ष्ये पूर्व्वपक्षे रहे दले ।
रवौ राज्यं बालकानां यदि प्रश्नं प्रियं फलम् ।
धर्म्मार्थलाभमेवं हि नयोनि प्राधिके नरे ।
संस्थितं परमानन्दं योगिनस्तत्र चिन्तनम् ।
इत्यादि रविवारस्य वृक्षानामशुभं शुभे ।
सोमे बलमुपैति देवकुसुमामोदेन पूर्णं सुखम्

186

वालानां नवकन्यका शुभफलं मुद्राभयार्थीलभेत्।
कैवल्यार्थ विचेरनं नृपवधूप्रेमाभिलाषं सदा
वाञ्छापुरण्यमुमापदेषु विमला भक्तिश्च सोमे दिने॥१
पृथ्वीपुत्रो रुधिरवदनो वालवाणी विशेषो
मुख्यं कार्य्यं दहति सहसा साहसं वासनायाम्।
हन्ति प्रायो विफलघटितं शोकसन्तानसारं
मुख्यं पुण्यं घटयति सदा मंगले भौमवारे॥२
वुधे मुख्यवारे महाधर्मपुञ्जं, समाप्नोति मर्त्यस्तथा दुर्वलंच।
सदाकालदोषं महाघोरदुःखं, रिपूणां धनानां महावीर्य्यदर्पम्॥३
सुराणां देवानां विविधधनलाभं वितरणाम्
प्रतापं सत्कीर्त्तिं क्रतुफलविशेषं विधिगतम्।
जनानामानन्दं समरसगतानन्दहृदयम्,
प्रतिष्ठासद्धर्मं गमयति मुदा वारसुगुरौ॥४
मन्दारमालावृतदेहधारी, नाकस्थले गच्छति देवनिष्ठः।
हरेः पदे भक्तिमुपैति सत्यं, प्रसाधनात् शुक्रसुवारकाले॥५
शनैश्चरदिने भयं दोषमोहान्वितम्
क्षितिप्रियसुताप्रियं परमभावकं श्रीमुखम्।
विशिष्टघननीरदं जवनासिद्धि कज्जर्कजम्
भजन्ति यदि मानुषाः सकलकामनादं प्रभो॥६

187

पुनश्च रविवारगं फलमतीव दुःखास्पदम
प्रचण्डकिरणां सदा, विकललोकरोगापदम।
तमेव परिभावनं परिकरोति योवानरो
ननश्यति कदाचन प्रचुरतापसापाकरम ॥ ७
कलायरफलं श्रृणु प्रणयवाक्यसुत्नांश्रयम
समग्रखचराः फलं फलवतां हि संज्ञा फलम।
गभीरवचनं नृपप्रियकरस्य रत्नाकरं
यदीह भजनं मुदा कालिशुभादिशम्भोऽकरोत ॥ ८
द्वितीयदलमाहात्म्यं नक्षत्रमण्डलावृतम।
रतत ताराफलं वक्ष्ये येन प्रश्नार्थनिर्णयः॥
अश्लेषादरदुःखरागलसितं व्यामोहशोभावृतं
नानाभंगनिषेवणां धनवतां हानिः पदे सम्पदे।
भूपानां परिवर्जनं खलुजनैराच्छादितं तापितं
सद्घात क्षितिपातिभीति नियतं कालाहले नायके॥
मघायां महेशी धनं हन्तिमाद्या
महोल्लासवृद्धिमयं तस्य शत्रोः।
क्षितिक्षोमहन्तारमत्यन्त भारं
सकामातुराणां सदासंगकारम॥
पूर्वफल्गुनी नक्षत्रे दूरगाणां फलं पठेत।

189

अतिधैर्य्यं शत्रुपक्षे ह्यनयो यान्ति निश्चितम् ।
कुलमुत्तरफल्गुन्या दीयते गतिरीश्वरी ।
यदि देवपदो नाथ तदा सर्व्वत्र सुन्दरम् ।
हस्ता मस्तकचूडया शुभकरी लोकत्रये भाग्यदा ।
रक्तांगी गतिचंचला मलगुणा ह्रादेन कल्याणदा ।
सा नित्यं प्रददाति रुक्मशतकं भक्ताय यागार्थिने
नानाव्यञ्जनभोजनै रतिसुखी शंकासमूहं दहेत् ॥
ददाति वित्तं जगतीह चित्रा मनोरथव्याकुलतामलंकृता
कदाचिदेवं हि शरीरदुःखं न प्राप्नुयादीश्वरभक्तिमान् भवेत् ॥
अश्लेषा नाथ शत्रोर्विपदमपि कदा नो ददाति प्रदुःखं
दत्ते पत्रे विहारे भुवनभयहरा चरणतापं निहन्ति ।
जीवः श्रीमान्नरेशो धनमपि विविधं ब्राह्मणाः पीतवर्णाः
पूर्व्वान्ता फल्गुनीशो विदधति निजवरो नीलवर्णाः सपुत्रः ॥
कुरुते बहुसुखवित्तं उत्तरफल्गुननाथो मंगलः ।
रहस्तायाः पतिचन्द्रो विभवमनन्तं चित्रेशो रविः ॥
बुधोऽपि [illegible]
[illegible] तथापि भूमौ [illegible] जः
अथ तृतीयपत्रस्य नक्षत्राणि शृणु प्रभो ।
यासां वारविशिष्टानां प्रश्ननिष्कर्षसत्फलम् ।

स्वातिं रविः पाति महोग्रतेजसा। विनाशकाले विपरीतबुद्धिदः॥
इन्दुर्विशाखां सुखदः स्वरस्वतीं भूजोऽनुराधां विपदापराधाम्॥
बुधोऽपि पायात सकलार्थसाधिनीं
ज्येष्ठां तथापि मूलां सुखदां च जीवः।
तथा धनार्थं प्रददाति शुक्रः
पूर्व्वान्विताषाढिकयान्वितः सुखम्॥
चतुर्थपत्रं वामस्थं महामंगलकारणम्।
अथर्व्ववेदरूपं तत सर्व्वप्रश्नकथावृतम्।
विपरीते महद्दुःखं वर्णसौख्येऽपि हानयः।
भवन्ति तारकानाथ शुभदृष्ट्या महोदयाः।
तत्तारकानाथगुणां शुभाशुभफलप्रदम्।
प्रश्नवर्णसमूहानां मतमालोक्य निर्णयम्।
शनिः पात्युत्तराषाढां हानिरूपां विपाकदाम्।
दुःखदां विद्रसंयुक्तां देवनिष्ठेन वाध्यते॥ए॥२॥
रविः प्रापाति श्रवणां धनादिभिः-
प्रधानदेवाश्रयनिर्व्विकल्याम्।
तथा धनिष्ठां फलदां सुधांशुः
कुजो विपत्तिं शतभिष्णगोशः॥
पूर्व्वभाद्रपदानाथो बुधः काञ्चनवर्द्धनः।

तथालोकं महादेवोत्तरभाद्रपदाधपतिः।
बृहस्पतिः सुखोल्लासं रेवतीशस्तथा भृगुः।
ददाति परमाह्लादं स्वस्वपत्रस्थराशिभिः।
अभिजित तारकं पाति शनिः श्रीमान धनप्रदः।
फलभागं मुदा दातुं शनी राज भृगान्तके।
तच्चन्द्रोच्चस्थमिति केवदन्ति परमप्रियम्।
राहुराजा ग्रहश्रेष्ठे अभिजित कालवेष्टितः।
ततकालं सूक्ष्मतद्रूपं योजानाति महीतले।
सन्ध्याकालमिति ज्ञेयं शनिवारे मुखान्तयोः।
तत सन्धिकालमेवं हि सत्वगुणं महोदयम्।
तत कुम्भकं विजानीयात मदीयदेहसम्भवम्।
महासूक्ष्मदर्गां तद्धि कुण्डली मण्डलं यथा।
तस्याः प्रथमभागे तु धावनाख्यः शनिः प्रभुः।
स्वयं ब्रह्मा मुदा भाति निरञ्जनकलेवरः।
तस्याः शेषे रेचनाख्यः संहारविग्रहः शुचिः।
राहुरूपी स्वयं शम्भुः पंचतत्वविधानवित्।
कालरूपी महादेवो विकटास्यो भयङ्करः।
सर्व्वपापानलं हन्ति चन्द्ररूपी सुधाकरः।
कल्याणकारी कालयमः पुण्यापुण्यनिरूपकः।

द्वयोर्मध्ये सूक्ष्मरूपा तडित्कोटिसमप्रभा ।
महासत्वाश्रिता देवी विष्णुमाया स्वहाश्रिता ।
नाभिजिता वक्रा सूक्ष्मा सन्धिकाललयाजया ।
कुम्भकाक्रान्तहृदया गुरुचक्रपुरोगमाः ।
नक्षत्रमण्डलस्थानमध्यस्था तिथि षोडशी ।
अमामयी सूक्ष्मकला तरुणानन्दनिर्भरा ।
अस्या आद्यभागसंस्थो ब्रह्मरूपी रजोगुणः ।
अस्याः शेषे कालरूपी तमोगुणालयः प्रियः ।
चन्द्रो ब्रह्मा शिवः सूर्य्यो महामाया तनूत्तरः ।
आग्नेयी परमाशक्तिः सुषुम्नान्तरगामिनी ।
मध्यस्था ब्रह्मशिवयोर्विधिशम्भुसुखाद्रिदा ।
यैर्ज्ञायते सर्व्वसंस्था सर्व्वानन्दहृदास्थिता ।
तैरानन्दफलोपेतैः सत्वसम्भोगकारिणी ।
महाविष्णुर्महामाया चन्द्रतारा स्वरूपिणी ।
मुक्तिदा भोगदा भोग्या शम्भोराद्या महेश्वरी ।
अज्ञानावृतघोरान्धकारसंहारहंसिनीम् ।
मन्दवायुप्रिया धर्म्मकल्पना खेचरी हृदा ।
सा पाति जगतां लोकान् तदधीनमिदं जगत् ।
नाकाले म्रियते कश्चित यदि जानाति वायवीम् ।

गायत्री परमा शक्तिरिति तत्त्वार्थनिर्णयः।
सुषुम्णागमनरूपेण सुखसिद्धिं ददाति या।
नराणां भजनार्थाय सर्वैश्वर्य्यजयाय च।
कथितं ब्रह्मणा पूर्वं शिष्याय तनुजाय च।
लोभमोहकामक्रोधमदमात्सर्य्यकाय च।
तत्क्रमं परमाप्रीतिवर्धनं भूतले प्रभो।
आज्ञाचक्रस्य मध्ये तु गायत्री परितिष्ठति।
चन्द्रसूर्य्याग्निरूपा सा धर्माधर्मविवर्जिता।
मनोरूपा बुद्धिरूपा शरीरं व्याप्य तिष्ठति।
आज्ञाद्विदलमध्ये तु चतुर्दलमुदाहृतम्।
वेददले वेदवर्णं वादिशान्तं महाप्रभम्।
तदाग्निरूपसम्पन्नमृग्वेदादिसमान्वितम्।
शृणु तद्वेदमाहात्म्यं क्रमशः क्रमशः प्रभो।

इति श्रीरुद्रयामले उत्तरतन्त्रे प्रश्नार्थनिर्णये आज्ञाचक्रसारसंकेते भैरवभैरवीसंवादे चतुर्दशः पटलः ॥१४॥ १४॥

आनन्दभैरव्युवाच।

देवकार्य्ये वेदशाखा पल्लवं प्रणवं परम्।
वदामि परमानन्दभैरवाह्लादनं शृणु।

193

आद्यपत्रे अकारंच ऋग्वेदं परमाक्षरम्।
ब्रह्मणं तद्विजानीयाद्याद्यवेदार्थनिर्णयम्।
वेदेन लभ्यते सर्वं वेदाधीनमिदं जगत्।
वेदमन्त्रविहीनो यः शक्तिविद्यां समभ्यसेत्।
स भवेद्धि कथं योगी कौलमार्गपरायणः।

आनन्दभैरव उवाच।

ब्रह्मस्तोत्रं हि किं देवि ब्रह्मविद्या च कीदृशी।
ब्रह्मज्ञानी च को वा स्यात् को वा ब्रह्मशरीरकः।
तत्प्रकारं कुलानन्दकारिणि प्रियकौलिके।
वद शीघ्रं यदि स्नेहाद् दृष्टिरस्ति मयि सुन्दरि।

आनन्दभैरव्युवाच।

तदेव ब्रह्मणः स्तोत्रं वायवी शक्तिसेवनम्।
ऋग्वेदस्थं परहंसमण्डलाकर्षमीश्वरम्।
वेदवक्त्रं वेदकायं वेदावेद्यप्रकाशकम्।
श्रुतिकन्या वेदकन्या सुन्दरानन्दमण्डिता।
वायुकस्य शरीरे च प्रलीना वायवी श्रुतिः।
सूक्ष्मरूपेण मग्ना या ब्रह्मविद्या प्रकीर्तिता।
सदा वायुपानरतः सूक्ष्मोन्मत्तप्रसन्नधीः।
एकान्तभक्तिः श्रीनाथे ब्रह्मविद्या प्रकीर्तिता।

अष्टाङ्गाभ्यासनिरतः सूक्ष्मसंहाररहतशुचिः।
सदा विवेकमाकुर्यात ब्रह्मज्ञानी प्रकीर्त्तितः।
ब्रह्मानन्दं हृदि श्रीमान शक्तिमाधाय वायवीम।
सदा भजति यो ज्ञानी ब्रह्मज्ञानी प्रकीर्त्तितः।
विजयारससारेण विना बाह्यासवेन च।
वायव्यानन्दसंयुक्तो ब्रह्मज्ञानी प्रकीर्त्तितः।
सदानन्दरसे मग्नः परिपूर्णकलेवरः।
आनन्दाश्रुजलोन्मत्तो ज्ञातो ब्रह्मशरीरधृक।
एकान्तभक्तिः श्रीनाथे जीवात्मपरमात्मनि।
विवेकी विचरेदेको ज्ञातो ब्रह्मशरीरधृक।
वायवीं शक्तिमाश्रित्य सदाध्यानपरायणः।
वशीज्ञानरसारूढो ज्ञातो ब्रह्मशरीरधृक।
शक्तिः कुण्डलिनी देवी जगन्माता स्वरूपिणी।
प्राप्यते यैः सदा भक्तैः मुक्तिर्वेदागमं फलम।
आद्यपत्रे प्रतिस्थाने वर्णजालसमाश्रिताः।
वायवीशक्तयः कान्ता ब्रह्माण्डमण्डलस्थिताः।
गणिनदन्तातिथिभिः सर्व्वोज्ज्वलनायकाः।
भवन्ति ब्रह्मणि प्रीता अवश्यमेव माश्रयेत।
मासेन जायते सिद्धिः खेचरी वायुशोषिणी।

* सूक्ष्मसंचारकृतशुचिः ८ शोषणी २

195

द्विमासे वज्रदेहः स्यात् क्रमेणावर्द्धयेत पुमान्।
त्रिमासे कल्यसंयुक्तो धर्म्मसंबन्धरूपतः।
चैतन्या कुण्डली शक्तिर्वायवीवलतेजसा।
चैतन्यसिद्धिहेतुस्सा ज्ञानमात्रं ददाति सा।
ज्ञानमात्रेण मोक्षः स्याद्वायवी ज्ञानमाश्रयेत्।
महावली महावाग्मी वर्द्धते च दिने दिने।
आयुर्वृद्धिः सदा तस्य जरामृत्युविवर्जितः।
कुण्डलीकृपयानाथ विना किञ्चिन्न सिद्ध्यति।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परं शिवो देवः वायवी परिकीर्त्तिता।
एते षट् शंकराः सर्व्वसिद्धिदाश्चित्तसंस्थिताः।
सर्व्वे तिष्ठन्ति पद्माग्रेऽमृतधारारसाप्लुताः।
अधोमुखाः सूक्ष्मरूपाः कोटिसूर्य्यसमप्रभाः।
ब्रह्ममार्गस्थिताः सर्व्वे सन्ति षट्चक्रमण्डले।
आज्ञाया अध एवं हि चक्रद्वादशकं स्मरेत्।
गलितामृतधाराभिराप्लुतं कुण्डलीप्रियम्।
आग्नेयीं कुण्डलीं मत्वा अधोधाराभितर्पणम्।
प्रकुर्व्वन्ति परानन्दरसिकाः षट्शिवाः सदा।
चन्द्रमण्डलसंजाता जीवरूपधराव्ययाः।

आत्मज्ञानसमासक्ताः शक्तितर्पणतत्पराः।
द्वितीयदलरूपं हि यजुर्वेदं कुलेश्वर।
अकस्मात् सिद्धिकथनं विज्ञानापरिमीलितम्।
बाणकोटिमहानादो बद्धनादसमाकुलम्।
ब्रह्माणं द्वाविमीशानं वासुदेवं सनातनम्।
स्वाधिष्ठाननिलयं चतुर्वर्गफलप्रदम्।
वाञ्छातिरिक्तदातारं कृष्णं योगेश्वरं विभुम्।
राधिका राकिणी देवी वायवीशक्तिलालितम्।
महाबले महावीरे शंखचक्रगदाधरम्।
पीताम्बरं सारभूतं यौवनामदलोभितम्।
श्रुतिकन्यासमाक्रान्तां श्रीविद्याराधिकाप्रभुम्।
दैत्यदानवहन्तारं शरीरस्य सुखावहम्।
भावदं शक्तिनिलयं दयासागरचन्द्रकम्।
गरुडासनमारूढं मनोरूपं जगन्मयम्।
यज्ञकर्मविधानज्ञमाज्ञाचक्रोपरिस्थितम्।
अधःपरामृतरसपानोन्मत्तकलेवरम्।
साधको योगनिरतः स्वाधिष्ठानगतं तथा।
तदाकारं विभाव्याशु सिद्धिमाप्नोति शंकर।

आनन्दभैरव उवाच।

(97)

कोवैष्णवो याज्ञिकः को धार्म्मिको वापि को भुवि।
कोवाभवति योगी, च तन्मेवद सुरेश्वरि।

आनन्दभैरव्युवाच

शृङ्कर शृणु वक्ष्यामि कालानिर्गमलक्षणम्।
वैष्णवानां वैष्णवत्वं ज्ञात्वा चक्रे फलाफलम्।
आज्ञाचक्रं महाचक्रं योजानाति महीतले।
तस्यासाध्यं त्रिभुवने न किञ्चिदपि वर्त्तते।
सदाशुचिर्ध्याननिष्ठो मुहुर्जाप्यपरायणः।
स्मृतिवेदक्रियायुक्तो विधिश्रुतिमनुप्रियः।
सर्व्वत्रसमभावज्ञो वैष्णवः परिकीर्त्तितः।
पश्वाचारनिविष्टात्मा ध्यानयोगपरायणः।
उत्तमाज्ञानसंयुक्तो वैष्णवः परिकीर्त्तितः।
शिवे विष्णौ तुल्यभावं दुर्गामन्त्रपरायणम्।
ध्यात्वा यः कुरुते कर्म्म वैष्णवः परिकीर्त्तितः।
समता शत्रुमित्रेषु करुणाभक्तिपरायणः।
योगाशिक्षापरो नित्यं वैष्णवः परिकीर्त्तितः।
यजुर्व्वेदाभ्यासरतो वेदाचारविचारवान्।
विवेककर्म्मविद्यार्थी करुणे चित्तं निधाय च।
शिववत्कुरुते कर्म्म वैष्णवः परिकीर्त्तितः।

वनस्थो घोरविपिने नवीनतरुशोभिते ।
याज्ञीको ब्राह्मणो धीरो मनःप्रेमाभिलासवान् ।
एकाकीकुरुते संगं जीवात्मपरमात्मनोः ।
वायवौ रेचकः सूर्यः पूरकश्चन्द्रमास्तथा ।
ज्वलच्छिखा सूर्य्यकपालयोज्ज्वलनमेव च ।
पुनः पूरकयोगश्च चन्द्रस्य तेजसा हविः ।
तद्धविषा ज्वलद्वह्नौ वायवीवलचञ्चले ।
योऽनिशं कुरुते होमं मौनी याज्ञिक उच्यते ।
जीवसूर्य्याग्निकिरणे आत्मचन्द्राद्यपूरकैः ।
लये यः कुरुते होमं याज्ञिकः परिकीर्त्तितः ।
गुणशक्तिः शिवो मांसं तद्धुतो भैरवः स्वयम् ।
शक्त्याग्नौ जुहुयान्मांसं याज्ञिकः परिकीर्त्तितः ।
पूर्णहोमं यः करोति साधकः परिकीर्त्तितः ।
भूमण्डले धर्म्मशीलो निर्ज्जनैकान्तवेश्मनि ।
दृढभक्त्या वीजसारं यो जपेत् स हि धार्म्मिकः ।
मणौ लोष्ट्रे समे ध्यानं धर्म्मेऽधर्म्मे जयेऽजये ।
कृत्वा त्यागी भवेद्यस्तु ब्रह्मज्ञानी स धार्म्मिकः ।
सदा ईश्वरचिन्ताढ्यो गुरोराज्ञाव्यवस्थितः ।
सुशीलो दीनबन्धुश्च धार्म्मिकः परिकीर्त्तितः ।

199

कालज्ञो विधिवेत्ता च सर्वांगोज्ज्वलविग्रहः।
पर्व्वते गह्वरे मौनी मत्तो योगी प्रकीर्त्तितः।
कालज्ञानी चावधूतः कृती सिद्धो वशी शुचिः।
वाञ्छाविहीनो धर्मात्मा स योगी परिकीर्त्तितः।
वाग्वादिनी कृपापात्रं षडाधारस्य भेदकः।
ऊर्द्ध्वरेता स्त्रीविहीनः स योगी परिकीर्त्तितः।
यजुर्व्वेदपुरोगामी यजुःपत्रस्य वर्णधृक्।
वर्णमालाचित्तजपो भावकः स हि योगिराट्।
मासद्वादशके ग्राह्यं राशिद्वादशकान्वितम्।
तिथिवारर्क्षनक्षत्रयुक्तमाज्ञाम्बुजे भवेत्।
दिग्देशकालप्रमार्थं वायवी शक्तिनिर्गमम्।
बालवृद्धाक्तादिदण्डपलनिश्वाससंख्यया।
व्याप्तमाज्ञाचक्रसारं भजेत परमपावनम्।
चक्रे सर्व्वत्र सुखदं सतां हानिर्नच प्रभो।
खलानां विपरीतं च निन्दकानां पदे पदे।
दुःखानि प्र(भ)वन्तीह पापिनां किं फलाफलम्।
पापी पञ्चत्वमाप्नोति ज्ञानी याति परं पदम्।
यः श्वासकालवेत्ता च स ज्ञानी परिकीर्त्तितः।
श्वासकालं न जानाति स पापी परिकीर्त्तितः।

(२) भजेत

यजुर्व्वेदं सत्वगुणं सत्वाधिष्ठाननिर्म्मलम्।
गुरोराज्ञाक्रमेणैव अधस्तुण्डेन कुण्डलीम्।
महाशक्तिं समाप्नोति ऊर्द्ध्वाऽधःक्रमयोगतः।
यजुर्व्वेदमहाचक्रे सत्वाधिष्ठानसेवया।
ललाटामृतधाराभिश्चैतन्या कुण्डली भवेत्।
विभाव्य द्विदलं चक्रं होमं कुर्यादहर्निशम्।
चतुर्द्दलस्य पूर्णेन्दुसुधाधारापरामृतैः।
शुद्धाज्यैर्जुहुयान्मन्त्री अधस्तुण्डेन कुण्डलीम्।
भजन्ति कर्म्मेन्द्रियशुद्धयोगिनः प्रचण्डरश्मिप्रगताङ्गसुन्दराः।
आज्ञाम्बुजं चक्रवरं चतुर्द्दलं यन्मध्यदेशे शशिकोटितेजसम्॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धभावनिर्णये पाशवकल्पे आज्ञाचक्रसारसङ्केते सि-
द्धमन्त्रप्रकरणे वेदप्रकरणोल्लासे भैरवीभैरवसंवादे

पञ्चदशः पटलः॥१५॥०॥

आनन्दभैरव्युवाच०

शृणु स्वानन्दरुद्रेश तृतीयदललक्षणम्।
सामवेदमधोवक्त्रं तमोगुणनिराकुलम्।
वर्णजालादिनाक्रान्तं रुद्ररूपं महेश्वरम्।
लयस्थानं कामरूपं परमानन्दविग्रहम्।

यस्मिवृत्तिसुखस्थानं विभाव्य योगिराड् भवेत ।
तत्स्थानं योगिनां धर्म्मं सुधीराज्ञाफलप्रदम् ।
तत्पादाब्जं श्रीगुरूणां भ्रूमध्ये द्विदलाम्बुजे ।
मुहुर्मुहुः शनैर्ध्येयैः समीरास्पदभास्वरम् ।
विभाव्य मनसा वाचा कर्म्मणा सूक्ष्मवायुना ।
लीनं कृत्वा सदा ध्यायेत् सदाहृष्टकलेवरः ।
सहस्रारे यथा ध्यानं तद्ध्यानं द्विदलाम्बुजे ।
गुरुमालानमीशानं देवदेवं सनातनम् ।
अकस्मात् सिद्धिदातारं योगाष्टांगफलप्रदम् ।
नित्यं शुद्धमयं प्रमाविषयगं नित्योपमेयं गुरुम्
चन्द्रोल्लासतनुप्रभं शतविधूल्लासस्य पंकेरुहम् ।
सर्व्वप्राणगतं गतिस्थमचलं ज्ञानाब्धिनिर्लेपनम्
कुद्दालस्य गुणालयं लयमयमालोपलाब्धे भजे ॥
यदि भजेज्जगताममलेश्वरं स्मरहरं गुरुमीश्वरमालिनि ।
पवनसुन्दरचन्द्रसमाकुलं निपतिताघकुलानलसंचयम् ॥
प्रणमतां समतां कुरुते सुधीर्यदि भवान् विकलं परिवाति गे ।
तव पदाम्बुजमद्भुतलीलया परिभजे भवसागरपारगम् ।
गुरुपदं कितपङ्कजराजितं कनकनूपुरसुन्दरखंजनम् ॥
रचितविचित्रचारुणमलेन्दुकं भुवनभावनपावनमाश्रये ।

सकलसत फलपालनकोमलं विमलशोणितपंकजमण्डलम्।
पदतलं खलनिग्रहपालनं—खचितरत्नसुराचलनं भजे॥
सुकनकाजड़िता सनपंकजे पारिभवं भवसागरसम्भवम्।
यदि कृपा न भवेन्मयि पामरे व्यवतु मां तव पादतलं भजे॥
परमहंस मनुं रसकोपिरां सकलमन्त्रमद्भुकमीश्वरम्।
सकललक्षणाचन्द्रमसः करं तव गुरो नुरवपङ्कजमाश्रये।
गुरोराज्ञाचक्रं भुवनकरणां केवलमयम्
सकारं नादेन्दुं कुमुदहृदयं कामकलया।
लयस्थाने वायोर्नवमधुरसामोदमिलिते
दलेवेददीन्ते विधुविराहिते तत्पदके॥
तमोगुणसमाक्रान्तो ऽथोमण्डलमण्डिते।
द्विबिन्दुनिलयस्थाने द्विदले श्रीगुरोः पदम्।
महावह्निशिखाकारं तन्मध्ये चिन्तयेत् सुधीः।
एतद्योगप्रसादेन वीजवाग्भवकूटकैः।
चिरजीवी भवेत् सद्यो वागीशत्वमवाप्नुयात्।
श्रीगुरोश्चरणाम्भोजनिःसृतं यत्परामृतम्।
तत्परामृतधाराभिः सन्तर्प्य कुलनायिकाम्।
पुनः पुनः समाकृष्य प्रसन्नां तां स्मरेत् सदा।

(१) ललिते।

पाययित्वा परबसं धारयेत मारुतं सुधीः।
एतत स्तोत्रं ततः पाठ्यं सर्व्वपुण्यफलाप्तये।
धनं रत्नं महालक्ष्मीं प्राप्नोति साधकोत्तमः
सर्व्वत्र जयमाप्नोति युद्धे क्रोधे महाभये।
महावायुःस्थिरो याति सुशीलो मोक्षमाप्नुयात।
इति ते कथितं नाथ ब्रह्मज्ञानमनुत्तमम।
आज्ञाचक्रत्रिखण्डस्य दलस्य कामरूपतः।
सतफलं समवाप्नोति विचार्य्य भावयेद्यतिः।
आज्ञाचक्रे त्रिखण्डे च कामरूपं महेश्वरम।
महारुद्रं धर्म्मलिंगं सर्व्वधर्म्मवहिष्कृतम।
अधर्म्मध्वान्तमिहिरं कोटिकोटिविधुद्रवम।
विद्यारमणकामेशं हेमवाराणसीश्वरम।
गुरुकामफला[1]विष्टं कोटिकोटिकलेवरम।
सामवेदमहापत्रमूलस्यान्तर्गतं शिवम।
कामलिङ्गं बिन्दुलिंगं विसर्गपदभूषणम।
परं [illegible] शिवं देवदेवं हाकिनीशक्तिमुक्तिदम।
कुलचूडामणिं सिद्धं वृद्धरूपिणमीश्वरम।
चीनाचारसमाक्रान्तं श्मशानाधिपवेष्टितम।
कालं कालकरं चक्रं महाकालं कलानिधिम।

(१) गुरुकामफला···

पलानुपलविपलदण्डतिथ्यादिपक्षकैः।
मासवत्सरादियुगैर्महाकालैः समन्वितम्।
उल्काकोटिसमं नेत्रं तीक्ष्णदंष्ट्रं सुभैरवम्।
कोटिकोटिनेत्रजालशोभिताननपंकजम्।
चिद्रूपं सदसद्व्यक्तिरूपिणं बहुरूपिणम्।
ध्यात्वा त्वभिमुखेनैव कालरुद्रं परेश्वरम्।
नास्तिकोऽहं भुवो मध्ये अष्टचक्रे महाप्रभो।
विभाव्य परमं स्थानं तत्तत्स्थानस्थितो भवेत्।
शाकिनीं भावयेन्मन्त्री भैरवादिविनाशिनीम्।
कोटिसौदामनीभासाममृतानन्दविग्रहाम्।
अयुतेन्दुपूर्णशोभां हेमवाराणसीस्थिताम्।
नानालङ्कारशोभाढ्यां हेमवाराणसीस्थिताम्
नवयौवनसंयुक्तां सर्वाधारस्वरूपिणीम्।
दीर्घप्रणवजापेन भावयन्तीं त्रिविक्रमम्।
मौनां मौनमयीं देवीं सर्वविद्यास्वरूपिणीम्।
महाकालीं महानीलां पीतवर्णां शशिप्रभाम्।
त्रिपुरां सुन्दरीं वामां वामकामदुघां शिवाम्।
ध्यायेदेकासने वामे परनाथस्य पावनीम्।
सर्वाधारात्मिकां शक्तिं दुर्निवार्यां दुरत्ययाम्।

205

आसमार्गेण वमयेत् कुलमार्गेण पण्डितः।
कुलाकुलविभागेन आलानं नीयते पदे।
आसाभ्यासं विना नाथ अष्टाङ्गाभ्यासनेन च।
विना दमेन धैर्येण कुलमार्गेण सिध्यति।
यथापूरकयोगेन रेचको नापि तिष्ठति।
विनाकुम्भकयोगेन यथैतौ नापि तिष्ठतः।
तथा योगं विना नाथ अष्टाङ्गाभ्यासनं विना।
कुलमार्गो महातत्त्वो न सिध्यति कदाचन।
कुलमार्गं विना मोक्षं कः प्राप्नोति महीतले।
कुलमार्गं नजानाति योगवाक्यागमाकुलम्।
सकथं पूजयेद्देवीं तस्य योगः कुतः प्रभो।
योगाभ्यासं सदा कुर्यात् कुलमार्गप्रसिद्धये।
आदौ भूत्वा महायोगी कुलीनः प्रभवेत्ततः।
आदौ कुलाचारभावं यः करोति नराधमः।
योगाभ्यासं विहायापि सम्भवेद्ब्रह्मराक्षसः।
अज्ञात्वा वीरनाथानां आचारं यः करोति हि।
तेषां बहुदिने योगशिक्षा भवति निश्चितम्।
प्राणायामं महाधर्मं वेदानामप्यगोचरम्।
सर्वपुण्यस्य सारं हि पापराशितुलानलम्।

महापातककोटीनां तत्कोटीनां च दुष्कृतम् ।
पुनर्जन्मार्जितं पापं न स्याद् दुष्कर्मपातकम् ।
नश्यत्येव महादेव अभ्यासाभ्यासयोगतः ।
सन्ध्याकाले प्रभाते च यः करोति अहर्निशम् ।
वशी षोडशसंख्याभिः प्राणायामं पुनः पुनः ।
संवत्सरं वशी ध्यात्वा खेचरो योगिराड् भवेत् ।
योगी भूत्वा कौलमार्गं समाश्रित्यामरो भवेत् ।
महाविद्यापतिर्भूत्वा विचरेत् साधकोत्तमः ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे आज्ञाचक्रसारसंकेते सिद्धमन्त्रप्रकरणे वेदभाषापरिच्छेदे षोडशः पटलः ॥ १६ ॥

अथ वक्ष्ये महादेव अथर्ववेदलक्षणम् ।
सर्ववेदस्य सारं हि शक्त्याचारसमन्वितम् ।
अथर्ववेदादुत्पन्नं सामवेदं तमोगुणम् ।
सामवेदाद् यजुर्वेदं महासत्त्वसमुद्भवम् ।
रजोगुणमयं ब्रह्मन् ऋग्वेदं यजुषः स्थितम् ।
ऋकसूत्रसदृशी देव अथर्ववेदरूपिणी ।
अथर्वे सर्ववेदाश्च जलखेचरभूचराः ।
निवसन्ति कामविद्याः कुलविद्यामहर्षयः ।

समाप्तिपत्रं शोयार्थं सामीप्यलोकमण्डले ।
शक्तिचक्रं समाक्रान्तं दिव्यभावात्मकं शुभम् ।
तत्रैव वीरभावंच तत्रैव पशुभावकम् ।
सर्व्वभावात् परं तत्त्वमथर्व्ववेदपत्रकम् ।
द्विबिन्दुनिलयस्थानं ब्रह्मविष्णुशिवात्मकम् ।
चतुर्व्वेदान्वितं तत्त्वं शरीरं दृढ़निर्म्मितम् ।
चतुर्विंशतितत्त्वानि सन्ति गात्रे मनोहरे ।
ब्रह्मा रजोगुणाक्रान्तः पूरकेणाभिवर्द्धते ।
विष्णुः सत्वगुणाक्रान्तः कुम्भकैःस्थिरभावनैः ।
रुद्रस्तमोगुणाक्रान्तो रेचकेनापि विग्रहम् ।
अथर्ववेदचक्रस्था कुण्डली परदेवता ।
एतन्मायात्रयेणैव ब्रह्मविष्णुशिवेन च ।
शरीरं त्रैवनिलयं भक्तं ज्ञात्वा प्रवर्त्तते ।
सर्व्वदेवमयी देवी सर्व्वमन्त्रस्वरूपिणी ।
सर्व्वमन्त्रात्मिका विद्या वेदविद्याप्रकाशिनी ।
चैतन्या सर्व्वधर्म्मज्ञा अधर्मस्थानवासिनी ।
अचैतन्या ज्ञानरूपा हेमपंचकमालिनी ।
अकलङ्का निराधारा शुद्धज्ञानमनोजवा ।
सर्व्वसंकटहन्त्रीच सारवीरं प्रपाति हि ।

तस्याः कार्य्यमिदं विश्वं तस्याः पुण्यानि सन्ति हि।
तस्याश्चैतन्यकरणे सदाव्याकुलचेतसः।
महात्मानः प्रसिध्यन्ति यदि कुर्वन्ति चेतनाम्।
तस्या अनुग्रहादेव किं न सिध्यति भूतले।
यस्मात्साभ्यासयोगेन चैतन्या कुण्डली भवेत्।
सा देवी वायवी शक्तिः परमाकाशवाहिनी।
तारिणी वेदमाता च वहिर्याति दिने दिने।
द्वादशाङ्गुलमानेन आयुः क्षरति नित्यशः।
द्वादशांगुलवायुं च क्षयं कुर्य्याद्दिने दिने।
यावद्यावद्वहिर्याति कुण्डली परदेवता।
तावत्तावत्खण्डलयं भवाब्धिपापमोक्षणम्।
यदा यदा न क्षरति वायवी सूक्ष्मरूपिणी।
बाह्यचन्द्रे महादेव आग्नेयी सूर्य्यमण्डले।
मूलाधारे कामरूपे ज्वलन्ती चाण्डकाशिखा।
सदाशिरोमण्डले च सहस्रदलपंकजे।
तेजोमयी सदा याति शिवं कामेश्वरं प्रभुम्।
अच्युताख्यं महादेवं तदा ज्ञानी स योगिराट्।
यदि वेत्ति सा देवी बाह्यचन्द्रे मनोलये।
तदा योगं समाकुर्य्यात् यावत् शीर्षेण गच्छति।

209

यदि शीर्षे समागम्यामृतपानं करोति सा।
वायवी सूक्ष्मदेहस्था सूक्ष्मालयप्रियासती।
तदैव परमासिद्धि र्भक्तिमार्गान्नसंशयः।
चतुर्व्वेदज्ञानसारं अथर्व्वं परिकीर्त्तितम्।
अथर्व्ववेदविद्या च देवता वायवी मता।
तस्याः सेवनमात्रेण रुद्ररूपी भवेन्नरः।
केवलं कुम्भकस्याज्ञा एकाग्रसप्रकाशिनी

भैरव उवाच

केन वा वायवी शक्तिकृपा भवति पार्व्वति।
स्थिरचेता भवेत केन विवेकी वा कथं भवेत।
मन्त्रसिद्धिर्भवेतकेन कायासिद्धिः कथं भवेत।
विस्तार्थ वद चामुण्डे आनन्दभैरवेश्वरि।

आनन्दभैरव्युवाच।

शृणुष्वैकमनाः शम्भो मम प्राणकुलेश्वर।
एकवाक्येन सकलं कथयामि समासतः।
श्रद्धया परया भक्त्या मनोनियमतत्परः।
स प्राप्नोति परां शक्तिं वायवीं सूक्ष्मगामिनीम्।
धैर्य्यक्षमामितारश्मी शान्तियुक्तो यतिर्महान्।
सत्यवादीब्रह्मचारी दयाधर्म्मसुखोदयः।

मनसः संयमज्ञानी दिगम्बरकलेवरः।
सर्व्वत्र समबुद्धिश्च परमार्थविचारवित्।
शवशय्या भूमितले वायवी परमामृतम्।
यत्रवापि रतिः क्षिप्रं तत्रैव वायवी कृपा।
गुरुसेवापरे धीरे शुद्धसत्वतनुप्रभे।
भक्ते अष्टाङ्गनिरते वायवी सुकृपा भवेत्।
अतिथिं भोजयेद्यस्तु न भुक्त्वा स्वयमेव हि।
सर्व्वपापविनिर्म्मुक्तो वायवी सुकृपा ततः।
अन्तरात्मा महात्मा यः कुरुते वायुधारणाम्।
देवे गुरौ सत्यबुद्धिर्वायवी सुकृपा ततः।
एककालो वृथा याति नैव यस्य महेश्वर।
वायव्यां चित्तमाधाय तत्रानिलाकृपा भवेत्
विचरति महीमध्ये योगाद्यानिबन्धनम्
प्राणायामेन युक्तो यो वा वायवी सुकृपा ततः।
प्रतिवत्सरमानेन पीठे पीठे वसन्ति ये।
वायवीं प्रजपन्तीह वायवी सुकृपा ततः।
अल्पाहारी नीरोगी च विजयानन्दनन्दितः।
वायवी भजनीयोगी वायवी सुकृपा भवेत्।
अन्तर्यागे पीठचक्रे चित्तमाधाय यत्नतः।

211

नामनिष्ठाधारणाख्यो वायवी सुकपातः।
पशुभावसमाक्रान्तः सदा येतो विवर्जितः।
शुचिर्मैथुनहीनश्च वायवी सुकपाततः।
आकाशेऽपि स्वकालेऽपि नित्यधारणातत्परः।
योगिनामपि संगी यो वायवी सुकपाततः।
बन्धुबान्धवहीनश्च विवेकाक्रान्तमानसः।
शोकाशोके समभावी वायवी सुकपाततः।
सर्व्वदानन्दहृदयः कालज्ञो मौनसाधनः।
मौनधारणजापश्च वायवी सुकपाततः।
सर्व्वशास्त्रार्थवेत्ता च विधिवेत्ता च धार्म्मिकः।
सूक्ष्मवायुप्रसादज्ञो वायवी सुकपाततः।
सत्यसारज्ञ दक्षो निन्दाधर्म्मविवर्जितः।
शिल्पकर्म्माभिमानी यो वायवी सुकपाततः।
निर्जनस्थाननिरतो निर्भयो दीनवत्सलः।
बहुजल्पनशून्यश्च स्थिरचेताः प्रकीर्तितः।
हास्यसन्तोषहिंसादिरहितः पीठपारगः।
योगशिक्षासमास्पर्धी स्थिरचेताः प्रकीर्त्तितः।
कामशास्त्रशिल्पशास्त्ररहितः स्थिरमानसः।
अल्पाहारी निर्व्विकल्पी स्थिरचेताः प्रकीर्त्तितः।

कलौ श्रीकालिकापीठे कामरूपी सुमन्त्रवित्।
पीत्वा वायुं जपेद्यस्तु स्थिरचेताः प्रकीर्तितः।
सत्कुलाचारभावज्ञो महाविद्यादिमन्त्रवित्।
शुद्धभक्तियुतः शान्तः स्थिरचेताः प्रकीर्तितः।
मूलाधारे कामरूपे हृदि जालंधरे तथा।
ललाटे पूर्णगिर्याख्ये उड्डीयाने तदूर्ध्वके।
वाराणस्यां भ्रुवोर्मध्ये ज्वलन्त्यालोचनत्रये।
मायावत्यां मुखवृत्ते कण्ठे अष्टपुरे तथा।
अयोध्यायां नाभिदेशे कट्यां काञ्च्यां महेश्वर।
पीठेष्वेतेषु मूर्लोके चित्तमाधाय यत्नतः।
उदरे पूरयेद्वायुं सूक्ष्मसंकेतभाषया।
पादाङ्गुष्ठे च जंघायां जानुयुग्मे च मूलके।
चतुर्दले षड्दले च तथा दशदले शुभे।
दले द्वादशके चैवं सिद्धासिद्धान्तनिर्मले।
कण्ठे षोडशचक्रे[१] च द्विदले पूर्णतेजसि।
कैलासाख्ये ब्रह्मपदे निर्मले तेजसि स्थिते।
सहस्रारे महापद्मे कोटिकोटिविधुप्रभे।
चालयित्वा महावायुं कुम्भयित्वा पुनः पुनः।
पूरयित्वा रेचयित्वा रोमकूपादिनिर्गतम्।

213

[१] पत्रे च . . .

तिस्रः कोट्यर्द्धकोटिश्च यानि लोमानि मानुषे।
नाडीमुखानि सर्व्वाणि धर्म्मबिन्दुं च्यवन्ति हि।
यावत्तद्बिन्दुपातं च तावत्काले लयः स्मृतः।
तावत्कालं प्राणयोगात् प्रस्वेदाधमसिद्धिदम्।
सूक्ष्मवायुसेवया च किं न सिध्यति भूतले।
लोमकूपे मनोदद्यात् लयस्थाने मनोरमे।
स्थिरचेता भवेत् शीघ्रं नात्र कार्य्या विचारणा।
वायुसेवां विना नाथ कथं सिद्धिर्भवेद्भवे।
स्थिरचित्तं विना नाथ मध्यमापि न जायते।
स्थाने स्थाने मनो दत्वा वायुना कुम्भकेन च।
धारयेन्मारुतं मन्त्री कालज्ञाने दिवानिशम्।
एकान्तनिर्जने स्थित्वा स्थिरचेता भवेद्ध्रुवम्
स्थिरचित्तं विना शम्भो सिद्धिः स्यादुत्तमा कथम्।
निवार्य्य पंचेन्द्रियसंज्ञकानि यत्नेन धैर्य्या यति मीश्वरत्वम्।
प्राप्नोति मासत्रयसाधनेन विषासवं भोक्तुमसौ समर्थः॥
मासत्रयाभ्यासमुसंचयेन स्थिरेन्द्रियः स्यादधमादिसिद्धः।
सारवेचरी सिद्धिरथ प्रवक्षा चतुष्टये मासि भवेद्विकम्पनम्॥
तदाधिकारी पवनासनोऽसौ स्थिरासनानन्दसुचेतसा भुवि।
प्रकम्पने सिद्धिर्यथार्थगामिनी मुपैति शीघ्रं वरवीरभावम्॥

सा वायवी शक्तिरनन्तरूपिणी लीनावलीनां कुहरे महासुखम्।
ददाति सौख्यं गतिचञ्चलं जयं स्थिराशयत्वं मतिशास्त्रकोविदः।
यस्मात् स योगासननिष्ठदेहो वायुप्रमानन्दरसाप्तविग्रहः।
विहाय कम्पादितयोगभावं भूत्वा समाकर्तुमसौ समर्थः।
स्थिरचेता महासिद्धिं प्राप्नोति नात्र संशयः।
संवत्सरकृताभ्यासी महाखेचरतां व्रजेत्।
यावन्निर्गच्छति प्रीता वायवी शक्तिरुत्तमा।
नासायमवधार्यैव स्थिरचेता महामतिः।
चण्डवेगा यदा क्षिप्रमन्तावालं न गच्छति।
सर्व्वत्रगामी स भवेत्तावत्काले विचक्षणाः।
यदि शीर्षादूर्द्ध्वदेशे द्वादशांगुलकोपरि।
गन्तुं समर्थो भगवान् शिवतुल्यो गणेश्वरः।
सर्व्वत्रगामी प्रभवेत् खेचरो योगिवाङ्वशी।
इति सिद्धिर्वत्सरे स्यात् स्थिरचित्तेन शंकर।
योगी भूत्वा मनःस्थैर्य्यं न करोति यदा भुवि।
कष्टेनापदमारुह्य प्रपतेन्नारकी यथा।
अत एव महाकाल स्थिरचेता भव प्रभो।
तदा मां प्राप्स्यसि क्षिप्रं वायवी महासिद्धिदाम्।
यदा सिद्धो भवेद्भूमौ वायवीसुकृपादिभिः।

215

सदाशयः स्थिरो भूत्वा गोपयेन्मातृजारवत् ।
यदा यदा महादेव योगाभ्यासं करोति यः ।
शिष्येभ्योऽपि सुतेभ्योऽपि योगमार्गं हि दुर्गमम् ।
प्रकाशयेन्न कदापि कृत्वा मृत्युमवाप्नुयात् ।
योगयोगाद्भवेन्मोक्षो मन्त्रसिद्धिरखण्डिता ।
न प्रकाश्य न तो योगं भुक्तिमुक्तिफलाय च ।
नित्यसुखं महाधर्मं प्राप्नोति वत्स बाह्यहिः ।
आत्मसुखं नित्यसुखं मन्त्रं यन्त्रं यथागमम् ।
प्रकाशयेन्न कदापि कुलमार्गं कुलेश्वर ।
यद्येवं कुरुते धर्मी तदा मरणमाप्नुयात् ।
योगभ्रष्टोऽविधानज्ञो यती मृत्युमवाप्नुयात् ।
येन मृत्युर्वशं याति तत्कार्यं नापि दर्शयेत् ।
दत्तात्रेयो यथा योगी शुको नारद एव च ।
येन कृतं सिद्धमन्त्रं वर्णजाले कुलार्णवन् ।
एकेन लोकनाथेन योगमार्गप्रवेशनाच्च ।
तथा मंगलकार्येण ध्यानेन साधकोत्तम ।
उत्तमां सिद्धिमाप्नोति वत्स रायोगशासनात् ।
आदौ च ब्रह्मणो ध्यानं पूरकाद्यंगलक्षणैः ।
कुर्यात् सकलसिद्ध्यर्थं माम्बिकापूजनेन च ।

ऋग्वेदं चेतसि ध्यात्वा मूलाधारे चतुर्दले।
वायुना चन्द्ररूपेण धारयेन्मारुतं सुधीः।
अथर्वाद्विनिर्गतं सर्व्वमृग्वेदादिचराचरम्।
तेन पूर्णं चन्द्रमसा जीवेनामृतेन च।
गुरुपादैकभावेन कुण्डली सूर्य्यगानले।
कुम्भकं कारयेन्मन्त्री यजुर्वेदपुरःसरम्।
सर्व्वसत्त्वाधिष्ठितं तत्र सर्व्वविज्ञानमुत्तमम्।
वायव्या पूर्णसंस्थानं योगनामाभिधायकम्।
पुनः पुनः कुम्भयित्वा सत्त्वे निर्म्मलतेजसि।
महामलयसारज्ञो भवतीति न संशयः।
रेचकं शम्भुना व्याप्तं तमोगुणमनोलयम्।
सर्व्वमृत्युकुलस्थानं व्याप्तं धर्म्मकुलाकुलैः।
पुनः पुनः क्षोभनिष्ठो रेचकेन निवर्त्तते।
रेचकेन लयं याति रेचकेन परं पदम्।
प्राप्नोति साधकश्रेष्ठो रेचकेनापि सिद्धभाक्।
रेचकं वह्निरूपं च कोटिवह्निशिखोज्ज्वलम्।
द्वादशाङ्गुलमध्यस्थं ध्यात्वा वाह्ये लयं दिशेत्।
चन्द्रव्याप्तं सर्व्वलोकं सर्व्वशून्यसमुद्भवम्।
रेचकाग्निर्दहतीह वायुसख्या महाबली।

२१७

सूर्यरूपेण / चन्द्ररूपेण

ततः शशांकजीवरूपं पीत्वा जीवति वायवी।
आग्नेयी दह्यते क्षिप्रमेष होमः परो मतः।
एतत्कार्य्यं यः करोति स न मृत्युवशो भवेत्।
एतयोः सन्धिकाले च कुम्भकं सवसाधनम्।
तदैव भावकानां च पवनस्थानमेव च।
महाकुम्भकमाहृत्य चिरं स्थित्वा च कुम्भके।
अथर्व्वगामिनीं देवीं भावयेदनघो महान्।
अनन्तभावनं शम्भो वक्षे यस्य स्थिरो मितम्।
अथर्व्वे भावयेन्मन्त्री शक्तिचक्रक्रमेण तु।
आज्ञाचक्रे वेददले चतुर्द्दलसुमन्दिरे।
अथर्व्वयोगिनीं ध्यायेत् समाधिस्थेन चेतसा।
ततोऽच्युताख्यं जगतामीश्वरं श्रीयिपङ्कजे।
प्रपश्यति [illegible] जगन्नाथं नित्यमुख्यसुखोदयम्।
आज्ञाचक्रषोडदलमथर्व्वं परिकीर्त्तितम्।
ज्योतिश्चक्रं च तन्मध्ये योगमार्गोल्लसद्दलम्।
प्रपश्यति महाज्ञानी वाह्यदृष्ट्या यथाम्बुजम्।
कालेन सिद्धिमवाप्नोति ब्रह्मज्ञानी च साधकः।
ततो भजेत् कौलमार्गं ततो विद्यां प्रपश्यति।
महाविद्यां कोटिसूर्य्य[illegible]ालामालासमाकुलाम्।

एतत्त्वं विनानाथ न पश्यति कदाचन ।
वशिष्ठो ब्रह्मपुत्रोऽपि चिरकालं सुसाधनम् ।
चकार निर्ज्जने देशे तीव्रेण तपसा वशी ।
सहस्रवत्सरं च व्याप्य योगादिसाधनम् ।
तथापि साक्षात गिरिजा न बभूव महीतले ।
ततो जगाम क्रुद्धोऽसौ तातस्य निकटे प्रभुः ।
सर्व्वं तत्कथयामास स्वीयाचारक्रमं प्रभो ।
अन्यमन्त्रं देहि नाथ यथा विद्या न सिद्धिदा ।
अन्यथा सुदृढं शापं तवाग्रे प्रददामि हि ।
ततस्तं वारयामास सर्वं न कुरु भो सुत ।
पुनस्त्वां भज भावेन योगमार्गेण पण्डितः ।
ततः सा वरदा भूत्वा आगमिष्यति तेऽग्रतः ।
सा देवी परमाशक्तिः सर्व्वसंकटतारिणी ।
कोटिसूर्य्यप्रभानीला चन्द्रकोटिसुशीतला ।
स्थिरविद्युल्लताकोटिसदृशी कालकामिनी ।
सर्व्वस्वरूपा सर्व्वास्था धर्म्माधर्म्मविवर्ज्जिता ।
शुद्धाचीनाचाररता शक्तिचक्रप्रवर्त्तिका ।
अनन्तानन्दमहिमा संसारार्णवतारिणी ।
बुद्धेश्वरी बुद्धमाता अथर्व्ववेदशाखिनी ।

सा पाति जगतां लोकान् तस्याः कर्म्मचराचरम् ।
भक्त पुत्रास्थिरानन्दे कथं शम्भुं समुद्यतः ।
एकान्तचेतसा नित्यं भक्तपुत्रदयानिधे ।
तस्या दर्शनमेवं हि अवश्यं समवाप्स्यसि ।
एतत् श्रुत्वा गुरोर्वाक्यं प्रणम्य च पुनः पुनः ।
जगाम जलधेस्तीरे वशी वेदान्तवित शुचिः ।
सहस्रवत्सरं सम्यक जजाप परमं जपम् ।
आदेशोऽपि न वभूव ततः क्रोधपरो मुनिः ।
व्याकुलात्मा महाविद्यां वशिष्ठः शप्तुमुद्यतः ।
द्विराचम्य महाशापः प्रदत्तश्च सुदारुणः ।
तेनैव मुनिना नाथ मुनेरग्रे कुलेश्वरी ।
आजगाम महाविद्या योगिनामभयप्रदा ।
अकारणमरे विप्र शापो दत्तः सुदारुणः ।
मम सेवां न जानासि मत्कुलागमचिन्तनम् ।
कथं योगाभ्यासवशात मत्पादाम्भोजदर्शनम् ।
प्राप्नोति मानुषो देवो ममध्यानमदुःखदम् ।
यः कुलार्थी सिद्धमन्त्री सद्वेदाचारनिर्मलः ।
ममैव साधनं पुण्यं वेदानामप्यगोचरम् ।
बौद्धदेशेऽथर्ववेदे महाचीने तदाव्रज ।

तत्र गत्वा महाभावं विलोक्य मत्पदाम्बुजम्।
मत्कुलज्ञो महर्षे त्वं महासिद्धो भविष्यसि।
एतद्वाक्यं कथयित्वा सा वायव्याकाशगामिनी।
निराकारा भवत् शीघ्रं ततः साकाशवाहिनी।
ततो मुनिवरः श्रुत्वा महाविद्या सरस्वतीम्।
जगाम चीनभूमौ च यत्र बुद्धः प्रतिष्ठति।
पुनः पुनः प्रणम्यासौ वशिष्ठः क्षितिमण्डले।
रक्ष रक्ष महादेव बुद्धरूपधराव्यय।
अतिदीनं वशिष्ठं मां सदाव्याकुलचेतसम्।
ब्रह्मपुत्रं महादेव साधनायागमाम च।
सिद्धमार्गं न जानामि वेदमार्गपरो हर।
तवाचारं समालोक्य भयानि सन्ति मे हृदि।
तन्नाशय मनःक्षिप्रं दुर्बुद्धिं वेदगामिनीम्।
वेदबाह्यकृतं कर्म सदा ते चालयत् प्रभो।
कथमेतत् प्रकारं च मद्यं मांसं तथांगनाम्।
सर्वे दिगम्बराः शिष्या रक्तपानोद्यता वराः।
मुहुर्मुहुः प्रपिबन्ति रमयन्ति वरांगनां।
मद्यमांसासवैः पूर्णा मत्ता रक्तविलोचनाः।
निग्रहानुग्रहे शक्ताः पूर्णान्तःकरणोद्यमाः।

वेदस्यागोचराः सर्व्वे मद्यस्त्रीसेवने रताः ।
इत्युवाच महायोगी दृष्ट्वा वेदबहिष्कृतान् ।
प्राञ्जलिर्विनयाविष्टो वदचैतत्कुलप्रभो ।
मनः प्रवृत्तिरेतेषां कथं भवति पावनः ।
कथं वा जायते सिद्धिर्वेदकार्य्यं विना प्रभो ।

बुद्ध उवाच

वशिष्ठ शृणु वक्ष्यामि कुलमार्गमनुत्तमम् ।
येन विज्ञानमात्रेण रुद्ररूपी भवेत् क्षणात् ।
संक्षेपेण सर्व्वसारं कुलसिद्ध्यर्थमागमम्
आदौ शुचिर्भवेद्धीरो विवेकाक्रान्तमानसः ।
पशुभावस्थिरचेताः पशुसंगविवर्ज्जितः ।
एकाकी निर्ज्जने स्थित्वा कामक्रोधादिवर्ज्जितः ।
सदा योगाभ्यासरतो योगशिक्षादृढव्रतः ।
वेदमार्गाश्रयो नित्यं वेदार्थनिपुणो महान् ।
एवं क्रमेण धर्म्मार्थी शीलौदार्य्यगुणान्वितः ।
धारयेन्मारुतं नित्यं श्वासमार्गे मनोलयम् ।
एवमभ्यासयोगेन वशी योगी दिने दिने ।
शनैः शनैः कृताभ्यासाद्देहे स्वेदोद्गमोऽधमः ।
मध्यमः कम्पसंयुक्तो भूमित्यागः परो मतः ।

५०९७

प्राणायामेन सिद्धिः स्यात् नरो योगेश्वरो भवेत्।
योगी भूत्वा कुम्भकेन मौनी भक्तो दिवानिशम्।
शिवे कृष्णे ब्रह्मपदे स्वान्तभक्तिसंयुतः।
ब्रह्माविष्णुशिवा एते वायवीतिचञ्चलागतिः।
एवं विभाव्य मनसा कर्म्मणा वचसा शुचिः।
शक्तौ चित्तं समाधाय चिद्रूपायां स्थिराशयः।
ततो महावीरभावं कुलमार्गमहोदयम्।
शक्तिचक्रं सत्वचक्रं वैष्णवं नवविग्रहम्।
समाश्रित्य भजेन्मन्त्री कुलकात्यायनीं पराम्।
प्रत्यक्षदेवतां श्रीदां चण्डोद्वेगनिकृन्तनीम्।
चिद्रूपां ज्ञाननिलयां चैतन्यानन्दविग्रहाम्।
कोटिसौदामिनीभासां सर्व्वतत्वस्वरूपिणीम्।
अष्टादशभुजां रौद्रीं शवमांसाचलप्रियाम्।
समाश्रित्य प्रजपेन्मन्त्रं कुलमार्गाश्रयो नरः।
कुलमार्गात परं मार्गं को जानाति जगत्त्रये।
एतन्मार्गप्रसादेन ब्रह्मा स्रष्टा स्वयं महान्।
विष्णुश्च पालने शक्तो निर्म्मलः सत्वरूपधृक्।
सर्व्वैः सेव्यो महापूज्यो यजुर्वेदाधिपो महान्।
हरः संहारकर्त्ता च वीरेशो मत्तमानसः।
सर्व्वैर्यामनाकः क्रोधी क्रोधराजो महाबली।

वीरभावप्रसादेन दिक्पाला रुद्ररूपिणः।
वीराधीनमिदं विश्वं कुलाधीनं च वीरकम्।
अतः कुलं समाश्रित्य सर्व्वसिद्धीश्वरो जडः॥
मासेनाकर्षणे सिद्धि द्विमासे वाक्पतिर्भवेत।
मासत्रयेण संयोगाज्जायते सुरवल्लभः।
एवं चतुष्टये मासि भवेद्दिक्पालगोचरः।
पंचमे पंचबाणः स्यात षष्ठे रुद्रो भवेद्ध्रुवम्।
एतत्पश्चाचारसारं सर्व्वधामयगोचरम्।
एतन्मार्गं कौलमार्गात परं च नहि योगिनाम्।
योगिनां दृढभक्तानां भक्तानामेकमासतः।
कार्य्यसिद्धिर्भवेन्नाथ कुलमार्गप्रसादतः।
पूर्णयोगी भवेद्विप्रः षण्मासाभ्यासयोगतः।
शक्तिं विना शिवोऽशक्तः किमन्ये जडबुद्धयः।
इत्युक्त्वा बुद्धरूपी च कारयामास साधनम्।
कुरु विप्र महाशक्तिसेवनं मद्यसाधनम्।
महाविद्यापदाम्भोजदर्शनं समवाप्स्यसि।
एतत्श्रुत्वा गुरोर्वाक्यं स्मृत्वा देवसरस्वतीम्।
मदिरासाधनं कर्तुं जगाम कुलमण्डले।
मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च।

224

पुनः पुनः साधयित्वा पूर्णयोगी बभूव सः।
योगमार्गं कुलमार्गमेकाचारक्रमं प्रभो।
योगी भूत्वा कुलं ध्यात्वा सर्व्वसिद्धीश्वरो भवेत्।
सिद्धिकालं कुलपथं योगेन जडितं सदा।
भगसंयोगमात्रेण सर्व्वसिद्धीश्वरो भवेत्।
एतद्योगं विजानीयाज्जीवात्मपरमात्मनोः। ४१ ॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे आज्ञाचक्रसारनिर्णये सिद्धमन्त्रप्रकरणे चतुर्दशोल्लासे भैरवीभैरवसंवादे सप्तदशः पटलः।

॥१७॥

225

शृणु नाथ प्रवक्ष्यामि असाध्यसाधनं परम्।
कामचक्रस्य वर्णानां वर्णनं प्रश्ननिर्णयम्।
आज्ञाचक्रं मध्यभागे नाडीकोटिरसालिनी।
तन्मध्ये भावयेन्मन्त्री कामचक्रं मनोरमम्।
कामचक्रे च पूर्व्वोक्तवर्णमालोक्य साधकः।
न्यासमन्त्रे पुटीकृत्य जपित्वा योगिराड् भवेत्।
एकमन्दिरमध्यस्य मन्त्रमाश्रित्य यत्नतः।
निजनामाक्षरं तत्र तत्कोष्ठमाश्रयेद्बुधः।
एतेषां कोष्ठसंस्थानां वर्णानां द्विफलाफलम्।
वदकान्ते रहस्यं च कामचक्रफलाद्भुतम्।

काम चक्रं कामरूपे तत्र वाराणसीपुरम्।
तत्र सर्व्वपीठचक्रं चक्राणामुत्तमोत्तमम्।
एतच्चक्रप्रसादेन ते पादाम्बुजदर्शनम्।
प्राप्नोति साधनात् सत्यं सर्व्वं जानाति साधकः।
कामनाफलसिद्ध्यर्थं मन्त्रार्थादि विचारणम्।
दुष्टमक्तामितं त्यक्ता गृह्णीयान्मन्त्रमुत्तमम्।

आनन्दभैरव्युवाच ।

शृणु वर्णफलं नाथ साध्यप्रश्नविनिर्णयम्।
वर्णानां च नाथ राशिभेदनं संशृणु प्रभो।
राश्यादिषु स्थितान् वर्णान् आश्रयेत साधकोत्तमः।
वर्जयेत दुष्टभावं च तथाक्तामितमेव च।
आश्रयेत राशिभेदेन वाल्यकैशोरयौवनम्।
अथ वाल्यवर्णभेदं विचारे वामयोगतः।
मन्त्राणां चापि गणयेत प्रश्नकर्म्माणि दक्षिणात्।
मध्यकोणावधि नाथ गणनीयं विचक्षणैः।
ऊर्द्धदक्षिणयोगेन गणयेत प्रश्नकर्म्माणि।
वामयोगेन गणयेत मन्त्रादीनां विचारणे।
शृणु तद्वर्णवर्णानां फलमत्यन्तसुन्दरम्।
वदामि परमानन्दरसासिन्धु मधुव्रत।

कवर्गं कामाख्या भवनमणिपीठे त्रिजगताम्
धरित्री सावित्री वसति शततं सिद्धशरणे ।
इताप्रोख्याकाशे जलदतनुजा सा कामजननी
गभीरा खड्गाभा करहरकरा घोरमुखरा ॥ १॥ क५॥
अभ्यासयोगात् कलिकालपावनीं
कालीं कुलानन्दमयीं भजे प्रीम् ।
महारसोल्लाससुवक्त्रलोचनां
कामेश्वरीं कूर्मपदां भजेज्जयीम् ॥ २॥

कालागुरोरुत्तमसिद्धसेविता
मनोहरा खेचरसारशाखिनी ।

उल्कासमाभा भवदीयशक्तिः
तेजस्तटाकोमलनीलदेहा ॥ ३॥

खड्गायुधा खर्परधारिणी सा ।
चण्डाङ्गमा वायुपथस्थखेचरी ।

विद्यामया खञ्जनलोचना गतिः
दातिदया खेचरवर्गधारिणी ॥ ४॥
खारी विहारी खल खेलनेश्वरी खेरी खलोन्मत्तगतिः प्रियाखगा ।
महाखगारूढपदा स्विलाश्रिता प्रयाति विद्यावलविक्रमस्था ॥
व्यापारनिद्रा कननार्थचिन्ता खर्वप्रभा भाति यदा यदोदये । ख

गायत्री गणनायिका मतिगतिर्ग्लानिघ्नगूढाशया
गीता गोकुलकामिनी गुरुतरा गाहाग्निजायोदया।
गोरूपा गयहा गया गुणवती गाथापथस्थायिनी
श्रीगुर्वीप्रतिपालनं त्रिजगतां गायन्ति यां तां भजे॥ ग।

घोरार्धर्मकरानन्दमोहिनी घर्घरा घना।
निद्रा मामाति घटना नीलघोटकवाहिनी। घ।

विन्दुस्था विषभोजनानलकथावीजस्रमालाप्रिया।
पंचागमनुनासिकामुखमयी वेदक्रियासन्मुखी।
कत्या भूतनिवारिणी कवणा गानङोनुशिरा मुखा
वर्णस्याहितकारिणी कलियुगे योगाटवी पातु वः॥ ङ॥

चचारचारं चमरीच चारु प्रचारचन्द्राननचंचलाचला।
विचित्रवक्त्राचरणाब्जचालनं चिराय चेष्टां मयि देहि चंचले॥ च॥

इत्थं वर्णा चवर्गस्य महापातकनाशनम्।
कामचक्रे स्थितं यद्यत प्रश्ने मन्त्रे ग्रहे तथा।
चवर्गफलमत्यन्तं निकर्षं सूक्ष्मभावनम्।
धिया सर्वाक्षरश्रेणीं भावयन्ति पुनः पुनः।
दृष्ट्वा स्तामितमेवं हि त्यक्त्वा मन्त्राणि दापयेत्।
अन्यकोणस्थवर्णानां गृह्णीयान्मन्त्रमुत्तमम्।
चवर्गकुलजालस्था देवता दायिता प्रभो।

228

ततप्रकारं प्रवक्ष्यामि शृणुष्व विश्वभावन।
सर्व्वं जानासि शम्भो त्वं परं किं कथयामि ते।
तथापि वर्गमाहात्म्यं कामचक्रस्य निर्म्मलम्।
यो जानाति कामचक्रं यमो न हन्ति तं जनम्।
ततप्रकारं भावयुक्तं भावनां ज्ञाननिर्म्मलम्।
यं ज्ञात्वा कामरूपस्था मूलाधारनिवासिनः।
देवताः पार्थिवाः सर्व्वे आत्मानं परमेष्ठिनम्।
न जानन्ति बालका मे तेषां योगादिसिद्धये।
कामचक्रं कामरूपं कामनाफलसिद्धिदम्।
तन्मन्त्रग्रहणादेव साक्षाद्दीक्षो भवेन्नरः।
श्रुतिशास्त्राणि सर्व्वाणि करे तस्य न संशयः।
योगशिक्षादिकं सर्व्वं जानाति कामचक्रतः।
कामचक्रप्रसादेन कामरूपी भवेद्ध्रुवम्
तदूर्द्ध्वस्थं तदन्तस्थं दशकोणस्थमेव च।
अष्टदलस्थं तथापि विचार्य्य साधकोत्तमः।
अनुलोमविलोमेन शास्त्रस्यानुक्रमेण च।
बाल्यं कैशोरमुख्यासं बुद्धिसिद्धि यौवनम्।
वृद्धत्वमाप्नोति अन्ते च निधनं भवेत्।
बलग्रहास्तन्मध्ये पंचप्राणाश्च सन्ति वै।

229

अनुलोमविलोमेन गमयेद्दशकोणके ।
दशकोणे सर्व्वसिद्धिरष्टसिद्धिश्च तत्रके ।
अष्टपत्रे प्रशंसन्ति अधोनन्दमधोगृहे ।
अन्त्यामूर्द्ध्वगृहे च वर्णामंत्रांश्च तत्र तान् ।
समाश्रित्य जपेद्विद्यां स्ववयः क्रमरूपिणीम् ।
ह्रस्वदेवी क्रोधवृद्धिं ददाति साधकाय च ।
यदि क्रोधतरा विद्या भक्षयेत साधकं लघु ।
अतः समवयोरूपां देवतामष्टसिद्धिदाम् ।
देवो भूत्वा भजेद्देवं तदा मोक्षमवाप्नुयात ।
यदि वर्णान जानाति कौलपुत्रोऽप्यधो व्रजेत ।
डाकिनी तं भक्षयन्ती दीक्षामन्त्रादिहीनकम् ।
अतो वर्णविचारं च प्रवक्ष्यामि समासतः ।
चापं पाशौ च धृत्वा नरकमनुजकं पालयन्तीह लोके
सार्व्वं चन्द्रा विद्यातं प्रचुरभवभयं भास्करे हन्ति शोकान् ।
चातुर्थ्यास्वकरूपाणैः पदमपि च फला संददातीह माया
योगाचारेण योगो द्रुततर मनसा साधकायाशु योगम् ॥ ८६
छायामण्डपमध्यगा छलगता छत्रच्छटा तेजसा
त्रैलोक्यं प्रतिपाति पाण्डुपातिभिः देवाधिपैः श्रीधरैः ।

 प॰ २८

प्राणप्रेमविहारिणी भगवती छचेण तं साधकम् ॥ छ।७॥
ज्ञातिख्यातिरनुत्तमा प्रभवति प्रीताय सौख्याय ताम्
जीवानामतिदुःखराशिहननादेकार्थसञ्चारिणी ।
वन्द्राजीवनमधगा गतिमती विद्याजया यामिनी ।
यातायातनिवारिणी जनमनःसंहारचिन्तारता ॥ ज।८
झञ्झानादविवादझाद झटिभिर्झञ्झारसानायवी
झञ्झंकारहता शुभा धनमुखी कैवल्यमुक्तिप्रदा ।
कृत्वा रक्षति साधकं वरझनातकारेण सूत्मानिला
कामक्रोधविनाशिनी शशिमुखी झंकारशब्दप्रिया ॥ झ।८॥
भकारबीजामलभावसारे रालस्यपुंजं प्रतिहन्ति योगिनी ।
खड्गायुधा सा रसपानमत्ता संहारमुद्राकुलसाधुदुःखहा ॥
ञ।१०।
वन्द्रातपाक्लिग्ध सुकान्तविग्रहा
टंकास्त्रवज्रास्त्रहतारिपुङ्गवा ।
टिंटिं महामन्त्रजपेन सिद्धिदा
हन्ति प्रियं क्रूरजनस्य पातकम् ॥ २।११।ट।११॥
विशालनेत्रायतडक्कराज्ञीं ठंठां स्वबीजं परिपाति ठाक्वरी ।
मनोगतं दुःखसमूहमुख्येशी रत्नाकरा शत्रुकुलं निहन्ति ॥ १२।१।
१२।ड।
डामरां जगतामाद्यां डंड्रां डिंडीं स्वरूपिणी ।
कामचक्रे मुखं दत्वा सारमेवं तनोति सा । १।१३।५।१६

231

ढंढंबीजालिका विद्या रत्नमन्दिरसंस्थिता ।
ढंकारी पाशहस्ता च साधकं पाति सुन्दरी ॥ २।२४।८।२४॥
संसांसिंसीं जपति सुजनी जीवनी मध्यसंस्था
सर्वैश्वर्या प्रभवति हृदि क्षोभपुञ्जापहाय ।
वाराणस्यां सकलभयहरं सन्ददातीह लक्ष्मीम्
मूलाद्यन्तानलपथमुखी कालजालं निहन्ति ॥ २५।७।२५।
ताराश्रीशा त्रिकटुकुटिला ताररूपा तरुस्था
तनुश्रेणी तरुवरकला त्राणहेतो रतीता ।
तालक्षोभा ताडदिवकरा कोटिसूर्य्यप्रकाशा
तोकादीनां वहनतरुणी तारकं पाति भक्तम् ॥ २।२६।६।२६
कालक्रमेणैव विमुक्तिदायिनी
मनोहरा नीरजनेत्रकामला ।
स्थिरा रथकाराद्यरमालिनी स्थला
प्रपाति मुख्यं वरसाधकं शिवा ॥ २।२७॥०
दात्री दारिद्र्यातिनिकृष्टदुःखहा
दान्ताप्रिया दैत्यविदारिणी दरा ॥
दानस्थलस्था दयिता जगत्पतेः
दयां ददाति द्रवदेवदारा ॥ २।२८।
धात्री धराधारगतात्परा धनी धनप्रदा धर्मगतिर्धरित्री ।

दधार बीजं धनबीजमालिनी ध्यानस्थिता धर्म्मनिरूपणाय ॥ ८. प० १९ ।
नन्दत्तु प्रतिपालनाय जगतामानन्दपुञ्जोदया
योगिन्यो नयनाम्बुजोज्ज्वलशिखा शोभाप्रभा नादराः ।
नीता नारपथास्थिता नुतिमतीं याः पालयन्तीह ताः
पान्तु श्रीसुरतेजसा खलु यथा कालक्रमा साधकम् ॥ २१२०।६१२०
प्रीता प्रेमविलासिनी वरपथज्ञानाश्रया पालनात्
पूज्या पायस पापरापरपदा पीताम्बरा पोषणा ।
प्रौढा पुत्रवती पुराणकथना पायात् पुरा पावनी
या कालेश्वरपावनं परजनं श्रीसाधकं प्रास्थिता ॥ प।२१॥
कृतफणिवरमाला फेरवी फेरूपा
फणाधरमुखफुल्लाम्भोजवाक्यामृताब्धौ ।
निरवधि हृदकण्ठे वाक्यरूपा फलस्था
फलगतफणिचूडा पातु फुल्लारविन्दे ॥ २२। फ ॥
वन्द्राभ्यां वशकारिणीं यदि जपेत् श्रीपादसंसेवनात्
वाणीं वेदविनिर्गतां भगवतीं श्रीवासुदेवोर्वराम् ।
वश्या तस्य कराम्बुजे वसति सा वीरासनस्थावशी
रक्ताम्भोरुहकोमले भगवती वाणी नरी नृत्यते ॥ २३। व ॥
भीमा भीतिहरा भया भवहरा भास्वभाव्या भगे
भाव्या भोगवशा शया भगवती भौतेश्वरी भूतगा ।

* प्रौढा प्रेमवती ....

भेरीनादभवोल्वणा भगपथा मोदेन संमोहिनी
भाति श्रीभवभूतिभूमिभवसा भूमीशभावाम्बुजे ॥ २४ ॥म।
माता मन्दिरमालिनी मतिमता मानन्दमालामला
मिथ्यामैथुनमोहिनी मनसि सा मित्रा मदन्मेलनी ।
मानीतं वदते महेश्वरमनाहृत्वं तस्य वक्षःस्थले
स्थित्वा सा मरणं निहन्ति सहसा मौनावलम्बी भवेत ॥ २५ ॥
याति प्रिया या प्रतियाति योगिनी
यामास्थिता योगसुखा स्वदा यथा ।
योनिस्थले सा यति साधकं यमा
यात्रा सदा याति यमादिकं दहेत ॥ २६ ॥
रतस्था रतिराजिता रमामुखे राज्ञः श्रिया रीतिहा
रक्तालङ्कृतरङ्गिणी रसवती रागापदा रोगहा ।
राजेन्द्रं रजनी रथं प्रकुपिता राधा मुदा पातु तम
स्वाहा रूपमनोरमा सुखमणी रामा रका रान्दरी ॥ २७ ॥
लक्ष्मीलां गललक्षणा सुललना लीलामला निर्मला
बाला मूलनिवासतां लवणसिन्धूल्लासलीलाकुला ।
लीला कौलकुलानना नलमुखी लग्नालयव्याकुला
कौला लौकिकलोचना लयबला बालोज्ज्वला पातु माम ॥ २८ ॥
विद्यासवस्थानवनस्थवासना वश्यावमनी ललना वसार्थम ।

सा पाति वीरं यदि तां भजेद्वशी विश्वासनं ते रसयन्ति वारुणीम्॥ २९॥
शीतांशुना शोकविशोषनाशिनीं भजेत सुशीलां स भवेद्दिवाकरः।
शिवां शचीं शौरभक्तां शवासनस्थां शवास्यितां शीतलदेशशोभिताम्॥ ३०।
षट्चक्रे षट्पदाधारी षडङ्गस्था षडानना।
षट्चक्रसिद्धिदा पाति साधकं षोडशीमुदा॥ ३१
सा सा सूक्ष्मा वहति सुजनं सप्तलोकस्य लाद्या
सदा साक्षात् सुखसमरसा सज्जनाह्लादसाध्या।
साकारास्या च्युतमधुगिरा पूरयन्ती महार्थम्
वेदाधीरा सुरमतिनिहा सामवेदान्तरस्था॥ ३२॥
हठात्कारेण सा हावा हरति प्राणहं जनम्।
विहारिणी न सा हन्ति हिरण्यहारमालिनी॥ ३३॥
क्षालोका लक्षजपदा लाक्षवा लक्षलोमशा।
क्षालम्बालालकालापा पातितं यो भजेल्लघु॥
स यं क्षितौ याति सुसूक्ष्मभावनम्
विहाय मन्त्री क्षयरोगहारिणी।
सूक्ष्मातिसूक्ष्मान्यतमं विचिन्तयेत
क्षोभादिकं पक्षकलाक्षयन्ती॥ ३४
षोडशस्वरभेदेन फलं शृणु महाप्रभो
संक्षेपेण प्रवक्तव्यमुत्तकस्य फलकाङ्क्षिणाम्।

235

श्लोकत्रयेण ततत्सर्व्वं फलमत्यन्तसाधनम्।
ये कुर्व्वन्ति महादेव कामचक्रोत्सवं यथा।
आद्यष्टस्वरमङ्गलं जपति यः श्रीनाथवक्त्राम्बुजां
प्राप्य श्रीधरनायकः क्षितितले सिद्धो भवेत्तत्क्षणात्।
राजा राजकुलेश्वरो जयपथे दीपोज्ज्वला मालया
संपश्येत परमां कलां जयति सः कामानलं ताडयेत्॥
अ॥ आ॥ इ॥ ई। उ॥ ऊ॥ ऋ॥ ॠ॥
शेषाष्टस्वरपावनी प्रियजनानन्देन मन्दोदरी
मन्दं हन्ति मदानना त्रिजगतां साधुत्तमानां सुखम्।
दत्वा पालयति प्रभा प्रलयके कौटिल्यविद्यापहा
भक्ताय क्षितिपालनं निजजपध्यानाकुला मंगलम्॥
* ऌ॥ ॡ॥ ए॥ ऐ॥ ओ॥ औ॥ अं॥ अः॥
इति वर्णफलं ज्ञात्वा यो गृह्णाति मनूत्तमम्।
स भवेत् कुलयोगार्थी सिद्धज्ञानी महीतले।
वर्गे वर्गे फलं नाथ शृणु वक्ष्यामि तत्वतः।
अकारादीनां च कथनं येन जानाति साधकः।
कवर्गे कामसम्प्राप्तिः स्त्रिया व्याप्तं सुमाद्भरम्।
प्राप्नोति कामचक्रार्थं नाशनं तत्र संमतम्॥क॥ पु॥
चवर्गे दीर्घजीवी स्यात् दृढ सम्पदमेव च।

वृत्तिं प्राप्नोति गमनादनुद्वेग्य शरीरिणाः।
समाचारं समाप्नोति गमने सर्व्वमुत्तमम्।
टवर्गे सम्भवेन्नाथ महदुच्चाटनादिकम्।
पुत्राणामपि वृद्धिः स्यात्तवर्गे धनलाभकम्।
पवर्गे मरणं नाथ यदि ज्ञानी महागुणी।
कामचक्रफलं नाथ राशिदण्डेन योजयेत्।
निजगेहे स्थितं राशिं ज्ञात्वा हि दिनदण्डतः
गणयित्वा शुभं ज्ञानी अनुलोमविलोमतः।
घटस्थं सकलं सिद्धं कोणस्थं पार्श्वगे शुभम्।
शुभं मन्त्रं गृहीत्वा तु सिद्धिमाप्नोति साधकः॥०॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे कामचक्रसारसंकेते सिद्धमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवीभैरवसंवादे अष्टादशः पटलः॥२८॥

आनन्दभैरवीउवाच॰
इदानीं शृणु वक्ष्यामि सर्व्वतन्त्रार्थगोपनम्।
तत सर्व्वं प्रश्नचक्रे च षडाधारस्य भेदनम्।
कालचक्रफलं तत्त्वं निर्विकल्पादिसाधनम्।
प्रश्नचक्रं कामरूपं चैतन्यं सर्व्वदा मनोः।

षड्मन्दिरे षट्कलापे कैवल्य साधनादिकम् ।
नानाभोगं योगसिद्धिं हित्वा योमन्त्रमाजपेत् ।
स भवेद्देवताद्रोही कोटिकल्पेन सिध्यति ।
हृदयस्य महाशक्तिः प्रतिभाति महोदया ।
क्षणादेव हि सिद्धिः स्यात् किं परैर्मन्त्रसाधनैः ।
अतो भक्तिं सदा कुर्यात् देवताभावसिद्धये ।
भैरव उवाच ।
एतच्चक्रप्रसादेन कोवा किं सिद्धिमाप्नुयात् ।
एतस्य भावतां देवि किंफलं भावनाशुभम्
कोवा प्रश्नादिकथने क्षमो भवति सुन्दरि ।
तत्प्रकारं प्रकारेण वद मे फलसिद्धये ।
आनन्दभैरव्युवाच ।
यः करोति पूर्णहोमं पुत्रार्थं योगसिद्धये ।
कुण्डलीक्रमयोगेन पुनः पुनः क्रमेण च ।
एतच्चक्रार्थभावज्ञः स एव नात्र संशयः ।
यः करोति सदा नाथ वायुर्निर्गमलक्षणम् ।
ऊर्द्धं संस्थाप्य विधिवत् भावनां कुरुते नरः ।
स एव सिद्धिमाप्नोति सिद्धमार्गे न संशयः ।
फलमेतद्भावनार्थं कामक्रोधादिवर्जितम् ।

भावनाफलसिद्ध्यर्थं वायुसंयोगसंक्रमात् ।
लेपयित्वा अंजयित्वा शोषयित्वा पुनः पुनः ।
धर्म्माधर्म्मविरोधेन सूक्ष्मवायुक्रमेण च ।
प्राप्नोति महतीं सिद्धिमेतत्चक्रस्य तत्फलम् ।
फलं च द्विविधं प्रोक्तं स्थूलसूक्ष्मपदास्थितम् ।
स्थूलां त्यक्त्वा महासूक्ष्मां मनो याति यदा यदा ।
तदाहि महती सिद्धिर्वासव स्तत्क्षणाद्भवेत् ।
एकवारं भावयेद्यः सिद्धचक्रस्य वर्णकान् ।
तस्यैव भावसिद्धिः स्यात् भावेन किं न सिध्यति ।
महद्वारं विना नाथ कः सिद्धिफलको गृही ।
योगभ्रष्टः स्थूलफले परजन्मनि सिद्धिभाक् ।
ऐहिके सिद्धिमाप्नोति सूक्ष्मफलक्रमेण तु ।
यो जानाति सूक्ष्मफलं स योगी भवति ध्रुवम् ।
स एव प्रश्नकथने योग्यो भवति साधकः ।
यः सूक्ष्मफलभोक्ता स्यात् क्रियागोपनतत्परः ।
निरन्तरं प्रश्नचक्रमाज्ञाचक्रोपरिस्थितम् ।
विभाव्य कालसिद्धिः स्यात् सर्व्वज्ञो वेदपारगः ।
कालज्ञानी च सर्व्वज्ञ इति मन्त्रार्थनिर्णयः ।
प्रश्नचक्रस्थितं वर्णं सूक्ष्मकालफलावहम् ।

239

मनोरूपं द्रएड भेदं मासभेदं सवर्गकम ।
मनसो भ्रम एवं हि काल एको न संप्रायः ।
मृत्युं वशं करोत्येव कालज्ञानी स योगिराट ।
कालेन लीयते सर्व्वं त्रैलोक्यं सचराचरम ।
कालाधीनमिदं विश्वं तस्मात कालं वशं नयेत ।
ततकालं सूक्ष्मनिलयं दुर्व्वाच्यं प्रश्नकं शृणु ।
मेषं तुलाराशिमनुत्तमं सदा वैशाखमासे फलसिद्धिकारणम ।
कवर्गकं प्राप्य स्ववालभावे यश्चिन्तयेत स क्षितिनाथराड भवेत ॥
आज्ञाचक्रोपरि ध्यात्वा सर्व्वं वर्णं महाप्रभो ।
एकदर्शन सिद्धिः स्यात परभावेन हेतुना ।
सिद्धेश चक्रचैतन्यं योजनाति महीतले ।
वाकसिद्धिर्जायते मासात दिवारात्रिक्रमेण च ।
वर्णमाला समाक्रान्तं राशिनक्षत्रसंयुतम ।
ग्रहचक्रं भावयित्वा सर्व्वं जयति साधकः ।
चवर्गं वृषमीनस्य कैशोरसिद्धिकारणम ।
द्विमाससाधनादेव सर्व्वज्ञो भवति ध्रुवम ।
योगिनी खेचरी विद्या आयाति निकटे सताम ।
ग्रहचक्रप्रसादेन जीवन्मुक्तस्तु साधकः ।
यदि कर्म करोत्येव एकान्तचित्तनिर्मले ।

तस्यासाध्यं त्रिभुवने न किञ्चिदपि वर्त्तते ।
पद्मचक्रप्रसादेन सर्व्वे वै योगिनो भुवि ।
यदि योगी भवेद्भूमौ तदा मोक्षमवाप्नुयात ।
विना योगसाधनेन कः सिद्धो भूमिमण्डले ।
साधनेन विना सिद्धिः कस्य भक्तस्य जायते ।
भक्तानां निकटे सर्व्वे प्रविशन्ति महर्षयः ।
अतो भक्तिं सदा कुर्यात सर्व्वधर्मान विहाय च ।
तत्कालं भक्तिमाप्नोति पद्मचक्रप्रसादतः ।
तत्प्रकारं महाधर्म्मं कौवतुं त्वम स्वाहि ।
किञ्चित्तद्भावसारं च पद्मचक्रे वदाम्यहम ।
ववर्ग भावनादेव भक्तिमाप्नोति साधकः ।
समाधाय परं देव माज्ञाचक्रोपरि प्रभो ।
विभाव्य नित्यभावं हि प्राप्नोति तत्क्षणादपि ।
आनन्दाश्रूणि पुलको देहावेशमनोलयम ।
सर्व्वकर्मसुसंत्यागी यः करोति स योगिराट ।
टवर्ग वासनासिद्धिः खगवाहितो भवेत ।
बलवान सर्व्वविज्ञानी त्रिमासे खेचरो भवेत ।
खेचरी मेलनं तस्य पारं प्राप्नोति चक्रतः ।
टवर्ग व्याप्य तिष्ठन्ति मिथुनः कुम्भ

प० २६

स्वनक्षत्रे स्वयोगं च विभाव्य योगिराड् भवेत् ।
चतुर्मासे पूर्णयोगी तवर्गसाधनादपि ।
वेतालादिमहासिद्धिः सिन्धुसिद्धिमवाप्नुयात् ।
तवर्गं व्याप्य तिष्ठन्ति मकराद्यष्टकर्कटाः ॥
चिरजीवी भवेद्दीप्त इन्दुतुल्यप्रियो भवेत् ।
तिष्ठेत् प्रलयपर्य्यन्तो महाप्रलयरूपवान् ।
कलाकालवशं मन्त्री महावायौ महालयम् ।
महाचन्द्रे सूर्य्यमध्ये वह्निमण्डलमध्यके ।
महाप्रलयभावेन लीनं कुर्य्यान्महानिले ।
महाप्रलयपर्य्यन्तो सैव तिष्ठति निश्चितम् ।
पंचमे मासि संप्राप्ते पवर्गे शुभलक्षणे ।
मनो निधाय यो योगी ध्यानचिन्तापरो यदि ।
वाग्देवता तस्य साक्षात् भवतीति न संशयः ।
पवर्गं व्याप्य तिष्ठन्ति धनुःसिंहस्तु चितं कले ।
विभाव्य परसंस्थानं स पश्यति महानिलम् ।
त्रैलोक्यमयवर्गं च षट्चक्रं चक्षुषा क्षणात् ।
यादवानां ब्रह्मपथं सर्व्वतीर्थपदाश्रयम् ।
महासत्वगुणाक्रान्तं सत्वं निर्म्मलचक्षुषा ।
कन्यावृश्चिकराशिभ्यां ब्रह्ममार्गं विलोकयेत् ।

242

षष्ठमासेन सिद्धिः स्यात् महाकौलो भवेद्ध्रुवम् ।
मौनी स्वकान्तभक्तः स्यात् श्रीपादाम्भोजदर्शनम् ।
प्राप्नोति साधकश्रेष्ठः सायुज्यपदवीं लभेत् ।
ततो मध्ये प्रगच्छन्ति योगिनस्तत्त्वचिन्तकाः ।
शर्दिद्दान्तो चतुष्कोणे सर्व्वयोगाश्रये पदे ।
विभाव्य याति शीघ्रं स श्रीदेवीलोकमण्डले ।
महाकालो भवेद्धीमान् प्रश्नचक्रस्य भावकः ।

इति श्रीरुद्रयामले उत्तरतन्त्रे सर्व्वतन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे प्रश्नचक्रसारसंकेते सिद्धमन्त्रप्रकरणे चतुर्व्वेदोल्लासे भैरवीभैरवसंवादे ऊनविंशः पटलः ॥०॥२६॥

आनन्दभैरव्युवाच ।

अथ वक्ष्ये महादेव सिद्धिमन्त्रविचारणम् ।
जपित्वा भावयित्वा च नरो मुच्येत शंकटात् ।
फलचक्रे सर्व्वमन्त्रं सर्व्वसारं तनुप्रियम् ।
क्रियायोगात् भवेत् सिद्धिर्वायवी शक्तिसेवनात् ।
वाह्नवाजं त्रिकोणस्थं षट्कोणं तद्बहिः प्रभो ।
षट्कोणे षड्मनुं ध्यात्वा यमाप्नोति रुद्ररूपिणः ।
अष्टकोणे स्थिता वर्णा अंकभेदेन मण्डितान् ।

244

अंकसंख्याक्रमेणैव ज्ञात्वा तद्वाहिदेव च।
ततसंख्यासु गतान वर्णान विभाव्य खेचरो भवेत।
विना त्रिकोणयोगेन षटकोणे तत्रवर्णकान।
आज्ञाचक्रमध्यदेशे कामचक्रमनोरमम।
कामचक्रमध्यदेशे महासूक्ष्मफलोदयम।
प्रश्नचक्रं षटपदानां षटचक्रफलसाधनम।
प्रश्नचक्रे फलचक्रे योगाष्टांगफलप्रदम।
फलचक्रस्योर्द्धभागे वर्णमालाक्रमेण तु।
तद्वर्णान मौनजापेन फलसारं समाप्नुयात।
फलचक्रप्रसादेन तत्वचिन्तापरो यदि।
स्थित्वा भ्रूमध्यकुहरे सदा भावयतीशवत।
भावज्ञानी भवेत शीघ्रं मूढोऽपि भावनावशात।
आदौ सूक्ष्मफलं वक्ष्ये वर्णभेदेन शंकर।
वाह्निवीजं सूक्ष्मफलं साक्षात प्रत्यक्षकारणम।
वह्निर्भाति निरन्तरं त्रिजगतां नाशाय रक्षाकरो-
वीजं सर्व्वचलाचलक्षयदहनः श्रीकालिकाविग्रहः।
सर्व्वव्यापक ईश्वरः जयति यः कान्त्या मनःपल्लवम
ध्यात्वा तं समरूपवान पराशिवज्ञानी भवेतत क्षणात॥
त्रिकोणस्थं वह्निवीजं विधिविद्याप्रकाशकम।

अकस्मात् सिद्धिदातारं यो भजेत् स भवेत् सुखी।
षट्कोणस्य वशी मन्त्रान् मूलाधारानन्दभैरव।
यत्र ज्ञात्वा देवताः सर्वा दिग्विदिक्षु प्रपालिका।
तदिदं कमनीयार्थं संकेतपुस्तलाञ्छितम्।
वह्निबीजस्योर्द्धदेशे चन्द्रबीजमनुत्तमम्।
तत्र यो भावयेन्मन्त्री स सिद्धो नात्र संशयः।
विधोर्बीजं सूक्ष्मं विमलकमलं कान्तिकिरणम्
सदा बीजस्थानं प्रलयनिलयं वायुजडितम्।
ततो वामे सूर्य्यं सकलविफलध्वंसनिकरम्
महावाक्स्थानं भजति सुजनो भावविधिना॥ ६६॥
तदधःकोणगेहे च श्रीबीजं पञ्चमस्वरम्।
भावकस्यलतासारमकारादिकुलान्तरम्।
चतुःपञ्चाशदंकस्थं वायुबीजमधस्ततः।
विभाव्य वायवीं सिद्धिमवाप्नोति नराधिपः।
तदंकदक्षिणे चाथ भवानीबीजमण्डलम्।
युग्मस्वरसमाक्रान्तं विभाव्य योगिराड् भवेत्।
तद्दक्षिणोर्द्धकोणे च सोमबीजमनुत्तमम्।
विभाव्य जगतामीशः स्थानं प्राप्नुयान्नरः।
तदूर्द्ध्वं परमं बीजं साक्षात्करफलप्रदम्

मासैकभावनादेव देवीलोके गतिर्भवेत् ।
तदूर्द्ध्वकोण गेहे च डाकिनीबीजमण्डलम् ।
साधनादेव सिद्धिः स्यात् लक्ष्मीनाथो भवेदिह ।
शंकरक्रमेण सर्वत्र ज्ञेयं स्वरविधानकम् ।
येन तेन स्वरेणापि वेष्टितं फलबीजकम् ।
भवत्येव महादेव वायुसिद्ध्यादिकारणम् ।
अष्टकोणतले नाथ षट्कोणे यानि सन्ति वै ।
तद्बीजानि मतफलानि ध्यात्वा वाक्सिद्धिमाप्नुयात् ।
बीजोर्द्ध्वे कमलाबीजं भावकल्पद्रुमाकरः ।
सर्वत्र तेजसाकान्तं विभाव्य योगिनीपते ।
तदधः शीतलाबीजं वामभागक्रमेण तु ।
विभाव्य परमानन्दरसे मग्नो महासुखी ।
तदधः कामबीजं च कामनाफलसिद्धिदम् ।
यो भजेत् परमानन्दो नित्यज्ञानी च वायुना ।
तदग्रे वेदकोणे च वारुणीबीजमुत्तमम् ।
विभाव्य तारको भूत्वा चिरजीवी स जीवति ।
तदूर्द्ध्वे पंचमे कोणे वज्रबीजं वकारकम् ।
अष्टसिद्धिकरं साक्षात् भजतां शीघ्रसिद्धिदम् ।
षट्कोणे च तदूर्द्ध्वे च स्वरबीजं महाफलम् ।

हृदये भावयेन्मन्त्री तस्य सिद्धिः प्रतिष्ठिता ।
अथ कोणस्योर्द्ध्वदेशे वर्णमालाविधिं शृणु ।
येन भावेन भावेन सर्वज्ञो जगदीश्वरः ।
ओ औ पवर्गमेवं हि यो नित्यं भजतेऽनिशम् ।
तस्य सिद्धिः क्षणादेव वायवीरूपधारणात् ।
चन्द्रबीजस्योर्द्ध्वदेशे विभाति पूर्णतेजसा ।
लृ लॄ ए ऐ तवर्गं च तद्दक्षिणविधानतः ।
तेजोमयी वायुशक्तिः ददाति सर्वमंगलम् ।
टवर्गं भावयेन्मन्त्री ऋ ॠ लृ स्वरसंयुतम् ।
अष्टैश्वर्यप्रदं नित्यं कमलामलसिद्धिदम् ।
तदधो भावयेद्यस्तु स भवेत् कल्पपादपः ।
भवानीबीजरूपस्य अधो गेहे विभावयेत् ।
इ ई युग्मं चवर्गं च भावयित्वामरो भवेत् ।
अ आ इ संयुतं नाथ कवर्गं चार्कतेजसम् ।
भावयेत् परया भक्त्या सोऽभीष्टं फलमाप्नुयात् ।
इत्येतत् कथितं नाथ फलचक्रं च सादरम् ।
एतच्चक्रभावनाभिर्महाविद्यापतिर्भवेत् ।
कामरूपे महापीठे लिंगपीठे प्रयत्नतः ।
आज्ञाचक्रं चतुश्चक्रं भावयित्वामरो भवेत् ।

247

महायोगी हिरण्याक्षो मासैकभावनावशात् ।
सप्तद्वीपेश्वरो भूत्वा अन्ते विष्णुर्वभूव सः ।
स्थिरचेता भवेद्योगी इति तन्त्रार्थनिश्चयः ।
एतानि चक्रसाराणि आज्ञाचक्रस्थितानि च ।
विभाव्य परमानन्दैः शीघ्रसिद्धिर्भवेद्ध्रुवम् ।
सूक्ष्मवायुप्रसादेन चिरजीवी भवेदिह ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे फलचक्रसारसंकेते सिद्धमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवीभैरवसंवादे विंशः पटलः ॥२०॥

श्रीभैरव उवाच ।

वदकान्ते रहस्यं मे येन सिद्धो भवेन्नरः ।
तत्प्रकारं विशेषेण देवानामपि दुर्लभम् ।
वीरभावस्य माहात्म्यमकस्मात् सिद्धिदायकम् ।
करुणाद्दापयानन्दा यदि चेदस्ति सुन्दरि ।

आनन्दभैरव्युवाच ।

परमानन्दसारज्ञ योगज्ञ देवपालक ।
रहस्यं शृणु मे नाथ महाकालज्ञ भावग ।
योगमार्गानुसारेण वीरभावं प्रियं तव ।
आनन्दोद्रेकपुञ्जं तत् शक्तिवेदार्थनिर्णयम्

वेदाधीनं महायोगं योगाधीनाच कुण्डली।
कुण्डल्याधीनं चित्तं तु चित्ताधीनं चराचरम्।
मनसः सिद्धिमात्रेण शक्तिसिद्धिर्भवेत ध्रुवम्।
यदि शक्तिर्वशीभुता त्रैलोक्यंच तदावशम्।
अमरः सभवेदेव सत्यं सत्यं कुलेश्वर।
सहस्रश्लोकयोगेन वीरो योगार्थनिर्णयम्।
पटलैकादशं होमयोगेन योगमण्डलम्।
षट्चक्रबाधनी विद्या सहस्रदलपंकजम्।
कैलासाख्यं सूक्ष्मपथं ब्रह्मज्ञानाय योगिनाम्।
कथयामि महावीर क्रमशः क्रमशः शृणु।
वीराणामुत्तमानांच भ्रष्टानां प्रहितायच।
साक्षात सिद्धिकरं यद्यत ततसर्व्वं प्रवदामिते।
योगशास्त्रक्रमेणैव यः सिद्धिफलमिच्छति।
ससिद्धो भवति क्षिप्रं ब्रह्ममार्गे न संशयः।
ब्रह्मविद्यास्वरूपेण जपहोमार्च्चनादिकम्।
कुरुते फलसिद्धौव सब्रह्मज्ञानवान् शुचिः।
षट्चक्रभेदने प्रीतिर्यस्य साधनं॰॰ चेतसः
संसारवारणी वापि ससिद्धो भवति ध्रुवम्।
षट्चक्रार्थं नजानाति योभजेदाम्बिकापदम्।

तस्य पापक्षयं याति सप्तजन्मसुसिद्धिभाक्।
ज्ञात्वा षट्चक्रभेदं च यः कर्म्म कुरुतेऽनिशम्।
संवत्सरात् भवेत् सिद्धिरिति तन्त्रार्थनिर्णयः।
प्रस्वेदे नाशमाप्नोति मासत्रयनिसेवनात्।
अष्टमासात् काम्यनाशो वत्सरात् खेचरीगतिः।
प्रस्वेदमधमं प्रोक्तं कम्पनं मध्यमं स्मृतम्।
भूमेरुत्थापनं नाथ खेचरत्वं महासुखम्।
द्वात्रिंशद्ग्रन्थिभेदं च मूलाधारावधिस्थितम्।
मेरुदण्डाश्रितं देशं कृत्वा ब्रह्ममयो भवेत्।
सुषुम्नावाह्यदेशे च यद्यद्ग्रन्थिपदं प्रभो।
क्रमशः क्रमशो भित्वा खेचरो भवति ध्रुवम्।
अल्पकार्य्ये मनोदत्त्वा ध्यानज्ञानविवर्ज्जितः।
उन्मत्तः स भवेदेव शास्त्राणां योगिराड् भवेत्।
हिमकुन्देन्दुधवलां बालाशक्तिं महोज्ज्वलाम्।
कालिकालकुलानन्दां मूले ध्यात्वा भवेद्वशी।
मूलपद्मे महाज्ञानी ध्यात्वा चक्रचतुर्द्दले।
कपिलाकोटिदानस्य फलं प्राप्नोति योगिराट्।
मूलपद्मे कोटिचन्द्रकलायुक्तं सदैव हि।
गलत्सुधारसामोदवदनाब्जं कुलं भजेत्।

निर्म्मलं कोटिवीरोग्रतेजसं ब्रह्मरूपिणम् ।
वामपार्श्वे कुण्डलिन्या विभाव्य शीतलो भवेत् ।
तत्र श्रीजटिलं वीरं तदाकारं तदुद्भवम् ।
ललाटवह्निजं देव्या नाथं भजति योगिराट् ।
तत्र पद्मपूर्व्वदले सिन्दूराकणविग्रहम् ।
रंकारं कोटिचपलामालां भजति योगिराट् ।
तत्पार्श्वे शोणितदले भूमिचक्रं मनोरमम् ।
यथाध्यानं कुण्डलिन्या आज्ञाचक्रे तथात्र च ।
भूमिचक्रक्रमं नाथ शृणु शंकर योगिनाम् ।
यं ध्यात्वा सिद्धिमाप्नोति सिद्धिदं षडष्टकं भजेत् ।
षडष्टकं त्रिकलागेहमेकत्रस्थं महाप्रभम् ।
ध्यायेद् योगी नवष्टकं मध्यगेहे च बीजकम् ।
वकारं दाक्षिणे गेहे हेममालिनमंजनम् ।
डाकिनीपरमाबीजं ब्रह्मबीजं विभावयेत् ।
वकारवामपार्श्वे च योगिनां योगसाधनम् ।
सदाशिवमहाबीजं विभाव्य योगिराड् भवेत् ।
वंबीजं वारुणाध्यक्षं हिमकुन्देन्दुनिर्म्मलम् ।
तद्विग्रो जन्मसंस्थानं सर्वं द्रवमुपाश्रयेत् ।
तदूर्द्धपूर्व्वभागे च लंबीजमिन्द्रपूजितम् ।

257

विद्युल्लताहेमवर्णां विभाव्य योगिनां पतिः।
इन्द्रबीजं दक्षपार्श्वे श्रीबीजं बिन्दुलाञ्छितम्।
स्थिरविद्युल्लताकारमिन्द्रायाः साधु भावयेत्।
तद्वामपार्श्वभागे च प्रणवं ब्रह्मसेवितम्।
विभाव्य कोटिमिहिरं योगिराट् भवति ध्रुवम्।
वंबीजाधो मन्दिरे श्री विद्याया बीजतेजसम्।
कोटिभास्कररूपं च ध्यात्वा योगी भवेन्नरः।
निजदेव्या वामभागे अधः कनकमन्दिरे।
श्रीगुरोरमलं बीजं ध्यात्वा वाग्भवमीश्वरम्।
निजदेव्या दक्षपार्श्वे दीर्घप्रणवतेजसा।
कोटिकोटिसूक्ष्मरूपं ध्यात्वा योगी भवेद्यतिः।
निजदेवीं तत्र पद्मे मनःसङ्गाकयोगकौ।
यथा ध्यानं तथा मौनं ध्यानं कुर्यात् जगत्पते॥
ब्रह्मणः पूरकेणैव महायोगक्रमेण तु।
सूक्ष्मवायूद्गमेनापि भूमिचक्रे जपं चरेत्।
चतुष्कोणं धरायास्तु नवभूमिगृहान्वितम्।
अष्टगेहं विभेद्यादौ वसुमूलं यजेद्यतिः।
धराबीजं वान्तवर्णं शक्रेण परिपूजितम्।
विभाव्य कुण्डलीं तत्र सर्वसिद्धीश्वरो भवेत्।

भजेदिन्द्रं तत्र नाके श्वेतकुञ्जरवाहनम्।
चतुर्व्बाहुं देवराजं विद्युतपुञ्जभयंकरम्।
डाकिन्या मन्दिरे कान्तां ब्राह्मणां हंसवाहनम्।
नवीनार्कं चतुर्व्बाहुं चतुर्व्वक्त्रं भजेद्वशी।
ब्राह्मणां डाकिनीयुक्तं सिन्दूराप्लुतभास्करम्।
परमामोदमत्तं तं विभाव्य योगिराड भवेत।
विद्युल्लतावेदबाहूज्ज्वलां श्रीदेवडाकिनीम्।
अभीष्टां रक्तनयनां हंसस्थां भावयेद्वशी।
ईशोर्द्ध कमलाबीजं सर्व्वालंकारभूषितम्।
महालक्ष्मीस्वरूपं यत तद्वजन्ति महर्षयः।
इन्द्रपृथ्वीबीजवामे प्रणवं ब्रह्मसेवितम्।
प्राणायामासिद्धिदं यत तद्वजन्ति महर्षयः।
तदधः प्राणानिलयं प्रेतबीजं शशिप्रभम्।
विभाव्य शिवतुल्यः स्याद्भूमिचक्रे सदाशिवः।
तदधो वाग्भवं ध्यायेत कोटिसौदामनीप्रभम्।
गुरुबीजं भूमिचक्रे महाविद्यागुरुर्भवेत।
तद्दक्षिणे मध्यगेहे श्रीविद्यानिर्म्मलं पदम्।
विभाव्य मनसा ध्यानात सिद्धो भवति साधकः।
तद्दक्षिणे शेषगेहे प्रणवं मन्त्रमम्।

सर्वाधारं ब्रह्मविष्णुशिवदुर्गापदं भजेत्।
एतत्श्रीभूमिचक्रार्थं सर्व्वचैतन्यकारकम्।
मूलाधारपूर्व्वदले वकारं व्याप्य तिष्ठति।
भूमिचक्रमण्डमध्ये वकारस्थं स्वरेद्यदि।
ब्रह्माण्डमण्डले शः स्यात् कुण्डव्यापकपत्रकम्।
तदेकपत्रं पत्रस्य शोभितं निर्म्मलद्युति।
तन्मध्यखण्डे भूमिचक्रे मध्येयं भावयेद्वशी।
एतच्चक्रप्रसादेन वरुणो मदिरापतिः।
अमृतानन्दहृदयः सर्व्वैश्वर्यान्वितो भवेत्।
द्वितीये दक्षिणे पत्रे वान्तवीजं महाप्रभम्।
मनो निधाय योगीन्द्रो ध्यायेद्योगार्थसिद्धये।
तत्र ध्यायेत् स्वर्गचक्रं स्वर्गशोभासमाकुलम्
विभाव्य स्वर्गनाथः स्याद्देवेन्द्रसदृशो भुवि।
पंचकोणं विभेद्यापि पंचकोणं विभातियः।
तन्मध्ये रक्तयुगले तत्र षट्कोणगं भजेत्।
एतत् स्वर्गाख्यचक्रन्तु भूपुरद्वयमध्यके।
दक्षिणोत्तरपत्रस्थे विभाव्य वान्तमीश्वरः।
षट्कोणान्तर्गतं वान्तं विद्युत्कोटिसमप्रभम्।
तमाश्रित्य सुराः सर्व्वे दशकोणे वसन्ति ते।

254

पूर्व्वकोणे महेन्द्रं च सर्व्वदेवसभास्थितम् ।
इन्द्राणी सहितं ध्यात्वा योगीन्द्रो भवति ध्रुवम् ।
तद्दक्षिणे वह्निकोणे वह्निं स्वाहान्वितं स्मरेत् ।
कोटिकालानलालोलं परिवारगणान्वितम् ।
दक्षिणे कालरूपी च भाति शक्तियुतः प्रभुः ।
परिवारान्वितं ध्यात्वा तं मृत्युं वशमानयेत् ।
नैर्ऋतं विद्युदाकारं कन्दर्पसदृशं प्रियम् ।
शक्तियुक्तं सुखानन्दं विभाव्य योगनीपतिः ।
तदधो वरुणं ध्यात्वा स्वशक्तिपरिलालितम् ।
जलानामधिपं सत्वं नित्यसत्वमयो भवेत् ।
तद्वामे मरुतः कोणे मरुद्गणविभागकम् ।
वायुस्थानं लयस्थानं वायुव्याप्तं भजेत् सुधीः ।
तत्पश्चाद्धननाशं च मत्तं शक्तिसमन्वितम् । *थ
परिवारगणानन्दं विभाव्य स्यात् कुलेश्वरः ।
तत्पश्चात् परमस्थानमीशं शक्तिसमन्वितम् ।
परिवारान्वितं ध्यात्वा कामरूपी भवेद्यतिः ।
तत्पश्चात्कोणगेहे च चन्द्रसूर्य्याग्नितेजसम् ।
एकरूपमूर्द्धसंस्थं ब्रह्माणं भावयेद्यतिः ।
अनन्तसहितं ध्यात्वा कामरूपी भवेद्यतिः ।

255

ततःपश्चात्कोण गेहे च आनन्दमयो भवेत्।
एतत्सुचक्रमध्ये तु वृत्तयुग्मं महाप्रभम्।
सर्वदा वह्निनाव्याप्तं ज्वलदग्निं विभावयेत्।
वृत्तमध्ये च षट्कोणं कोणे कोणे रिपुत्रयम्।
लोभमोहादिषट्कं च हरेत् षट्कोणसंस्थितम्
लोभं हरेत् इन्द्राग्नी मोहं हरति दण्डधृक्।
कामं नैर्ऋतवरुणौ क्रोधं वायुश्च योगिनाम्।
मदं कुबेर ईशश्च ब्रह्मानन्तौ हि योगिनम्।
मात्सर्यं संहरत्येव मासत्रयनिषेवनात्।
षट्कोणमध्यदेशस्थं वान्तबीजं शशिप्रभम्।
स्वर्णालंकारजडितं भावयेद्योगसिद्धये।
सदा व्याप्तं कुण्डलिन्या पालितं मण्डितं सुधीः।
तैले यथा दीपपुंजं विभाव्य योगिराड् भवेत्।
स्वयम्भुलिंगं तत्रैव विभाव्य चन्द्रमण्डलम्।
आप्लुतं कारयेन्मन्त्री कुण्डलीसहितं वशी।
एवं क्रमेण सिद्धिः स्यात् कुण्डल्याकुंचनेन च।
सदाभ्यासी महायोगी संस्थाप्य वायवीं ततः।
वायव्याभ्यासमात्रेण एतच्चक्राश्रयेण च।
मूकोऽपि वाक्पतिर्भूयात् फलभागी दिने दिने।

तृतीयदलमाहात्म्यं योगिज्ञानोदयं परम्।
भावसिद्धिर्भवेत्तस्य यो भजेदाल चिन्तनम्।
दलमध्ये तुलाचक्रं चतुष्कोणगृहाणि च।
द्वात्रिंशद्ग्रन्थिरूपाणि सन्ति ग्रन्थिविभेदने।
तुलाचक्रस्य नाडीभिर्द्वात्रिंशद्ग्रन्थिभेदनम्।
गलदेशावधिध्यानं मेरुमध्ये प्रकाशयेत्।
द्वात्रिंशद्ग्रन्थिगेहस्य मध्ये वृत्तत्रयं शुभम्।
तन्मध्ये च त्रिकोणे च यसमूहं भजेद्वशी।
एतद्गेहे विभाव्यानि वर्णजालफलानि च।
दक्षिणावर्त्तयोगेन विभाव्य वाक्पतिर्भवेत्।
अकारमाद्यगेहे च अनुस्वारं द्वितीयके।
विसर्गन्तु तृतीये च यो भजेत् स भवेद्वशी।
एतदन्यमन्दिरेषु कादिहान्तं विभावयेत्।
वादिशान्तं वर्जयित्वा सबिन्दुं भावयेद्वशी।
आज्ञाचक्रे यथा नाथ फलं प्राप्नोति साधकः।
वर्णानां मूलपद्मे तु तत्फलं हि तुलागृहे।
भजेन्मध्यं सकारस्य त्रिवृत्तस्य त्रिकोणके।
ज्वालामालासहस्राढ्यं स्वर्णालंकृतमाश्रयेत्।
प्रत्येकवर्णपुटितं तुलाचक्रे च मौनवान्।

257

मौनं जपं यः करोति यकारं ध्याय योगिराट्।
एतद्योगप्रसादेन चैतन्या कुण्डली भवेत्।
वाक्सिद्धिश्च भवेत्तस्य तापत्रयविनाशिनी।
सिद्धमन्त्रस्य वर्णानां जपमात्रेण शंकर।
तुलाचक्रान्तरस्थानं विभाव्य मन्त्रसिद्धिभाक्।
एतच्चक्रं विनानाथ कुण्डली नापि सिध्यति।
भावज्ञानं विना कुत्र योगी भवति भारते।

अथान्तर्ध्यानमाहात्म्यं शृणु वक्ष्यामि तत्वतः।
योगसंचारसारं यत् कुण्डलीशक्तिसाधनम्।
शक्तिबीजं बिन्दुयुतं अष्टकोणस्य निर्म्मलम्।
विद्युत्पुञ्जं वर्णमालावेष्टितं भावयेद्यतिः।
चतुष्कोणं विभेद्यापि चतुष्कोणं मनोहरम्।
तन्मध्ये च चतुष्कोणं सबीजं भावयेद्यतः।
कोटिसूर्य्यसमां देवीं कुण्डलीं देवमातरम्।
पादाङ्गुष्ठावधि ध्यात्वा सर्व्वसिद्धीश्वरो भवेत्।
यदि वारिचक्रमध्ये ध्यानं कुर्व्वन्ति मानुषाः।
अमराः सत्वयोगस्थाः षट्चक्रफलभोगिनः।
तच्चतुष्कं समाभाव्य वारिव्याप्तं सुनिर्म्मलम्।
वामावर्त्तस्थितं ध्यायेत् सप्तखण्डं महाबली।

सप्तस्तोपरि ध्यायेत् दलषोड़शपंकजम्।
दले दले महातीर्थं सिद्धो भवति निश्चितम्।
तीर्थमालावृतं नाथ दलं षोड़शशोभितम्।
तदेकपत्रमध्ये तु भाति विद्युल्लतान्वितम्।
पूर्व्वादौ दक्षिणे पत्रे तीर्थे मालाफलं शृणु।
येषां दर्शनमात्रेण जीवन्मुक्तस्तु साधकः।
गङ्गा गोदावरी देवी गयातुल्या महाफला।

259

स्वर्गगंगा महादेवं
यमुना कोटिफलदा बुद्बुदा च सरस्वती।
मणिद्वीपं श्वेतद्वीपं पंचतीर्थं महाफलम्।
श्वेतगंगा महापुण्या तलगङ्गा महाफला।
स्वर्गगंगा महादेवं पुष्करं तीर्थपावनम्।
कावेरी सिन्धुपुण्या च नर्म्मदा शुभदा शुभा।
अष्टकोणे अष्टसिद्धिं वारिपूर्णां फलोदयाम्।
सप्तकोणे सप्तसिन्धुं पूर्व्वादौ भावयेद्यतिः।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः।
मकारं व्याप्य तिष्ठन्ति महासत्वं स्मरेद्यतिः।
मध्ये चतुष्के शक्तिं च कोटिसौदामनीतनुम्।
विभाव्य वारिचक्रे तु कोटिविद्यापतिर्भवेत्।
शक्तिबीजवामभागे आद्या प्रकृतिसुन्दरी।

विभाति कामनाशाय योगिनी सा सतां गतिः।
शक्तिबीजदाहिशोच पुंकलापशिवात्मकम्।
सदा भावनरूपाच यो भजेदीश सिद्धये।
शक्तिबीजस्योर्द्धभागे पूर्णचन्द्रं मनोहरम्।
भजन्ति साधकाः सर्व्वे धर्म्मकामार्थसिद्धये।
शक्तिबीजतले गेहे श्रीसूर्य्यं कालवाहनम्।
उल्काकोटिसमं ध्यात्वा वाञ्छातिरिक्तमाप्नुयात्।
वारिचक्रप्रसादेन चिरजीवी भवेन्नरः।
भूमौ महाकालरूपी मूलाधारे चतुर्द्दले।
चतुर्द्दले शेषदले वारिचक्रं सषान्तकम्।
कोटिसौदामनीभासं विभाव्य योगिराड् भवेत्।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे मूलपद्मोल्लासे भूमिचक्रस्वर्गचक्रसारसंकेते सिद्धमन्त्रप्रकरणे भैरवी भैरवसंवादे एकविंशतिपटलः॥ २१॥

भैरव्युवाच

शृणु शम्भो प्रवक्ष्यामि षट्चक्रस्य फलोदयम्।
यज्ज्ञात्वा योगिनः सर्व्वे चिरं तिष्ठन्ति भूतले।
मूलाधारं महापद्मं चतुर्द्दलसुशोभितम्।

वादिसान्तं स्वर्णवर्णं शक्तिब्रह्मपदं भजेत्।
चित्यपृतेजोमरुद्व्योममण्डलं षट्सु पंकजे।
क्रमेण भावयेन्मन्त्री मूलविद्याप्रसिद्धये।
मूलपद्मोर्द्ध्वदेशे च स्वाधिष्ठानं महाप्रभम्।
षड्दलं राकिणी विष्णु कर्णिकायां स्मरेद्यतिः।
षड्दले वादिलान्तं च वर्णं ध्यात्वा सुराधिपः।
कन्दर्पवायुनाव्याप्तं लिंगमूले भजेद्यतिः।
तदूर्द्ध्वं नाभि मूले च मणिकोटिसमप्रभम्।
दशदलं योगधर्म्मं डादिफान्तार्णगं भजेत्।
लाकिनीसहितं रुद्रं ध्यायेद्योगादिसिद्धये।
महामोहपदं दृष्ट्वा जीवन्मुक्तो भवेद्ध्रुवम्।
बन्धूकपुष्पसंकाशदलद्वादशशोभितम्।
कादिठान्तार्णसहितं ईश्वरं काकिनीं भजेत्।
तदूर्द्ध्वं षोडशोल्लासदले साक्षात् सदाशिवम्।
महादेवीं शाकिनीं च कण्ठे ध्यात्वा शिवो भवेत्।
विशुद्धाख्यं महापुण्यं धर्म्मार्थकाममोक्षदम्।
धूम्रधूमाकरं विद्युत्पुञ्जं भजति योगराट्।
आज्ञानामाम्बुजं शुक्लं हिमकुन्देन्दु[illegible]म [illegible]म्।
हंसस्थानं बिन्दुपदं द्विदलं भ्रूकुले भजेत्।

261

लक्षविन्दुद्वयान्तं यद्विन्दुयुक्तं मनोलयम् ।
तयोः श्रीपुंप्रकृत्यास्यं कोटिचन्द्रोज्ज्वलं भजेत् ।
कंठषोडशपत्रे च षोडशस्वरवेष्टितम् ।
अकारादिविसर्गान्तं विभाव्य कुण्डलीं नयेत् ।
आज्ञाचक्रे समानीय कोटिचन्द्रसमोदयाम् ।
कंठाधावात कुण्डलिनीं जीवन्मुक्तो भवेदिह ।
यदि श्वासं न त्यजाति बाह्यचन्द्रमसि प्रभो ।
भ्रूमध्ये चन्द्रनिकरे त्यक्त्वा योगी भवेदिह ।
सूक्ष्मवायुक्रमेणैव त्यजेद्वायुं मुहुर्मुहुः ।
सहस्रारागतं मूले मूलान्तं चैव मानयेत् ।
चन्द्रः सूर्ये लयं याति सूर्यश्चन्द्रमसि प्रभो ।
यो बाह्यमानयेत प्रायं तस्य विन्दुजयो भवेत् ।
यावद्बाह्ये चन्द्रमसि मनो याति रविप्लुते ।
अन्तर्गते चन्द्रसूर्ये न तस्य दुरितं तनौ ।
केवलं सूक्ष्मवायुस्थं वायवीशक्तिलालितम् ।
मानसं यः करोतीह तस्य योगादिवर्द्धनम् ।
प्राप्ते यज्ञोपवीते यः श्रीयदेवब्राह्मणोत्तमः ।
योगाभ्यासं सदा कुर्यात् स भवेद्योगिवल्लभः ।
यावत्कालं स्थितं विन्दुं बाल्यभावे यथा यथा ।

तथा तथा योगमार्गं बिन्दुपातान् भविष्यति ।
तथापि यदि मासं वा पक्षं वा वर्षमेव हि तैः ।
यदि तिष्ठति बिन्दुस्थः साक्षादभ्यासतो जयी ।
कामानलमहापीडा विप्रिय पुरुषो यदि ।
ततकामादि संहर्षो विना योगेन कः क्षमः ।
सम संसर्ग गूढो वा कामी भवति निश्चितम् ।
ततकामातक्रोध उतपन्नो महाशत्रु विनाशकृत ।
क्रोधात भवति संमोहः संमोहात स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशाद्विनाशनम् ।
अतः सद्बुद्धिमाधार्य्य मूलादिब्रह्ममण्डले ।
ध्यात्वा श्रीनाथपादाब्जं सिद्धो भवति साधकः ।
ईश्वरस्य कृपाचिह्नमादौ शान्तिर्भवेद्हृदि ।
शान्तिभिर्जायते ज्ञानं ज्ञानान्मोक्षमवाप्नुयात् ।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिरिति ताः स्मृताः ।
चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः ।
इदं ज्ञानमिदं ज्ञेयं इति चिन्ता समाकुलाः ।
पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः ।
शिरो वहति पुष्पाणि गन्धं जानाति नासिका ।
पठन्ति मम तन्त्राणि दुर्लभा भाव बोधकाः ।

यज्ञोपवीतकालेच पशुभावाश्रयो भवेत् ।
यावद्योगं न संप्राप्तं तावद्वीराचरोनंच ।
आचारो विनयो विद्या प्रतिष्ठायोगसाधनम् ।
तस्यैव जायते सिद्धिर्विष्णुपादाम्बुजे मतिः ।
देवे गुरौ महाभक्तिर्यस्य नित्यं विवर्द्धते ।
संवत्सरात्तस्य सिद्धिर्भवत्येव न संशयः ।
वेदागमपुराणानां सारमालोक्य यत्नतः ।
मनः संस्थापयेद्धरिपादाम्भोकहमण्डले ।
चेतसि द्वैतकमले षट्चक्रे योगनिर्मले ।
मनो निधाय मौनीयः स भवेद्योगिवल्लभः ।
मनः करोति कर्माणि मनो लिप्यति पातकैः ।
मनस उन्मनीभूता पापपुण्यैर्न लिप्यते ।

भैरव उवाच

वद कान्ते रहस्यं मे येन सिद्धो भवेन्नरः ।
तत्प्रकारं विशेषेण योगिनामप्यगोचरम् ।
क्रमेण वद तत्वं मे यदि स्नेहोऽस्ति योगिनि ।
न ज्ञात्वापि च यत्तत्वं योगी मोहाश्रितो भवेत् ।

आनन्दभैरव्युवाच ।

त्रैलोक्ये योगयोग्यामि षट्चक्रं भेदनेवत ।

त्वमेव परमानन्दसत्वाधिष्ठाननिर्म्मलः।
संघातयेन्महावीर एतान् दोषान् महाभयान्।
कामक्रोधलोभमोहमदमातसर्य्यसंज्ञकान्।
संघातयेन्महावीरो विकारं चेन्द्रियोद्भवम्।
निद्रालज्जादौर्म्मनस्यं दण्डाकाननलप्रभा ।
संगोपयेन्महावीरो महामन्त्रं कुलक्रियाम्।
265
मुद्रा[illegible]हसूत्रतन्त्रार्थं योगिनीवीरसंगमम्।
अत्याचारं भैरवानां योगिनामपि साधनम्।
नाड़ीग्रहणमालां च गोपयेन्मातृजारवत्।
न निन्देत प्राणानिधने देवतां गुरुमीश्वरम्।
सुरां विद्यां महादेवं पीठं योगाधिकारिणाम्।
योगिनीं जड़मुन्मत्तं जन्मकर्म्मकुलक्रियाम्।
प्रयोगधर्म्मकर्त्तारं नानन्देत प्राणसंस्थितौ।
ज्येष्ठभ्रातृवधूं चैव वौद्धाचारं च योगिनाम्।
कर्म्म शुभाशुभं चैव महावीरो न निन्दयेत।
निषीदयेन्नकदापि कन्यायोनिं दिने रतम्।
पशुक्रीड़ां दिग्वसनां कामिनीं.........।
विग्रहं द्यूतपापार्थं क्लीवं विष्ठादिकं शुचौ।
अभिचारमारणं च क्रियामज्ञस्य नेदयेत।

प० २२

पूजयेत परया भक्त्या देवतां गुरुमीश्वरम् ।
शक्तिं साधुमात्मरूपं स्थूलसूक्ष्मं प्रयत्नतः ।
अतिथिं मातरं सिद्धं पितरं योगिनीं तथा ।
पूजयेत परया भक्त्या सिद्धमन्त्रसुसिद्धये ।
भावयेदेकचित्तेन साधूक्तं योग [illegible] साधनम् ।
गुरोर्वाक्योपदेशंच स्वधर्मं तीर्थदेवताम् ।
कुलाचारवीरमन्त्रमात्मानं परमेष्ठिनम् ।
भावयेद्विविधविद्यांच तन्त्रसिद्धार्थनिर्णयम् ।
वर्जयेत साधकश्रेष्ठो अगम्यागमनादिकम् ।
धूर्तसंगं वंचनंच प्रलापमनृताशुभम् ।
वर्जयेत पापगोष्ठीय मालस्यं बहुजल्पनम् ।
अवेदकर्म्मसंचारं गोसवं ब्राह्मणस्य च ।
जुगुप्सयेन्नकदापि विप्रमूत्रं क्लेदशोणितम् ।
हीनाङ्गी प्रेषितां नाथ कपालाहरणादिकम् ।
सुरां गोपालने चैव निजपादे रिपोर्भयम् ।
एतदेवाहि कर्तव्यं यदि सिद्धिमिहेच्छति ।
समायाचारसेवेयं योगिनां वीरभाविनाम् ।
गुर्वाज्ञया यः करोति जीवन्मुक्तो भवेद्भुवि ।
वृथा धर्म्मं वृथा चर्य्यं वृथा दीक्षा वृथा तपः ।

वृथा सुकृत गुर्व्वाज्ञालंघनं नृणाम्।
ब्राह्मणक्षत्रियादीनामादौ योगादिसाधनम्।
पश्चात् कुलक्रियां नाथ योगविद्याप्रसिद्धये।
विना भावेन वीरेण पूर्णयोगी कुतो भवेत्।
आदौ कुर्य्यात् पशोर्भावं पश्चात् कुलविचारणम्।
मम तन्त्रे महादेव केवलं सारनिर्णयम्।
अकस्मात् भक्तिसिद्ध्यर्थं कुलाचारं च योगिनाम्।
ब्राह्मणानां कुलाचारं केवलं भक्तिसिद्धये।
ज्ञानेन जायते योगी योगादमरविग्रहः।
भूत्वा योगी कुलीनस्य योगाभ्यासमहर्निशम्।
षट्चक्रं भूतानिलयं भावयेद्भावसिद्धये।
मूलपद्मस्योर्द्ध्वदेशे लिंगमूले महाशुचिः।
स्वाधिस्थाने महापद्मं षड्दलं वायुना यजेत्।
सततषड्दलवर्णानां भावनां यः करोति हि।
तस्य साक्षाद्भवेद्विष्णु राकिणी सहितः प्रभो।
स्वाधिस्थानं षड्दलस्य कर्णिकामध्यमण्डले।
कुलाष्टकं भावयित्वा नागयुक्तं कुलेश्वरः।
अष्टौ नागा अष्टदले प्रतिभाति यथाक्रमः।
जलस्योपरि पद्मे च ध्यायेत्तन्नागवल्लभान्।
अनन्तं वासुकीं पद्मं महापद्मं च तक्षकम्।

267

कुलीरं कर्कटं शंखं दक्षिणादौ दले भजेत।
अष्टदलोपरि ध्यायेत कर्णिकारत्नयुग्मकम्।
तदूर्द्ध्वे षड्दले वादिलान्तयुक्तं सबिन्दुकम्।
पूर्व्वादिक्रमयोगेन दक्षिणावर्त्तवायुना।
पुनः पुनः कुम्भयित्वा ध्यायेत षड्वर्णनायकीम्।
केवलं युगलं ध्यायेत गलद्धेमाकृतिं मुदा।
अष्टदले षड्दलेच विभाव्य योगिराड् भवेत।
अष्टदलस्योर्द्ध्वदेशे वृत्तयुग्मं मनोहरम्।
तस्योपरि पुनर्ध्यायेत षड्दले वादिलान्तकम्।
दलाष्टकाधो ध्यायेद्यो वृत्तयुग्मं मनोहरम्।
वृत्ताधो मण्डलाकारं वं बीजं व्याप्य तिष्ठति।
वृत्तलग्नसमाव्याप्तं वं बीजं विद्युताकरम्।
कोटिसूर्य्यसमाभासं विभाव्य योगिनां यतिः।
यान्तबीजं कलानां तु अधः षट्कोणमण्डलम्।
षट्कोणे दक्षिणादौचभावयेद्यदिलान्तकम्।
ततषट्कोणमध्यदेशे षट्कोणं धूम्रतेजसम्।
[illegible] कोणे [illegible] दक्षिणादौच द्रव्यादिषट्कमाश्रयेत।
द्रव्यं गुणास्तथाकर्म्म सामान्यं सविशेषकम्।
समवायं क्रमेणैव षट्कोणेषु विभावयेत।
पूर्व्वादिक्रमयोगेन दक्षिणावर्त्तवायुना।

सर्व्वत्र भावयेन्मन्त्री कुम्भयित्वा पुनः पुनः।
इत्थं षट्कोणमध्ये तु षट्कोणं चारुतेजसम्।
कोणे कोणे च षट्वर्गान् भावयेत् स्थिरचंचलान्।
तन्मध्ये च त्रिकोणे च राकिणीसहितं हरिम्।
कोटिचन्द्रमरीचिस्थं ध्यायेद्योगी विशालधीः।
षट्दलान्तर्गतं पद्मं योगिनामपि साधनम्।
यो नित्यं कुरुतेऽभ्यासं तस्य मासात् प्रसिध्यति।
एतच्चक्रप्रसादेन निरोगी निरहंकृतः।
सर्व्वज्ञो भवति क्षिप्रं श्रीनाथपादभावनात्।
ज्योतीरूपं योगमार्गं सूक्ष्मातिसूक्ष्मनिर्म्मलम्।
त्रैलोक्यकामनासिद्धिं षट्चक्रं भावयेद्धरिम्।
यो हरिः सैव शम्भुश्च शम्भुः सूक्ष्मस्वरूपधृक्।
सूक्ष्मरूपे स्थितो ब्रह्मा ब्रह्माधीनमिदं जगत्।
एकमूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः।
मम विग्रहसंक्लृप्ताः सृजत्यवति हन्ति च।
प्राणायामोद्गता एते योगविघ्नकराः सदा।
प्राणायामेन निष्पीड्य प्रणवं सिद्धिमाप्नुयात्।
अकारं ब्रह्मणो वर्णं शान्तरूपं महाप्रभम्।
प्रणवान्तर्गतं नित्यं योगं पूर्व्वकमाश्रयेत्।

उकारं वैष्णवं वर्णं शब्दभेदिनमीश्वरम ।
प्रणवान्तर्गतं सत्वं योगं कुम्भकमाश्रयेत ।
मकारं शाम्भवं रूपं जीवमूर्त्तं विशुद्धतम ।
प्रणवान्तःस्थितं कालं लयस्थानं समाश्रयेत ।
वर्णत्रयविभागेन प्रणवं परिकल्पितम ।
प्रणवाज्जायते हंसो हंसः सोऽहं परो भवेत ।
सोऽहं ज्ञानं महाज्ञानं योगिनामपि दुर्लभम ।
निरन्तरं भावयेद्यः स एव परमो भवेत ।
हं पुमान श्वासरूपेण चन्द्रेण प्रकृतिस्तु सः ।
एतत हंसं विजानीयात सूर्य्यमण्डलभेदकः ।
विपरीतक्रमेणैव सोऽहं ज्ञानं यदा भवेत ।
तदैव सूर्य्यगः सिद्धः सुरासुरप्रपूजितः ।
हकारार्णं सकारार्णं लोपयित्वा ततः परम ।
सान्धिं कुर्य्यात ततः पश्चात प्रणवोऽसौ महामनुः ।
एतत हंसं महामन्त्रं स्वाधिष्ठाने मनोगृहे ।
मनोरूपं भजेद्यस्तु स भवेत सूर्य्यमध्यगः ।
हंसं सूर्य्यं विजानीयात सोऽहं चन्द्रो न संशयः ।
विपरीतो यदा भूयात तदैव मोक्षभाक भवेत ।
यदि हंसं मनोरूपं स्वाधिष्ठाने हरेः पदे ।

270

विभाव्य श्रीगुरोः पादे लीयते नात्र संशयः ।
सोऽहं यदा शक्तिकूटं अकाराकारसंपुटम् ।
कृत्वा जपति योज्ञानी स भवेत् कल्पपादपः ।
जपहोमादिकं सर्व्वं हंसेन यः करोति च ।
तदैव चन्द्रः सूर्य्यः स्यात् हंसमन्त्रप्रसादतः ।
एतज्जपं महादेव देहमध्ये करोम्यहम् ।
एकविंशसहस्राणि षट्शतानि च हं मनुम् ।
पुंरूपेण हंकारं च स्त्रीरूपेण सकारकम् ।
जप्त्वा रक्षां करोमीह चन्द्रविन्दुशतेन च ।
प्रणवान्तं महाहंसं नित्यं जपति यो नरः ।
वायुसिद्धिर्भवेत्तस्य वायवी सुकृपा भवेत् ।
इह हंसं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।
कामरूपी क्षणादेव वाक्सिद्धिरिति निश्चितम् ।
आदौ प्रणवमुच्चार्य्य ततो हंसपदं लिखेत् ।
तत्पश्चात् प्रणवं ज्ञेयं ततः परमिदं स्मरेत् ।
परमान्ते हंसपदं ततः प्रणवमेव च [illegible]
तर्पयामि पदस्यान्ते प्रणवं फाड़िति स्मरेत् ।
एतद्धि हंसमन्त्रं तु वीराणामुदयाय च ।
इह हंसप्रसादेन षट्चक्रभेदको भवेत् ।

271

षट्चक्रेच प्रशंसन्ति सर्व्वे देवाश्चराचराः।
योगसिद्धिविघाताय भ्रमन्ति क्रोधिनस्तनौ।
यदि हंसं स्हहंसं जपन्ति वायुसिद्धये।
तदा सर्व्वे पलायन्ते राक्षसान्मानुषा यथा।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसंकेते योगसिद्धमन्त्रप्रकरणे भैरवी भैरवसंवादे द्वाविंशः पटलः॥ २२॥

272

। भैरव्युवाच ।

अथातः संप्रवक्ष्यामि ब्रह्ममार्गमनुत्तमम।
यद्यज्ज्ञात्वा सुराः सर्व्वे जयाख्याः परमा जगुः।
मनःस्थैर्य्यप्रकाशाय महतां धर्म्मवृद्धये।
योगाय योगिनां नाथ भक्षप्रस्थनिरूपणम।
योगाभ्यासं यः करोति न जानातीह भक्षणम।
कोटिवर्षसहस्रेण न योगी भवति ध्रुवम।
ततो भक्षणमाहात्म्यं प्रवदामि समासतः।
यज्ज्ञात्वा सिद्धिमाप्नोति स्वाधिष्ठानादिभेदनम।
आदौ विवेकी यो भूयात भूतले परमेश्वर।
स एव भक्षनियमं गृहेऽरण्ये समाचरेत।
वाय्वासनदृढानन्दः परमानन्दनिर्भरः।

मिताहारं सदा कुर्य्यात पूरकाह्लादहेतुना।
तदा पूरकसिद्धिः स्यात भक्षणादि निरूपणात।
उदरं पूरयेन्नित्यं कुम्भयित्वा पुनः पुनः।
निजहस्तप्रमाणेन त्रिःप्रस्थं पूर्वमेव च।
तत प्रस्थं स्थापयेन्नाथ विश्वामित्रकपालके।
हंसद्वादशवारेण शिलायामपि घर्षयेत।
नित्यं ततपात्रपूर्णं च वनेनैकेन भक्षयेत।
तण्डुलान शालिसम्भूतान कपालप्रस्थपूर्णकान।
दिने दिने त्त्वयं कुर्य्यात भक्षणादिषु कर्म्मसु।
हंसद्वादशवारेण वारेण संक्षयं चरेत। (जपेन)
शिलायां ततकपाले च वर्द्धयेत पूरकानलम।
यावतकालं क्षयं याति निजभक्षणनिर्णयम।
ततकालं वायुनापूर्य्य स्वोदरं काकचंचुभिः।
आकुञ्चयेत सदा मूले कुण्डली भक्षवारणात।
तत्रसंपूरयेद्योगी भक्षप्रस्थायनाशनात।
कालक्रमेण ततसिद्धिमवाप्नोति जितेन्द्रियः।
यतस्थानभक्षणस्यैव ततस्थाने पूरयेत सुखम।
पुनः पुनः श्रमादेव भक्षासिद्धिमुपैति हि।
विना पूरकयोगेन भक्षणं नापि सिध्यति।

273

अथवान्यप्रकारेण भक्षत्यागविनिर्णयम ।
येन हीना न सिध्यन्ति नातिचक्रस्य देवताः ।
द्वाविंशद्ग्रासमादाय त्रिपर्व्वाणि यथास्थितम ।
अर्द्धग्रासं विहायापि नित्यं भक्षणमाचरेत ।
सदासंपूरयेद्वायुं भावको गतभीर्महान ।
भक्षस्थाने समायोज्य पिबेद्वायुमहर्निशम ।
चतुःषष्टिदिने सर्व्वक्षयं कृत्वा ततः सुधीः ।
पयोभक्षणमाकुर्य्यात स्थिरचेता जितेन्द्रियः ।
पयःप्रमाणं वक्ष्यामि हस्तप्रस्थत्रयं त्रयम ।
शनैःशनैः विजेतव्यः प्राणो मत्तगजेन्द्रवत ।
षण्मासाज्जायते सिद्धिः पूरकादिसुलक्षणा ।
क्रमेणाष्टांगसिद्धिः स्यात यतीनां कामरूपिणाम ।
बद्ध्वा पद्मासनं कृत्वा विजयानन्दनिर्वृतः
धारयेन्मारुतं मन्त्री मूलाधारे मनोलयम ।
अथासनप्रभेदंच शृणु सत्सिद्धिकांक्षिणाम ।
येन विना पूरकाणां सिद्धिभाक न महीतले ।
अधोमुखासनं सारं सर्व्वेषां प्राणिनां सुखम ।
ऊर्द्ध्वमार्गे पदे दत्वा धारयेन्मारुतं सुधीः ।
सर्व्वासनानां श्रेष्ठं हि ऊर्द्ध्वपादं यदाचरेत ।

तदैव महतीं सिद्धिं ददाति वायवी कला ।
ततः पद्मासनं कुर्य्यात प्राणवायुप्रसिद्धये ।
शुभासनं सदा ध्यायेत पूरयित्वा पुनः पुनः ।
ऊरुमूले वामपादं पुनस्तद्दक्षिणं पदम् ।
वामोरौ स्थापयित्वा च पद्मासनमिति स्मृतम् ।
सव्यापसव्ययोगेन आसनं परिकल्पयेत ।
275
तदैकासनकाले तु द्वितीयासनमारभेत ।
पृष्ठे पादद्वयं नीत्वा ऽङ्गुष्ठद्वयं सुधीः ।
कायसंकोचमाकृत्य बद्धपद्मासनं भवेत ।
बद्धपद्मासनं कृत्वा वायुं रुद्ध्वा पुनः पुनः ।
चिबुकं स्थापयेद्यत्नात हृदि तेजसि भास्करे । ३०
इत्यासनं हि सर्व्वेषां प्राणिनां सिद्धिकारणम्
वायुवशाय कुर्य्याद्यः स योगी नात्र संशयः ।
स्वभावसिद्धिकरणं सर्व्वेषां स्वाक्तिकामनम् ।
वामपादतले कुर्य्यात पाददक्षिणमेव च ।
सर्व्वत्रैवं प्रकारं च कृत्वा नाडीवशो भवेत् ।
आसनानि च गणयेतत द्वात्रिंशत संख्यकानि च ।
सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह ।
चतुःषष्ट्यासनानीह वदामि वायुसाधनात ।

द्वात्रिंशद्ग्रन्थि भेदाय कल्पयेद्वायुरुद्धये।

कार्म्मुकासनमाहृत्य उदरे पूरयेत सुखम।

तदावायुर्वशं याति कालेन सूक्ष्मवायुना।

कृत्वा पद्मासनं मन्त्री वेष्टयित्वा प्रधारयेत।

करेण दक्षिणेनैव वामपादांगुलि तटम्।

सव्यापसव्याङ्गुष्ठं कार्म्मुकासनमेव च।

कार्म्मुकद्वययोगेन शववद्वायुमानयेत।

कुक्कुटासनमावेश्य नाडीनिर्म्मलहेतुना।

सतकुलागममार्गेण कुर्याद्वायुनिषेवणम।

निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः

पद्मां बन्धं यः करोति कुर्परद्वयमध्यतः।

सव्यापसव्ययुगलं कुक्कुटं अस्मणा कृतम्।

बद्धं कृत्वा अधः शीर्षं यः करोति खगासनम।

खगासनप्रसादेन श्रमलोपो भवेद्ध्रुवम।

पुनः पुनः श्रमादेव विषयश्रमलोपकृत।

लीलासनं सदा कुर्य्यात वायुलोपो पयातनात।

स्थिरवायुप्रसादेन स्थिरचेता भवेद्ध्रुवम।

पद्मासनं समाहृत्य पादयोः सन्धिगह्वरे।

हस्तद्वयमधोदेशं नियोज्य कुक्कुटकृति।

निजहस्ततलद्वन्द्वं निपात्य हस्तनिर्भरम्।
कृत्वा शरीरमुत्थाप्य स्थित्वा पद्मासनेऽनिशम्।
स्थित्वैतदासने मन्त्री अधःशीर्षं करोति चेत्।
उत्तमोगासनं ह्येयं योगिनामपि दुर्लभम्।
एतदासनमाहृत्य शरीरं शीतलं भवेत्।
पुनः पुनः श्रमादेव चैतन्याकुण्डली भवेत्।
सव्यापसव्ययोगेन यः करोति पुनः पुनः।
पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्।
कृत्वा कुम्भकमेवं हि सूक्ष्मवायुलयं विधौ।
मूलादिब्रह्मरन्ध्रान्ते स्थापयेन्नयने पदे।
एतत्शुभासनं कृत्वा सूक्ष्मरन्ध्रे मनोलयम्।
[illegible]।
सूचीरन्ध्रे यथा सूत्रं पूरयेत्सूक्ष्मवायुना।
एवं क्रमेण अभ्यासात् पूरकस्यापि लक्षणम्।
महासुखं समाप्नोति योगाष्टांगनिषेवनात्।
अथ वक्ष्ये महादेव पर्वतासनमंगलम्।
यत्कृत्वा स्थिररूपी स्यात् षट्चक्रादिविलोडनम्।
योऽभ्यासनं पर्वतेन योगं योगफलोत्तमम्।
तत्कालं सफलं तावत् खेचरो यावदेव हि।

पादाङ्गुष्ठेन चाक्रम्य लिङ्गाग्रं योनियोजयेत।
अन्यत पदमुरौ दत्वा तत्र योन्यासनं भुवि।
एतन्मध्ये महादेव वद्धयोन्यासनं शृणु।
यतकृत्वा विचरो भुत्वा विचरेदीश्वरो यथा।
कृत्वा योन्यासनं नाथ लिंगगुह्यादिवन्धनम।
मुखनासानेत्रकर्णं कनिष्ठांगुलिभिस्तथा।
ओष्ठाधरं कनिष्ठाभ्या मनासाभ्यांच नासिके।
मध्यमाभ्यां नेत्रयुग्मं तर्ज्जनीभ्यां परे श्रुती।
एतत सिद्धासनं नाथ योगिनामपि दुर्लभम।
कृत्वा यः पूरयेद्वायुं मूलमार्गंच स्तम्भयेत।
सव्यापसव्ययोगेन सिद्धो भवति साधकः।
शनैः शनैः समाकृष्य कुम्भकं परिपुरयेत।
अरुणोदयकालाच्च वसुदण्डे सदाशिव।
सव्यापसव्ययोगेन रहून्तं वाह्यगामिवम। ६०
द्वितीये प्रहरे कुर्यात वाह्यपूजां मनोरमाम।
एतदासनमाहृत्य सिद्धो भवति साधकः।
अथान्यदासनं वक्ष्ये यतकृत्वा सोमरो भवेत।
मत साधकः शुचिः श्रीमान कुर्यात्कृत्वा निराविले।
भेकनामासनं योगं निजवक्त्रासि सरमुखम।

278

निधाय पादयुगलं स्कन्धे बाहौ पदोपरि।
ध्यायेदिष्टपदं श्रीमान् आसनस्थं सुखाय च।
यदि सर्व्वाङ्गमुत्तोल्य गगने खेचरासनम्।
महाभेकासनं प्रोक्तं सर्व्वसिद्धिप्रदायकम्।
महाविद्यामहामन्त्रं प्राप्नोति जपतीह यः।
एतत्प्रभेदं वक्ष्यामि करोति यः स चामरः।
एकपादमुरो बद्धा स्कन्धेऽन्यत्पादरक्षणम्।
एतत्प्रणासनं प्रोक्तं सर्व्वसिद्धिप्रदायकम्।
वायुं मूले समारोप्य ध्यात्वा कुम्भं प्रकारयेत्।
केवलं पादमेकं च स्कन्धमारोप्य यत्नतः।
एकपादेन गगने तिष्ठेत् स दण्डवत्प्रभो।
अपानासनमेतद्धि सर्व्वेषां पुष्टकाश्रयम्।
कृत्वा सूक्ष्मशीर्षपद्मे समारोप्य च वायुभिः।
तदा सिद्धो भवेन्मर्त्यो प्राणापानसमागमम्।
अपानासनयोगेन कृत्वा योगेश्वरो भुवि।
समानासनमावक्ष्ये सिद्धमन्त्रादिसाधनात्।
एकपादमुरौ दत्वा गुह्येऽन्यालिंगवक्त्रके।
एतद्वीरासनं नाथ समानासनसंज्ञकम्।
इत्याकृत्य जपेन्मन्त्रं धृत्वा वायुं चतुर्द्दले।

कुण्डलीं भावयेन्मन्त्री कोटिविद्युल्लताकृतिम्।
आत्मचन्द्रामृतरसै राप्लुतां योगिनीं सदा।
वीरासनन्तु वीराणां योगवायुप्रधारणम्
यो जानाति महावीरः स योगी भवति ध्रुवम्।
अथ वक्ष्ये महाकाल समानासनसाधनम्।
भावक्रमेण यज्ज्ञात्वा वीराणामधिपो भवेत्।
समानासनमाहृत्य रुद्धां गुरुं करेण च।
एकेन सोऽधिकारी स्यात् शवयोगादिसाधने।
आसनं यो हि जानाति वायूनां हरणं तथा।
कालादीनां निर्णयन्तु स कदाचिन्न नश्यति।
कालेन लभ्यते सिद्धिः कालरूपा महोज्ज्वला।
साधकैर्योगिभिर्ध्येयः सिद्धवीरासनात्मना।
अथ वक्ष्ये नीलकण्ठ ग्रन्थिभेदासनं शुभम्।
ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवनात्।
कृत्वा पद्मासनं मन्त्री जंघयोः कुहरे कुरौ।
कूर्परस्थलपर्यन्तं विभेद्य स्कन्धधारणम्।
भित्वा पद्मासनं मन्त्री हस्ताङ्घ्रिं नखयाटनम्।
येन शीर्षं भवेन्नम्रं सर्वाङ्गुलिभिराश्रयम्।
ग्रन्थिभेदासनं चैतत् खेचरादिप्रदर्शनम्।

कृत्वा सूक्ष्मवायुलयं परमात्मनि कारयेत्।
अथान्यासनमावक्ष्ये योगपूरकबन्धनात्।
कृत्वा पद्मासनं पादांघ्रिगुष्ठं ... जंघसंस्थितम्।
हस्तमेकन्तु जंघायाः कार्म्मुकं कूर्परोर्द्धकम्।
पद्मासने समाधाय अङ्गुष्ठं परिधारयेत्।
कार्म्मुकासनमेतद्धि सव्यापसव्ययोगतः।
पद्मासनं वेष्टयित्वा अंगुष्ठाग्रं प्रधारयेत्।
यः करोति सदा नाथ कार्म्मुकासनमुत्तमम्।
तस्य रोगादि शत्रूणां क्षयं नीत्वा सुखं भवेत्।
अथ वक्ष्येऽत्र संक्षेपात् सर्व्वाङ्गासनमुत्तमम्।
यत्कृत्वा योगनिपुणो विद्याभिः पण्डितो यथा।
अधो निधाय शीर्षं च ऊर्द्धपादद्वयं चरेत्।
पद्मासनन्तु तत्रैव भूमौ कूर्परयुग्मकम्।
दण्डे दण्डे सदा कुर्यात् श्रमशान्तिपरः सुधीः।
नित्यं सर्व्वासनं हित्वा न कुर्यात् वायुधारणम्।
मासेन सूक्ष्मवायूनां गमनं चोपलभ्यते।
द्विमासे देवपदवीं त्रिमासे शीतलो भवेत्। ६०
अथ वक्ष्ये महादेव मयूरासनमुत्तमम्।
भूमौ निपात्य हस्तौ द्वौ कूर्परोपरि देहकम्।

281

कूर्परोपरि संस्थाप्य सर्व्वं देहं स्थिराशयः।
केवलं हस्तयुगलं निपात्यं भुवि सुस्थिरः।
एतदासनमात्रेण नाड़ी संभेदनं भवेत्।
पूरकेण दृढो याति सर्व्वत्रांगं श्रमेणच।
अथान्यदासनं कृत्वा सर्व्वव्याधिनिवारणम्।
योगाभ्यासी भवेत् क्षिप्रं ज्ञानासनप्रसादतः।
दक्षपादोरुमूलेच वामपादतलं तथा।
दक्षपादतलं दक्ष पार्श्वे संयोज्य धारयेत्।
एतज्ज्ञानासनं नाथ ज्ञानविद्याप्रकाशकम्
निरन्तरं यः करोति तस्य ग्रन्थिः श्लथो भवेत्।
सव्यापसव्ययोगेन मुंडासनमिति स्मृतम्।
ध्यात्वा ध्यात्वा स्थिरो भूत्वा नीयते परमात्मनि।
गरुड़ासनमावद्ये येन ध्यानस्थिरो भुवि।
सर्व्वदोषाद्विनिर्मुक्तो भवतीति महाबली।
एकपादमुरौ बद्ध्वा एकपादेन दण्डवत्।
जंघापादसन्धिदेशे जानोरग्रव्यवस्थितम्।
एतदासनमाहृत्य पृष्ठे संहारमुद्रया।
आराध्य योगनाथंच सदा सईश्वरस्यच। १००
अथान्यदासनं वक्ष्ये येन सिद्धो भवेन्नरः।

अकस्माद्वायुसंचारं कोकिलारवासनेन च।
ऊर्द्ध्व हस्तद्वयं कृत्वा तदग्रे पादयोः सुधीः।
वृद्धाङ्गुष्ठद्वयं नाथ शनैः शनैः प्रकारयेत्।
पद्मासनं समाकृत्य कूर्परोपरिविद्वासनम्।
स्थापयेत् सुदृढं तद्धि कोकिलासनमुत्तमम्।
एतदासनमाहृत्य वायुस्तम्भां गनिर्भरम्।
283
तिष्ठेदूर्द्ध्वमुखो वीरः कोकिलासनसंस्थितः।

अथ वक्ष्ये वीरनाथ आनन्दमन्दिरासनम्।
यत्कृत्वा अमरो धीरो भवत्येवेह साधकः।
हस्तयुग्मपार्श्वदेशे पादयुग्मं प्रदापयेत्।
प्रकृत्य दण्डवत् कौलो नितम्बाग्रे प्रतिष्ठति।
खंजनासनमावक्ष्ये यत्कृत्वा सुस्थिरो भवेत्।
पृष्ठे पादद्वयं बद्धा हस्तौ भूमौ प्रधारयेत्।
भूमौ हस्तद्वयं नाथ पातयित्वा निलं पिवेत्।
पृष्ठे पादद्वयं बद्धा खंजनेन जयी भवेत्।
अथान्यदासनं वक्ष्ये साधकानां हिताय च।
पवनासनरूपेण खेचरो योगिराड भवेत्।
स्थित्वा बद्धासने वीरो नाभेरधः करद्वयम्।
ऊर्द्ध्वमुखं पिवेद्वायुं निरुद्धेन्द्रियमाविले।

अथ सर्पासनं वक्ष्ये वायुपानाय केवलम्।
शरीरं दण्डवत् तिष्ठेत् ऋजुवक्रन्तु पादयोः।
वायवी कुण्डली देवी कुण्डलाकारमण्डले।
मण्डिता भूषणाद्यैश्च रक्षेत् मनस्थितिम्।
निद्रालस्यभयांस्त्यक्त्वा रात्रौ कुर्य्यात् पुनः पुनः।
सर्व्वान् विघ्नान् वशीकृत्य निद्रादीन् वायुसाधनात्।
अथ वक्ष्ये कालरूपकन्दासनमनुत्तमम्।
कालिपापात् प्रमुच्येत वायवीं वशमानयेत्।
निजपादद्वयं बद्ध्वा स्कन्धदेशे च साधकः।
नित्यं तत्र पदद्वन्द्वं भूमौ पृष्ठे करद्वयम्।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थनिर्णये पाशवकल्पे षट्चक्रसारसंकेते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे त्रयोविंशः पटलः॥ २३॥०॥

आनन्दभैरव उवाच।

अथ वक्ष्ये महाकालयोगशास्त्रार्थनिर्णयम्।
येन विज्ञानमात्रेण षट्चक्रग्रन्थिभेदकः।
पर्व्वातिरिक्तदिवसे कुर्य्यात् श्रीयोगसाधनम्।
कालिकाकुलसर्व्वस्वं कालिकालफलान्वितम्।
आसनं विधिनाज्ञानं कोटिकोटिक्रियान्वितम्।

शतलक्षसहस्राणि आसनानि महीतले ।
स्वर्गे पातालमध्ये तु समुक्तानि महर्षिभिः ।
भेदाभेदक्रमेणैव कुर्य्यान्नित्यं सदासनम् ।
तत्प्रकारं च विविधं यत्कृत्वा अमरो भवेत् ।
अमरः सिद्ध इत्याहुः अष्टैश्वर्य्यसमन्वितः ।
प्रतिभाति सरस्वाला मुनयस्तत्त्ववेदिनः ।
येऽमरास्ते प्रशंसन्ति सर्व्वलोके निरन्तरम् ।
देवाः श्रीकामिनीकान्ताः प्रभवन्ति जगत्त्रये ।
यः कालवशमाकर्त्तुं नियुक्तो यश्च भावकः ।
ते सर्व्वे विचरन्तीह कोटिवर्षशतेषु च ।
तत्तदासननामानि शृणु तत्साधनानि च ।
येन विज्ञानमात्रेण साक्षादीशस्य भक्तिमान् ।
अथ कूर्म्मासनं नाथ कृत्वा वायुं प्रपूरयेत् ।
कामरूपी भवेत् क्षिप्रं कलिकल्मषनाशनः ।
समानासनमाहात्म्य लिंगाग्रे स्त्रीयमस्तकम् ।
नितम्बे हस्तयुगलं भूमौ संकोचितः पतेत् ।
कुम्भीरासनमावश्ये वायूनां धारणाय च ।
तिष्ठेत् कुण्डाकृतिर्भूमौ करौ शीर्षोपरिस्थितौ ।
पादोपरि पदं दत्वा शीर्षोपरि करद्वयम् ।

प० २४

तिष्ठेत् दण्डाकृतिर्भूमौ कुम्भीरासनमेव तत् ।
अथ मत्स्यासनं पृष्ठे हस्तोपरिकराङ्गुलिः ।
पादयुग्म समानेन वज्राङ्गुष्ठस्य योजनम् ।
मकरासनमावक्ष्ये वायुपानाय कुम्भकम् ।
पृष्ठे पादद्वयं बद्ध्वा हस्ताभ्यां पृष्ठबंधनम् ।
अथ सिंहासने नाथ कूर्परोपरिजानुनी ।
स्थापयित्वा ऊर्द्ध्वमुखे वायुपानं समाचरेत् ।
अथ वक्ष्ये महाकाल कुञ्जरासनमुत्तमम् ।
करे सौकेन पादाभ्यां भूमौ तिष्ठेत स्थिरः करः ।
व्याघ्रासनमतो वक्ष्ये क्रोधकालविनाशनम् ।
एकपादं शीर्षमध्ये मेरुदण्डोपरिस्थितम् ।
भल्लुकासनमावक्ष्ये यत्कृत्वा योगिराड् भवेत् ।
नितम्बे च पादगोष्ठौ हस्ताभ्यामङ्गुलिद्वयम् ।
अथ कामासनं वक्ष्ये कामवर्द्धनहेतुना ।
गरुडासनमाहृत्य कनिष्ठाग्रं स्पृशेद्भुवि ।
वर्त्तुलासनमावक्ष्ये यत्कृत्वा भैरवो भवेत् ।
आकाशस्थितपादाभ्यां पृष्ठदेशं निबन्धयेत् ।
अथान्यदासनं वक्ष्ये यत्कृत्वा पेत्तमान्द्यम् ।
दत्तहस्तं दत्तपादं केवलं स्थापयेत् सुधीः ।

286

अथ मालासनं नाथ यत्कृत्वा वायवीप्रियः।
शुभयोगं समाप्नोति एकहस्तास्थितोनमः।
अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत्।
एकहस्तमध्यदेशं भूमिहस्तं च नाशया।
अर्द्धोदयासनं नाथ सर्व्वाङ्गं खे नियोजयेत्।
केवलं हस्तयुगलं भुवि व्यालोड्य नाशया।
अथ चन्द्रासनं वक्ष्ये पादाभ्यां सशरीरकम्।
पुनः पुनर्भ्रामयेद्यो वायुधारणपूर्व्वकम्।
अथ हंसासनं वक्ष्ये शरीरेण पुनः पुनः।
भूमौ संताडयेत् श्वासैः प्राणवायुं दृढं सुधीः।
अथ सूर्य्यासनं वक्ष्ये पृष्ठात् पादेन बन्धनम्।
पृष्ठभेदान्वितं पादमन्यहस्तेन बन्धयेत्।
अथ योगासनं वक्ष्ये यत् कृत्वा योगिराड् भवेत्।
ऊर्ध्वः पादतलद्वन्द्वं स्वाङ्के बद्ध्वा करद्वयम्।
गदासनमतो वक्ष्ये गदाकारो वसेद्भुवि।
ऊर्द्धवाहुर्भवेद्येन कायसाधनहेतुना।
अथ लक्ष्म्यासनं वक्ष्ये लिंगाग्रेऽङ्घ्रितलद्वयम्।
गुह्यदेशे हस्तयुग्मं तलाभ्यां बन्धयेद्भुवि।
अथ कुल्यासनं वक्ष्ये यत्कृत्वा कौलिको भवेत्।

एकहस्तो मस्तकस्थोऽधःशीर्षो नाभिगः करः।
ब्रह्मासनमथो वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत्।
एकपादमुखौ दत्त्वा तिष्ठेद्दण्डाकृतिर्भुवि।
क्षत्रियासनमावक्ष्ये यत्कृत्वा धनवान्भवेत्।
केशेन पादयुगलं बद्ध्वा तिष्ठेदधोमुखः।
अथ वैश्यासनं वक्ष्ये यत्कृत्वा सत्यवान्भवेत्।
वृद्धाङ्गुष्ठेन सन्तिष्ठेत् हस्तयुग्मं स्ववक्षसि।
अथ शूद्रासनं वक्ष्ये यत्कृत्वा सेवको भवेत्।
धृत्वाङ्गुष्ठद्वयं योज्यं नासाग्रे पादमध्यके।
अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत्।
हस्ताङ्घ्रियुग्मं भूमौ गमनागमनं ततः।
पाशवासनमावक्ष्ये कृत्वा पशुपतिर्भवेत्।
पृष्ठे हस्तद्वयं बद्ध्वा कूर्पराग्रे समस्तकम्।
एतेषां साधनादेव चिरजीवी भवेन्नरः।
संवत्सरसाधनाद्धि जीवन्मुक्तो भवेद्ध्रुवम्।
श्रीविद्यासाधने पश्चात् कथितव्यं तव प्रभो।
आसनं योगशिक्षार्थं कायशोधनहेतुना। ४०
इदानीं शृणु देवेश रहस्यं कोमलासनम्।
योगसिद्धिविचाराय सिद्धचर्मासनं शुभम्।

अथ नरासनं वक्ष्ये षोडशादिप्रकारकम्।
येन साधनमात्रेण योगी भवति साधकः।
प्रकाराः षोडश प्रोक्ताः सत्कुलागमसम्भवम्।
येन साधनमात्रेण साक्षाद्योगी महीतले।
एकमासाद्भवेत द्विमासे द्रुतकम्पनम्।
त्रिमासे योगकम्पः स्याच्चतुर्मासे स्थिराशयः।
पञ्चमासे सूक्ष्मकम्पः षण्मासे वीरकम्पगः।
सप्तमासे ज्ञानयुक्तो भावको भवति ध्रुवम्।
अष्टमे सत्वसंयुक्तो जितेन्द्रियकलेवरः।
नवमे सिद्धिमिलनो दशमे चक्रभेदवान्।
एकादशे महावीरो द्वादशे खेचरो भवेत्।
इति योगासनद्वन्द्वे योगी भवति साधकः।
नरासनं यः करोति स सिद्धो नात्र संशयः।
तत्प्रकारं प्रवक्ष्यामि येन सिद्धो भवेत् प्रभो।
अधोमुखं महादेव नरासनस्य साधने।
करणीयं साधकेन्द्रैः योगशास्त्रार्थसम्मतैः।
अदीनां यौवनोद्दामसुन्दरं चारुकुन्तलम्।
लोकानां श्रेष्ठमेवं हि पतितं रणासम्मुखे।
तत्शवं हि समानीय मंगले वासरे निशि।

चन्द्रसूर्य्यासनं कृत्वा साधयेत्तत्र कौलिकः।
अथान्यत संप्रवक्ष्यामि सर्वसिद्धिप्रकारणात।
भेकासनं यः करोति स एव योगिनीपतिः।
अथान्यत संप्रवक्ष्यामि यत कृत्वा योगिराड् भवेत।
तत शवोत्तरापृष्ठे स्थित्वा चन्द्रासने जपेत।
अथान्यत तत्प्रकारं च महाविद्यादिदर्शनात।
तद्रूर्ध्वे गौरवर्णा च तत्र शैलासने जपेत।
अथान्यत्तत प्रकारं च योगी कौलो न संशयः।
यद्येवं म्रियते सोऽपि तदा भद्रासने जपेत।
तत तत साधनकाले च एवं कुर्य्याद्दिने दिने।
चतुर्दिक्षु न वीक्ष्येत भैरवाणां भयार्द्दनात।
मनोनिवेशमात्रेण योगी भवति भैरव।
स्वेच्छासने समाहृत्य मन्त्रं जपति यो नरः।
महासारवीतरागः सिद्धो भवति निश्चितम्।
अथान्यत शवमाहात्म्यं शृणुष्वावहितो मम।
तदूर्ध्वं गृहमानीयाच्छाद्य शार्दूलचर्म्मणा।
तत्र मन्त्री महापूजां कृत्वोपविश्य संजपेत।
पद्मासनस्थस्तस्यैव झटि योगी न संशयः।
एतत्प्रकारासनमाशु कृत्वा जितेन्द्रियो योगफलार्थविज्ञः।

भवेन्मनुष्यो मम चाज्ञया हि सिद्धो गणोऽसौ जगतामधीशः।
मूलशंखयष्टिपादि करवालादिनामृतम्।
वज्रभूतसर्पराजव्याघ्रसद्यो मृतं यजेत्।
यस्य मृत्युर्भवेन्नाथ भैरवस्य सुरापतेः।
रणे सम्मुखयुद्धस्य तदानीय जपं चरेत्।
तत्र कौलासनं कृत्वा अथवा कमलासनम्।
महाविद्यामहामन्त्रं जप्त्वा सिद्धिमवाप्नुयात्।
एतच्छवं न गृह्णीयाद्यदिच्छेदात्मनो हितम्।
न व्याधिमरणं कुष्ठं स्त्रीवश्यं पतितं गुरुम्।
दुर्भिक्षमृतमुन्मत्तं अव्यक्तं लिंगमेव च।
हीनांगं तुवरं वृद्धं पलायनपरं तथा।
अन्ययोन्यविचारेण हवालोकं जपन्ति ये।
ते सर्व्वे व्याघ्रभक्ष्याः स्युः खादन्ति व्याघ्ररूपिणः।
पर्य्युषितं तथास्पृश्य माधिकांगं कुकिल्विषम्।
ब्राह्मणं गोमयं वीरं धार्म्मिकं संत्यजेत सुधीः।
स्त्रीजनं योगिनं त्यक्त्वा साधयेद्वीरसाधनं।
तदा सिद्धो भवेन्मन्त्री आज्ञया मेन संशयः।
तरुणं सुन्दरं शूरं अस्त्राविद्धं समुज्ज्वलम्।
गृहीत्वा जपमाकल्य सिद्धो भवति नान्यथा।

291

मनुष्यशवहृतपद्मे सर्व्वसिद्धिः कुलाकुला।
तत्र सर्व्वासनान्येव सिध्यन्ति नात्रसंशयः।
अथान्यत्ततप्रकारंच यतकृत्वाच योगिराड्भवेत।
कोमलाद्यासने स्थित्वा धारयेन्मारुतं सुधीः।
ततकोमलादिमाहात्म्यं शृणुष्व मम तत्वतः।
अचूडकं मृतं वालं षण्मासात कोमलं परम।
एतद्विभेदं वक्ष्यामि गर्भच्युतं महाशवम।
तद्धित्वाप्रलगावद्धं कृत्वा तत्र जपेत स्थितः।
तद्विभेदि प्रवक्ष्यामि सर्व्वच्युतमहाशवम।
तद्धित्वाग्रानुगेवद्धं कृत्वा तत्र जपेत स्थितः।
षण्मासा न्तरं यावद्दशमासाच्च पूर्व्वकम।
चारुवेशं सुखंवालं गर्भाष्टमपरःसरम।
एकहस्ते द्विहस्ते वा चतुरस्रे समं ततः।
विशुद्ध आसने कुर्यात संस्कारं पूजनं ततः।
पूर्णे पंचमवर्षे च साधको वीतभीः स्वयम।
हीनचूडोपनयनो योमृतस्तं हि कोमलम।
गर्भच्युतफलं नाथ शृणु ततफलसिद्धये।
अणिमाद्यष्टसिद्धिः स्यात संवतसरस्य साधनात।
एतासने जपेन्मन्त्री महाविद्यामनुं शुभम।

आचरात्तस्य सिद्धिः स्यान्नात्र कार्य्या विचारणा।
अथान्यत शृणु माहात्म्यं शृणु सिद्धिश्च साधनात।
साधको योगीराड्भूत्वा ममपादतले वसेत।
दशसंवत्सरे पूर्णे यो म्रियेत शुभे दिने।
शनौ मंगलवारे च तमानीय प्रसाधयेत।
तत्र वीरासनं कृत्वा योजपेद्भद्रकालिकाम।
अथवा वद्धपद्मे च स सिद्धो भवति ध्रुवम।
अथ भावफलं वक्ष्ये येन शवादिसाधनम।
अकस्मात प्राप्तिमात्रेण शवस्य विहितस्य च।
यत पंचदशवर्षीयं सुन्दरं पतितं रणे।
तमानीय यपेद्विद्यां निशि वीरासने स्थितः।
शीघ्रमेव सुसिद्धिः स्यात खेचरी वायुपूरणी।
धारणात शक्तिसिद्धिः स्यात यः करोतीह साधनम।
अथ षोडशवर्षीयं सर्व्वसिद्धिकरं शृणाम।
भोगमोक्षौ करे तस्य शवेन्द्रस्यापि साधनात।
एवं क्रमेण पंचाशद्वर्षीयं सुन्दरं वरम।
आनीय साधयेद्यस्तु स योगी भवति ध्रुवम।
एतत रणस्थमानीय साधयेत सुसमाहितः।
इन्द्रतुल्यो भवेन्नाथ रणस्थशवसाधनात।

यदि सम्मुखयुद्धे वा शूलपाहशयातनम ।
शवमानीय वीरेन्द्रो जपेद्वीरासनस्थितः ।
तच्छवन्तु महादेव पूजार्थं निजमन्दिरे ।
देवालये निर्जने च स्थापयित्वा जपं चरेत । ६०
तत्र वीरासनं किं वा योनिमुद्रासनादिकम ।
पद्मासनं तथा कृत्य वायुं धृत्वा जपं चरेत ।
मासैकेन भवेद्योगी विप्रो गुणाधरः शुचिः ।
सूक्ष्मवायुधारणाज्ञो जपेद्यो वरागे शवे ।
शवसाधनकाले च यद्यत कर्म्म करोति हि ।
तत कर्म्मसाधनादेव योगी स्यादमरो नरः ।

आनन्दभैरव्युवाच ॥

कालक्रियादिकं ज्ञात्वा सूक्ष्मानिलनिधारणाम ।
साधको विचरेद्धीरो वीराचारविवेचकः ।
शवादे[illegible]नयातस्य क्रियामाहात्म्यमुत्तमम ।
शृणु संकेतभाषाभिः शिवेन्द्र चन्द्रशेखर ।
एकदण्डाद्दमानन्तु भूम्यधो विधिमन्दिरे ।
संस्थाप्य सुशवं नाथ मनोदेवगतः प्रभो ।
एकारं जगदाधारं आधारान्तगता सती ।
पतिहीना सूक्ष्मरूपा दधरादिचराचरम ।

मदीयं साधकं पुण्यं सर्व्वकामार्थमोदागम।
प्रकरोमि महाबुद्धां धातुरूपा सरस्वती।
केवलं तव भावेन प्रारम्भो योगपरायण।
मग्ना संसारकरणात त्वयि त्वं चाहमेव च।
यद्यद्वु-पदार्थनिकरे तिष्ठसि त्वं सदा मुदा।
तत्रैव संस्थिता हृष्टा चाहमेव न संशयः।
295
एतद्भावं त्वं करोषि इतिहेतोस्तव प्रिया।
वामांगे संस्थिता नित्यं कामक्रोधविवर्ज्जिता।

आनन्दभैरव उवाच।

किंप्रयोजनमेवं हि शवादीनां च साधनात।
यदि ते श्रीपदाम्भोजमधुमत्तो भवेद्यतिः।
त्रैलोक्यपूजिते भीमे वाञ्छादनीस्वरूपिणि।
शवसाधनमात्रेण केन योगी भवेद्धर। १०३
आनन्दरसलावण्यमन्दहासमुखाम्बुजे।
योगी भवति योगार्थं केन तत्फलमावद।

आनन्दभैरव्युवाच

यदि शंकर भक्तोऽपि मम जापपरायणः।
तथापि शवभावेन शववत शवसाधनम।
रात्रियोगे प्रकर्त्तव्यं दिवसे न कदाचन।

296

शवे स्थिरो यो बभूव स भक्तो मे न संशयः।
मे शवाहुतिसद्द्रव्यं ममतुष्टिनिबन्धनम्।
ममाज्ञां पालयामासुः कुर्य्याद्वीरः शवासनम्।
यद्यहं तत्र गच्छामि तत्रैव स शिवो भवेत्।
निःश्वासत्यागमात्रेण शवत्वं प्रलये तनोः।
यः करोति भावनाशं मयि देव्यां महेश्वरः।
त्रैलोक्यपूजितायान्तु स शिवः शवमाश्रयेत्।
आधिकालापभक्तस्य पालने शवरूपतः।
करोमि कामिनीनाथ सन्देहो नात्र भूतले।
यदाहं त्यजते गात्रं पशूनां भावनाय च।
तदैते च मृताः सर्व्वे केवलाहुतिहेतुना।
तदाहुतिमहद्द्रव्यं शवेन्द्रं वराहारिणम्।
आनीय साधयेद्यस्तु सास्थिरो मे सुभक्तिगः।
सदा क्रोधी भवेद्यस्तु स क्रूरो नात्र संशयः।
स कथं [illegible] घोररात्रौ च साधयेद्विह्वलः शवम्।
भयविह्वलचेता यः स क्रोधी नात्र संशयः।
नास्ति क्रोधसमं पापं पापात् क्लिष्टो भवेत् शवैः।
यो भक्तः पापनिर्मुक्तः सिद्धरूपी निराश्रयः।
विवेकी ध्याननिष्ठश्च स्थिरः संसाधयेत् शवम्।

यावत कालं स्थिरं चित्तं न प्राप्नोति जितेन्द्रियः।
तावत कालं नापि कुर्यात शवेन्द्रस्यापि साधनम्।
शवमानीय तद्भूमे तेनैव परिखन्य च।
तद्दिनं तद्दिनं यावत तद्भाप्य स्थापयेच्छवम।
एवं कला ह्यविद्याशी महाविद्यादिसाधनम।
जितेन्द्रियो मुदा कुर्यादष्टांग साधनेन च।
तदष्टांगफलं वक्ष्ये यत कला सिद्धिभाग्भवेत।
नाड़ीमुद्राविभेदं च कुलाचारफलान्वितम।
अष्टांगसाधनादेव सिद्धरूपी महीतले।
पश्चादन्यत स्वर्गगामी भवेन्न भूतलं विना।
आदौ भूतलसिद्धिः स्याद्भुवोलोकस्य सिद्धिभाक।
पश्चात स्वर्लोकसिद्धिः स्यान्महर्लोकस्य सिद्धिभाक।
जनलोकस्य सिद्धीशस्तपोलोकस्य सिद्धिभाक।
सत्यलोकस्य सिद्धीशः पश्चाद्भवति साधकः।
एवं क्रमेण सिद्धिः स्यात स्वर्गादीनां महेश्वर।
अष्टांगसाधनार्थाय देवा भवन्ति भूतले।
भूतले सिद्धिमाहृत्य गच्छन्ति ब्रह्ममन्दिरे।
क्रमेणैव विलीनास्ते अतो भूतलसाधनम।
भूतले प्रावमास्थाय ब्रह्मचारी दिवाशुचिः।

निशायां पंचतत्वेन दिवसेऽष्टांगसाधनम्।
जितेन्द्रियो निर्विकारो शुद्धध्यानपरायणः।
शवं संसाधयेद्वीरः चिन्तालस्यविवर्जितः।
चिन्ताभिर्जायते लोभो लोभात कामः प्रजायते।
कामाद्भवति संमोहो मोहादालस्यसंचयः।
आलस्यदोषजालेन निद्रा भवति तत्क्षणात।
महानिद्राविपाकेन मृत्युर्भवति निश्चितम।
अपक्वनिद्राभंगेन क्रोधो भवति निश्चितम।
ततक्रोधाच्चित्तविकलो विकलात श्वासवर्द्धनम।
एथायुः क्षयमाप्नोति विस्तरे श्वाससंक्षये।
बलबुद्धिः क्षयं याति बुद्धिहीनो जड़ात्मकः।
जड़भावेन मन्त्राणां जपहीनो भवेन्नरः।
जपहीने श्वासनाशः श्वासनाशे तनुक्षयः।
अतस्तनुं समाश्रित्य जपनिष्ठो भवेत शुचिः।
अष्टांगधारणेनैव सिद्धो भवति नान्यथा।
अष्टांगलक्षणं वक्ष्ये साक्षात सिद्धिकरं परम।
जन्मकोटिसहस्राणां फलेन कुरुते नरः।
योगेन लभ्यते ज्ञानं ज्ञानात कुलपतिर्भवेत।
यो योगेशः सकुलेशः पशुभावस्य निर्म्मलः।

नियमेन भवेत पूजा पूजया लभते शिवम्।
यत्र कल्याणसम्पूर्णं सम्पूर्णः शुचिरुच्यते।
आसने दीर्घजीवी स्यात रोगशोकविवर्जितः।
ग्रन्थिभेदनमात्रेण साधकः शीतलो भवेत्।
प्राणायामेन शुद्धः स्यात प्राणवायुवशेन च।
वशी भवति देवेश आत्मारामे प्रतीयते।
प्रत्याहारेण चित्तन्तु चंचलं कामनाप्रियम्।
तत्कामनाविनाशाय स्थापयेत पदपंकजे।
धारणेन वायुसिद्धिरिष्टसिद्धिस्ततः परम्।
अणिमासिद्धिमाप्नोति अनुरूपेण वायुना।
ध्यानेन लभते मोक्षं मोक्षेण लभते सुखम्।
सुखेनानन्दवृद्धिः स्यादानन्दो ब्रह्मविग्रहः।
समाधिना महाज्ञानी सूर्य्यचन्द्रमसोर्गतिः।
महाशून्ये लयस्थाने श्रीपादानन्दसागरः।
तत्तदंगे मनोदत्वा परमात्मनि निर्म्मले।
श्रीपादमूर्तिमाकल्प्य ध्यायेत कोटिरवीन्दुवत।
श्रीमूर्तिं कोटिचपलां मालाज्वालासुनिर्म्मलाम्।
ध्यायेद्योगी सहस्रारे कोटिसूर्येन्दुसुन्दरीम्।
श्रीविद्यामतिसुन्दरीं त्रिजगतामानन्दपुंजेश्वरीम्

कोट्यर्कायुततेजसि प्रियकरीं योगोदरीं शांकरीम् ।
तां बालां स्थिरचंचलां गुरुबलां ब्यालाचलां केवलां
ध्यायेद्यः सुसमाधिना स्थिरमतिः सश्रीपतिर्गच्छति ॥

इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने भावनिर्णये पापद्रवकल्पे षट्चक्रसारसंकेते योगविद्याप्रकरणे मन्त्रसिद्धिशक्त्युपाख्याने भैरवीभैरवसंवादे चतुर्विंशतिः

॥पटलः॥ २४॥

३००

।आनन्दभैरवउवाच।

वदकान्ते रहस्यं मे तत्त्वावधानपूर्वकम् ।
यद्यतज्ज्ञात्वा महायोगी प्रविशत्याननाम्बुजे ।
यदि स्नेहदृष्टिरस्ति मम ब्रह्मनिरूपणम् ।
योगसारं तत्त्वपथं निर्मलं वदयोगिनि ।

आनन्दभैरव्युवाच ।

शृणु प्राणेश वक्ष्यामि योगनाथ क्रियागुरो ।
योगांगं योगनामिस्थं तत्त्वब्रह्मनिरूपणम् ।
तत्र सृष्टिप्रकारं च प्रपालनविधिस्तथा ।
क्रमसंख्यस्थितिसंहारं वदामि तत्त्वतः शृणु ।
त्वमेव संहारकलेवरः प्रियः प्रधानमेवाचितयेत्सु शंकर ।
संहारभावं भवभूतिनाशनात प्रधानमाद्यस्य जगतप्रलापनम् ।

(२) सुकरूणां.....

301

तत्रागमं मेरुभुजंगसंगमं सृष्टिप्रकारं खलु तत्र मध्यमम्।
तत्पालनं चोत्तममेव वाह्यं संसाररूपं प्रकृते र्गुणात्मकम्।
तत्र त्रयं नाथ भवादिकारणं तन्नाशनाम्नो प्रणवं गुणात्मकम्।
त्रयं गुणातीतमनन्तमन्तरं संभाव्य योगी भवतीह साधकम्।
अव्यक्तरूपान प्रणवाद्धि सृष्टिं तल्लीयतेऽव्यक्ततनोः समासात्।
सूक्ष्मात्मकारात् प्रतिभान्ति खे सदा प्रणश्यन्ति स्थूलकलान्निरन्तरात्।
अतीव चित्रं जगतां विचित्रं नित्यं चरित्रं कथितं न शक्यते।
हंसास्थितास्ते भववासिनो जनाः ज्ञात्वान देहान्तमुपाश्रयन्ते।
देहाधिकारी प्रणवादिदेवो मायाश्रितां निद्रित एव कालः।
प्रणीयते दीर्घपथे च काले तदा प्रणश्यन्ति जगत्स्थिता जनाः।
कालो जगद्भक्षक ईशवेषो विस्तीर्णगात्रो गतिहीनमीनः।
स एव मृत्युर्विहितं चराचरं प्रभंजति श्रीरहितं पलायनम्।
पञ्चेन्द्रतत्त्वे न महेन्द्रसृष्टिः प्रतिष्ठिता यज्ञविधानहेतुना।
सदैव यज्ञं कुरुते भवार्णवे निःसृष्टिकाले वरयज्ञसाधनम्।
हिताहितं तत्र महार्णवे भयं विलोक्य लोका भयविह्वलः सदा।
विशन्ति ते कुत्सितमार्गमण्डले अतो महानारकिबुद्धिहीनाः।
मायामये मोहधर्माकुलानले भवे
लीनो यथा वेदपथानुसारी ।
म्रियेत कालानलतुल्यमृत्युना कथं तु योगी कथमेव साधकः॥

यः साधकः प्रेमकलासुभक्त्या स एव मूर्खो यदि याति संस्तौ।
स सारहीनः प्रियचारुकान्त्या सिद्धो भवेत् कामदचक्रवर्त्ती।
वसेन्न सिद्धो गृहिणीसमृद्धां महाविपद्दुःखविशेषिकायाम्।
यदीह काले प्रकरोति वासनां तदा भवेन्मृत्युरतीव निश्चितम्।
कृपावलोक्यं वदनारविन्दं तवैव हे नाथ ममैव वा यदि।
सदैव यः साधुगुणाश्रितो नरो ध्यात्वा निगूढं मतिभावमग्नः।
स एव साधुः प्रकृतेर्गुणाश्रितः कृतीव पृथ्वीवेदपुराणावक्ता।
सत्यं महाकाल इतीह चाहं प्राणाश्रयं ते कथितं प्रिये मया।
गुणेन भक्तेन्द्रगणादिकानां साक्षात्फलं योगजयाख्यसंगतिम्।
अष्टांगभेदेन शृणुष्व कामक ....

यमादिकं तत् प्रथमं वशे नयेत् स एव योगी जगतां प्रतिष्ठितः।
दविप्रकारं यमवासनावशे शृणुष्व तत्कालवशायि केवलम्।
सर्वत्र कामादिकपाशुजिह्वा जेतुं समर्थोऽयमकर्म्मसेवकः।
कामं तथा क्रोधमतीव लोभं मोहं मदं मात्सरितं त्वहंकृतम्।
ततो यमो द्वादशशत्रुघातकं वशं समाहृत्य महेन्द्रतुल्यः।
सर्वत्र वायौ वशकारणाय करोति योगी स च नान्यथा भवेत्।
अहिंसनं सत्यसुवाक्यसुप्रियं अस्तेयभावः कुरुते वशिष्ठवत्।
सुब्रह्मचर्यं सुदयार्जवं सदा क्षमां धृतिं सैव सुसूक्ष्मवायुगः।
तथा मिताहारमसंशयं मनः शौचं प्रपंचार्थविसर्जनं प्रभो।

करोति यः साधकचक्रवर्त्ती वाञ्छोत्सवज्ञानविवर्ज्जितं सदा।

वशी यमद्वारदशासंख्ययेति यः करोति चाष्टांगफलार्थसाधनम्।

वरानना श्रीचरणारविन्दे मदुद्गदशान्दे यतिनेत्रगोचरम्।

तपश्च सन्तोषमनःस्थिरं सदा आस्तिक्यमेवं द्विजदानपूजनम्।

नितान्तदेवार्च्चनमेव भक्त्या सिद्धान्तशुद्धं श्रवणं च ह्रीर्मतिः।

जपोहुतं तर्पणमेव सेचनं तद्भावनं चेष्टनमेव नित्यम्।

इतीह शास्त्रे नियमाश्चतुर्द्दश भक्तिक्रियामङ्गलसूचनानि।

पूर्व्वोक्तयोगासनमेव नित्यं भेकासनं वद्धमहोत्पलासनम्।

वीरासनं भद्रसुभद्रमासनं पूर्व्वोक्तमेवासनमाशु कर्य्यात्।

सर्व्वाणि तन्त्राणि हतानि नाथ सूक्ष्माणि नालं वशहेतुना मया।

तथापि मूढो यदि वायुपानं नाहत्य योनौ भ्रमतीह पातकी।

प्राणी निरानन्दरसेन मत्तो गजेन्द्रगामी पुरुषोत्तमः स्मृतः।

तस्यैव सेवानिपुणो भवेद्वशी ब्रह्माण्डलोकं परिपाति यो बली।

वदामि देवादि सुरेश्वर प्रभो सूक्ष्मानिलं प्राणरसेन धारयेत्।

सिद्धो भवेत् साधकचक्रवर्त्ती सर्व्वान्तरस्थं परिपश्यति प्रभुम्।

आनन्दभैरव उवाच।

वद कान्ते महाज्ञानं ब्रह्मज्ञानं च शोभनम्।

सर्व्वत्र शोभनं नित्यं किमाकारेण जायते।

येन वायुं वशं कृत्वा खेचरो भवति प्रिये।

303

साधकोब्रह्मरूपी स्यात ब्रह्मज्ञानप्रसादतः।

ब्रह्मज्ञानात परं ज्ञानं कुत्रास्ति वद सुन्दरि।

आनन्दभैरवी उवाच।

शृणुष्व योगिनां नाथ धर्म्मज्ञ ब्रह्मसाधक।

अज्ञानध्वान्तमोहानां निर्म्मलं ब्रह्मसाधनम्।

ब्रह्मज्ञानसमो धर्म्मो नान्यधर्म्मो विधीयते।

गयायां पिण्डदानेन वाराणस्यां मृतेन किम्।

किं कुरुक्षेत्रदानेन प्रयागे वपनेन किम्।

अश्वमेधसहस्रेण राजसूयशतेन च।

ब्रह्मज्ञानसमो धर्म्मो नान्यधर्म्मो विधीयते।

गयायां पिण्डदानेन सरोवरसहस्रेण कोटिहेमाचलेन च।

कोटिब्राह्मणभोज्येन कोटितीर्थेन किं फलम्।

कामरूपे महापीठे साधकैर्लभ्यते यदि।

ब्रह्मज्ञानसमो धर्म्मो नान्यो धर्म्मो विधीयते।

ब्रह्मज्ञानन्तु द्विविधं प्राणायामजमव्ययम्।

भक्तिवाक्यशब्दरूपस्वरूपब्रह्मणः परम्।

प्राणायामन्तु द्विविधं सगर्भं च निगर्भकम्।

जपध्यानं सगर्भं च तदयुक्तं निगर्भकम्

अव्ययं लक्षणाक्रान्तं प्राणायामं परात्परम्।

305

ब्रह्मज्ञानेन जानाति साधको विजितेन्द्रियः।
तत्प्रकारद्वयं नाथ मात्रावृत्तिं जपक्रमम्।
मात्रावृत्तिर्द्वादशकं जपक्रममनु षोडश।
नासिकायां महादेव लक्ष्यत्रयमनुत्तमम्।
पूरकं कुम्भकं तत्र रेचकं देवताश्रयम्।
एतेषामप्यधिष्ठानं ब्रह्मविष्णुशिवाः प्रजाः।
त्रिवेणी संगमे यान्ति सर्व्वपापापहारकाः।
इड़ा च भारती गंगा पिंगला यमुना मता।
इड़ापिङ्गलयोर्मध्ये सुसुम्ना च सरस्वती।
त्रिवेणी संगमो यत्र तीर्थराजः स उच्यते।
त्रिवेणी संगमे वीरश्चालयेत्तान् पुनः पुनः।
सर्व्वपापाद्विनिर्मुक्तः सिद्धो भवति नान्यथा।
चन्द्रसूर्य्यालिकामध्ये वह्निरूपे महोज्ज्वले।
ध्यात्वा कोटिवीरकरं कुण्डली किरणं वशी।
त्रिवारभ्रमणं वायो कृतमाधममध्यमाः।
यत्र यत्र गतो वायुस्तत्र तत्र त्रयं त्रयम्।
इड़ादेवी च चन्द्राख्या सूर्य्याख्या पिंगला तथा।
सुसुम्ना जननी मुख्या सूक्ष्मा पंकजतन्तुवत्।
सुसुम्ना मध्यदेशे तु वज्राख्या नाड़िका शुभा।

तत्र सुद्माचित्रिणीच तत्र श्रीकुण्डली गतिः।
तया संग्रथितं नाड्या षटपद्मं सुमनोहरम्।
ध्यानगम्यं परं ज्ञानं षटशिवं शक्तिसंयुतम्।
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परशिवो नाथ षटशिवाः परिकीर्त्तिताः।
डाकिनी राकिनी शक्तिर्लाकिनी काकिनी तथा।
साकिनी वाकिनी तत्र षटपद्मे षट्शिवान्विताः।
मूलाधारं स्वाधिष्ठानं मणिपुरं सुपंकजम्।
अनाहतं विशुद्धाख्यं आज्ञाख्यं यन्महोत्पलम्।
आज्ञाचक्रादिमध्ये च चन्द्रशीतलतेजसम्।
प्रपतन्तं मूलपद्मे तं ध्यायेत पूरकानलम्।
यावतकालं स्थैर्यगुणं ततकालं कुम्भकं स्मृतम्।
पिंगलायां प्रगच्छन्तं रेचकं वशमानयेत।
अङ्गुष्ठैकपर्व्वणा च दक्षनासापुटं वशी।
धृत्वा षोडशवारेण प्रणवेन जपं चरेत।
एततपूरकमाकल्य कुर्य्यात कुम्भकमद्भुतम्।
चतुःषष्टिप्रणवेन जपं ध्यानं समाचरेत।
कुम्भकानन्तरं नाथ रेचकं कारयेद्बुधः।
द्वात्रिंशद्वारजापेन मूलेन प्रणवेन वा।

द्धिनासिकापुटं बद्ध्वा कुम्भकं सर्व्वसिद्धिदम् ।
कनिष्ठानामिकाभ्यां तु वाममंगुष्ठदक्षिणम् ।
पुनर्दक्षिणनासाग्रे वायुं संपूरयेद्बुधः ।
मनुषोड़शजापेन कुम्भयेत पूर्व्ववत ततः ।
ततो वामे रेचकं च द्वात्रिंशत प्रमाणेन तु ।
पुनर्व्वामेन संपूर्य षोड़शप्रमाणेन तु ।
पुनर्दक्षिणनासाग्रे द्वादशांगुलमानतः ।
कुम्भयित्वा रेचयेद्यः सर्व्वत्र पूर्व्ववत प्रभो ।
प्राणायामत्रयेणैव प्राणायामैकमुत्तमम् ।
द्विवारं मध्यमं प्रोक्तं मधमं चैकवारकम् ।
त्रिकालं कारयेद्यत्ना॰ दनन्तफलसिद्धये ।
प्रातर्मध्याह्नकाले च सायाह्ने नियतं शुचिः ।
जपध्यानादिभिर्युक्तं सगर्भं यः करोति हि ।
मासात सलक्षणं प्राप्य षण्मासे पवनाशनः ।
तालुमूले समारोप्य जिह्वाग्रं योगसिद्धये ।
त्रिकाले सिद्धिमाप्नोति प्राणायामेन षोड़श ।
सदाभ्यासी वशीभूत्वा पवनं चालयेत पुमान ।
षण्मासाभ्यन्तरे सिद्धिरिति योगार्थनिर्णयः ।
योगेन लभ्यते सर्व्वं योगाधीनमिदं जगत ।

तस्माद्योगं परं कुर्य्यात यदा योगी तदा सुखी।
विना योगं न सिद्धेत्तु कुण्डली परदेवता।
अतो योगं सदा कुर्य्यादीश्वरी पाददर्शनात।
योगी योगाद्भवो मोक्षः इति योगार्थनिर्णयः।
मन्त्रसिद्धीकुर्को यावत तावद्योगं तदाभ्यसेत।
मात्रावृत्तिं प्रवक्ष्यामि काकचंचुपुटं यथा।
मूलवायुभक्षणं तत चन्द्रमण्डलचालनम।

आनन्दभैरवी उवाच।

मात्रावृत्तिश्च त्रिविधा तन्मध्ये उत्तमं त्रयम।
वर्णं सचन्द्रसंयुक्तं मूलं यद्वरमेव वाम।
जानुजंघामध्यदेशे तत्तत सर्व्वासनास्थितः।
वामहस्ता तालुमूले भ्रामयेद्द्वादशक्रमात।
द्वादशक्रमशः कुर्य्या प्राणायामं इह पूर्व्ववत।
मात्रावृत्तिक्रमेणैव जयमष्टसहस्रकम।
प्राणायामद्वादशकै भवेदष्टसहस्रकम।
कला सिद्धिश्चरो नाथ निष्पापी चैकमासतः।
त्रिसन्ध्यं कारयेद्यत्नात ब्रह्मज्ञानी निरंजनः।
भवतीति न सन्देहः सदाभ्यासी इह योगराट।
योगाभ्यासात भवेन्मुक्तो योगाभ्यासात कुलेश्वरः।

योगाभ्यासाच्च सन्न्यासी ब्रह्मज्ञानी निरामयः।
सदाभ्यासाद्भवेद्योगी योगाभ्यासाद्भवेत् परंतपः।
सदाभ्यासात् पापमुक्तो विधिविद्यां प्रकाशयेत्।
काकचंचुपुटं कृत्वा पिबेद्वायुमहर्निशम्।
सूक्ष्मवायुक्रमेणैव सिद्धो भवति योगराट्।
बद्धपद्मासनं कृत्वा योनिमुद्रां विभाव्य च।
मूले संपूरयेद्वायुं काकचंचुपुटेन तु।
मूलमाकुञ्च्य सर्व्वत्र प्राणायामे मनोरमे।
प्रबुद्धयेत् कुण्डलिनीं चैतन्या चेन्महासुखी।
ओष्ठाधरं काकतुल्यं दन्तैर्दन्तान् प्रगाढकम्।
बद्धा राजद्विजो योगी जिह्वां नैव प्रसारयेत्।
राजदन्तयुगं नाथ नाशयेज्जिह्वया सुखी।
काकचंचुपुटं बद्धा बद्धवीरासनस्थितः।
तालुजिह्वामूलदेशे चान्यजिह्वां प्रयोजयेत्।
तदद्भुतामृतरसं काकचञ्चुपुटे पिबेत्।
यः काकचंचुपुटके सूक्ष्मवायुप्रवेशनम्।
करोति स्तम्भनं योगी सोऽमरो भवति ध्रुवम्।
एतद्योगप्रसादेन जीवन्मुक्तस्तु साधकः।
राजव्याधिमहापीड़ारहितो भवति ध्रुवम्।

अथवा मात्रया कुर्यात षोड़शस्वरसंपुटम ।
स्वमन्त्रप्रणवं वापि जप्त्वा योगी भवेन्नरः ।
अथवा वर्णमालाभिः पुटितं मूलमन्त्रकम ।
मात्रासंख्याक्रमेणैव जप्त्वा कालं वशं नयेत ।
वदनेनोच्चरेद्वर्णं वाञ्छाफलसमृद्धये ।
केवलं जिह्वया जाप्यं कामनाफलसिद्धये ।
नाभौ सूर्यो वह्निरूपी ललाटे चन्द्रमास्तथा ।
अग्निशिखास्पर्शनेन गलितं चन्द्रमण्डलम ।
ततपरामृतधाराभिस्तृप्तिमाप्नोति भास्करः ।

310

सन्तुष्टः पाति सततं पूरकेणच योगिनम ।
ततः पूरकयोगेन अमृतं स्रावयेत सुधीः ।
कुर्यात प्रज्वलितं वह्निं रेचकेन वराग्निना ।
ततो मौनजपं कत्वा धृत्वा सूक्ष्मानिलं मुदा ।
सहस्रारे गुरुं ध्यात्वा योगी भवति भावकः ।
प्राणवायुः स्थिरो यावत तावन्मृत्युभयं कुतः ।
ऊर्द्धरेता भवेद्यावत तावत कालं भयं कुतः ।
यावद्बिन्दुः स्थितो देहे विधुरूपी सुनिर्म्मलः ।
सदा गलतसुधाव्याप्तस्तावन्मृत्युभयं कुतः ।

आनन्दभैरव उवाच

वद कान्ते कुलानन्दरसिके कामरूपिणि।
सर्व्वतेजोमयि श्रीदे येन सिद्धो भवेन्नरः।
महाविद्या* खेचरीच सर्व्वतत्त्वस्वरूपिणी।
कीदृशी शांकरी विद्या श्रोतुमिच्छामि तत्क्रियाम्।
अध्यात्मविद्यायोगेशी कीदृशी भवितव्यता।
कीदृशी परमादेवी तत्प्रकारं वदस्व मे।

आनन्दभैरव्युवाच।

यस्य नाथ मनःस्थैर्यं महासत्त्वे सुनिर्म्मले।
महत्या सम्भावनं यत्र विना चालम्बनं प्रभो।
यस्यासनं चित्तवलं स्वमिन्द्रियं स्थिरा सुदृष्टिर्जगदीश्वरीपदे।
नाथेन्दुशोभेच विनावलोकनं वायुः स्थिरो यस्य विना निरोधनम्।
त एव मुद्रां विचरन्ति खेचराः पापाद्विमुक्ताः प्रपिवन्ति वायुम्।
यथा हि वालस्य ड जडस्य चेष्टा निद्रा विहीनाः प्रतियान्ति निद्राम्।
यथा पथज्ञानविवर्त्तिता ये धर्म्मार्थकामादिविहीनमानसाः।
विनावलम्बं जगतामधीश्वरास्त एव मुद्रां विचरन्ति शांकरीम्।
ज्ञानेनाध्यात्मविद्यार्थं जानाति कुलनायकः।
अध्याज्ञाचक्रमध्यस्थ शिवात्मानं सुविद्यया।
अध्यात्मज्ञानमात्रेण सिद्धो योगी न संशयः।

311

* महामुद्रा खेचरीच....

षट्चक्रभेदको योऽहि अध्यात्मज्ञः सउच्यते।
अध्यात्मशास्त्रसंकेत मात्मना मागतं शिवम्।
कोटिचन्द्रार्कातं शान्तं योजानाति षड्भुजे।
स ज्ञानी सैव योगी च सैव देवो महेश्वरः।
स मां जानाति हे कान्त विस्मयो नास्ति शंकर।
मम सर्व्वात्मकं रूपं जगत्स्थावरजंगमम्।
सृष्टिस्थितिप्रलयगं यो जानाति सयोगराट्।
अध्यात्मविद्यां संगोप्य नानाशास्त्रं प्रकाशितम्।
तच्छास्त्रजालमुग्धा ये ते ध्यानज्ञाः कथं नराः।
त्रिदण्डी स्यात सदा भक्तो वेदाभ्यासपरः कृती।
वेदादुद्भवशास्त्राणि त्यक्त्वा मां भावयेद्यदि।
वेदाभ्यासं समाकृत्य नानाशास्त्रार्थनिर्णयम्।
समुत्पन्नां महाशक्तिं समालोक्य भजेद्यतिः।
सर्व्वव्यापिकां शक्तिं कामरूपां निराश्रयाम्।
व्यक्ताव्यक्तां स्थिरपदां वायवीं मां भजेद्यतिः।
यस्या आनन्दमतुलं ज्ञानाज्ञस्य फलाफलम्।
योगिनां निश्चयज्ञानमेकमेव न संशयः।
यस्याः प्रभावमात्रेण तत्वचिन्तापरो नरः।
तामेव परमां देवीं सर्व्वराजसुकुण्डलीम्।

तामेव वायवीं शक्तिं सूक्ष्मरूपां सुखाश्रयाम् ।
आनन्दवासिकां गौरीं ध्यायेत् श्वासनिवासिनीम् ।
आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिः परिगीयते ।
तद्द्रव्यस्थां महादेवीं नीलोत्पलदलप्रभाम् ।
भ्रामरीं परमामष्टादशाभिस्तु भुजैर्युताम् ।
कुण्डलीं चेतनाकर्त्रीं चैतन्यां परदेवताम् ।
आनन्दभैरवीं नित्यां घोरहासां भयानकाम् ।
तामेव परमां देवीं सर्व्ववायुवशंकरीम् ।
मदिरासिन्धुसम्भूतां मत्तां रौद्रीं वराभयाम् ।
योगिनीं योगजननीं ज्ञानिनीं मोहिनीमुमाम् ।
सर्व्वभूतसर्व्वदेहस्थितरूपां महोज्ज्वलाम् ।
षट्चक्रभेदिकां सिद्धां भीमां नित्यां मतास्थिताम् ।
विमलां निर्म्मलां ध्यात्वा योगी मूलाम्बुजे यजेत् ।
एतत्पटलपाठे तु पापमुक्तो दिवाकरः ।
यथोर्द्धरेता धर्म्मज्ञो विचरेज्ज्ञानसिद्धये ।
एतत्क्रियादर्शनेन ज्ञानी भवति साधकः ।
ज्ञानादेव हि मोक्षः स्यान्मोक्षः समाधिसाधनः ।
यत्रदूर्द्धगो वायुश्च धारणाशक्तिरेव च ।

313

तत्तन्मन्त्रं वर्द्धयित्वा प्राणायामे समाचरेत।
प्राणायामात् परं नास्ति पापराशिक्षयाय च।
सर्व्वपापक्षये जाते किं न सिध्यति भूतले।
प्राणवायुं महोग्रंतु महातेजोमयं परम।
प्राणायामेन जित्वा च योगी मत्तगजं यथा।
प्राणायामं विना नाथ कुत्र सिद्धो भवेन्नरः।
सर्व्वसिद्धिक्रियासारं प्राणायामं परं स्मृतम।
प्राणायामं त्रिवेणीस्थं यः करोति मुहुर्मुहुः।
तस्याष्टांगसम्सिद्धिः स्याद्योगिनां योगवल्लभः।

इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसंकेते सिद्धमन्त्रप्रकरणे प्राणायामसमुल्लासे भैरवीभैरवसंवादे पंचविंशतिः पटलः॥०॥२५

आनन्दभैरव उवाच। शृणु प्राणसम फलं प्राणायामनिरूपणम।
प्राणायामजपं ध्यानं तत्वयुक्तं वदामि तत।
प्रकारत्रयमुल्लासं प्राणायामेषु शोभितम।
देवताविधिविद्यावीश उत्तमाधममध्यमाः।
रजस्तमोगुणं नाथ सत्वे संस्थाप्य यत्नतः।
कामक्रोधादिकं त्यक्त्वा योगी भवति योगवित।

रजोगुणं नृपाणां तु तमोगुणमतीवच।
अधिकन्तु पशूनां हि साधूनां सत्वमेवच।
सत्वं विष्णु देवरूपं निर्म्मलं द्वैतवर्ज्जितम्।
आत्मोपलब्धविषयात्रिमूर्त्तिमूलमाश्रयेत।
सत्वगुणाश्रयादेव निव्यापी सर्व्वसिद्धिभाक।
जितेन्द्रियो भवेत शीघ्रं ब्रह्मचारीव्रतेनचु।
प्राणवायुवशेनापि वशीभुताश्चगणाचरा:।
तस्यैव करणे नाथ जपं ध्यानं समाचरेत।
वक्ष्यामि तत्प्रकारं च जपध्यानविधिद्वयम्।
एतत्प्रकारमात्रेण योगीस्यान्नात्र संशय:।
जपं चात्रिविधं प्रोक्तं व्यक्ताव्यक्तादिसूक्ष्मगम्।
व्यक्तं वाचिकमुपांशु मव्यक्तं सूक्ष्ममानसम्।
तत्र ध्यानं प्रवक्ष्यामि प्रकारमेकाविंशतिम्।
ध्यानेन जपसिद्धि: स्याज्जपात्तसिद्धिर्न संशय:।
आदौ विद्यामहदेवी ध्यानं वक्ष्यामि शंकर।
एषा देवी कुण्डलिनी अस्या मूलाम्बुजे मन:।
मन: करोति सर्व्वाणि धर्म्मकर्म्माणि सर्व्वदा।
यत्र गच्छति स श्रीमान तत्रवायुश्च गच्छति।
अतो मूले समारोप्य मानसं वायुरूपिणम्।

द्वादशाङ्गुलगं वाह्ये नासाग्रे चावधारयेत ।
मनःस्थं रूपमाकल्प्य मनोधर्म्मं मुहुर्मुहुः ।
मनस्तत्सदृशं याति गतिर्येन सदा भवेत ।
मनोविकाररूपं तु एकमेव न संशयः ।
अज्ञानिनां हि देवेश ब्रह्मणो रूपकल्पना ।
अव्यक्तं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम ।
धर्म्मकर्म्मविनिर्मुक्तं मनोगम्यं भजेद्यतिः ।
पद्मं चतुर्द्दलमूले स्वर्णावर्णं मनोहरम ।
तत्कर्णिकामध्यदेशे स्वयम्भूवेष्टितां भजेत
कोटिसूर्य्यप्रतीकाशां सुसुम्नावर्त्मगामिनीम ।
ऊर्द्धागतगलत्सुधाधारामण्डितां कुण्डलीं भजेत ।
स्वयम्भुलिंगं परमं ज्ञानाङ्कुरविवर्द्धनम ।
सूक्ष्मातिसूक्ष्ममाकाशं कुण्डलीजडितं भजेत ।
पूर्व्वोक्तयोगपटलं तत्र मूले विभावयेत ।
कुण्डलीध्यानमात्रेण षट्चक्रभेदको भवेत ।
ध्यायेद्देवीं कुण्डलिनीं परापरगुरुं प्रियाम ।
आनन्दार्णवमध्यस्थां योगिनीं योगमातरम ।
कोटिविद्युल्लताभासां सूक्ष्मातिसूक्ष्मवर्णगाम ।
ऊर्द्ध्वमार्गे व्याप्नुवतीं प्रथमारुणविग्रहाम ।

प्रथमोद्गमने कौलां ज्ञानमार्गप्रकाशिकाम्।
प्रविप्रयासे मत्तचामम्रतव्याप्तविग्रहाम्।
धर्म्मोदयां भानुमतीं जगत्स्थावरजङ्गमाम्।
सर्व्वगस्थां निर्व्विकल्पां चैतन्यानन्दविग्रहाम्।
आकाशवाहिनीं नित्यां सर्व्ववर्णस्वरूपिणीम्।
महाकुण्डलिनीं ध्यायेत ब्रह्मविष्णुशिवादिभिः।
प्रणवान्तःस्थितां शुद्धां शुद्धज्ञानाश्रयां शिवाम्।
कुलकुण्डलिनीं सिद्धिं चन्द्रमण्डलभेदिनीम्।
मूलां भोजस्थितामाद्यां जगद्योनिं जगत्प्रियाम्।
स्वाधिष्ठानादिपद्मस्थां सर्व्वशक्तिमयीं पराम्।
आत्मविद्याशिवानन्दां पीठस्थामतिसुन्दरीम्।
सर्पाकृतिं रक्तवर्णां सर्व्वरूपविमोहिनीम्।
कामिनीं कामरूपस्थां मातृकामर्थदायिनीम्।
कुलमार्गानन्दमयीं कालीं कुण्डलिनीं भजेत्।
इति ध्यात्वा मूलपद्मे निर्म्मले योगसाधने।
धर्म्मोदये ज्ञानरूपी साधयेत परकुण्डलीम्।
कुण्डलीभावनादेव खेचराद्यष्टसिद्धिभाक्।
ईश्वरत्वमवाप्नोति साधको गतभीर्भवेत्।
योगाभ्यासे भावसिद्धौ स्मृतो वायुर्महोदये।

प्राणानामालनिर्व्वाहो यत्नेन तं प्रचालयेत ।
प्रतिष्ठयां समाकुर्य्यां मूलपद्मस्य कुण्डलीम् ।
तदा प्राणमहावायुवशी भवति निश्चितम् ।
ये देवाः सन्ति ब्रह्माण्डे क्षेत्रे पीठेषु तीर्थके ।
शिलायां मरणये नाथ सिद्धाः स्युः प्राणवायुना ।
ब्रह्माण्डे यानि संसन्ति तानि सन्ति कलेवरे ।
ते सर्व्वे प्राणलग्नाः स्युः प्राणातीतं निरंजनम् ।
यावत प्राणः स्थितो देहे तावन्मृत्युर्भयं कुतः ।
गते प्राणे समायान्ति देवताश्चेतनास्थिताः ।
सर्व्वेषां मूलभूता सा कुण्डली भूतदेवता ।
वायुरूपा पाति सर्व्वमानन्दचेतनामयी ।
जगतां चेतनारूपा कुण्डली योगदेवता ।
आत्ममनः समायुक्ता ददाति मोक्षमेव सा ।
अतस्तां भावयेन्मन्त्री भावज्ञानप्रसिद्धये ।
भवानीं भोगमोक्षस्थां यदि योगमिहेच्छति ।
वायुरोधनकाले च कुण्डली चेतनामुखी ।
ब्रह्मरन्ध्रावधिर्ध्येया योगिनं पाति कामिनीम् ।
वायुरूपां परं देवीं नित्यं योगेश्वरीं जयाम् ।
निर्व्विकल्पां त्रिकोणस्थां सदाध्याये कुलेश्वरीम् ।

अनन्तां कोटिसूर्य्याभां ब्रह्मविष्णुशिवात्मिकाम्।
अनन्तज्ञाननिलयां मां भजन्ति मुमुक्षवः।
अज्ञानतिमिरे घोरे सालम्बा मूढचेतसि।
सुप्ता सर्पसमा मौना पाति साधकमीश्वरी।
ईश्वरीं सर्वभूतानां ज्ञानाज्ञानप्रकाशिनीम्।
धर्माधर्म्मकलाव्याप्तां करुणामयविग्रहाम्।
नित्यं ध्यान्ति योगेन्द्रा कांचनाभाः कलिस्थिताः।
कुलकुण्डलिनीं देवीं चैतन्यानन्दनिर्भराम्।
वकारादिसान्तवर्णमालाविद्युल्लतारताम्।
हेमालंकारभूषांगीं सत्यां सम्भावयन्ति ते।
ये कुलाब्धिस्थां कुलमार्गप्रकाशिनीम्।
ध्यायन्ति हर्षसंयुक्तास्ते मुक्ता नात्र संशयः।
ये मुक्ताः पापराशेस्तु धर्म्मज्ञानसुमानसाः।
तेऽवश्यं ध्यानमाकुर्वन् स्तुवन्ति कुलमण्डलीम्।
कुलकुण्डलिनीध्यानं भोगमोक्षप्रदायकम्।
यः करोति महायोगी भूतले नात्र संशयः।
त्रिविधं कुण्डलीध्यानं दिव्यवीरपशुक्रमम्।
पशुभावादियोगेन सिद्धो भवति योगिराट्।
दिव्यध्यानं प्रवक्ष्यामि सामान्यानन्तरं प्रभो।

आदौ सामान्यमाकृत्य दिव्यादीन् भावयेत्ततः।
कोटिसूर्य्यप्रतीकाशां तेजोविद्यां निराकुलाम्।
ज्वालामालासहस्राढ्यां कालानलशतोपमाम्।
दंष्ट्राकरालदुर्धर्षां जटामण्डलमण्डिताम्।
घोररूपां महारौद्रीं सहस्रकोटिचंचुलाम्।
कोटिचन्द्रसमाक्लिन्धां सर्व्वचस्थां भयानकाम्।
अनन्तसृष्टिसंहारपालनोन्मत्तमानसाम्।
सर्व्वव्यापकरसाढ्यामादिलीलाकलेवराम्।
अनन्तसृष्टिनिलयां तां ध्यायन्ति मुमुक्षवः।
वीरध्यानं प्रवक्ष्यामि यत्कृत्वा वीरवल्लभः।
वीराणां वल्लभो योऽहि मुक्तिभोगी स उच्यते।
यदि वीराचारधर्म्मं करोति भुम्रतां पतिः।
स योगी योगवक्ता स्यादानन्दपूर्णभावकः।
मुक्तिदाता विधाता च विधाता वेदवाचकः।
वेदवक्ता महारुद्रो वीराचारेण संभवेत्।
वीराचारे सत्गुणं निर्मलं दिव्यमुत्तमम्।
संप्राप्य च महावीरो योगी भवति तत्क्षणात्।
वीराचारं विना नाथ दिव्याचारं न लभ्यते।
अतो वीराचारधर्म्मं कृत्वा दिव्यं समाचरेत्।

वीराचारकोटिफलं वारैकजपसाधनम् ।
कोटिजन्मकृतं पापं दुःखनाशं समभ्नगम् ।
कुलाचारं समाचारं वीराचारं महाफलम् ।
कला सिद्धश्च विद्यानां कुलध्यानं मदीयकम् ।
कुलकुण्डलिनीं देवीं मां ध्यात्वा पूजयन्ति ये ।
मूलपद्मे महावीरां भैरवीं ते वशेन्द्रियाः ।
कालीं कौलीं कुलेशीं कनकनिजकला ध्यानकालानलाकी-
कल्लोलां कालकल्वां केलिकिलिकलिकां केलिलावण्यलीलाम् ।
सूक्ष्माख्यां संस्थयाख्यां त्वयकुलकमले सूक्ष्मतेजोमयीं ता-
माद्यन्तस्थां भजन्ति प्रणतरतजनां सुन्दरीं स्वर्णवर्णाम् ॥
अष्टादशभुजैर्युक्तां नीलेन्दीवरलोचनाम् ।
मंदिरां सागरोतपन्नां चन्द्रसूर्याग्निरूपिणीम् ।
चन्द्रसूर्याग्निमध्यस्थां सुन्दरीं वरदायिनीम् ।
कामिनीं कोटिकन्दर्पदर्पान्तकपतिप्रियाम् ।
आनन्दभैरवाक्रान्तामानन्दभैरवीं पराम् ।
योगिनीं कोटिशीतांशुगलद्गात्रमनोहराम् ।
कोटिविद्युल्लताकारां सदसद्व्यक्तिवर्जिताम् ।
ज्ञानचैतन्यनिरतां वीराचारा भजन्तिहि ।
तस्या ध्यानप्रसादेन सन्तुष्टो भैरवः स्वयम् ।

अहं च तुष्टा संसारे सर्व्वे तुष्टा न संशयः।
प्राणायामान् संकरोति साधकः स्थिरमानसः।
ध्यात्वा देवीं मूलपद्मे वीरो योगमवाप्नुयात्।
वीरभावं सूक्ष्मवायुधारणेन महेश्वर।
साधको भुवि जानाति स्वमृत्युर्जन्मसंकटम्।
मासादाकर्षिणीं सिद्धिं वीकासिद्धिश्च द्विमासतः।
मासत्रयेण संयोगाज्जायते देववल्लभः।
एवं चतुष्टये मासि भवेद्दिक्पालगोचरः।
पंचमे पंचवाणः स्यात् षष्ठे रुद्रो न संशयः।
वीरभावस्य माहात्म्यं कोटिजन्मफलेन च।
जानाति साधकश्रेष्ठो देवीभक्तः स योगिराट्।
वीराचारं महाधर्म्मं चित्तस्थैर्यस्य कारणम्।
यस्य प्रसादमात्रेण दिव्यभावान्वितो भवेत्।
स्वयं रुद्रो महायोगी महाविष्णुः कृपानिधिः।
महावीरः सर्वात्मा मोक्षभागी न संशयः।
अथ नाथ महावीर भावस्नानं कुलाश्रयम्।
यत्कृत्वा शुचिरेव स्यात् शुचिश्चेत् किं न सिध्यति।
कुलस्नानं महास्नानं योगिनामपि दुर्ल्लभम्।
कृत्वा जितेन्द्रियो वीरः कुलध्यानं समाचरेत्।

स्नानन्तु त्रिविधं प्रोक्तं मार्जनं गात्रमार्जनम् ।

मन्त्रजालादिभिः स्नानमुत्तमं परिकीर्त्तितम् ।

तत्प्रकारं शृणु प्राणवल्लभ प्रियकारण ।

स्नानमात्रेण मुक्तः स्यात् पापशैलादनन्तगः ।

स्नायाच्च विमले तीर्थे हृदयाम्भोजपुष्करे ।

बिन्दुतीर्थेऽथवा स्नायात् सर्व्वजन्माघमुक्तये ।

इडासुसुम्ने शिवतीर्थकेऽस्मिन्

ज्ञानाम्बुपूर्णे वहतः शरीरे ।

ब्रह्माम्बुभिः स्नाति तयोः सदा यः

किं तस्य गाङ्गैरपि पुष्करैर्वा ॥

इडा मनःस्थाननिवासिनी सूर्य्यालिका या यमुना प्रवाहिका ।

तथा सुसुम्ना मनदेशगामिनी सरस्वती रक्षति मज्जनात्मकम् ।

मनोगतस्नानपरो मनुष्यो मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।

महीस्थतीर्थे विमले जले सुरा मूलाम्बुजे स्नाति स मुक्तिभाग्भवेत् ।

सर्व्वादितीर्थे सुरतीर्थपावनी गंगा महाकालविनिर्गता सती ।

करोति पापक्षयमेव मुक्तिं ददाति साक्षादतुलार्थपुण्यदा ।

स्वर्गस्थं सारदातीर्थं स्वाधिष्ठानेषु पंकजे ।

मनो निधाय योगेन्द्रः स्नाति गंगाजले यथा ।

मणिपुरे देवतीर्थं पंचकुण्डं सरोवरम् ।

तत्र श्रीकामनातीर्थे स्नाति यो मुक्तिमिच्छति ।
विशुद्धाख्ये महापद्मे पीठतीर्थसमुद्भवम् । २अष्ट
कैवल्यमुक्तिदं ध्यात्वा स्नाति वीरो विमुक्तये ।
मानसं विन्दुतीर्थं च कालिकुण्डं कलेवरम् ।
आज्ञाचक्रे सदा ध्यात्वा स्नाति निर्वाणसिद्धये ।
एतत् कुलप्रियस्नानं कुर्वन्ति योगिनो मुदा ।
अतो वीराः सत्वयुक्ताः सर्वसिद्धियुताः सुराः ।
नानापापं सदा कृत्वा ब्रह्महत्यादिनिर्गतम् ।
कृत्वा स्नानं महातीर्थे सिद्धाः स्युरणिमादिकाः ।
स्नानमात्रेण नियापी शक्तः स्याद्वायुसंग्रहे ।
तीर्थानां दर्शनाद्येषां मुक्तो योगी भवेद्ध्रुवम् ।
अथ सन्ध्या महातीर्थे कुलनिष्ठः समाचरेत् ।
कुलरूपां महाविद्यां योगयोगाद्यतीश्वरः ।
शिवशक्त्या समायोगो यस्मिन्काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते ।
शिवं सूर्यं हृदि ध्यात्वा भानुशक्तीन्दुसंगमम् ।
सा संध्या कुलनिष्ठानां समाधिस्थे प्रजायते ।
अथ विन्दुं शिवं ध्यात्वा हृतसूर्यशक्तिसंगमम् ।
संयोगविद्या सा संध्या समाधिस्थे प्रजापयेत् ।

किंवा देहस्थिता शक्तिः वायवीया शिवान्विता ।
नासाग्रसन्धिनिलया सा संध्या वायुसंगमा ।
किंवा बाह्यगता शक्तिः सुन्दरी शिवसंगमम् ।
सा सन्ध्या तत्वनिष्ठानां समाधिस्थे प्रजायते ।
इति संध्या च कथिता ज्ञानरूपा जगन्मयी ।
सा नित्या वायवीशक्तिः छिन्ना छिन्नं विनाशयेत् ।
तत्वतीर्थे महादेव तर्पणं यः करोति हि ।
त्रैलोक्यं तर्पितं तेन तत्प्रकारं शृणु प्रभो ।
मूलाम्भोजे ज्वलन्तीं च सोमसूर्य्याग्निरूपिणीम् ।
समुत्थाप्य कुण्डलिनीं परे बिन्दुं निवेश्य च ।
तदुद्भवामृतेनेह तर्पयेद्देहदेवताम् ।
कुलेश्वरीमादिविद्यां सा सिद्धा भवति ध्रुवम् ।
चन्द्रसूर्य्यमहावाह्नि संभूतामृतधारया ।
तर्पयेत् कौलिनीं नित्याममृताक्तां विभावयेत् ।
एतत्परपदाकाली श्रीविद्यादिप्रतर्पणम् ।
कृत्वा योगी भवेदेव सत्यं सत्यं कुलेश्वर ।
मूले पात्रं चान्द्रमसं ललाटेन्द्वमृतेन च ।
संपूज्य ज्ञानमार्गेण तर्पयेत्तेन खेचरीम् ।
सुधासिन्धोर्मध्यदेशे कुलकन्यां प्रतर्पयेत् ।

सहिरामृतधारामि: सिद्धो भवति योगिराट।
तत्रतीर्थे महाज्ञानी ध्यानं कुर्य्यादहर्निशम।
प्राणायामपरो भूत्वा स्वतत सर्व्वं विभावयेत।
किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यमम।
महाशून्येनयं कत्वा पुनस्तिष्ठति योगिराट।
निरालम्बे पदे शून्ये यत्तेज उपपद्यते।
तद्धर्ममभ्यसेन्नित्यं ध्यानमेतद्धि योगिनाम।
स्वीयां कन्यां भोजयेद्वै परकीयामथापिवा।
परितोषाय सर्व्वेषां युवतीं वा प्रतोषयेत।
पूर्व्वोक्तस्तोत्रसारेण कवचांगेन शंकर।
सहस्रनाम्ना कुमार्य्यास्तुत्वा देवीं प्रतोषयेत।
यःकरोति पूर्णयज्ञं पंचांगजपकर्म्मणि।
पुरश्चरणकार्य्यंच प्राणायामेन कारयेत।
प्राणवायुःस्थितो देहे पूजाग्रहणहेतुना।
येऽन्तरस्थं नकुर्व्वन्ति तेषां सिद्धिः कुतःस्थिता।
अतोऽन्तर्यजनेनेह कुण्डली तुष्टमानसा।
यदि तुष्टा महादेवी तदैव सिद्धिभाक पुमान।
आभायेंचेत जगद्धात्रीं प्रत्यक्षपरदेवताम।
मूलाम्भोजात सहस्रारे पूजयेद्बिन्दुधारया।

गलच्चन्द्रामृतोल्लासधारया सिच्य पार्वतीम् ।
पूजयेत् परया भक्त्या मूलमन्त्रं जपन् सुधीः ।
अर्चयन् विषयैः पुष्पैस्तत्तद्ग्रहणात् तन्मयो भवेत् ।
न्यासस्तन्मयताबुद्धिः सोऽहम्भावेन पूरयेत् ।
मन्त्राक्षराणि चित्शक्तौ प्रोक्तानि परिभावयेत् ।
तामेव परमव्योम्नि परमानन्दविग्रहाम् ।
दर्शयत्यात्मसंभावं पूजाहोमादिभिर्विना ।
तदन्तर्यजनं ज्ञेयं योगिनां शंकर प्रभो ।
अन्तरात्मा महात्मा च परमात्मा स उच्यते ।
तस्य स्मरणमात्रेण साधुर्योगी भवेन्नरः ।
अमायमनहंकारमरागममदं तथा ।
अमोहकमदम्भं च अनिन्द्याक्षोभकौ तथा ।
अमात्सर्यमलोभं च दश पुष्पाणि योगिनाम् ।
अहिंसा परमपुष्पं च पुष्पमिन्द्रियनिग्रहम् ।
दयापुष्पं क्षमापुष्पं ज्ञानपुष्पं च पंचमम् ।
इत्यष्टसप्तभिः पुष्पैः पूजयेत् परदेवताम् ।
अथ होमविधिं वक्ष्ये पुरश्चरणसिद्धये ।
संकेतभाषया नाथ कथयामि शृणुष्व तत् ।
आत्मानमपरिच्छिन्नं विभाव्य सूक्ष्मवतास्थितम् ।

आत्मत्रयस्वरूपन्तु चित्तकुण्डं चतुरस्रकम् ।
आनन्दमेखलायुक्तं नाभिस्थं ज्ञानवह्निषु ।
अर्द्धमात्राकृतिर्योनि र्भूषितं जुहुयात् सुधीः ।
इति मन्त्रेण तद्वह्नौ सोऽहंभावेन होमयेत् ।
वाह्यनारीविधिं त्यक्त्वा मूलान्तेन सतेजसम् ।
नाभिचैतन्यरूपाग्नौ हविषा मनसा स्रुचा ।
ज्ञानप्रदीपिते नित्यं मन्त्रवृत्तिं जुहोम्यहम् ।
इति प्रथममाहुत्या मूलान्तेन सतेजसम् ।
नाभिचैतन्यरूपाग्नौ मूलान्ते मन्त्रमुच्चरन् ।
द्वितीयाहुतिदानेन होमं कृत्वा भवेद्वशी ।
धर्म्माधर्म्महविर्दीप्तमात्माग्नौ मनसा स्रुचा ।
सुसुम्नावर्त्मना नित्यं मन्त्रवृत्तिं जुहोम्यहम् ।
स्वाहान्तं मन्त्रमुच्चार्य्य मूलान्ते संस्मरेत् क्रियाम् ।
द्वितीयाहुतिमेतन्तु तृतीयाहुतिमाशृणु ।
प्रकाशाकाशहस्ताभ्यां मवलम्ब्योन्मनी स्रुचा ।
धर्म्माधर्म्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ।
स्वाहान्तं मन्त्रमुच्चार्य्य माद्ये मूलं प्रयोज्य च ।
जुहुयादेकभावेन मूलाम्भोरुहमण्डले ।
चतुर्थपूर्णहवने एतन्मन्त्रेण कारयेत् ।

एतन्मंत्रचतुर्थं तु पूर्णाविद्याफलप्रदम् ।
अन्तर्निरन्तरनिरन्धनमेधमाने
मायान्धकारपरिपन्थिनि सम्विदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधादिशिवावसानम् ॥
इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् ।
न तस्य पुण्यपापानि जीवन्मुक्तो भवेद्ध्रुवम् ।
ज्ञानिनां योगिनामेव अन्तर्यागो हि सिद्धिदः ।
अन्तर्यजनकाले तु दृढभावेन भावयेत् ।
तां मां नाथ कथां ध्यात्वा दिवारात्र्याकथा यथा ।
सुरापाक्तिः सुरामांसं तद्भक्तभैरवः स्वयम् ।
तयोरैक्यसमुत्पन्नं आनन्दो मोक्षनिर्णयः ।
आनन्दं ब्रह्मकिरणं देवमध्ये व्यवस्थितम् ।
तदभिव्यंजकैर्द्रव्यैः कुर्याद्ब्रह्मतर्पणम् ।
आनन्दं जगतां सारं ब्रह्मरूपं तनुस्थितम् ।
तदभिव्यंजकं द्रव्यं योगिभिस्तैः प्रपूजयेत् ।
लिंगत्रयज्ञः षट्पद्माधारमध्येन्दुभेदकः ।
पीठस्थानानि चागत्य महापद्मवनं व्रजेत् ।
मूलाम्भोजाद्ब्रह्मरन्ध्रं चालयेदनुचालयेत् ।

329

गत्वा पुनः पुनस्तत्र चिच्चन्द्रपरमोदयः ।

चिच्चन्द्रकुण्डली शक्तिःसाचारस्य महोदयम् ।

व्योमपंकजनिःस्यन्दसुधापानरतो नरः ।

मधुपानमिदं नाथ वाह्ये चावान्तरे सतम् ।

इतरन्मद्यपानं हि योगिनां योगघातनम् ।

इतरस्तु महापानं भ्रान्तिमिथ्याविवर्ज्जितः ।

महावीरः संकरोति योगांगास्य समिद्धये ।

पुण्यापुण्यपशुं हत्वा ज्ञानखड्गेन योगवित् ।

परे शिवे नयेच्चित्तं मांसाशी स महीतले ।

वाह्यस्थानं पशूनां तु मांसं वीरेन्द्रभोजनम् ।

यदि तद्बुद्धिमाप्नोति तदा तत्कर्म चाचरेत् ।
मानसेनेन्द्रियगणं संयम्यात्मनि योजयेत् ।
मांसाशी स भवेदेव इतरे प्राणिघातकाः ।
शरीरस्थे महावह्नौ दग्धमत्स्यानि पूजयेत् ।

शरीरस्थं जलस्थानि इतराण्यशुभानि च ।

महीगतं स्निग्धसौम्योद्भवा शुद्धा महाफला ।

तत सर्वं ब्रह्मकिरणे आरोप्य तर्पयेत् सुधीः ।

एतन्मुद्राभोजनानि आनन्दवर्द्धकानि च ।

इतराणि च भोगार्थे एताद्धि योगिनां परम् ।

परशक्त्यात्ममिथुनं संयोगानन्दनिर्भरा ।

मुक्तास्ते मैथुनं तत स्यादितरे स्त्रीनिषेवकाः ।

एतत पंचमकारेण पूजयेत परनायिकाम् ।

पुरश्चरणगूढार्थं सारमन्त्रप्रपूजनम् ।

एतद्योगं सदाभ्यस्येन्निद्रालस्यविवर्ज्जितः।
प्राणवायुवशं कुर्य्यात कालवारणासकारणात।
एततक्रियां प्राणवशे यः करोति निरन्तरम्।
तस्य योगसमृद्धिः स्यात काले सिद्धिमवाप्नुयात।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये सूक्ष्मयोगासिद्धादिकारणे पाशवकल्पे षट्चक्रसारसंकेते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे षड्विंशतिः पटलः ॥०॥ २६ ॥०

331

आनन्दभैरवउवाच।

विविधानि त्वयोक्तानि योगशास्त्राणि चैव हि।
सर्व्वरूपा त्वमेवात्मा मम कान्ते प्रियम्वदे।
योगाष्टांगफलान्येव सर्व्वतत्वोज्ज्वलानि च।
इदानीं श्रोतुमिच्छामि शक्तितत्वक्रमेण तु।
पूर्व्वोक्तप्राणवायूनां हरणं वायुधारणाम्।
प्रत्याहारं धारणां च ध्यानं समाधिमावद।

आनन्दभैरव्युवाच।

शृणु लोके प्रवक्ष्यामि प्राणायामफलाफलम्।
न गृह्णीयाद्बहुतरं तु स्वल्पं नैव तु कुम्भयेत।
शनैः प्रकर्त्तव्यः संहारं च विवर्ज्जयेत।

पूरकाभ्याससिद्धौ च प्राणायामं शतं शतम् ।
वक्ष्ये प्राणलक्षणं तु यस्मिन् यस्मिन् दिने गतिः ।
कृष्णपक्षे शुक्लपक्षे तिथित्रिंशत्फलोदयम् ।
शुक्लपक्षे इडायां तु कृष्णपक्षेऽन्यदेव हि ।
कुर्यात् सर्वत्र गमनं सुसुम्नावह्नुरूपिणीम् ।
तिथित्रयं सितस्यापि प्रतिपाद्यादिषु संभवम् ।
उदयं दक्षनासायां वायोर्ज्ञेयं महाप्रभो ।
चतुर्थीं पंचमीं षष्ठीं व्याप्योदयति देवता ।
वामनासापुटे ध्येया वायुधारणकर्म्मणि ।
सप्तमीमष्टमीं चैव नवमीं व्याप्य तिष्ठति ।
वामनासापुटे ध्येया साधकैः कुलपण्डितैः ।
दशम्येकादशीं चैव द्वादशीं व्याप्य तिष्ठति ।
वायुर्दक्षिणनासाग्रे ध्येयो योगिभिरीश्वरः ।
त्रयोदशीं व्याप्य वायुः पौर्णमासीं चतुर्द्दशीम् ।
वामनासापुटे ध्येयः संहारहरणाय च ।
कृष्णपक्षे फलं वक्ष्ये यज्ज्ञात्वा ऽमरो भवेत् ।
कालज्ञानी भवेत् शीघ्रं नात्र कार्य्या विचारणा ।
प्रतिपद्द्वितीया यस्य तृतीया ऽसितस्य च ।
पिंगलायां समारोप्य वायुर्निःसरते सदा ।

चतुर्थीं पंचमीं षष्ठीं वामेच व्याप्यतिष्ठति ।
सप्तमीमष्टमीं वायुर्नवमीं दक्षिणे ततः ।
दशम्येकादशीं वायुं व्याप्य भ्रमति सर्व्वदा ।
वामे च दक्षिणेऽन्यानि तीर्थादीनि सदा निशम् ।
यदा एतद्व्याप्य भावं समाप्नोति नरोत्तमः ।
तदैव मरणं रोगं बन्धुनाशं त्रिपक्षके ।
निजजन्मतिथिं ज्ञात्वा तस्मिन् काले निरोधयेत् ।
आरभ्य जन्मनाशाय प्राणायामं समाचरेत् ।
यदा व्यत्ययभावेन देहं त्यक्त्वा प्रगच्छति ।
तदा निरुद्धश्वसनं कालाग्नौ धारयेदथः ।
यावत् स्वस्थानमायाति तावत् कालं समभ्यसेत् ।
यावन्नाचलते देहं यावन्नचलितं मनः ।
क्रमादभ्यासतः पुंसो देहे स्वेदोद्गमोऽधमः ।
मध्यमः कम्पसंयुक्तो भूमित्यागः परः स्मृतः ।
षण्मासाद्दूरदर्शी स्याद्दूरश्रवणमेव च ।
संवत्सराभ्यासयोगाद्योगविद्याप्रकाशकत् ।
योगी जानाति सर्व्वाणि तन्त्राणि सूक्ष्माणिच ।
यदिदर्शनदार्ढ्यः स्यात्तदा योगी नसंशयः ।
प्रत्याहारफलं वक्ष्ये यत्कृत्वा खेचरो भवेत् ।

ईश्वरे भक्तिमाप्नोति धर्म्मज्ञानी भवेन्नरः।
उत्तमस्य गुणप्राप्तिर्यावत शीलनमिष्यते।
तावज्जपेत सूक्ष्मवायुं प्रत्याहारप्रसिद्धये।
इन्द्रियाणां विचरतां विषयेषु विनिर्गमम।
बलादाहरणं तेभ्यः प्रत्याहारो विधीयते।
नानाकर्म्मसु धर्म्मेषु शास्त्रपाठेषु योगिराट।
पतितं चित्तमानीय स्थापयेत पदपंकजे।
दुर्निवार्य्यं स्थिरचित्तं दुरत्यय समन्वितम।
बलादाहरणं तस्य प्रत्याहारो विधीयते।
एतत-प्रत्याहरबलाद्योगी स्वस्थो भवेद्ध्रुवम।
अकस्माद्भावमाप्नोति भावराशिः स्थिरो नरः।
भावात परतरं नास्ति भावाधीनमिदं जगत।
भावेन लभ्यते योगं तस्माद्भावं समाश्रयेत।
अथ धारणमावक्ष्ये यतकृत्वा धैर्य्यरूपभाक।
त्रैलोक्यमुदरे कृत्वा पूर्णास्तिष्ठति योगिराट।
अंगुष्ठगुल्फजानूरुसीमनी लिंगनाभिषु।
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां तथा नसि।
भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधि।
धारणं प्राणमरुतो धारणेति निगद्यते।
सर्व्वनाड्यग्रथिरेणे षट्चक्रे देवतालये।

ब्रह्ममार्गं धारणं यत् धारणेति निगद्यते ।
धारणं मूलदेशे तु कुण्डली नासिकातटे ।
प्राणवायोः प्रसम्बन्धं धारणेति निगद्यते ।
तव श्रीचरणाम्भोज मंगले चारुतेजसि ।
भावेन स्थापयेच्चित्तं धारणाशक्तिमाप्नुयात् ।
अथ ध्यानं प्रवक्ष्यामि यत् कृत्वा सर्व्वगो भवेत् ।
ध्यानयोगाद्भवेन्मोक्षस्तत्क्षणात् गमनिर्गमः ।
समाहितेन मनसा चैतन्यान्तरवर्त्तिना ।
आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते ।
श्रीपदाम्भोरुहद्वन्द्वे नखकिञ्जल्कचित्रिते ।
स्थापयित्वा मनः पद्मं ध्यायेदिष्टं गुणं महत् ।
अथ समाधिमाहात्म्यं वदामि तत्वतः शृणु ।
यस्यैवकरणादेव पूर्णो योगी भवेन्नरः ।
समत्वभावनान्नित्यं जीवात्मपरमात्मणोः ।
समाधिना जयी भूयाद्गनन्द्भैरवेश्वर ।
संयोगासिद्धिमात्रेण समाधिस्थं महाजनम् ।
प्रपश्यति महाज्ञानी समाध्यष्टांगलक्षणैः ।
एततसमाधिनाहृत्य योगी योगान्वितो भवेत् ।
आत्मचन्द्रे मनः सूर्यं समारोप्य विभावयेत् ।
एतदष्टांगसारेण योगयोग्यो भवेन्नरः ।

335

योगयोगाद्भवेन्मोक्षो मन्त्रासिद्धिरखण्डता।
योगशास्त्रप्रकारेण सर्व्वे वै भैरवाः स्मृताः।
योगशास्त्रात्परं शास्त्रं त्रैलोक्येनापि वर्त्तते।
त्रैलोक्यातीतशास्त्राणि योगज्ञो विविधानि च।
ज्ञात्वा मां पश्यति क्षिप्रं नानाध्यानेन शंकर।
कामादिदोषनाशाय कथितं ज्ञानमुत्तमम्।
इदानीं शृणु वक्ष्यामि मन्त्रयोगार्थनिर्णयम्।
विश्वं शरीरमक्लेशं पंचभूताश्रयं प्रभो।
चन्द्रसूर्याग्नितेजोभिर्जीवब्रह्मैकरूपकम्।
तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्यो मताः।
तेषु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः।
प्रधानमेरुदण्डे च सोमसूर्याग्निरूपिणी।
नाडीत्रयस्वरूपेण योगमाता प्रतिष्ठिता।
इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी।
शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा।
दक्षिणे पिंगलाख्या तु पुंरूपा सूर्यविग्रहा।
दाड़िमीकुसुमप्रख्या विषाख्या परिकीर्त्तिता।
मेरुमध्ये स्थिता सा तु मूलाद्ब्रह्मविग्रहा।
सर्व्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी।

तस्य मध्ये विचित्राख्या अमृतस्राविणी शुभा ।
सर्व्वदेवमयी सा तु योगिनां हृदयंगमा ।
विसर्गाद्बिन्दुपर्य्यन्तान व्याप्य तिष्ठति तत्वतः ।
मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मिके ।
मध्ये स्वयम्भूलिंगं तु कोटिसूर्यसमप्रभम् ।
तदूर्द्ध्वे कामबीजं तु कलशान्तीन्दुनायकम ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ।
तद्बाह्ये हेमवर्णाभं वसवर्णचतुर्द्दलम् ।
द्रुतहेमसमप्रख्यं तत्र पद्मं विभावयेत ।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दले हीरकप्रभम ।
वादिलान्तैस्तु षड्वर्णैः सहितं रसपत्रकम् ।
स्वाधिष्ठानाख्यममलं योगिनां हृदयंगमम् ।
मूलाधारादिषट्कानां मूलाधारं प्रकीर्त्तितम ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं स्वलिंगकम् ।
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम ।
मेघाभं विद्युदाभं च वहुतेजोमयं प्रभो ।
मणिवद्भिन्नं तत्पद्मं मणिपूरं शशिप्रभम् ।
कथितं सकलं नाथ हृदयाब्जं शशिप्रभम ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम ।

शिवेनाधिष्ठितं पद्मं विश्वलोकनकारकम् ।
तदूर्द्ध्वेनाहतं पद्मं हृदिस्थं किरणाकुलम् ।
उद्यदादित्यसंकाशं कादिठान्ताक्षरान्वितम् ।
लद्द्वादशसंयुक्तमीश्वराद्यसमन्वितम् ।
तन्मध्ये बाणलिंगं तु सूर्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ।
तेनानाहतपद्माख्यं योगिनां योगसाधनम् ।
आनन्दसदनं तत्तु सिद्धेनाधिष्ठितं परम् ।
तदूर्द्ध्वं तु विशुद्धाख्यं दलषोडशपंकजम् ।
वर्णैः षोडशभिर्युक्तं धूम्रवर्णं महाप्रभम् ।
योगिनामद्भुतं स्थानं सिद्धवर्णं समभ्यसेत् ।
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाप्रभम् ।
आज्ञाचक्रं तदूर्द्ध्वं तु आत्मनाधिष्ठितं परम् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ।
कैलासाख्यं तदूर्द्ध्वं तु तदूर्द्ध्वं बोधनी ततः ।
एवं चक्रकुलचक्राणि कथितानि तव प्रभो ।
तदूर्द्ध्वं स्थानममलं सहस्राराम्बुजप्रभम् ।
बिन्दुस्थानं परं ज्ञेयं गणानां मतमाश्रृणु ॥

बौद्धा वदन्ति चात्मानं ज्ञानिनामपि ईश्वराः।
सर्व्वं नास्तीति चार्व्वाका नानाकर्म्मविवर्ज्जिताः।
वेदनिन्दापराः सर्व्वे बौद्धाः शून्यातिवादिनः।
समज्ञानाश्रिताः कान्ताश्चीनभूमिनिवासिनः।
आत्मानमपरिच्छिन्नं विभाव्य भावते मम।
श्रीपदारविन्दयुग्मं नवेन्दुमंडलं शुभम्।
शिवस्थानं प्रवदन्ति शैवाः शाक्ता महर्षयः।
परमं पुरुषं नित्यं वैष्णवाः प्रीतिकारकाः।
हरिहरात्मकं रूपं वदन्ति च परे जनाः।
देव्याः पदं नित्यरूपाः चरणानन्दनिर्भराः।
वदन्ति मुनयो मुख्याः पुरुषं प्रकृत्यात्मकम्।
पुंप्रकृत्याख्यभावेन मग्ना भान्ति महीतले।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम्।
योगमार्गानुसारेण भावयेत् सुसमाहितः।
आदौ महापूरकेण मूले संयोजयेन्मनुम्।
गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबोधयेत्।
लिंगभेदक्रमेणैव प्रापयेद्बिन्दुचक्रकम्।
शंभुना तां परां शक्तिमेकीभावं विचिन्तयेत्।
तत्रोत्थितामृतरसं द्रुतलाक्षारसोपमम्।

पाययित्वा परां शक्तिं कुण्डल्यां योगसिद्धिदाम्।
षट्चक्रभेदकं तत्र सन्तर्प्यामृतधारया।
आनयेत्तेन मार्गेण मूलाधारं ततः सुधीः।
एवमुद्यम्यमानस्य अहन्यहनि मारुतम्।
जरामरणदुःखाद्यै र्मुच्यते भवबन्धनात्।
तन्त्रोक्ता दूषिता मन्त्राः सर्व्वे सिध्यन्ति नान्यथा।
स्वयं सिद्धो भवे[illegible]त क्षिप्रं योगोऽयं योगिवल्लभः।
ये गुणाः सन्ति देवस्य पंचकृत्यविधायिनः।
ते गुणाः साधकाधारे भवन्त्येव नचान्यथा।
इति ते कथितं नाथ मंत्रयोगमनुत्तमम्।
इदानीं धारणाख्यन्तु शृणुष्व परमात्मनः।
दिक्कालाद्यनवच्छिन्ने त्वयि चित्तं निधाय च।
मयि वा साधकवरो ध्यायेत्तन्मयतामियात्।
तन्मयो भवति क्षिप्रं जीवब्रह्मैकयोजनात्।
इष्टपादे मतिं दत्वा नखकिंजल्कचित्रिते।
अथवा समलं चित्तं यदा क्षिप्रं न सिध्यति।
तदावयवयोगेन योगी योगं समभ्यसेत्।
पादाम्भोजे मनो दद्यात् नखकिञ्जल्कचित्रिते।
जंघायुगे तथा राम कदलीकाण्डमण्डिते।

उरुद्वये मत्तहस्तिकरदण्डसमप्रभे।
गंगावर्त्तगभीरे तु नाभौ सिद्धुविलोमतः।
उदरे वक्षसि तथा हारश्रीवत्सकौस्तुभे।
पूर्णचन्द्रयुतप्रस्थललाटे चारुकुंडले।
संखचक्रपद्माम्भोजदोर्द्दण्डपरिमण्डिते।
सहस्रादित्यसंकाशे किरीटकुण्डलद्वये।
स्थाने ध्येयु यजेन्मन्त्री विशुद्धः शुद्धचेतसा।
मनो निवेश्य श्रीकृष्णे वैष्णवो भवति ध्रुवम्।
इति वैष्णवमाख्यातं ध्यानं सत्वसुनिर्म्मलम्।
विष्णुभक्ताः प्रभजन्ति स्वाधिस्थाने मनःस्थिराः।
यावन्मनो लयं याति कृष्णे स्वात्मनि चिन्मये।
तावत् स्वाधिस्थानसिद्धिरिति योगार्थनिर्णयः।
तावज्जपेन्मनुं मन्त्री जपहोमं समभ्यसेत्।
ततः परं न किंचिच्च कत्यमस्ति मनोहरे।
विदितं परतत्वे तु समस्तनियमैरलम्।
तालवृन्तेन किं कार्यं लब्धे मलयमारुते।
मन्त्राभ्यासेन योगेन ज्ञानं ज्ञानाय कल्पते।
न योगेन विना मन्त्रो न मन्त्रेण विना हि सः।
द्वयोरभ्यासयोगो हि ब्रह्मसंसिद्धिकारणम्।

अत एव सदा कुर्य्यात ध्यानं योगं मनुं जपेत ।
तमः परिस्थिते गेहे घटोद्दीपेन दृश्यते ।
एवं मायावृतो बाला मनुना गोचरीकृतः ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ।
कृत्वा पापोद्भवैर्दुःखै मुच्यते नात्र संशयः ।
दुर्लभं विषयाशक्तैः सुलभं योगिनामपि ।
सुलभं न त्यजेद्विद्वान् यदि सिद्धिमिहेच्छति ।
ब्रह्मज्ञानं योगध्यानं मन्त्रजाप्यं क्रियादिकम् ।
यः करोति सदा भद्रो वीरभद्रो हि योगिराट् ।
भक्तिं कुर्यात सदा शम्भोः श्रीविद्यायाः परात्पराम् ।
योगसाधनकाले च केवला भावनादिभिः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
एतद्भक्तिप्रसादेन जीवन्मुक्तस्तु साधकः ।
योगिनां वल्लभो भूत्वा समाधिस्थो भवेद्यतिः ।

इति श्रीरुद्रजामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसंकेते सिद्धमन्त्रप्रकरणे मन्त्रयोगाधिकरणे भैरवीभैरवसंवादे सप्तविंशतिः पटलः ॥ ० ॥ २७ ॥

आनन्दभैरवउवाच

त्रैलोक्यपूजिते कान्ते इदानीं सिद्धिहेतवे ।
मन्त्रसिद्धिलक्षणं तु योगिनामपि दुर्लभम् ।
त्वन्मुखाम्भोरुहोल्लास निःसृतं परमामृतम् ।
पीत्वा चकार तन्त्राणि तत्र यन्त्राक्ति तद्वद ।

आनन्दभैरव्युवाच ।

निश्चयं ते प्रवक्ष्यामि आनन्दभैरवेश्वर ।
मन्त्रसिद्धिलक्षणं योगमार्गानुकालतः ।
नित्यं चेतसि सुस्थिरे स्थितिपथे क्लेशादिदोषक्षयम् ।
सर्व्वं चोत्तममन्त्रसिद्धिकलितं सलक्षणं शोभनम् ।
मृत्यूनां हरणं जगतपतिसती सन्दर्शनं चोत्तमम् ।
योगक्लेशविवर्द्धनं समुदया क्लेशप्रयोगेऽर्थभाक् ॥
नरेन्द्राणां काये प्रविशति हठात् क्षोभमतितं
पुरे तेषां मूर्द्धोत्क्रमण सचरस्थावरपुरे ।
अधश्छिद्रं पश्येत खचरवनिता मेलनमलम्
शृणोति प्रध्वानं जगति जगतां कीर्त्तिरतुला ॥
इतीह सिद्ध्यादिसुलक्षणेन प्रयाति वैकुण्ठपुरीं मनोरमाम् ।
हिताहितं पश्यति सोऽवनीभृतां जगद्विपक्षो निजपक्षमाश्रयेत ।
कीर्त्तिं भूषणमादिभक्तिसफला मुक्तिक्रियासंयुतो
देवानामतिभक्तियुक्तहृदयं सर्व्वक्रियादक्षता ।

343

त्रैलोक्यं निजदास्यकर्म्मनिपुणं जित्वा चिरं जीवति।
अस्त्रांगाम्यसनं जगद्वशकरं चैतन्यतामुत्तमम्।
भोगेच्छारहितं जगज्जनचमत्कारानुकम्पान्वितम्।
रोगाणां हरणं विरक्तहृदयं वैराग्यमुक्तिप्रियम्।
त्यागं संशमनं तथा समदयामायाबुजालस्य वा।
ऐश्वर्य्यं कवितारसं धनजनं लक्ष्मीगणं ज्ञापनम्।
उल्लासं हृदयाम्बुजे सुतधनं सन्माननं मंगलम्।
वाञ्छासागररत्नपूर्णमुचितं कान्तागणामोदितम्।
संकेतादिमनुप्रियं हरिहरब्रह्मैकभावान्वितम्।
लोकानां गुरुता निरन्तरशिवानन्दैकमुद्राधरम्।
एतदुक्तम्महादेवोत्तरतन्त्रनिरूपणम्।
मन्त्रसिद्धिलक्षणं तदुत्तमाधममध्यमम्।
मुनयो देवमुख्याश्च नित्यं जन्मनि जन्मनि।
दिव्यरूपं नरकुले धृत्वा तप्यन्ति चानिशम्।
तवैवापि ममैवापि तर्पणं होमभाजनम्।
सर्व्वदा कुरुते साधु तन्मनो भवति ध्रुवम्।
एतत्प्राणवायुपाने सूक्ष्मचन्द्रनियोजने।
कर्त्तव्यं प्रत्यहं कार्य्यं दिवारात्रौ मुहुर्मुहुः।
यद्येतत्कर्म्मसंकुर्य्यात् योगसाधनमुत्तमम्।

यः श्रीमान साधुसद्भक्ता दुष्टमंत्रोऽपि सिध्यति ।
तत्तद्दोषसमूहन्तु वदामि तत्वतः शृणु ।
छिन्नादिदोषदुष्टानां योगतत्वेन सिध्यति ।
देवेन्द्रशापदुष्टाच भुवनेशी सुसिद्धिदा ।
आराधिता महाविद्या वीर्य्यदर्पविवर्जिता ।
एकाक्षरी वीर्य्यहीना वाग्भवेन महोज्वला
तदैवध्युत्तमा देवी तारसंपुटहंसिनी ।
आविद्धा कामबीजेन विद्या कामेश्वरी परा ।
शरेण पीड़िता पूर्व्वं भुवनेश्यां प्रतिष्ठिता ।
या कुमारी महाविद्या मया शप्ता विबोधिता ।
तारा चन्द्रस्वरूपाहं शिवशक्त्या च केवलम् ।
भैरवीणां हि विद्यानां दोषजालं शृणु प्रभो ।
एतान् दोषान् प्रणाश्यन्ति योगमार्गानुसारिणः ।
यतः कुण्डलिनी देवी योगेन चेतनामुखी ।
ततो योगं सदा कुर्य्यात् स च मंत्रप्रसिद्धये ।
भैरवी विधिशप्ता च दग्धा च कीलिता तथा ।
सैव संहारकरणी मोहिता चानुमोहिता ।
महामदोन्मत्तचित्ता मूर्च्छिता वीर्य्यवर्जिता ।
स्तम्भिता मारिता छिन्ना रुद्धा रुद्धा च भ्रामिता ।

345

निर्बीजा शक्तिहीना च सुप्ता मत्ता च घूर्णिता ।
पराङ्मुखी नेत्रहीना त्रस्ता भीतालसंस्कृता ।
सुसुप्ता भेदिता प्रौढा बालिका मानिनी क्षमा ।
भयदा युवती क्रूरा दाम्भिका शोकसंकटा ।
निस्त्रिंशिका सिद्धिहीना कूटस्था मन्दबुद्धिदा ।
हीनकर्णा हीनवासा अतिक्रुद्धांगभंगुरा ।
कलहा कलहप्रीता बहुस्थाना क्षयाकुला ।
धर्मभ्रष्टा चातिवृद्धा विबाला सिद्धिनाशिनी ।
कृतवीर्य्या महाभीमा क्रोधपुंजा च ध्वंसिनी ।
कालविद्या सूक्ष्मधर्म्मा विधर्म्मा धर्म्ममोहिनी ।
दुर्गतिस्था छिन्नचित्ता प्रचण्डा चण्डगामिनी ।
उल्कावज्ज्वलिता दीना मन्दाहारा निरंशका ।
सत्वहीना केकरी च धूसिता सिद्धिवर्ज्जिता ।
अतिलुप्ता क्षुधार्त्ता च धूर्त्ता ध्यानस्थिता स्थिरा ।
एता विद्याः प्रसन्नाः स्युर्योगकालनिरोधनात् ।
वीरभावेन सिद्धिः स्यात् पुरश्चरणकर्म्मणा ।

आनन्दभैरव्युवाच ।

तत्र वीरो यजेत् कान्तां परकीयामथापि वा ।
स्वीयामलंकारयुतां सुन्दरीं चारुहासिनीम्

सदा मदन संतप्तामासवानन्द विग्रहाम ।
योगिनीं कौलिनीं योग्यां धर्मशीलां कुल प्रियाम् ।
दीक्षितां लोलवदनां वदनाम्भोजमोहनीम् ।
नानादेशस्थितां कन्यां युवतीं परिपूजयेत् ।
जापिकां मन्दहास्यां च मन्दमन्दगतिप्रियाम् ।
कृशांगीमतिसौन्दर्य्यामलंकृतकलेवराम् ।
कोटिकन्याप्रदानेन यत फलं लभते नरः ।
तत फलं लभते सद्यः कामिनी परिपूजनात् ।
ततः षोडशकन्याश्च योगिन्यो योगसिद्धये ।
पूजयेत परया भक्त्या तत पूजाविधिमाशृणु ।
विना देवीपूजनेन वीराचारक्रमं विना ।
न योगी संभवेत कुत्र सर्व्वत्र समभावकः ।
पुरश्चरणसिद्धौ च परयोषां मनोहराम् ।
पूजयेत परया भक्त्या वस्त्रालंकारभूषणैः ।
नानाविधैः पिष्टकान्नैः पक्वान्नैः प्राणसंभवैः ।
दधिदुग्धघृतैश्चापि नवनीतैः सशर्करैः ।
उपलाखंडमिश्रान्नैर्नानारसफलान्वितैः ।
चूतादिभिर्नारिकेलैः कपित्थैर्नागरङ्गकैः ।
नानारम्यफलैश्चैव नानागंधसमन्वितैः ।

मृगनाभिचन्दनाभ्यां श्रीखण्डैर्नवपल्लवैः।
पूजयेत्तां प्रयत्नेन जलजैः स्थलजैस्तथा।
नानासुगन्धिपुष्पैश्च रक्तचन्दनकुंकुमैः।
पूजयेत पुण्यगेहे च निर्ज्जने विपिने तथा।
कुलदेवीं समानीय स्वागतं प्रवदेदनु।
अर्घ्योदकेन संशोध्यामृतीकरणमाचरेत्।
शक्तिं चाभिमुखीं कृत्वा वीरो योगी भवेद्ध्रुवम्।
शक्तिं च षोड़शीं देवीं कुलचक्रप्रियां शुभाम्।
महाशक्तिं शृणु प्राणवल्लभ श्रीकलावतीम्।
ब्रह्मणी क्षत्रिया वैश्या शूद्रा वैश्या च सुन्दरी।
कुलभूषासमाक्रान्ता मालिनी नापितांगना।
रजकी नटकी कौला श्यामाङ्गी स्थलविग्रहा।
संकेतागमना भार्य्या विदग्धा रंजकी तथा।
खटकी कौलकन्या च कुलमार्गानुवर्त्तिका।
सर्व्वांगसुन्दरी भव्या चारुनेत्रा हसन्मुखी।
यद्यदीक्षाव्रतास्तास्तु देया दीक्षा तदा प्रभो।
सूक्ष्मतन्त्रानुसारेण कथितं पूर्व्वसूचितम्।
सर्व्वांगसुन्दरी मुग्धा शुद्धलोककुलोद्भवा।
युवतिर्योगनिरता सा देवी डाकिनीमता।

348

तामानीय महामन्त्रं दापयेदिष्टसिद्धये।
आनन्दभैरवीजं देवीं शक्तिं स्वबीजकम्।
अथवा सिद्धमंत्रंच श्रीविद्यायाः प्रदापयेत्।
ताश्च आदौ ततो मृत्युंजयमन्त्रस्ततश्च मे।
श्रीकृष्णरामनन्त्रं तु दापयेत् सत्वसिद्धये।
ततस्ताः पूजनीयास्तु दीक्षाहीनासु नाचरेत्।
किंवा केवलमायां तु कोट्यादित्यकराकृतिम्।
ज्वलन्तीं मूलपद्मे तु स्वयम्भुकुसुमाकराम्।
एवंभूतां महामायां तस्यै दत्वा जयी भवेत्।
आदौ वामकर्णपुटे युग्मवारं परे त्रयम्।
ततः शिक्षां सदानन्द दीक्षान्ते कारयेद्बुधः।
दीक्षामूलं जपं सर्वं दीक्षामूलं गुरोः कृपा।
दीक्षामाश्रित्य मायायां जपेत् सा खेचरी परा।
तस्याः पूजनमात्रेण प्रसन्नाहं न संशयः।
जगतां जगदीशानां नारीरूपेण संस्थितिः।
अहं नारी न सन्देहः सुन्दरी कुतसितापरा।
सुन्दरीपालनार्थाय विनाशाय सुकुत्सिता।
साधकस्य भ्रान्तिरूपा सहिता परिभावयेत्।
या परा मोक्षदा विद्या सुन्दरी कामरूपिणी।

भाविनी सा भवानी च तां विद्यां परिपूजयेत्।
तस्या अङ्गे स्थिता नित्या देवता याऽहं प्रभो।
यस्य योगी सर्व्वसमः सर्व्वात्मा चालयेत् किल।
अन्यथा सिद्धिहानिः स्यात् भावाभाव विचारणात्।
विना भावं न सिध्येत्तु वीराणां भावराशिगः।
कुलपुरश्चरणं कुर्य्यात् कुलदेव विमुक्तये।
योगी स्यादव्ययो धीरो विद्युन्मुक्तो हि जीवने।
ब्राह्मणीं सुन्दरीं सिद्धां नवयौवनशालिनीम्।
आनीय दद्याद्दीक्षान्तु तस्मै तत्कर्म्मचाष्टगाः।
कुलमार्गानुसारेण वक्तव्यं त्रिदशेश्वर।
अत्यद्भुतो भवेन्मन्त्री पुरश्चरणकर्म्मणि।
एता अष्टौ महाशक्तीः संस्थाप्य क्रमतो भजेत्।
वामहस्ते महार्घ्यं तु दक्षिणे आसनादिकम्।
दद्यात्ताभ्य आसनानि तत्तन्नाम्नाच स्वागतम्।
तत्तदा अर्घ्यपाद्य स्वजलेन प्रोक्षयेच्च ताः।
धेनुमुद्रां समाकृत्य वंमन्त्रेणामृतीक्रियाम्।
अमृतीकरणं त्वेतत् रूप भेदं समानयेत्।
संज्ञाभिर्नामकरणं कृत्वाचासनमर्पयेत्।

श्रीभैरव्युवाच

अथ कान्त प्रवक्ष्यामि षट्चक्रभेदनक्रियाम्।
यत् कृत्वा अमरा लोके विचरन्ति चराचरे।
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
योगेन जीववर्गाश्च भवन्त्यमररूपिणः।
षट्चक्रे च महापद्मे सर्व्वसत्वगुणान्विते।
धर्म्माधर्म्ममनोवाह्ये सर्व्वविद्यानिधौ कृतौ।
कलिकल्मषमोहानां सर्व्वपापापहारके।
मनो दत्वा महाकाल जीवाः सर्व्वत्रगामिनः।
एतत् श्रुत्वा महावीरो विवेकी परमार्थवित्।
पुनर्जिज्ञासयामास ज्ञानज्ञेयेन शंकरः।

आनन्दभैरव उवाच

षट्चक्रभेदनकथां कथयस्व वरानने।
हिताय सर्व्वजन्तूनां हिरण्यवर्णमण्डितम्।
प्रकाशयाद्यवरदे योगानामुदयं वद।
येन योगेन वीराणां हितार्थं वाञ्छितं मया।
कालक्रमेण सिद्धिः स्यात् कालज्ञानविनाशनात्।
कालमानेन हेतुश्च पूर्व्वकज्जपनं कृतम्।

आनन्दभैरवी उवाच।

आदौ कुर्य्यात् परानन्दं रससागरसंभवम्।

351

मान्यं मन्त्रगुणोपेतं शृणु तत्क्रममुत्तमम् ।
स्तोत्रं कुर्य्यात् मूलपद्मे कुण्डलिन्याः पुरस्क्रियाम् ।
पुरश्चरणकाले तु जपान्ते नित्यकर्म्मणि ।
काम्यकर्म्मणि धर्म्मेषु तथैकधर्म्मकर्म्मसु ।
गुरुतद्गुरुनिलयेषु भक्तिमाहत्य संपठेत् ।
ओं नमो गुरवे । ओं नमो सर्व्वस्वपरदेवतायै । ओं नमः सर्व्वधर्म्म-
स्वरूपायै । ओं नमः सर्व्वज्ञानस्वरूपायै । ओं नमो भवविभायै ।
ओं दक्षयज्ञविनाशिन्यै । ओं नमो भद्रकाल्यै । ओं कपालिन्यै ।
ओं उमायै । ओं माहेश्वर्य्यै । ओं सर्व्वसंकटतारिण्यै महादेव्यै
नमोनमः ॥

ओं मायामयदानवक्षयकरी शक्तिः क्षमा कर्त्तृका
शुम्भ-श्रीमहिषासुरादिदलहा प्राणोत्थचण्डापहा ।
भद्रार्द्रा रुधिरप्रिया प्रियकरी
चामुण्डरणरक्तबीजदमनी ज्योत्स्नामुखीश्रीवरा ॥
या जाया जयदायिनी गृहिणी भीत्यापहा भैरवी ।
नित्या सा परिदत्तगणं कुरु शिवा सारस्वतोत्पत्तये ।
सा मे पातु कलेवरस्य विषयज्ञानेन्द्रियाणां बलम्
वक्त्रः स्थायिनमुल्वणोज्ज्वलशिखाकारादिजीवांशिता ।
कृत्वा योगकुलान्वितं स्वभवने नित्यं मनोरंजनम् ।

नित्यं संयमतत्परं परतरे भक्तिक्रियानिर्म्मलम् ।
प्राप्तो वल्लरणाज्य श्रीशचरणाम्भोजे सदा भावनम् ।
विद्यार्थप्रियदर्शनं त्रिजगतां संयम्य योगी भवेत् ॥ १॥
आकांक्षापरिवर्ज्जितं निजगुरोः सेवापरं पावनम् ।
प्रेमाह्लादकथामृतं जटिलताहिंसापमानाप्रियम् ।
कान्तिक्षेमफलाफलं फलशतं मायाविहीनं कुलम् ।
कौलानामपि साधनं तमिह हे संप्राप्यहं सर्व्वदा । २॥
मिथ्यावाग्रहितं स्वधर्म्मनिरतं नित्योक्तिभक्तिप्रियम् ।
कालक्षेपणादोषजालरहितं शक्तिं सुभक्तिं यातम् ।
श्रीशक्तिप्रियवल्लभं सुरुचिरं ज्ञानान्तरं माननम्
मालासूत्रसुसूक्ष्मबन्धनिलयं सल्लक्षणांसादिगम् ॥ ३॥
नानाकारविकारसारसरणं साकारब्रह्मार्पणम् ।
नित्या सा जडितं महान्तमखिलं योगाकुलं ज्ञाननम् ।
तं वन्दे पुरुषोत्तमं त्रिजगतामंशाङ्गहंसं परम् ।
मायाङ्के प्रतिभाति चारुनयनाह्लादैकवीजं विधिम् ॥ ४॥
कलीलानि कुलाकुलासमतुलाकालानिवाहानना ।
हालाहेलनकलकेलिकालिकाकेयूरहारामला ।
सर्व्वाङ्गं मम पातु पीतवसना शीघ्रासनावासना
मावामानलवाहना सुगहना सम्मानना धारणा ॥ ५॥

खंखंखं खखचराचराकुलचराचाचराखेचरा
चंचंचं चमरीहरी भगवती गाथागता संगतिः।
वा हौ मे परिपातु पंकजमुखी या चण्डमुण्डापहा
कंकंकं कमलाकला गतिफला फुत्कारफेत्कारकला॥
पंपंपं परमा रमा जयगमाव्या सङ्गमाजंगमा
तंतंतं तिमिरकरुणा सकरुणा सा तारिणी तारिणी।
भंभंभं भयहारिणी प्रियकरी सा मे भवलन्तरा
भ्रंभ्रंभ्रं भ्रमरभ्रमभ्रमरा गतिपथस्थाता रसानन्दिता॥
मंमंमं मलिनं हिंसा हयगता हन्त्री रिपूणां हिता
भक्तानां भयहारिणी रणमुखे शत्रोः कुलाग्निस्थिता।
सासासा भवतु प्रभा पटलपाटलाङ्घ्रियुग्मोज्ज्वला।
गंगंगं गुरुरूपिणी गणपतेरानन्दपत्न्योत्तमा॥
तरासारसरोरुहारुणकलाकोटिप्रभा चंचला
नेत्रं पातु महेश्वरः शिवपथे कोट्यायुतार्कप्रभा।
तुण्डं मुण्डविभूषणा नरशिरोमालाविलोला समा
योगेशी शशिशेखरोल्वणा कथालापोदया भाविनी॥
शीर्षं पातु ललाटकर्णयुगलानन्तस्ततः सर्व्वदा
मुण्डं मे रुणशिखास्थिताव्यवतु मे गण्डस्थलं मैथिली।
ओष्ठं चाष्टसयष्टिकाधारतलं धात्रीधराधारिणी

354

नासान्तर्द्वयगह्वरं स्फुटतरा नेत्रत्रयं भाविनी ॥ १०

केशान् कुन्तलकालिका सुकपिला कैलासशैलासना
कंकालामृतमालिका सुरसना दन्तावलिं दैत्यहा ।
वाक्यं मन्त्रमनन्तशास्त्रतरणी संज्ञावचस्स्वामिनी
हंहंहं नवहारयोवरसना संचारिणी पातु मे ॥ ११ ॥

शत्रूणां हरणं करोतु नियतं मे चण्डमुण्डापहा
भीमा सन्ततहेतुहन्तृ तपना संवर्द्धनं वर्द्धिनी ।
मन्दारप्रियगन्धविभ्रमविदिग्दिग्दण्डमोहान्तरा ।
श्यामा पातु पतङ्गकोटिनिनदा हुङ्कारवं कारिणी ॥ १२

आनन्दोतसवरागयागजयदा सर्व्वत्र सा रक्षिका
क्लीं क्लीं क्लीं कठिनाद्रवाद्भयकरी सर्व्वांगदोषं हरा ।
देहादेः कुचकाकहाटकचमत्कारारिहा पूजिता
घंघंघं घटघर्घरा विघटिताजायापतिः पातु मे ॥ १३ ॥

कल्पाकल्पकुलाल्पकल्पलतिका सर्व्वत्र मे विग्रहं
नित्या प्रावति कालिका मम कुलं लङ्कातटाच्छादिनी ।
नंनंनं नयनाननासुकमलामालाकिलीलक्षणा ।
दद्यात् पृष्ठतलं मुदा मम धनं सा पातु मुद्रामयी ॥ १४

मोहं पातु करालकालरजकीं या रंजकी कौतुकी
कन्यानाथपतपुत्रिका शशिमुखी सूक्ष्मा मम प्राणगम् ।

मन्त्राराप्रियमायया ममामयग्रन्थामहन्मारिडता
पूज्या योगिभिरुतसुखी भगवती मूलस्थितासतक्रियाम।
मत्तापातु पतिव्रता मम गृहं धर्मं ममाश्रेयसम्।
धर्माम्भोरुहमध्यदेशनिकरे काली महायोगिनी।
मन्त्रानाम तिदर्पहा हराशिरो माला कला केवला
मे गुह्यं जयमेव लिंगमपि मे मूलाम्बुजं पातु माम।
या कन्या हिमपर्वतस्य भयहा पायान्नितम्बस्थलम
सर्वेषां हृदयोदयाननाशिखा शक्तिर्मनोरूपिणी।
मे भक्तिं परिपातु कामकुशला लक्ष्मीप्रिया मे प्रभो
गौरी गौरवकारिणी भुवि महामाया महामोहिनी।
वंवंवंवरवारुणी सुमदिरा मे पातु नित्यं कटिं
क्रूरा सा रविचन्द्रवह्निरहिता स्वेच्छामयी मे मुखम।
कालाद्वेषरादोषजालरहितं शाक्तं सुभक्तियति
श्रीशक्तिप्रियवल्लभं सुरुचिरह्नानानन्दारं मालिनम।
एतत्स्तोत्रं पठेद्यस्तु सर्वकाले च सर्वदा।
स भवेत कालयोगेन्द्रो महाविद्यानिधिर्भवेत।
मूलपद्मारा धनेच मूलप्रकृति साधने।
निज मन्त्राराधनेच घोरसंकटकालके।
आपदस्तस्य नश्यान्ति अन्धकारं यथा रविः।

प० २९

सर्वकाले सर्व्वदेशे महापातकघातकः।
स भवेद्योगिनीपुत्रः कलिकाले न संशयः॥ ७॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे कुद्धवासिनीस्तोत्रं नाम अष्टाविंशतिः पटलः।

आनन्दभैरव्युवाच।

अथ षट्चक्रयोगं च प्रवक्ष्यामीह तत्त्वतः।
कुण्डलिनीयोगविधिं कृत्वा योगी भवेन्नरः।
मूलादिब्रह्मरन्ध्रान्तं षट्चक्रभेदनं मतम्।
षट्चक्रे योगशास्त्राणि विविधानि वसन्ति हि।
यो जानातीह षट्चक्रं स सर्व्वशास्त्रविद्भवेत्।
चतुर्द्दलं मूलपद्मं वादिसान्तार्णसंभवम्।
हिरण्यवर्णममलं ध्यायेद्योगी पुनः पुनः।
निर्जने विपिने शून्ये पशुपक्षिगणान्विते।
निर्भये सुन्दरे देशे दुर्भिक्षादिविवर्ज्जिते।
कृत्वा दृढ़ासनं मन्त्री योगमार्गपरो भवेत्।
तदा योगी भवेत् क्षिप्रं मम शास्त्रानुसारतः।
पूर्व्वे दले वकारं च ध्यायेद्योगी सदा सुखी।
सुवर्णवर्णं हितकारिणां नृणां सत्वोद्भवं पूर्व्वदलास्थितं सुखम्।
सत्वाश्रयं वारुणमत्तमन्दिरं मन्त्रात्मकं शीतलरूपधारिणम्॥

357

योगानुभावाश्रयकालमन्दिरं तेजोमयं सिद्धिसम्राद्धिदं गुरुम् ।
आद्यान्तरं चावरभावसाधनं वाद्याभावनपंचचूडम् ।
ध्यायेत प्राकारं कनकाचलप्रभं गौरीपतेः श्रीकरणं पुराणाम् ।
लक्ष्मीप्रियं सर्व्वसुवर्णवेष्टितं सदामुदा दक्षिणपत्रपावनम् । प्रा
णमीश्वरीषट्कं गुणावतंसं षट्पद्मसंभेदनकारकं परम् ।
परापरस्थाननिवासिनं गुरुं हेमाचलक्षुत्रमहं भजामि । र
सकारमानन्दरसाप्रियं प्रियं ध्यायेन्महाहाटकपर्व्वतोग्रम् ।
ध्यायेत मुदाहं धननाथमन्दिरे मायामहामोहविनाशनं जयम् । स
चतुर्भुजं भुजयुगमष्टादशभुजं तथा ।
अष्टवक्त्रं सदा ध्यायेत मन्त्री भावविशुद्धये ।
ततो ध्यायेतकाशीकायामध्यदेशे मनोरमम् ।
स्वयम्भुलिंगं परमं योगिनां योगसिद्धिदम् ।
प्रातः सूर्यसमप्रख्यं तड़ितकोटिसमप्रभम् ।
तं संवेष्ट्य महादेवी कुण्डली योगदायिनी ।
सार्द्ध त्रिवेष्टनग्रन्थि युक्ता सा मुक्तदायिनी ।
निन्द्रिता सा सदा भद्रा महापातकघातिनी ।
निरन्तरं तस्य शीर्षे विभाति श्वासधारिणी ।
तच्छ्वासधारिणी नित्या जगतां प्राणधारिणी ।
सुप्ता सर्पसमा भाति यथार्कशतकोटयः ।

यदा लिंगं साविहाय प्रगच्छति महापथे।
तदा सिद्धो भवेद्योगी ध्यानधारणाकृतस्तुचिः।
सदानन्दमयो नित्यश्चैतन्या कुण्डली यदा।
सुसुम्ना नाड़िकामध्ये महासूक्ष्मानिले स्थितः।
मनो निधाय योगीश श्वासमार्गपदो भवेत्।
तदा सा भवति क्षिप्रं चैतन्या कुण्डली भवेत्।
पृष्ठदेशे महादण्डे मेरुमूले महाप्रभो।
मूलादिब्रह्मरन्ध्राधः सदास्थि रूपधारकः।
कनकाचलनाम्ना च प्रतिभाति जगत्त्रये।
तन्मध्ये परमा सूक्ष्मा सुसुम्ना वहुरूपिणी।
मनोन्मयी स्वरूपा च मनश्चैतन्यकारिणी।
तन्मध्ये भाति वज्राख्या घोरपातकघातिनी।
सिद्धिदा भावविज्ञानां मोददा कुलरूपिणां।
तन्मध्ये चित्रिणी देवी देवताप्रीतिवर्द्धनी।
तेजस्विनी महामाया कालजालविनाशिनी।
सा पाति सकलान् चक्रान् पद्मरूपधरान् परान्।
त्रैलोक्यमण्डलगता साक्षादसद्विग्रहा।
स्वयं दधार सा देवी चित्राख्या चारुतैजसी।
तले पृष्ठे मूलदेशे शीर्षे वज्रासनाभिधु।

359

करालरूपे चक्रमध्ये ब्रह्माण्डं पाति सर्व्वदा ।
शरीरात्मकमीशार्थं त्रैलोक्यं सचराचरम् ।
चित्राख्या ग्रथनं पद्मं यो विभावयति भावकः ।
भावेन लभ्यते योगं भावेन लभ्यते शिवः ।
भावेन शक्तिमाप्नोति तस्माद्भावं समाश्रयेत् ।
षट्चक्रभावनां कृत्वा महायोगी भवेन्नरः ।
सर्व्वधर्म्मान्वितो भूत्वा राजते क्षिति मण्डले ।
सर्व्वत्रगामी स भवेत् यदि पद्मे मनोलयम् ।
पद्मभावनमात्रेण आकाशसदृशो भवेत् ।
महापद्मे मनो दत्वा महाभक्तो भवेद्ध्रुवम् ।
यदि भक्तो भवेन्नाथ तथा मुक्तो न संशयः ।
यदि मुक्तो मही मध्ये ध्यानयोगपरायणः ।
तदा कालवशं कृत्वा सर्व्वदर्शी च सर्व्ववित् ।
सर्व्वज्ञः सर्व्वतो भद्रो भवतीति न संशयः ।
चित्रिणी मध्यदेशे च ब्रह्मनाड़ी महाप्रभा ।
सर्व्वसिद्धिप्रदा नित्या सा देवी सकलाकला ।
कोषरूपा भगवती सर्व्वचैतन्यरूपिणी ।
एकं रूपं परं ब्रह्म ब्रह्मातीतं जगत्त्रयम् ।
यदा जगल्लयं ब्रह्म तदा महालयं प्रभो ।

महालये मनोदत्वा सर्व्वकाले जयी भवेत ।
मृत्युञ्जयी महावीरो महादेवो महागतिः ।
सर्व्वव्यापकरूपेण ईश्वरत्वेन भाव्यते ।
सर्व्वदा सत्वसम्भूतो विशालाक्षः प्रसन्नधीः ।
एकस्थानस्थितो याति नकुत्र सहि शंकर ।
एकदृष्टिः क्षुधालक्षणा रहितो वाक्यवर्ज्जितः ।
निराकारे मनो दद्यात तदा महालयं प्रभो ।
किन्तु नाथ ज्ञानिनां हि नापि कुत्र महालयः ।
महाप्रलय एवं हि योगिनां हि न संशयः ।
यदा मनो योग विशुद्धये मनोलयं यः कुरुतेऽप्यहर्निशम् ।
स एव मोक्षी सुधासिन्धुरूपी कालाग्निरूपी निजदेव दैवतः ।
महामनोयोग विकारवर्ज्जितो कामाक्रियाकारणसुकारणस्थितः ।
हितो गतीनामतिमान्निवस्तो महालयस्थोऽमर एव भक्तः ।
मानीविचारार्थ विवेकचिन्ताः चातुर्य्यचित्तोल्वणताविवर्ज्जितः ।
योगी भवेत साधकचक्रवर्त्ती व्योमाम्बुजे चित्तविवर्ज्जनं सदा ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे महाप्रलयनिर्णयो नाम ऊनत्रिंशत्-पटलः ॥०॥२९ ॥०

आनन्दभैरव्युवाच

अथ वक्ष्ये महाकाल मूलपद्म विवेचनम ।
यत कृत्वा अमरो भूत्वा वसेत कालचतुष्टयम ।
अथ षट्चक्रभेदार्थे भेदिनीं शक्तिमाप्नुयात ।
छेदिनीं सर्वग्रन्थीनां योगिनां समुपाश्रयेत ।
तस्या मन्त्रान् प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।
आदौ शृणु महामन्त्रं भेदिन्याः प्रवरं मनुम ।
आकालीं समुपोद्धृत्य ब्रह्ममन्त्रं ततः परम ।
देव्याः प्रणवमुद्धृत्य भेदिनी तदनन्तरम ।
ततो हि मम ग्रंथीनां द्रावयद्वयमेव च ।
चित्तचंचल शब्दान्ते मां रक्ष युग्ममेव च ।
भेदिनि मम शब्दान्ते अकालमरणं हर ।
हरयुग्मं महापापं नमो नमोऽग्निजायया ।
एतन्मन्त्रं जपेत्तत्र डाकिनी रक्षसि प्रभो ।
आदौ प्रणवमुद्धृत्य ब्रह्ममन्त्रं ततः परम ।
समुद्धर ततश्चोक्त्वा आह्वनीति पदं ततः ।
मनो निवेशनं कुरु मे भावयेति द्वियं परम ।
छेदिनीं पदमुद्धृत्य मम मानस शब्दतः ।
महान्धकारमुद्धृत्य छेदयेति द्विधापदम ।

स्वाहान्तं मनुमुद्धृत्य जपेन्मूलाम्बुजे सुधीः।
एतन्मन्त्रप्रसादेन जीवन्मुक्तो भवेन्नरः।
तथा श्रीयोगिनीमंत्रं जपेत्तत्रैव शंकर।
ओं योगरूपे पदं चैव सर्व्वव्यापिनि शंकर।
महायोगिनि मे पापं शोकं रोगं हरेति च।
विपक्षं छेदये द्वा योगं मध्यर्पयेद्वयम्।
स्वाहान्तं मनुमुद्धृत्य जपेद्योगी भवेन्नरः।
खेचरत्वं समाप्नोति योगाभ्यासेन योगिराट्।
डाकिनीं ब्रह्मणा युक्तां मूले ध्यात्वा पुनः पुनः।
जपेन्मन्त्रं सदा योगी ब्रह्ममन्त्रेण योगवित्।
ब्रह्ममन्त्रं प्रवक्ष्यामि तज्जपेनापि योगिराट्।
ब्रह्ममंत्रप्रसादेन जडो योगी न संशयः।
प्रणवत्रयमुद्धृत्य दीर्घप्रणवयुग्मकम्।
तदन्ते प्रणवत्रीणि ब्रह्मब्रह्मत्रयं त्रयम्।
सर्व्वसिद्धिपदस्यान्ते पालयेति च मां पदम्।
सत्वगुणो रक्ष रक्ष माया स्वाहापदं जपेत्।
डाकिनीमन्त्रराजं च शृणुष्व परमेश्वर।
यज्ज्ञात्वा डाकिनी वश्या त्रैलोक्यस्थितपालकः।
यो जपेत डाकिनीमन्त्रं चैतन्या कुण्डली भवेत्।

363

अनायासेन सिद्धिः स्यात् परमात्मप्रदर्शनम् ।
मायात्रयं समुद्धृत्य प्रणवैकं ततः परम् ।
डाकिन्यन्ते तु हे देवि डाकिन्यनुपदं ततः ।
पुनः प्रणवमुद्धृत्य मायात्रयं ततः परम् ।
मम योगसिद्धिमन्तो साधयेति द्विधापदम् ।
स्वाहान्तं मनुमुद्धृत्य जपेद्योगी भवेज्जडः ।
जप्त्वा संपूजयेन्मन्त्री पुरश्चरणसिद्धये ।
सर्वत्रविल्वमान्येन द्रव्यादिविविधेन च ।
पूजयित्वा मूलपद्मे चित्तोपकरणेन च ।
ततो मानसजापं च स्तोत्रं च कलिपावनम् ।
पठित्वा योगिराड् भूत्वा वसेत् षट्चक्रवेश्मनि ।
शक्तियुक्तं विधिं यस्तु स्तौति नित्यं महेश्वर ।
अस्यैव पालनार्थाय मम जन्म महीतले ।
तत्स्तोत्रं शृणु योगार्थं सावधानावधारय ।
एतत् स्तोत्रप्रसादेन महाकालो वशी भवेत् ।
ब्रह्माणं हंसहंसाद्ययुतशतवदावाहनं वेदवक्त्रम्
विद्यादानैकहेतुं तिमिरहननयनाग्नीन्दुफुल्लारविन्दम् ।
वागीशं वाग्मतिस्थं मतिमतविमलं वालकं चाकवर्णम्
डाकिन्यालिंगितं तं सुरनरजगती भावयेन्मूलपद्मम् ॥

नित्यं ब्रह्मपरायणां त्रिनयनां ध्यायेन्मुदा डाकिनीं
रक्तां गन्धविमोहिनीं कुलपथज्ञानाकुला ज्ञानिनाम् ।
मूलाम्भोरुहमध्यदेशनिकटे भूवि मध्ये प्रभाम्
हेतुस्थां गतिमोहिनीं श्रुतिभुजां विद्यां भवाह्लादिनीम् ॥

विद्यां वाग्भवमायया गलतलप्रारम्भशोभाकराम्
ध्यात्वा मूलनिकेतने निजकुले यः स्तौति भक्त्या सुधीः ।
नानाकारविकारसारकरणात् कर्त्रीं विधौ योगिनीम्
मुख्यां मुख्यजनान्वितां स्थितिमतीं सत्वाश्रितामाश्रये ॥

सा देवी नवडाकिनी सुरमणी विज्ञानिनी मोहिनी ।
मां पातु प्रियकामिनी भवविधेरानन्दसिन्धूद्भवा ।
तन्मूलं गुणभाषिणी प्रचयतु श्रीकीर्तिचक्रं हि माम्
नित्यं सिद्धगुणोदया सुरदया श्रीसंज्ञया मोहिता ॥

तन्मध्ये परमा कला कुलफला रत्नप्रकाशाकरा ।
वाकारा प्रायसादृशा शशियदा लोलामला कोमला ।
सा माता नवमालिनी मम कुलं मूलाम्बुजं सर्वदा ।
सा देवी डकडाकिनी कलिकुलोल्ला सैकवीजान्तरा ॥

धात्री धैर्य्यवती सती मधुमती विद्यावती भारती
कल्याणी कुलकन्यका धरणिरूपा सा हि सौख्यास्पदा ।
मोक्षस्था स्थितिपूजिता स्थितिगता माता शुभा योगिनाम् ॥

365

नौमि श्रीभविकाशयां शमगां गीतोद्धृतां गोपनां
कल्केशीं कुलपण्डितां कुलपथग्रन्थिक्रियाच्छेदिनीम् ।
नित्यं सा गुणमण्डितां प्रचपलामालाशतार्काकृणां
विद्यां चण्डगुणोदयां समुदयां त्रैलोक्यरक्षाद्गराम् ॥
ब्रह्मज्ञाननिवासिनीं सितशुभानन्दैकबीजोद्भुतां
गीतार्थानुभवप्रियां सकलसिद्धान्तप्रभापाटलाम् ।
कामाख्यां प्रभजामि जापनिलयां हेतुप्रियां सत्क्रियां
सिद्धां साधनतत्परां परतरां साकाररूपार्पिताम् ॥
ब्रह्मज्ञानं निदानं गुणविधिनयनाकारणानन्दयानं
ब्रह्माणं ब्रह्मबीजं रजनिजयजनं यागकार्य्यानुरागम् ।
शोकातीतं विनीतं नतजनवचनं सर्व्वविद्याविधिज्ञं
साधात्सारतरं सकलतिमिरहं हंसगं पूरयामि ॥
सततसम्बन्धमार्गं नवनववदनं वेदवेदांगविज्ञं
मूलाम्भोजप्रकाशं तरुणरविशशिप्रोल्वणाकारसारम् ।
भावाख्यं भावसिन्धुं जयजयदविधिध्यानगम्यं पुराणम्
पारास्यं पारणाख्यं परजनजनितं ब्रह्मरूपं भजामि ॥
डाकिनीसहितं ब्रह्मध्यानं कृत्वा पठेत् स्तवम् ।
पठनाद्धारणान्मन्त्री योगिनीसंगतिर्भवेत् ।
सततपठनमात्रेण महापातकनाशनम् ।

एकरूपं पश्यतीह सजनः परमो भवेत ।
बालरूपं सदा ध्येयं ब्रह्माणं तेजसाह्वलम ।
डाकिनीशक्तिसहितं परमात्मानमीश्वरम ।
चतुर्मुखं महाकायं वनमालाविभूषितम ।
नवीनं नवरूपाढ्यं लोकानामभिलाषदम ।
चतुर्भुजां महाहंसगामिनीं नित्ययोगिनीम ।
स्रष्टारं भावुकं भव्यं भगमालावृतं विभुम ।
कोटिसूर्यप्रतिकाशं कुण्डलीशक्तिदेवकम ।
पृथिवीशक्तिवीजांग विशालनयनाम्बुजम ।
एवं ध्यात्वा पठेत स्तोत्रं पठनाद्योगिराड भवेत ॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमंत्रप्रकरणे षटचक्रसिद्धसाधने भैरवीभैरवसंवादे डाकिनीब्रह्मस्तोत्रं नाम त्रिंशत पटलः ॥ ३० ॥

आनन्दभैरव्युवाच ।

अथ नाथ प्रवक्ष्यामि भेदिन्याः साधनं परम ।
येन साधनमात्रेण योगी स्यात कालजालहृः ।
कालिकाले महायोगं साधयत्वं महाप्रभो ।
यदि नः साधितः कालः सकालो देहभक्षकः ।
भेदिनीसाधनेनैव ग्रन्थीनां भेदनं भवेत ।

डाकिनीं हृदये ध्यायेत परमानन्दरूपिणीम् ।
अष्टहस्तां विशालाक्षीं शशांकावयवांगिनीम् ।
त्रैलोक्यमोहिनीं विद्यां भयदां वरदां सताम् ।
शुक्लवर्णां त्रिनयनां चारुरूपां मनोहराम् ।
ध्यात्वा मूलाम्बुजे योगी पाद्याद्यैः परिपूजयेत् ।
तत्र मनोलयं कृत्वा योगी भवति भूतले ।
यदा मनोलयं याति तदा तस्यास्तवं पठेत ।
स्तोत्रपठनमात्रेण सर्व्वसत्वाश्रितो भवेत ।
ध्यानमाहृत्य प्रपठेत सर्व्वसिद्धिमयो भवेत ।
या मेदिनी सकलग्रंथिविनाशनानां
कर्म्मान्तरे प्रबलशत्रुविनाशनस्था ।
सा मे सदा प्रतिदिनं परिपातु देहं
कालात्मिका भगवती शुभकार्य्यकर्त्री ॥
या कान्ता करुणामयी त्रिजगतामानन्दसिद्धिस्थिता
स्त्रित्याशा परिपालिका कुलकलानीलानना कोमला ।
बाला सिद्धिकरी कृतार्थनिगड़े शीघ्रोदया शांकरी
संज्ञाभेदनभेदिका सुखदा वेदान्तसिद्धान्तदा ॥
वाणी बालाकुलाला कनकनखवरा जामला शंखमाला
हेलामालान्तराला कुलकमलचला चंचलादेहकामा ।

भेदाख्या भेद्यभेदा विमलदनिनदा नादबिन्दुप्रकाशा
सा मे शीर्षं ललाटं मुखहृदयकटिं मूलपद्मं प्रपायात ॥
कांचीपीठप्रकाशा निजपदविलया योगिनीनेत्ररक्षा
नेत्रे योगप्रकाश्या चक्रशतघटिता घोरसंहारकारा ।
ब्रह्मानन्दस्वरूपा विगतमतिहरा हीरकाभा त्रिनेत्रा
हारश्रेण्यादिभूषा शशिशतकिरणा पातु मां भेद्यदेहे ॥
या भेदिनी सकलपापरिपुप्रयाणां
स्वर्गापवर्गविमला वगलामुखी सा ।
मे पातु देहघटितं सकलेन्द्रियार्थं
भावं प्रभापटलसारगुहं गुहस्था ॥
कामाश्रिता विविधदोषविनाशकर्त्री
सौन्दर्य्यवेशकरणी क्रतुकर्म्मदक्षा ।
दीक्षा सतां मतिमतां निजयोगदात्री
सा मे सदा सकलदेह मीहाम्ब भेद्या ॥
कान्ता शान्ता गुणोदया मम धनं देहस्य नित्याशया
पायात श्रीकुलदैवतस्य जयदा सा योगसारं परम ।
साक्षादीश्वरपूजिता समुचिता चित्तार्थिता प्रार्थिता-
रण्ये घोरतरेऽजने निजकुले कालाकुले व्याकुले ॥
भेदाभेदविवर्ज्जिता सुरवरश्रीहस्तपद्मार्चिता

मे मेढ्रं खलु लिंगमूलकमलं कालप्रिया पातु माम् ।
सप्तस्वर्गतलं ममैव वपुषो मिथ्यापमानापहा
हेरम्बासुरसुन्दरप्रियवती हेमावती भारती ॥
एतत् स्तोत्रं पठित्वा यः स्तौति मूलाम्बुजे च माम् ।
स एव योगमाप्नोति स भवेद्योगिवल्लभः ।
मनः स्थिरो भवेत् क्षिप्रं राजत्वं लभते क्वचित् ।
अनायासेन सिद्धिः स्यात् तस्य वायुवशो भवेत् ।
योगिनीनां दर्शनं हि अनायासेन लभ्यते ।
भावसिद्धियुतो भूत्वा विचरेदमरो यथा ।
मूलपद्मे वसेद्देवी मूलाम्भोजप्रकाशिनी ।
मालती मालवी माला मालिनी मालसंस्थिता ।
माणिमन्त्रिमनःक्षेत्र मारणामरणापहा ।
मलहा मंगलामाला मीनस्था मांसमोहिनी ।
मदिराष्टादशभुजा मेध्यामेयमनोहरा ।
मानसी मदनामुद्रा माल्या मैथुनतत्परा ।
मेकस्थामाघ्यकुसुमैर्मण्डिता च मलप्रिया ।
मनःस्थैर्यकरी देवी भाव्यते यैः कुमारकैः ।
अकस्मात् सिद्धिमाप्नोति कालेन परमेश्वर ।
अथ वक्ष्ये महादेव्याः षट्दिव्यास्तवमुत्तमम् ।

370

छेत्तारं सर्व्वग्रन्थीनां यत्-प्रसादाद्यतीश्वरः।
मत्प्रसादादनन्दो हि योगी संसारमण्डले।
ईशानन्दा सकलगुणदा छेदिनी छेदनस्था
सुस्था व्यस्था विभवनिरता या निरक्ता निशायाम्।
सा मे नित्यं कुलकमलगा गोपिनी या विधिज्ञैः
श्रीप्राणेशी गगनवसना सर्व्वयोगं प्रपायात्॥
कामानन्दा मदननिरता भाविता भावसिन्धोः
कामानन्दोद्भववसनता योगियोगस्य धात्री।
सा मे धौतं प्रकुकवपुषो धर्म्मपुञ्जं प्रपायात्।
कालाकालं कमलकलिकावासिनी कालिका मे॥
आनन्देहं स्थिरगृहगता गात्रनाडीगतस्था
वक्त्राम्भोजे वचनमधुरं धारयन्ती जनानां।
सा मे रन्ध्रं सम्मकाचरतनोः पातु पंचानना या।
योगांगस्था क्षितितलयहरा रोमकूपस्वरस्था॥
माता गौरी गिरिपतिसुता भासुरास्त्रप्रदीप्ता
संपायान्मे हृदयविवरं छेदिनी मूलपूरे।
कैलासस्था मम तनुगिरिं पातु फेकप्रमादा-
न्नादान्तःस्था मलगुणधरा सत्वसिद्धान्तपारा॥
भोगानन्दा भगनगविलाकाष्ठयन्ती जनानाम्

विद्याविद्याविविधगमना छेदिनी छिन्नरूपा ।
सा सर्वान्तःकरणनिलया नाकिनी प्रेमभावा

यायायात्रा त्रिविधकरणा कारणा सर्वजन्तो
र्माता कर्त्री गगनगृहिणी सर्वकर्त्री मनो मे
रत्नारत्नान्तरगतकला केवला निष्कला या
सा योगेन्द्र समवतु मुदो मे गुदं कुण्डलिन्याम् ।
जह्नोः कन्या कमलनिलया राकिणी प्रेमभावान्
मोक्षप्राणान् पतनरहिता पातु मे वेदवक्त्रा ॥
सिद्धा मूलाम्बुजदलगता पावनी पातु तुण्डम्
हेरम्बाज्ञा प्रणयघटिता काकिनी क्रोधरूपा ।
यदि भजति कुलीनः कामिनीं क्रोधवशां
स तरति परयोगी छेदिनी स्तोत्रपाठात् ।
सकलदुरितनाशः तालनादप्रसिद्धिः
सकलजनवशः स्यात् तस्य नित्यं सुराज्यम् ॥
एतत् स्तोत्रं पठेद्विद्वान् महासंयमतत्परः ।
मूले मनः स्थिरो याति सर्वान्तविनाशनः ।
सर्वसिद्धिः करे तस्य यो भावं समुपाश्रयेत् ।
श्रृणुष्व परमानन्द रससागरसंभव ।

योगिनीस्तोत्रसारं च श्रवणाधारणाद्यतिः।
अप्रकाश्यमिदं रत्नं नृणामिष्टफलप्रदम्।
यस्य विज्ञानमात्रेण शिवो भवति साधकः।
कंकाली कुलपंडिता कुलकला कालानलश्यामला
योगेन्द्रेन्दुसुराविनाथजयिता सा योगिनी मोक्षदे।
सा मे कंकुजडं मुखास्तनधनं हीनं च दीनं खलम्
यद्येवं परिपालनं करोषि नियतं त्वां संहिता माश्रये॥
यद्गेशी शशिशेखरा त्वमपरा हेरम्बयोगास्पदा
दात्री दानपरा हरा हरिहरा घोरागमा शंकरा।
भद्रे बुद्धिविहीनदेहजडितं पूजाजपावर्जितं
मामेकार्थसाकिंचनं यदि शिवे त्वं योगिनी रक्षसि॥
भाव्या भावनतत्परस्य करणा साचारणा भोगिनी
चन्द्रस्था निजनाथदेहसुगता मन्दारमालावृता।
योगेशी कुलयोगिनी त्वमधराधाराधराच्छादनी
योगेन्द्रोतसवरागयागजड़िताया माल्हासिद्धास्थिता॥
त्वं मां पाहि परमेश्वरी सुरवती श्री भास्करी योगगं
मायापाशविवर्द्धनं तवकथालापामृतावर्जितम्।
नानाधर्मविवर्जितं कालकुले संव्याकुलालक्षणं
मय्येके यदि दृष्टिपातकमलं तत केवलं सेवनम्॥

मायामयि त्वयि यदा मम चित्तमग्नं
राज्यं तदा किमु फलं फलसाधनं वा।
इत्याशया बलवती मम शक्तिदेवी
भाति प्रिये श्रुतिदले त्वथवापि सा ते॥
या योगिनी सकलयोगसुमन्त्रसाध्या
रुद्रा महद्गुणमयी करुणानिधाना।
सा मे भयं हरतु वारणमत्तचित्ता
संहारिणी भवतु सोदरवल्लहारा॥
यदि मनोगो गीरसाधी सुरंगो
वशयति रिपुवर्गं क्रोधपुंजं विहन्ति।
भुवनपवनभक्तो भावकं स्यात् सुसिद्धी
रतिपतिगुणतुल्यो रामचन्द्रो यथेशः॥
एतत् स्तोत्रं पठेद्यस्तु स भक्तो भवति प्रियः।
मूलपद्मे स्थिरीभूत्वा षट्चक्रे राज्यमाप्नुयात्॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकरणे सिद्धमन्त्रप्रकरणे च भैरवीभैरवसंवादे भेदिन्या स्तोत्रं नामैकत्रिंशत्पटलः॥०॥

आनन्दभैरव्युवाच।
अथ कान्ते प्रवक्ष्यामि शृणुष्व मम तत्त्वतः।

शक्तिकुण्डलिनी देवी सर्वभेदनभेदिनी।
कलिकल्मषहन्त्री च जगतां मोक्षदायिनी।
तस्याः स्तोत्रं तथा ध्यानं न्यासं मन्त्रं शृणु प्रभो।
यस्य विज्ञानमात्रेण मूलपद्मे मनोलयः।
चैतन्यानन्दनिरतो भवेत् कुण्डलिनीवशम्।
आकाशगामिनीं सिद्धिं ददाति कुण्डली स्वयम्।
अमृतानन्दरूपाभ्यां करोमि पालनं नृणाम्।
श्वासोच्छ्वासकराभ्यां च शरीरं त्रिगुणात्मकम्।
पंचभूतावृता नित्यं नित्यं पंचानिलासनम्।
पाल्यतेऽखिललोकानां संसारस्थितये मया।
कुण्डल्याराधनं तत्र ब्राह्मणो निकटे घटे।
कुण्डल्याराधनं कृत्वा योगी जितेन्द्रियो भवेत्।
परिपालनशक्तिः स्यात् नाशशक्तिर्भवेद्ध्रुवम्।
कोटिप्राभातसूर्यप्रतिकाशां निरालम्बां विभावयेत्।
सर्वास्थितां ज्ञानरूपां श्वासोच्छ्वासनिवासिनीम्
स्वयम्भुकुसुमोत्पन्नां ध्यानज्ञानप्रकाशिनीम्।
मोक्षदां शक्तिदां नित्यां नित्यज्ञानस्वरूपिणीम्।
लोलां नीलवरां सर्वां शुद्धज्ञानप्रकाशिनीम्।
कोटिकालानलसमां विद्युत्कोटिमहोज्ज्वलाम्।

375

तेजसाव्याप्तकिरणां मूलादूर्द्ध्वप्रवेशिनीम् ।
इहलोकप्रकाशाद्यां नीलेन्दीवरलोचनाम् ।
सर्व्वमुखीं सर्व्वहस्तां सर्व्वपादाम्बुजान्विताम् ।
मूलादिब्रह्मरन्ध्रान्तःस्थानलोके प्रकाशिनीम् ।
त्रिभासां सर्व्वभक्तांच श्वासनिर्गमपालिनीम् ।
ललितां सुन्दरीं नीलां कुण्डलीं मण्डलाकृतिम् ।
अखण्डमण्डवाह्यस्थां वाह्यज्ञानप्रकाशिनीम् ।
नागभूषणभूषाद्यां भयानककलेवराम् ।
योगिज्ञेयशुद्धरूपां विरलामूर्द्ध्वगामिनीम् ।
एवं ध्यात्वा मूलपद्मे कुण्डलीं परदेवताम् ।
भावसिद्धिर्भवेत क्षिप्रं कुण्डलीभावनादिह ।
ततो मानसजापं हि मानसं होमतर्पणम् ।
अभिषेकं मुदाकृत्वा प्रातःकाले पुनःपुनः ।
प्राणायामं ततः कृत्वा स्तोत्रं च कवचं पठेत
एतत्स्तोत्रप्रपठनात स्वयं सिद्धान्तविद्भवेत ।
कुण्डली सुकृपा तस्य मासाद्भवति निश्चितम् ।
निद्रादशादिकं त्यक्त्वा प्रकाश्याहं शरीरके ।
अहं दात्री सुयोगानामधिपाहं जगत्त्रये ।
अहं कर्म अहं धर्मः अहं देवी च कुण्डली ।

377

यो जानाति महावीरः कुण्डलीरूपसेवनात ।
इहं तं पालनं कर्त्तुं मवतीर्णा हि भूतले ।
अत एव परं मन्त्रं कुण्डलिन्याः स्तवं शुभम ।
प्रपठेत सर्व्वदा देवी यावद्वश्या न कुण्डली ।
तावत कालं जपं कुर्य्यात यावत सिद्धिर्न जायते ।
आधारे परदेवता भवनता श्रीकुण्डली देवता
देवानामधिदेवता त्रिजगतामानन्दपुंजास्थिता ।
मूलाधारनिवासिनी त्रिनयनी या ज्ञाननी मालिनी ॥
सा मे मातृमनुस्थिता कुलपथानन्दैकबीजानना ॥
सर्व्वाङ्गस्थितिकारिणी सुरगणानन्दैकचिह्ना शिवा
वारेन्द्रानवकामिनी वचनदा सिद्धिप्रदा ज्ञानदा ।
सानन्दा धननान्दिनी घनगणाच्छिन्नाभया मोदिनी
धीरा धैर्य्यवती समाप्तविषया श्रीमंगला कुण्डली ॥
सर्व्वाकारनिवासिनी जयधरा धारधरस्था गया
गीता गोधनवर्द्धिनी गुरुमयी गानप्रिया गोधना ।
गार्हाग्निस्थितिचन्द्रिका सुलतिका जाड्यापहा रागदा
दारागायनकारिणी सुगमना ब्रह्माण्डमार्गोज्वला ॥
माता मानसगोचरा हरिचरा सिंहासना कारणा
आशादामगणोश्वरी गुणवती गाथापथस्थायिनी ।

निद्राक्षुब्धजनप्रिया वरदृशा भाषाविशेषान्विता
स्थित्यन्तप्रलयापहा नरशिरोमालाधरा कुण्डली ॥
गाङ्गेशी यमुनस्वरी शुकृतरी गोदावरी भास्करी
भक्तार्त्तिक्षयकारिणी मम शिवं यद्येकभावान्विता ।
त्वं शीघ्रं कुरु कौलिके मम शिरोरन्ध्रं तथाङ्गं मुदा
तत्पार्श्वे स्थितिदैवतं कुलवती मातः स्थलं पाहि कम् ॥
मालोर्द्ध्वे धवलाकला रसफला कालाग्निजालोज्ज्वला
फेरुप्राणनिकेतने गुरुतरा गुर्व्वी सुगुर्व्वी सुरा ।
हालोहालसमोदया यतिदया माया जगत्तारिणी
निद्रामैथुननाशिनी मम महामोहापहा पातु कम् ॥
भालं नीलतनुस्थिता मतिमतामर्थप्रिया मैथिली
भालानन्दकरं महाप्रियजनं पद्मानना कोमला ।
नानारङ्गसुपीठदेशदशना सिद्धासना घोरणा
तालस्थालयधारिणी कलिहला श्रीकुण्डली पातु कम् ॥
भ्रूमध्यं वगलामुखी शशिमुखी विद्यामुखी सन्मुखी
नागाख्यानगवाहिनी महिषहा पञ्चाननस्थायिनी ।
पारावारविहारहेतु सफरी सेतुप्रकाराकरा
काशीवासिनमीश्वरं प्रतिदिनं श्रीकुण्डली पातु कम् ॥
या कुण्डोद्भवसारपाननिरता मोहादिदोषापहा

सा नेत्रत्रयमम्बिका सुवासिका श्रीकालिकाकौलिका।
काकस्याहिकचञ्चुपूरणाकरी संज्ञाकरी सुन्दरी
मे पातु प्रियया तया रुचिरया स्वच्छाययाच्छादिता।
श्रीकुण्डे रणचण्डिका सुरतिका कंकालिका शीतकशा
शोकाशा परिवर्ज्जिता सुमतिका ज्ञानालिका चोतसुका।
सोकासूक्ष्मसुखा प्रथागुणानिका दीक्षा च शिक्षालिका
सा मह्यं ममकन्दवासिनि शिवे संज्ञाहि संज्ञाहिकम॥
एतत्स्तोत्रं पठित्वा त्रिभुवनपरमं पावनं लौकिकानां
राजा स्यात किल्बिषाग्निः कृतपति रहयः क्षेमदं योगिनांवा।
सर्व्वेशः सर्व्वकर्त्ता भवति निजगृहे योगयोगांगवक्ता
स शाक्तः शैव एकः परमपुरुषगो निर्म्मलात्मा महात्मा॥
प्रणवे पुटितं कृत्वा यः स्तौति नियतः शुचिः।
स भवेत कुण्डलीपुत्रो भूतले नात्रसंशयः॥०॥

इतिश्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने मूलचक्रासंकेते भैरवीभैरवसंवादे स्कन्दवासिनीस्तोत्रं नाम द्वात्रिंशत पटलः॥०

—०।०—

आनन्दभैरवउवाच०

अथवक्ष्ये महादेव कुण्डलीकवचं शुभम।
परमानन्ददं सिद्धं सिद्धवृन्दनिषेवितम।

यद्धृत्वा योगिनः सर्व्वे धर्म्माधर्मप्रदर्शकाः।
ज्ञानिनो मानिनो धैर्य्या विचरन्ति यथामराः।
सिद्धयोऽष्टाणिमाद्याश्च करस्थाः सर्व्वदेवताः।
एतत्कवचपाठेन देवेन्द्रो योगिराड्भवेत्।
ऋषयो मुनयः सर्व्वे जटिलाः कुलभैरवाः।
प्रातःकाले त्रिवारंच मध्याह्ने वारयुग्मकम्।
सायाह्ने वारमेकन्तु पठेत् कवचमेवच।
पाठादेव महायोगी कुण्डलीदर्शनं भवेत्।
कुलकुण्डलिनीकवचस्य ब्रह्मा ऋषि र्गायत्रीछन्दः कुलकुण्डली-
देवता सर्व्वाभीष्टसिद्ध्यर्थे विनियोगः।
ओं ईश्वरी त्रिजगद्धात्री ललिता सुन्दरी परा।
कुण्डली कुलरूपाच पातु मां कुलचण्डिका।
शिरो मे ललिता देवी पातूग्राख्या कपालकम्।
ब्रह्ममन्त्रेण पुटिता भ्रूमध्ये पातु मे सदा।
नेत्रद्वयं महाकाली कामाग्निभक्षिका शिखाम्।
दन्तावलीं विशालाक्षी ओष्ठमिष्टान्नवासिनी।
कामवीजात्मिका विद्या अधरं पातु मे सदा।
लृयुगस्था गण्डयुग्मं मायावी श्रावसप्रिया।
भुवनेशी कर्णयुग्मं चिवुकं क्रोधकालिका।

कपिला मे गलं पातु सर्व्वबीजस्वरूपिणी ।
मातृकावर्णपुटितं कुण्डलीकण्ठमेव च ।
हृदयं लोकपुत्री च कंकाली पातु मे मुखम् ।
भुजयुग्मं चण्डबुद्धा चण्डदोर्दण्डखण्डिनी ।
स्कन्धयुग्मं स्कन्दमाता हालाहलगता मम ।
अङ्गुल्यग्रं कुलानन्दा श्रीविद्या नखमण्डलम् ।
कालिका भुवनेशानी पृष्ठदेशं सदावतु ।
पार्श्वयुग्मं महावीरा सनधाराभया
पातु मां कुलदण्डस्था नाभिमुदरमम्बिका ।
कटिदेशं पीठसंस्था महामहिषघातिनी ।
लिङ्गस्थानं महामुद्रा भगमालामनुप्रिया ।
भगीरथप्रिया धूम्रा मूलाधारं गणेश्वरी ।
चतुर्द्दलं कल्पपूज्या दलाग्रं मेवसुन्दरी ।
धीरा तु धारणाख्या च ब्रह्माण्डं पातु मे सदा ।
मेदिनी पातु कमला वागदेवी पूर्व्वगं दलम् ।
केदिनी दक्षिणे पत्रे पातु चण्डा महातपा ।
चण्डघण्टा सदा पातु योगिनां वारुणं दलम् ।
उत्तरस्थं दलं पातु पृथिवीमिन्द्रलालिताम् ।
चतुष्कोणं पातु विद्या ब्रह्मविद्याष्टकोणकम् ।

अष्टमूलं सदा पातु सर्व्वदा शववाहना।
चतुर्भुजा सदा पातु डाकिनी कुलचंचला।
मेद्रस्थानदलाधारा पातु मे चारुपंकजम्।
स्वयम्भुलिंगं चार्व्वीका कोटराद्दी ममासनम्।
कदम्बवनमापातु कदम्बवनवासिनी।
वैष्णवी परमामया पातु मे वैष्णवं पदम्।
षड्दलं डाकिनी पातु वंकिनी कामवासिनी।
कामेश्वरी कामरूपा करणां मे पीतवाससम्।
वनमाल्यं वनदुर्गा शंखं मे शंखिनी शिवा।
चक्रं चक्रेश्वरी पातु कामलाद्दी बदा मम।
पद्मं मे पद्मगंधा च पद्ममालामनोहरा।
वादिलान्ताद्दरं पातु लाकिनी लोकपालिनी।
षटद्लास्थितदेवांश्च पातु कैलासवासिनी।
अग्निवर्णा सदा पातु जलं मे परमेश्वरी।
मणिपूरं सदा पातु मणिमालाविभूषणा।
दशपत्रे दशवर्णा डादिफान्तात्रिविक्रमा।
पातु नीला महाकाली भद्राभीमा सरस्वती।
अयोध्यावासिनी देवी महापीठनिवासिनी।
वाग्भवाद्यामहाविद्या कुण्डली कालकुण्डली।

दशच्छदगतं कद्रं पातु कद्रात्मकं मम ।
सूक्ष्मात् सूक्ष्मतरा पातु सूक्ष्मस्थाननिवासिनी ।
नाकिनी लोकजननी पातु कूटाक्षरस्थिता ।
तेजसं पातु नियतं रजकी राजपूजिता ।
विजयाकुलवीजस्था तवर्गं तिमिरापहा ।
तन्त्रात्मिका मणिग्रन्थिभेदिनी पातु सर्व्वदा ।
भर्गमाताम्भ्रगुसुता पातु मां नाभिवासिनी ।

383

लांगली पातु सकलं कुण्डली कालकम्पिता । [नान्दनीर]
हृत्पद्मं पातु कालाख्या धूम्रवर्णा मनोहरा ।
दलद्वादशवर्णांश्च भास्करी भावसिद्धिदा ।
पातु मे परमाविद्या कवर्गं कामचारिणी ।
चवर्गं चारुवसना व्याघ्रास्या टङ्कधारिणी ।
टकारं पातु कृष्णाख्या काकिनी पातु कालिका ।
कुठारङ्गी ठकारं मे वीजभाषा महोदया । (जीव)
ईश्वरं पातु विमला मम हृत्पद्मवासिनी ।
कर्णिकां कालसन्दर्भा योगिनी योगमातरम् ।
इन्द्राणी वारुणी पातु कुलमालाकुलान्तरम् ।
तारिणी शक्तिमाता च कण्ठवाक्यं सदावतु ।
विप्रचित्ता महोग्रोग्रा प्रभादीप्ताम्बरावना ।

घनाघना

नाकस्तामिनी रजो देहा वैदेही हयवाहिनी ।
उन्मत्तानन्दचित्ताच कुलेशी सा भगान्तरा ।
मम षोड़शपत्राणि पातु मातृतनुस्थिता ।
सुरान् ददातु वेदज्ञा सर्व्वभायाच कर्णिकाम् ।
ईश्वराङ्कासनगता प्रपायान्मे सदाशिवम् ।
शाकम्भरी महामया शाकिनी पातु सर्व्वदा ।
भवानी भगमाताच प्रायात् भ्रूमध्यपंकजम् ।
द्विदलं व्रतकामाख्या अष्टांगसिद्धिदायिनी ।
पातु मामखिलानन्दा मनोरूपा जगत्प्रिया ।
लकारं लक्षणाक्रान्ता सर्व्वलक्षणलक्षणा ।
कृष्णाजिनधरा देवी क्षकारं पातु सर्व्वदा ।
द्विदलस्थं सर्व्वदेवं सदा पातु वरानना ।
बहुरूपा विश्वरूपा हाकिनी पातु हास्थिता
हराहरशिवं पातु मानसं धातु पंचमा
षटचक्रस्था सदा पातु षटचक्रं कुलवासिनी ।
अकारादिक्षकारान्ता बिन्दुसर्गसमान्विता ।
मातृकार्णा सदा पातु कुण्डली कुलकुण्डली ।
वेदकालीगतप्रेमा पूर्णागिरितटं शिवा ।
उड्डीयानेश्वरी देवी सकलं पातु सर्व्वदा ।

कैलासपर्व्वतं पातु कैलासगिरिवासिनी।
डाकिनी राकिणी शाकिनी लाकिनी लाकिनी कला।
शाकिनी हाकिनी देवी षट्चक्रादीन् प्रपातु मे।
कैलासाख्यं सदा पातु पञ्चाननतनूद्भवा।
हिरण्यवर्णा रजनी चन्द्रसूर्य्याग्निभाक्षिणी।
सहस्रदलपद्मं मे सदा पातु कुलाकुला।
सहस्रदलपद्मस्था दैवतं पातु भैरवी।
कालीतारा षोडशाख्या मातङ्गी पद्मवासिनी।
शशिकोटिगलद्रूपा पातु मे सकलां तनुम्।
वने घोरे जले देशे युद्धे वादे श्मशानके।
सर्व्वत्रगमने ज्ञाने सदा मां पातु शैलजा।
पर्व्वते विविधावासे विनाशे पातु कराली।
पादादिब्रह्मरन्ध्रान्तं सर्व्वाकाशं सुरेश्वरी।
सदा पातु सर्व्वविद्या सर्व्वज्ञानं सदा मम।
नवलक्षमहाविद्या दशदिक्षु प्रपातु माम्।
इत्येतत् कवचं देव कुण्डलिन्याः प्रसादिदम्।
ये पठन्ति सदा ध्यानयोगमार्गव्यवस्थिताः।
ते यान्ति मुक्तिपदवीं ऐहिके नात्र संशयः।
मूलपद्मे मनोयोगं कृत्वा दृढासनास्थितः।

मन्त्री ध्यायेत कुण्डलिनीं मूलपद्मे प्रकाशिनीम्।
धर्म्मादयां दयारूढ़ामाकाशस्थानवासिनीम्।
अमृतानन्दरसिकां विकलां सुकलां सिताम्।
असितां व्यक्तहरितां विरक्तां रक्तविग्रहाम्।
रक्तनेत्रां कुलक्षिप्तां कुलाञ्जनचयोज्ज्वलाम्।
शिखाकारां मनोरूपां मूले ध्यात्वा प्रपूजयेत।
यो योगी कुरुते सर्वं स सिद्धो नात्र संशयः।
रोगी रोगात प्रमुच्येत बद्धो मुच्येत बन्धनात।
राज्यश्रियमवाप्नोति राज्यहीनः पठेद्यदि।
पुत्रहीनो लभेत पुत्रं योगहीनो भवेद्वशी।
कवचं धारयेद्यस्तु शिखायां दक्षिणे भुजे।
वामा वामकरे धृत्वा सर्व्वाभीष्टमवाप्नुयात।
स्वर्णे रौप्ये तथा ताम्रे स्थापयित्वा प्रपूजयेत।
सर्व्वदेशे सर्व्वकाले पठित्वा सिद्धिमाप्नुयात।
स भूयात कुण्डलीपुत्रो नात्र कार्य्या विचारणा॥ ५०॥

इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने सिद्धविद्याप्रकरणे षटचक्रप्रकाशे भैरवीभैरवसंवादे स्कन्दवासिनीकवचं नाम त्रयस्त्रिंशत पटलः॥ ५। ३३॥

—००—

387

आनन्दभैरव्युवाच।

अथ भेदान् प्रवक्ष्यामि हिताय जगतां प्रभो।
निर्मलात्मा शुचिः श्रीमान ध्यानस्थश्च सदाशिवः।
सर्वोद्वगो ज्ञानरूपी स षट्चक्रार्थभेदकः।
त्रिगुणाध्यानविकलो न पश्यति दिवानिशम्।
दिवारात्रज्ञानहेतो र्न पश्यति कलेवरम्।
इति कृत्वा हि मरणं स्मरणं जन्मानि जन्मानि।
तज्जन्मक्षयहेतोश्च ममयोगं समभ्यसेत।
पंचामरा महायोगं कृत्वा स्यादमरो नरः।
तत्प्रकारं शृणु प्राणवल्लभ प्रियदर्शन।
तदभावे नैवकस्य न कुत्र वद शंकर।
यदि लोकस्य निकटे कथ्यते योगसाधनम्।
विघ्नघोरावसन्त्येव गोत्रयोगादिकं कथम्।
योगयोगाद्भवेन्मोक्ष स्तत्प्रकाशाद्विनाशनम्।
अतो न दर्शयेद्योगं यदीच्छेदात्मनः सुखम्।
कृत्वा पंचामरायोगं प्रत्यहं भक्तिसंयुतः।
पठेत श्रीकुण्डली देवी सहस्रनामचाष्टकम्।
महायोगी भवेन्नाथ षण्मासान्नात्रसंशयः।
पंचामरायोगविद्या सर्वाविद्याप्रकाशिनी।

कला पंचासनानासिद्धिस्ततोऽष्टांगादिधारणा ।
तत्प्रकारं प्रवक्ष्यामि सावधानावधारय ।
अहं जानामि संसारे केवलं योगपारदिता ।
तत्सादिनी ह्यहं नाथ भक्तानामुदयायच ।
इदानीं कथ्यते नाथ ममवा योगधारणाम् ।
एवं कला नित्यरूपी योगानामङ्कुरायते ।
ततः कालेन पुरुषः सिद्धिमाप्नोति निश्चितम् ।
पंचामराविधानानि क्रमेण शृणु शंकर ।
नेतियोगं हि सिद्धानां महाकफविनाशनम् ।
शन्तियोगं ततः पश्चात् हृदयग्रन्थिभेदनात् ।
धौतीयोगं ततः पाश्चात् सर्व्वं मलविनाशनात्
नेडलीयोगपरमं सर्व्वाङ्गोदरचालनात् ।
दालनं परमं योगं नाड़ीनां दालनात् स्मृतम् ।
एतत्पंचामरायोगं यमिनामतिगोचरम् ।
यमानियमकालेतु पंचामराक्रियां चरेत् ।
अमरासाधनादेव अमरत्वं लभेद्ध्रुवम् ।
एतत्करणकालेच तथा पंचामरासनम् ।
पंचामराभक्षणेन अमरो योगसिद्धिभाक् ।
तानि द्रव्याणि वक्ष्यामि तवाग्रे परमेश्वर ।

येनहीना नसिध्यन्ति कल्पकोटिशतेन च ।
एका तु अमरा दूर्व्वा तस्या ग्रन्थिं समानयेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ।
अन्या तु विल्वपर्णस्था शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थे निर्गुण्डी चामरा मता ।
अन्या तु तुलसी देवी श्रीविष्णोः परितोषिणी ।
एताः पंचामराः ज्ञेया योगसाधनकर्म्मणि ।
एतासां द्विगुणं ग्राह्यं विजयापत्रमुत्तमम् ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा सर्व्वत्र पूजिताः ।
एतद्द्रव्याणि संगृह्य भक्षयेच्चूर्णमुत्तमम् ।
तच्चूर्णं भक्षसमये एतन्मन्त्रादिपंचकम् ।
पठित्वा भक्षणं कृत्वा नरो मुच्येत संकटात् ।
ओं दूर्व्वेऽमरपूज्ये त्वममृतोद्भवसम्भवे ।
अमरं मां सदा भद्रे कुरुष्व हरिप्रिये ।
ओं दुर्व्वायै नमः स्वाहा । इति दुर्व्वायाः पुनर्व्विजयामन्त्रेण शोधयेत् ।
सर्व्वकन्यकाः ।
ओं संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ।
भैरवाणां च तृप्त्यर्थं पवित्रा भव सर्व्वदा ।
ओं ब्रह्मण्यै नमः स्वाहा

ओं सिद्धिमूलकरे देवि हीनबोधप्रबोधिनि।
राजपुत्रिवशंकरि शत्रुकण्ठत्रिशूलिनि।
ओं क्षत्रियायै नमः स्वाहा
अज्ञानेन्धनदीप्ताग्ने ज्वालाग्निज्ञानरूपिणि।
आनन्दाद्याहुतिं मत्वा सम्यक् ज्ञानं प्रयच्छ मे।
ह्रीं वैश्यायै नमः स्वाहा
ओं नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि।
त्रैलोक्यविजये मातः समाधिफलदा भव।
श्री शूद्रायै नमः स्वाहा
ओं कायसिद्धिकरे देवि विल्वपत्रनिवासिनि।
अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम्।
ओं शिवदायै नमः स्वाहा
ओं निर्गुणे परमानन्दे योगानामधिदेवते।
सा मां रक्षतु अमरे भावसिद्धिप्रदे नमः।
ओं शोकापहरायै नमः स्वाहा
ओं विष्णोः प्रिये महामाये कालजालानिवारिणि।
तुलसि मां सदा रक्ष मामेकममरं कुरु।
ओं ह्रीं श्रीं रें क्लीं अमरायै नमः स्वाहा
पुनरेकत्र आकृत्य सर्व्वासां शोधनं चरेत्।

ओं अमृते ऽमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय सिद्धिं देहि स्वाहा ।
धेनुमुद्रां योनिमुद्रां मत्स्यमुद्रां प्रदर्शयेत् ।
तत्तन्मुद्राक्रमेणैव तर्पणं कारयेद् बुधः ।
अमन्त्रकं सप्तवारं गुरोर्नाम्ना शिवेऽर्पयेत् ।
सप्तवारमिष्टदेव्या नाम्ना मूर्ध्नि प्रदापयेत् ।
ततस्तर्पणमाकुर्य्यात् तर्पयामि नमो नमः ।
एतद्वाक्यस्य पूर्व्वे च इष्टमन्त्रं समुच्चरेत् ।
परदेवतां शब्दमुद्धृत्य सर्व्वाद्यप्रणवं स्मृतम् ।
ततो मुखे प्रजुहुयात् कुण्डली नामपूर्व्वकम् ।
ओं ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्व्वसत्ववशंकरि शत्रुकण्ठत्रिशूलिनि स्वाहा ।
एतद्धोत्वा स्वाश्रमी च वशी साधकसत्तमः ।
पंचामरासाधनज्ञः कुलाचारविधिप्रियः ।
स्थिरचेता भवेद्योगी यदि पंचामरागतः ।
नेति योगविधानानि शृणु कैलासपूजित ।
येन सर्व्वमस्तकस्थकफानां दहनं भवेत् ।
सूक्ष्मसूत्रं दृढतरं प्रदद्यात् नासिकाबिले ।
मुखरन्ध्रे समानीय सन्धानेन समापयेत् ।

391

पुनः पुनः सदा योगी यातायातेन घर्षयेत ।
क्रमेण वर्द्धनं कुर्य्यात सूत्रस्य परमेश्वर ।
नेति योगेन नासाया रन्ध्रं च निर्म्मलं भवेत ।
वायोर्गमनकाले तु महासुखमिति प्रति प्रभो ।
दन्तियोगं ततः पश्चात कुर्य्यात साधकसत्तमः ।
दन्तधावनकाले च योगमेतं प्रकाशयेत ।
दन्तधावनकाष्ठं च सार्द्धहस्तैकसम्भवम ।
नातिस्थूलं नातिसूक्ष्मं नवीनं नम्रमुत्तमम ।
अपक्वं यत्नतो ग्राह्यं मृणालसदृशं तरुम ।
गृहीत्वा दन्तकाष्ठं तत क्रमेणाचाप्रतदयेत ।
दन्तकाष्ठाग्रभागं च कनिष्ठांगुलिपर्व्वतः ।
एवं दन्तावलेह्यं च चर्व्वणं सुन्दरं चरेत ।
ततः प्रक्षाल्य नीरेण शनैर्गिलनमाचरेत ।
शनैः शनैः प्रकर्त्तव्यं कायवाकचित्तशोधनम ।
यावन्नायाति काष्ठाग्रं नाभिमूले त्वनाकुलम ।
भवेत सूक्ष्मतरं ग्राह्यमवश्यं प्रत्यहं चरेत ।
हृदये जलचक्रं च यावत खण्डं न जायते ।
तावत कालं सर्व्वदिने प्रभाते बदधावनम ।
हृदये कफभाण्डस्य [illegible] खण्डनं जायते । ध्रुवम

पवनागमने सौख्यं प्राप्नोति योगनिर्भरम् ।
खेचरान्नं नवनतमम्बलान्नं कटूद्भवम् ।
मिष्टान्नं शाकदध्यन्नं द्विवारं रात्रिभोजनम् ।
अवश्यं संत्यजेद्योगी यदि योगमिहेच्छति ।
एकभागं मुद्गवीजं द्विभागं तण्डुलं मतम् ।
उत्तमं पक्वमाकृत्य घृतदुग्धेन भक्षयेत् ।
अथवा केवलं दुग्धं तर्पणं कारयेद्बुधः ।
कुण्डलीं कुलरूपां च दुग्धेन परितर्पयेत् ।
कुण्डलीतर्पणं योगी यदि जानाति शंकर ।
अनायासेन योगी स्यात् सज्ज्ञानीन्द्रो भवेत् क्षणात् ।
यमनियमपरो यः कुण्डलीसेवनस्थः
विभवविरहितो वा भूतिभासाश्रितो वा ।
स भवति परयोगी सर्वविद्यार्थवेद्यो
गुणगणगमनस्थो मुक्तरूपी गणेशः ॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे पंचामरायोगसाधनं नाम चतुःत्रिंशत पटलः ॥

आनन्दभैरव्युवाच ।

अथ वक्ष्ये महाकाल रहस्यं चातिदुर्लभम् ।
यस्य विज्ञानमात्रेण नरो ब्रह्मपदं लभेत् ।

आकाशे तस्य राज्यं च खेचरेशो भवेद्ध्रुवम्।
धनेशो भवति क्षिप्रं ब्रह्मज्ञानी भवेन्नरः।
योगानामधिपो राजा वीरभद्रो यथा कविः।
गोविन्दगणनाथस्य कृपा भवति सर्व्वदा।
यः करोति पंचयोगं सस्यादमरविग्रहः।
धूति योगं प्रवक्ष्यामि यत्कृत्वा निर्म्मलो भवेत्।
अत्यन्तगुह्यं योगं च समाप्तिकरणं नृणाम्।
यदि नः कुरुते योगं तदा मरणमाप्नुयात्।
धौतियोगं विना नाथ कः सिध्यति महीतले।
सूक्ष्मात् सूक्ष्मतरं वस्त्रं द्वात्रिंशद्धस्तमानकम्।
एकहस्तक्रमेणैव यः करोति शनैः शनैः।
यावद्द्वात्रिंशद्धस्तं च तावत्कालं क्रियां चरेत्।
एतत्क्रियाप्रयोगेण योगी भवति तत्क्षणात्।
क्रमेण मन्त्रसिद्धिः स्यात् कालजालवशं नयेत्।
एतन्मध्ये आसनानि शरीरस्थानि चाचरेत्।
दृढासने योगसिद्धिरिति तन्त्रार्थनिर्णयः।
सिद्धे मनौ परव्याप्तिः पंचयोगासनेन च।
पार्श्वे चाष्टाङ्गुलं वस्त्रं दीर्घं द्वात्रिंशदीश्वर।
एतत्सूक्ष्मं सुवसनं गृहीत्वा कारयेद्यतिः।

जितेन्द्रियः सदा कुर्य्यात जनो ध्याननिषेवणः।
कुलीनः पण्डितो मानी विवेकी सुस्थिराशयः।
धौति योगं सदा कुर्यात तदैव शुचिगो भवेत।
अनाचारेण हानिः स्यात इन्द्रियाणां वलेन च।
महापातकमुख्यानां संगदोषेण हानयः।
सम्भवन्ति महादेव तव योगः सुकर्म्म च।
वृद्धो वा यौवनस्थो वा वालो वा जड़ एव च।
कवणाद्दीर्घजीवी स्या[illegible]दमरो लोकवल्लभः।
मन्त्रसिद्धिरष्टसिद्धिः ससिद्धीनामधीश्वरः।
शनैः शनैः सदा कुर्य्यात कालदोषविनाशनात।
हृदयग्रन्थिभेदेन सर्व्वावयववर्द्धनम।
तदा महावलो ज्ञानी चारुवर्णो महाशयः।
धौतीयोगोद्भवं कामं महामरणकारणम।
तस्य त्यागं यः करोति स नरो देवविक्रमः।
श्वासत्यागे स्तम्भनं च मनो दद्यान्महानिले।
श्वासादीनां च गमनं अवश्यं भावयेद्गृहे।
प्राणायामविधानेन सर्व्वकालं सुखी भवेत।
वायुपानं सदा कुर्य्यात ध्यानकार्य्यं सदैव हि।
प्रत्याहारं सदा कुर्य्यात मनोनिवेशनं सदा।

मानसादिप्रजाप्यं च सदा कुर्य्यान्मनोलयम्।
धौती योगानन्तरं हि नेडुली कर्म्म चाचरेत्।
नेडुलीकर्म्मयोगेन आसने नेडुलीपमः।
नेडुलीसाधनादेव चिरजीवी निराशयः।
अन्तरात्मा सदा मौनी निर्म्मलात्मा सदा सुखी।
सर्व्वदा समयानन्दः करणानन्दविग्रहः।
योगाभ्यासं सदा कुर्य्यात् कुण्डली साधनादिकम्।
कृत्वा मन्त्री खेचरत्वं प्राप्नोति नात्र संशयः।
तत्प्रकारं प्रवक्ष्यामि सावधानावधारय।
भुक्त्वा मुद्गान्नपक्वं च वारैकं प्रतिपालयेत्।
प्रपालयेत् सादरं च कठिनासा विवर्जितः।
पुनः पुनश्चालनं च कुर्य्यात् सोदरमध्यगम्।
कुलालचक्रवत् कुर्य्यात् भ्रमणं चोदरस्य च।
सर्व्वांगचालनादेव कुण्डलीशक्तिचालनम्।
चालनात् कुण्डलीदेव्याश्चैतन्या सा भवेत् प्रभो।
एतस्यानन्तरं नाथ चालनं परिकीर्त्तितम्।
नाडीनां चालनादेव सर्व्वविद्यानिधिर्भवेत्।
सर्व्वत्र जयमाप्नोति कालिकादर्शनं भवेत्।
वायुसिद्धिर्भवेत्तस्य पंचभूतस्य सिद्धिभाक्।

तस्य कीर्त्तिस्त्रिभुवने कामदेववलोपमः।
सर्व्वत्रगामी स भवेदिन्द्रियाणां पतिर्भवेत्।
मुण्डासनं हि सर्व्वत्र सर्व्वदा कारयेद्बुधः।
ऊर्द्ध्वं पद्मासनं कृत्वा अधोहस्ते जपं चरेत्।
यदि त्रिदिनमाकर्त्तुं समर्थो मुण्डिकासनम्।
तदा हि सर्व्वनाड्यश्च वशीभूता न संशयः।
नाडीचालनयोगेन मोक्षदाता स्वयं विधिः।
नाडीयोगेन सर्व्वार्थसिद्धिः स्यान्मुण्डिकासनात्।
मुण्डासनं यः करोति निडली सिद्धिगो यदि।
नेडलीसाधनगतो नेड्डलीसाधनोत्तमः।
स धीरो मानसचैव तदा चालनयोगेन सिद्धिमाप्नोति साधकः।
नेडलीं यो न जानाति स कथं कर्त्तुमुत्तमः।
स धीरो मानसचरो मतिमान् स जितेन्द्रियः।
यो नेडलीयोगसारं कर्त्तुमुत्तमपारगः।
स चावश्यं चालनं च कुर्यात् नाड्यादिधारणात्।
नेडलीयोगमार्गेण नाडीचालनपारगः।
भवत्येव महाकाल राजराजेश्वरो यथा।
पृथिवीपालनरतो विप्रहार्थे प्रपालनम्।
केवलं प्राणवायोश्च धारणात् चालनं भवेत्।

397

विना चालनयोगेन देहशुद्धिर्न जायते।
चालनं नाड़िकादीनां कफपित्तमलादिकम्।
करोति यत्नतो योगी मुण्डासनानिलाशनात्।
वायुग्रहणमेकं हि नेडुलीवशकालके।
नकुर्य्यात् केवलं नाथ अन्यकाले सदाचरेत्।
यावत् नेड़लीं नजानाति तावत्वायुं न संपिबेत्।
बहुतरं न संग्राह्यं वायोरागमनादिकम्।
केवलं श्वासगणनं यावन्नेड़ली न सिध्यति।
श्वासोच्छ्वासं प्रगणयेत् यावत् नेड़ली न सिध्यते।
पंचामराः प्रकथिता योगिनीसिद्धिदायिकाः।
पंचामरासाधनेन पंचवायुवशी भवेत्।
प्रतापे सूर्य्यतुल्यः स्यात् शोकदोषापहारकः।
सर्व्वयोगं स्थिरतरं संप्राप्य योगराड् भवेत्॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवी भैरवसंवादे पंचामरयोगसाधनं नाम पञ्चत्रिंशत् पटलः॥ ३५॥

श्रीआनन्दभैरव्युवाच

अथ कान्त प्रवक्ष्यामि कुण्डलीचेतनादिकम्।

सहस्रनाम सफलं कुण्डलिन्याः प्रियं सुखम्।
अष्टोत्तरं महापुण्यं धारणात् सिद्धिदायकः।
तव प्रेमरसेनैव कथयामि श्रृणुष्व तत्।
विना यजनयोगेन विना ध्यानेन यत्फलम्।
तत्फलं लभते सद्यो विद्यायाः सुकृपा भवेत्।
या विद्या भुवने प्राणी त्रैलोक्यं पाति सर्व्वदा।
तस्या नामसहस्राणि त्रैलोक्यं पाति सर्व्वदा।
तस्या नामसहस्राणि साष्टोत्तरशतानि च।
श्रवणात् पठनान्मन्त्री महाभक्तो भवेदिह।
ऐहिके सम्भवेन्नाथ जीवन्मुक्तो महाबली।
अस्य श्रीमहाकुण्डलीमष्टोत्तरशतसहस्रनामस्तोत्रस्य ब्रह्मा-
ऋषिर्जगतीछन्दो भगवती श्रीमन्महाकुण्डली देवता सर्व्व-
योगसमृद्धिसिध्यर्थे विनियोगः॥

कुलेश्वरी कुलानन्दा कुलीना कुलकुण्डली।
श्रीमन्महाकुण्डली च कुलकन्या कुलप्रिया।
कुलक्षेत्रस्थिता कौली कुलवर्त्म प्रकाशिनी।
कुलाख्या कुलमार्गस्था कुलशास्त्रार्थपालिनी।
कुलज्ञा कुलयोग्या च कुलपुष्पप्रकाशिनी।
सुकुलीना कुलाध्यक्षा कुलचन्दनलेपिता।

कुलदर्भासना कुल्या कुलच्छन्ना कुलालजा ।
कुलीनयोगललिता कुण्डली कुलपण्डिता ।
कुलद्रव्यप्रिया कीला कलिकन्या कुलान्तरा ।
कुलकाली कुलामोदा कुलशब्दोत्सवा कुला ।
कुलरूपा कुलोद्भूता कुलकुण्डनिवासिनी ।
कुलभिन्ना कुलोत्पन्ना कुलाचारविनोदिनी ।
कुलवृक्षसमुद्भूता कुलमाला कुलप्रभा ।
कुलज्ञा कुलमध्यस्था कुलकंकणशोभिता ।
कुलोत्तरा कौलपूज्या कुलक्रिया
कुलभेदा कुलप्राणा कुलदेवी कुलस्तुतिः ।
कौलिका कालिका कालिभिन्ना कुलामला । ^काला
कलिकल्मषहन्त्री च कलिदोषविनाशिनी ।
कंकाली केवलानन्दा कालज्ञा कालधारिणी ।
कौतुकी कौमुदी केका काका कालभयान्तरा ।
कोमलाङ्गी करालास्या कन्दपूज्या च कौशला ।
कैशोरी काकपुच्छस्था कमलासनवासिनी ।
कैकेयीपूजिता कोला कोलपत्नी कपिध्वजा ।
कमला कामलाक्षी च कमलस्थेतरप्रिया ।
कालिका भंगदोषस्था कालजा कालकुण्डली ।

400

काव्यदा कविता वाणी कालसन्दर्भभेदिनी।

कुमारी करुणाकारा कुरुसैन्यविनाशिनी।

कान्ता कुम्भगता काया कामिनी कामनाशिनी।

कामोद्भवा कामकन्या केवला कालघातिनी।

कैलासशिखरारूढा कैलासपतिसेविता।

कैलासनाथललिता केयूरहारमण्डिता।

कन्दर्पकठिनानन्दा कुचगा कीचगापहा।

कमलाख्या कठोरा च कीटरूपा कटिस्थिता।

कन्देश्वरी कन्दरूपा कोकिला कन्दवासिनी।

कूटस्था कूटभक्ता च कालकूटविनाशिनी।

कटस्था कामबीजाला कृष्णा कृष्णगुणोदया।

कृष्णानन्दा कृष्णपूज्या दृष्णाहा कृष्णरक्षिका।

कारणाङ्गी कृष्णवर्णा कीलिता कोकिलस्वरा।

काञ्चीपीठस्थिता काञ्ची कामरूपनिवासिनी।

कामाख्या कामना कन्या कामराजतनूद्भवा।

कामरूपाधरा कम्रा कमनीया कालप्रिया।

कञ्जानना कञ्जहस्ता कंजपत्रायतेक्षणा।

काकिनी कामरूपस्था कामरूपप्रकाशिनी।

कोलविध्वंसिनी कंका कलंकांककलाङ्किनी।

401

महाकुलनदी कर्णा कर्णकाण्डविमोहिनी ।
काण्डस्था काण्डकरणा कार्मुकस्था कुटुम्बिनी ।
कोमलाभा कबककण्ठा करुणा करुणामयी ।
ककरोषी करा कर्णा कर्त्रहस्ता कुलोदया ।
ककुस्था सागरोद्भूता काकमध्यसिन्धुवासिनी ।
कार्त्तिकेशी कार्त्तिकस्था कार्त्तिकप्राणपालनी ।
करुणानिधिपूज्याच काकिणीया क्रियाकला ।
कल्पस्था कल्पनिलया कल्पातीताच कल्पिता ।
कुलपा कुलविज्ञाना कामिणी कालवात्रिका ।
कैवल्यदा कोरकस्था कलमंजीररञ्जिनी ।
कलयन्तीकालजिह्वा किंकरासनकारिणी ।
कुमुदा कुशला कुशलानन्दा कौद्रल्याकाशवासिनी ।
केशापहा सहेत्रीच कैवल्यगुणसंभवा ।
एकाकिनी अर्करूपा कुवला कर्कटास्थिता ।
कर्कोटकाकोष्ठरूपा कूटवह्निकरास्थिता ।
कूजन्ती मधुरध्वानं कामयन्ती सुलक्षणम् ।
केतकी कुसुमानन्दा केतकीपुष्पमण्डिता ।
कर्पूरपूरकाचिरा कर्पूरभक्षणप्रिया ।
कपालपात्रहस्ताचकपालचन्द्रधारिणी ।

कामधेनुस्वरूपा च कामधेनुक्रियान्विता।
कश्यपाकाश्यपाकुन्ती केशान्ता केशमोहिनी।
कालकर्त्री कूपकर्त्री कुलपा कामचारिणी।
कञ्चुलाभा कञ्चुलस्था कुपिता कोपघातिनी।
केलिस्था केलिकलिता केपना कर्पटास्थिता।
कलातीता कालविद्या कालात्मपुरुषोद्भवा।
कष्टहा काष्ठकुष्ठस्था कुष्ठहा कष्टहा कुला।
कालिकास्फुटकर्त्री च काम्बोजा कामनाकुला।
कुशलास्था काककुष्ठा कुम्भस्था कुम्भमध्यगा।
कुण्डलाकारचक्रस्था कुण्डगोलोद्भवा कफा।
कपित्थाग्ररसा काशा कपित्थबोधकारिणी।
कहोड़ी कहड़ा काड़ा कंकाला भावकारिणी।
कनका कनकाभा च कनकाद्रिनिवासिनी।
करञ्जा कर्पटी कर्णा कपाकार्पासवासिनी।
कार्पासयज्ञसूत्रस्था कूटब्रह्मार्थसाधिनी।
कलञ्जभक्षिणी क्रूरा क्रोधपुञ्जाकपिस्थिता।
कपालीसाधनरता कनिष्ठा कोशवासिनी।
कुञ्जरेशी कुंजरस्था कुंजरा कुंजरागतिः।
कुञ्जस्था कुञ्जरजनी कुंजमन्दिरवासिनी।

कुपिता कोपशून्या च कोपाकोपविवर्जिता ।
कपिञ्जलस्था कापिंजा कपिञ्जलतरुद्भवा ।
कुन्ती प्रेमकथा विद्या कुन्ती मानसपूजिता ।
कुन्तला कुन्तहस्ता च कुन्तकुन्तलमोहिनी ।
कान्ताङ्घ्रिसेविता कान्ता कुशला कौशलावती ।
कोशहन्त्री ककुस्था च ककुपस्थवनवासिनी ।
कैलासशिखरानन्दा कैलासगिरिपूजिता ।
कीलालनिर्मलाकारा कीलालमुग्धकारिणी ।
कुतुका कुट्मली कूटा च कुट्मला मोदकारिणी ।
क्रौंकारी क्रौङ्करी काशी क्रः शब्दस्था किरातिनी ।
कूजन्ती सर्ववचनं कारयन्ती कृताकृतम् ।
कृपानिधिस्वरूपा च कृपासागरवासिनी ।
केवला केवलाकारा केवलानन्दकारिणी ।
कामिजा कामदोषघ्नी कृपाकपटकुट्टिता ।
कृशांगी क्रमभंगस्था किंकरस्था करास्थिता ।
कामरूपा कान्तरता कामरूपस्थसाङ्गिदा ।
कामरूपपीठदेवी कामरूपांकजा कुजा ।
कामरूपा कामविद्या कामरूपादिकालिका ।
कामरूपकलाकाम्या कामरूपकुलेश्वरी ।

कामरूपजनानन्दा कामरूपकुशाग्रधीः ।
कामरूपकराकाशा कामरूपतरुस्थिता ।
कामालजा कामफला कामरूपविहारिणी ।
कामशास्त्रार्थमध्यस्था कामरूपक्रियाकला ।
कामरूपमहाकाली कामरूपयशोमयी ।
कामरूपपरानन्दा कामरूपादिकामिनी ।
कुलमूलकामरूपपद्ममध्यनिवासिनी ।
कृताञ्जलिप्रियाकृला कृत्यादेवीस्थिताकटा ।
कटकाकाटिकाकोटा कटिघण्टाविनोदिनी ।
कटिस्थलकराकाशा कात्यायनसुसिद्धिदा ।
कात्यायनी काचलस्था कामचन्द्राननाकथा ।
काश्मीरदेशनिरता काश्मीरी कामिकर्मजा ।
कृषिकर्मस्थिताकौर्मा कूर्मपृष्ठनिवासिनी ।
कलघण्टानादरता कलमञ्जीरमोहिनी ।
कलयन्ती शत्रुवर्गान् क्रोधयन्ती गुणागुणम् ।
कामयन्ती सर्व्वकामं काशयन्ती जगत्त्रयम् ।
कौलकन्या कालकन्या कौलकालकुलेश्वरी ।
कौलमन्दिरसंस्था च कुलधर्म्मविडम्बिनी ।
कुलधर्म्मरताकारा कुलधर्म्मनिवासिनी ।

405

कुलधर्म्मपरिगुप्ता च कुलधर्म्मसमृद्धिदा ।
कौलभोगमोक्षदा च कौलभोगेन्द्रयोगिनी ।
कौलकुन्दानवकुलश्वेतचम्पकमालिनी ।
कुलपुष्पककान्ता च कुलपुष्पचयोद्भवा ।
कौलकोलाहलकरा कौलकर्म्मप्रियक्रिया ।
काशीस्थिता काशिकन्या कलिकाप्रिया कुथा ।
काष्ठासनप्रिया काका काकपक्षा कपालिका ।
कपालरसभोग्या च कपालनरमालिनी ।
कपालस्था च कापाली कपालसिद्धिदायिनी ।
कपाला कुलकर्त्री च कपाललिखनास्थिता ।
कथना कपणाशीदा कपा कपणसेविता ।
कर्म्महन्त्री कर्म्मगता कर्म्माकर्म्मविवर्जिता ।
कर्म्मसिद्धिरता कार्म्मी कर्म्मज्ञाननिवासिनी ।
कर्म्मधर्म्मसुशीला च कर्म्मधर्म्मवशंकरी ।
कनकाब्जसुनिर्म्माणमहासिंहासनस्थिता ।
कनकग्रन्थिमालाढ्या कनकग्रन्थिभेदिनी ।
कनकोद्भवकन्या च कनकाम्भोजवासिनी ।
कालकूटादिकूटस्था कीटशब्दान्तरस्थिता ।
कंकपक्षिनादमुखा कामधेनूद्भवा कला ।

कंकणाभा कलधौता कर्द्दमा कर्द्दमास्थिता।
कर्द्दमस्थजलाच्छन्ना कर्द्दमस्थजनप्रिया।
कमठस्था कामठस्था कणस्था कंसनाशिनी।
कामप्रिया कंसहन्त्री कंसाज्ञानकरालिनी।
कांचनाभा कांचनाढ्या कामदा क्रमदा सदा।
कान्तभिन्ना कान्तचिन्ता कमलासनवासिनी।
कमलासनसिद्धिस्था कमलासनदेवता।
कुत्सिता कुत्सितरता कुत्साशापविवर्जिता।
कुपुत्रा रक्षिका कुल्या कुपुत्रमानसापहा।
कुजरक्षाकरी कौजी कुब्जाख्या कुब्जविग्रहा।
कुनखी कुपदी कुस्था कुर्बुरी कुधनी कुदा।
कुप्रिया कोकिलानन्दा कोकिलाकामदायिनी।
कुकामिनी कुबुद्धिस्था कुर्परासनमोहिनी।
कुश्लोककुलरोकस्था कुशासनसुसिद्धिदा।
कौशिकी देवताकन्या कणादवाक्यसुप्रिया।
कुसौख्यदा कुमित्रस्था कुमित्रशत्रुघातिनी।
कंकालनिकरा कुस्था कुस्थिताकर्णदायिनी।
सुकर्णा कुकर्णकरणी कर्णवर्द्धविमोहिनी।
कर्णशोधनकर्त्री च कालास्त्रधारिणी कुगा।

कुगतिः कालसुगतिः कुबुद्धिः कुलविनाशिनी।
कलिकालफलोत्पन्ना कलिपावनकारिणी।
कलिपापहराकाली कालसिद्धि मुमुक्षदा।
कालिदासवाक्यगता कालिदासस्य सिद्धिदा।
कलिशिखाकालशिक्षा कन्दशिखा परायणी।
कमनीयभावरता कमनीयसुभक्तिदा।
करकाजलरूपा च कच्छावादकराकरा।
कंचुवर्णा काकवर्णा कोणरूपा कषायगा।
क्रोष्टुनादरता कीता कातरा कातरप्रिया।
कातरस्था काकतंका कातरानन्दकारिणी।
कामर्द्दतरूद्भूता काममर्द्दविभाविनी।
कष्टहानिः कष्टदात्री कष्टलोकविविक्तदा।
कायगता कायसिद्धिः कायानन्दप्रकाशिनी।
कायगन्धहरा कुम्भा कोलकुन्दकठारिणी।
कठोरतरुसंस्था च कठोरलोकनाशिनी।
कुमार्गस्थापिता कुप्रा कार्पासतरुसंभवा।
कार्पासवृक्षसूत्रस्था कवर्गस्था करोत्सवा।
कर्णाटीकर्णसम्भूता कर्णाटीकर्णपूजिता।
कर्णास्थिरतिका कर्णा कर्णस्था कर्णकुण्डला।

408

कुण्डलादेशनमिता कुटुम्बकुम्भकारिका।
कार्पासकोमला कृष्णा कृष्णहस्ताम्बुजार्चिता।
कृष्णाङ्गी कृष्णदेहस्था कुदेशस्था कुमंगला।
क्रूरकर्म्मस्थिता कोरा किराता कलकामिनी।
कालरात्रिप्रिया कामा कारुवाक्यरता प्रिया।
कज्जलवर्णा कौमुदी कुज्योत्स्ना कमलप्रिया।
कलना सर्व्वभूतानां कापित्थवनवासिनी।
कटुनिम्बस्थिता कास्था कवर्गास्था कवर्गिका।
करातच्छेदिनी कार्य्या कार्य्याकार्य्यविवर्ज्जिता।
कात्यायनादिकल्पस्था कात्यायनसुखोदया।
कुलेत्रस्था कुलारिघ्ना करणादिप्रवेशिनी।
काकालिका कालकला कीलिता सर्व्वकामिनी।
कीलितापेक्षिता कूटाकलिशब्दविनाशिनी।
कुङ्कुमागन्धनिलया कुटुम्बभवनास्थिता।
कुंकथा कारणानन्दा कवितारसमोहिनी।
काव्यशास्त्रानन्दरता काव्यपूज्या कवीश्वरी।
कठकादिहस्तिरथहयवृन्दाभिमर्द्दिनी।
कितवा क्रूरधूर्त्तस्था केकाशब्दनिवासिनी।
कैं केवलान्विता केता केतकीपुष्पमोहिनी।

409

कैं कैवल्यसुखोल्लासा कैवल्यधनदायिनी ।
कवीधनीन्द्रजननी कादरास्था कलाङ्किनी ।
कुडड्वान्ता कान्तिशान्ता काङ्क्षापारमहंसगा ।
कातिचिन्ता कान्ताचिन्ता कथगा काथिभोजना ।
कुंकुमासक्तहृदया केयूरहारमालिनी ।
काश्मीरीकेशकन्यस्था कैशोरजनमण्डिता ।
कलिकामध्यनिरता कोकिलास्वरगामिनी ।
कूरदेहहरा कुम्बा कुटुम्बाकरमोदिनी ।
कुण्डलीश्वरसंवादा कुण्डलीश्वरमध्यगा ।
कालसूक्ष्मा कालयज्ञा कालाहारकरी कुहा ।
कलहस्ताप्रिया चैव कलहा कामहा कुली ।
कुरङ्गेशी कुरङ्गस्था कौरङ्गी कुन्तलापहा ।
कुललक्ष्मीः कथावुद्धिः कथाध्याननिवासिनी ।
कुतराकातरनता कृतार्थकरणी कुषी ।
कलावस्था कामुकस्था कालिकाभाङ्गदोषजा ।
कुंकुमाकारकमला कुसुमास्त्राग्निभूषणा ।
किञ्जल्काकैतवा केशा कमनीयजलोदया ।
कुमध्यस्था कुकल्पा च कुलपङ्क्तिप्रकाशिनी ।
कुलभ्रमरदेहस्था कुलभ्रमरनादिनी ।

4/0

ककारकूटसर्व्वाङ्गी ककाराद्यक्षमालिनी।
कला सा केवला शोका कालदोषविहारिणी।
कालभेदकरा काष्ठा कर्षदा सा ककुत्स्थला।
कुवासाः कवरीकर्णा कुसर्व्वा कुलपालिनी।
कुरुपूज्या कुरुश्रेष्ठा कुरूणां ज्ञाननाशिनी।
कुतूहलरता कान्ता कुव्याप्ता काष्ठरंधना।
कषाययातकस्था च कषायरसोद्भवा।
कतिविद्या कुष्ठदात्री कुष्ठिदेशविसर्जनी।
काष्ठासनगता कार्य्याश्रया काश्रयकौलिका।
कौलिकासनमन्त्रस्था कौलिकाध्यानवासिनी।
कूपस्था कूपजननी कूपाच्छिन्ना किलध्वजा।
केशवा केशवानन्दा केश्यादिदानवापहा।
केशरांगजकन्या च केशरांगजमोहिनी।
किशोरार्च्चनयोग्या च किशोरादरदेवता।
कान्ताश्रीःकरणी कुल्या कर्पटप्रिययातिनी।
कुकामजानिता क्रौञ्चा क्रौञ्चस्था क्रौञ्चवासिनी।
कुपस्था कूपवुद्धिस्था कूपमाला मनोरमा।
कुलपुष्पाश्रया कान्ता क्रमदा क्रमदाक्रमा।
कुविक्रमा कुक्रमस्था कुण्डली कुलदेवता।

कौण्डिन्यनगरोद्भूता कौंडिन्यगोत्रपूजिता।
कपिराजस्थिता कापि कपिबुद्धिबलोदया।
कपिध्यानपरमास्या कुथवस्या कुसाह्निदा।
कुलासंगा कौलसंगा कुलमत्ता कुलानिला।
कविचिन्ता कालाचिन्ता काष्ठचिन्ताकरीन्द्रजा।
करीन्द्रा कमलेशश्री: कोटिकन्दर्पदर्पहा।
412
कोटितेजोमयी कोट्या कौटीरपद्ममालिनी।
कोटिरमोहिनी कोटिकोटिविधूद्भवा। कोटि
कोटिसूर्यसमानास्या कोटिकालानलोपमा।
कोटिरहारललिता कोटिपर्व्वतधारिणी।
कुचयुग्मधरा देवी कुचकामप्रकाशिनी।
कुचानन्दा कुचाह्लन्ना कुचकाठिन्यकारिणी।
कुचयुग्ममोहनस्था कुचकामातुराकुचा।
कुचयौवनसंमोहा कुचमर्दनसौख्यदा।
काचस्था काचदेहा च काचपूरनिवासिनी।
काचयस्ता काचवर्णा कीचकप्राणनाशिनी।
कमललोचनप्रेमा कामलाक्षी मनुप्रिया।
कमलाक्षी कमलजा कमलास्या करालजा।
कमलांघ्रिद्वया काम्या कराख्या करमालिनी।

कवषमाधरा कन्या कल्कबुद्धिप्रदायिनी ।
कमलोद्भवपुत्री च कमलापुत्रकामिनी ।
किरन्ती किरणाच्छन्ना किरणप्राणवासिनी ।
काव्यप्रदा काव्यचित्ता काव्यसारप्रकाशिनी ।
कलया कल्पसुजननी कल्पभेदासनस्थिता ।
कालेच्छा कालसारस्था कालमारणघातिनी ।
किरणक्रमदीपस्था कर्मस्था क्रमदीपिका ।
काललक्ष्मीः कालचण्डा कुलचण्डेश्वरप्रिया ।

413

काकिनीशक्तिदेहस्था किंतवा कीर्णकारिणी ।
कच्छा कच्छका क्रौञ्चा काकचंचुपुटस्थिता ।
काकाख्या काकशब्दस्था कालाग्निदहनार्थिका ।
काकभद्रानिला कुत्रा कुपुत्रा क्रतुरक्षिका ।
कनकप्रतिभाकारा करकाङ्का कृतिस्थिता ।
कृतिरूपा कृतिप्राणा कृतिक्रोधनिवासिनी ।
कुत्सिताकारा कुत्सा कुत्सितज्ञानधारिणी ।
कुत्सितदेवस्थिता कुत्सः क्रियादक्षा क्रियातुरा ।
क्रियानिष्ठा क्रियानन्दा क्रतुकर्मप्रिया क्रिया ।
कुशलासवसंसक्ता कुशारिप्राणवल्लभा ।
कुशारिरक्षमदिरा काशीराजवधोद्यमा ।

काशिराजगृहस्था च कर्णाभ्यालम्बहस्थिता ।
कर्णाभरणभूषाढ्या कण्ठभूषा च कण्ठिका ।
कण्ठस्थानगता कण्ठा कण्ठपद्मनिवासिनी ।
कण्ठप्रकाशकारिणी कण्ठमाणिक्यमालिनी ।
कण्ठपद्मसिद्धिकरी कण्ठाकाशनिवासिनी ।
कण्ठपद्मशाकिनीस्था कण्ठषोडशपत्रिका ।
कृष्णाजिनधरा विद्या कृष्णाजिनसुवासिनी
कुतुकस्था कुस्थलस्था कुण्डलालंकृताकृता ।
कलगीता कालहाला कलभंगपरायणा ।
काली चन्द्रकला काञ्चा कुण्डस्था च कुचेलधृ ।
कुचेलघातिनी कञ्जा कञ्जादस्था कजानना ।
कंजकुन्दमुखी कंजा कंजतुण्ड कजीवनी ।
कामझर्झरवाद्यस्था क्रियझंकारनादिनी ।
कणादप्रोक्तसूत्रस्था कीलाललंजसंज्ञका ।
का हासा कपाटस्था कटधूमनिवासिनी ।
कठिनादघोरतरा कुकला पाटलिप्रिया ।
कामचाराब्जनेत्रा च कामझंकारसंक्रमा ।
काष्ठपर्वतसंदाहा कुण्डकोटरनिवासिनी ।
कहोडलमन्त्रसिद्धिस्था काहलाडिण्डिमप्रिया ।

कुलडिण्डिमवाद्यस्था कामडामरसिद्धिदा ।
कुलडामरमध्यस्था कुलढक्कानिनादिनी ।
कोटरागरदोलनादा कर्मवीरवनस्थिता ।
कालादिकरणा शुद्धा करुणानिधिवत्सला ।
क्रतुश्रीदा कृतार्थश्रीः कालतारा कुलोत्तरा ।
कथापूज्या कथानन्दा कथना कथनप्रिया ।
कार्म्मचिन्ता कार्म्मविद्या कालमिथ्यापवादिनी ।
कदम्बपुष्पसंकाशा कदम्बपुष्पमालिनी ।
कादम्बरीपानतुष्टा कामदम्भा कदम्बदा ।
कदम्बपत्रमध्यस्था कुलधाराधरप्रिया ।
कुलदेवशरीरार्द्धा कुलधामा कलाधरा ।
कामलाभूषणाढ्या कामलाभूषणप्रिया ।
कुलीननागहस्ता च कुलीननागवाहिनी ।
कामपूरस्थिता [illegible] कोपा कपालीवल्कलोद्भवा ।
कारागारजनापाल्या कारागारप्रपालिनी ।
क्रियापंक्तिः कालपंक्तिः कार्णपंक्तिः कफोदया ।
कामफुल्लारविन्दस्था कामरूपफलाफला ।
कायफला कायफेना कान्तानाडीफणीश्वरा ।
कामफेरुगता गौरी कायवाणी कुवीरगा । =

कवरीमणिबन्धस्था कावेरी तीर्थसंगमा।
कामभीतिहरा कान्ता कातरीर्द्धुभमोत्तरा।
कविभावहरा भीमा कमनीयभयापहा।
कामभर्गदेवमाता कामकल्पलतामरा।
कमठप्रियमांसादा कमठामर्कटप्रिया।
किमाकारा किमाधारा कुम्भकारमनःस्थिता।
काम्ययज्ञस्थिता काम्या काम्ययज्ञोपवीतिका।
कामयोगासिद्धिकरी काममैथुनयामिनी।
कामाख्या यमुनासंस्था काममायासयोगिनी।
कुरुयागरता योगा कुरुमांसविभक्षिणी।
कुरुरक्तप्रिया कारी किंकरप्रियकारिणी।
कर्णीश्वरी कारणाला करिभक्षा करिप्रिया।
करिशत्रुपृष्ठलग्ना कैलासोपरिसंस्थिता।
कालिरात्रिसिद्धिस्था कालीरात्रिदिनसिद्धिदा।
कलंकरहिता काली कलिकल्मषकालदा।
कुलपुष्पलवङ्गस्थकमलाग्रथिसुभेदिनी।
काम्बोजरंगदेशस्था कुलवासुकिरक्तिका।
कुलशास्त्रक्रियाशान्तिः कुलशान्तिः कुलेश्वरी।
कुशालप्रतिभाकाशी कुलषट्चक्रभेदिनी।

416

कुलषट्चक्रमध्यस्था कुलषट्पद्मदीपनी।
कष्णमार्जारक्रोधस्था कष्णमार्ज्जारयष्टिका।
कुलमार्ज्जारकुपिता कुलमार्ज्जारषोडशी।
कालान्तकवधोत्पन्ना कापिलान्तकघातिनी।
कलहंसकलहंसी कलहार्था कलामला।
कलापपद्मवद्धा च कुद्दोवपद्मसंस्थया।
कास्थानस्थासाक्षिणी च महामोहप्रतिष्ठिता।
अर्ककोटिशतच्छाया आह्निकी किंकरार्चिता।
कावेरीतीरभूमिस्था आग्नेयास्त्रार्कधारिणी।
ईं क्रिं श्रीं कामकमला पातु कैलासवासिनी।
मम श्रीं ईं वीजरूपा पातु काली शिरःस्थलम्।
ऊरुस्थूलाङ्गसकलं उमोक्रा पातु बालिका।
ऊदुमुन्यर्करमणी ऊङ्कोया कुलकर्दमा।
कलापेक्षाकतिमती कूंकारार्ल्हलिपिस्थिता।
क्लीं दीर्घस्वरा क्लृप्ता क्लैं कैलाशकरार्च्चिता।
कैशोरी कैँकरी क्लैं कैं वीजास्थानेत्रयुग्मकम्।
कौमा मतंगयाजिता कौशल्यादिकुमारिका।
पातु मे कर्णयुग्मं तु कौं कौं वीजकरालिनी।
गण्डयुग्मं सदा पातु कुंडली अंकवासिनी।

अर्ककोटिप्रतामासा अक्षराक्षरमालिनी।
आशुतोषकरी हस्तौ कुलदेवी निरंजना।
पातु मे कुलपुष्पाढ्या पृष्ठदेशं सुरोत्तमा।
कुमारी कामलापूर्णा पार्श्वदेशं सदावतु।
देवी कामाख्यिका देवी पातु प्रत्यंगिरा कटिम्।
कटिस्थदेवता पातु लिंगमूलं सदा मम।
गुह्यदेशं काकिनी मे लिंगाधः कुलसिंहिका।
कुलनागेश्वरी पातु नितम्बदेशमुत्तमम्।
कंकालमालिनी देवी मे पातु चोरुमूलकम्।
जंघायुग्मं सदा पातु कीर्तिचक्रा महाविपत्ति।
पातु युग्मं पादसंस्था पाकशासनरक्षिका।
कुलालचक्रभ्रमरा पातु पादाङ्गुलीर्मम।
नखाग्राणि दशविधा तथा हस्तद्वयस्य च।
विश्वरूपा कालनाख्या सर्व्वदा परिरक्षतु।
कुलकुलाधाररूपा कुलमण्डलगोपिता।
कुलकुण्डलिनी माता कुलमण्डितमण्डिता।
काकाननाकाकतुण्डी काकायुः प्रस्वरार्कजा।
काकज्वराकाकजिह्वा काकजिह्वासनस्थिता।
कपिध्वजा कपिक्रोधा कपिवर्णा कपीश्वरी।

418

काकध्वजा काकरूढा काकवालादिकस्वरा।
काककांची विंशातिस्था सदा विंशनखाग्रकम्।
पातु देवी कालरूपा कलिकालफलालया।
वातेवा पर्व्वते वापि शून्यागारे चतुष्पथे।
कुलेन्द्रसमयाचारा कुलाचारजनप्रिया।
कुलपर्व्वतसंस्था च कुलकैलासवासिनी।
महादावानले पातु कुमार्गे कुत्सितग्रहे।
राज्ञोऽप्रिये राजवश्ये महाशत्रुविनाशने।
कलिकालमहालक्ष्मीः क्रियालक्ष्मीकुलाम्बरी।
कलीन्द्रकीलिता कीला कीलालस्वर्गवासिनी।
दशदिक्षु सदा पातु इन्द्रादिदशलोकपाः।
नवच्छिद्रे सदा पातु सूर्य्यादिकनवग्रहा
पातु मां कुलमांसाढ्या कुलपद्मनिवासिनी।
कुलद्रव्यप्रिया सोया षोड़शी भुवनेश्वरी।
विद्यावादे विवादे च मत्तकाले महाभये।
दुर्भिक्षादिभये चैव व्याधिसंकरपीड़िते।
काली कुल्ला कपाली च कामाख्या कामचारिणी।
सदा मां कुलसंसर्गे पातु कौले सुलक्षदा।
सर्व्वत्र सर्व्वदेशे च कुलरूपा सदावतु।

इत्येतत् कथितं नाथ मातुः प्रसादहेतुना।
अष्टोत्तरशतं नाम सहस्रकुण्डलीप्रियम्।
कुलकुण्डलिनीदेव्याः सर्व्वमन्त्रसुसिद्धये।
सर्व्वदेवमनूनांच चैतन्याय सुसिद्धये।
अणिमाद्यष्टसिद्ध्यर्थं साधकानां हिताय च।
ब्राह्मणाय प्रदातव्यं कुलद्रव्यप्रियाय च।
अकुलीने ब्राह्मणे च न देयं कुण्डलीस्तवम्।
प्रवृत्ते कुण्डलीचक्रे सर्व्वे वर्णा द्विजातयः।
निवृत्ते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक्।
कुलीनाय प्रदातव्यं साधकाय विशेषतः।
दानादेव हि सिद्धिः स्यात् ममाज्ञाबलहेतुना।
मम क्रियायां यस्तिष्ठेत् स मे पुत्रो न संशयः।
स न याति यमपदं जीवन्मुक्तः सवासवः।
आसवेन समांसेन कुलवह्नौ महानिशि।
नामप्रत्येकमुच्चार्य्य जुहुयात् कामसिद्धये।
पंचाचाररतो भूत्वा ऊर्द्ध्वरेता भवेद्यदि।
संवत्सरात् ममस्थानमायाति नात्र संशयः।
ऐहिके कामसिद्धिः स्यात् ऐहिके कामसिद्धिदम्।
वशीभूतास्त्रिमार्गस्था स्वर्गभूतलवासिनः।

तस्य भीत्या प्रवदन्ति इन्द्रादिलोकपालकाः।
स एव योगी परमो यस्यार्थेऽहं सुनिश्चला।
स एव खेचरो भक्तो नीवदादिषु कोपमः।
यो लोको प्रजुहोत्येवं सशिवो नच मानुषः।
मतसमाधिगतो नित्यं ध्यानस्थो योगिवल्लभः।
चतुर्व्यूहगतो देवो महेशो नात्र संशयः।
यः प्रधारयते भक्त्या कण्ठे वा मस्तके भुजे।
स भवेत् कालिकापुत्रो विद्यानाथ स्वयं भुवि।
धनेशः पुत्रवान् योगी यतीशः सर्वगो भवेत्।
वामा वामकरे धृत्वा सर्वसिद्धीश्वरो भवेत्।
यदि पठति मनुष्यो मानुषी वा महात्मा।
सकलधनजनेशी पुत्रिणी जीववत्सा
कुलपतिरिह लोके स्वर्गमोक्षैकहेतुः
स भवति भवनाथो योगिनीवल्लभेशः॥
पठति यदिह नित्यं भक्तिभावेन मर्त्यो
हरणमपि करोति प्रातरि प्राणयोगैः।
स्तवन पठन पुण्यं कोटिजन्माघनाशं
कथितमपि नपात्र्याऽहं मांसभक्षः॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रक-

421

-रणो अष्टचक्रप्रकाशे भैरवीभैरवसंवादे महाकुलकुण्डलिन्यष्टो-
त्तरशतसहस्रनामस्तवं कवचं नाम षट्त्रिंशत्पटलः ॥०॥—३६

आनन्दभैरव उवाच ॰

श्रुतं च परमं धर्माधर्मविवेचनम् ।
सर्ववेदान्तसारं च सारात्सारं परात्परम् ।
कुण्डलीस्तवनं श्रुत्वा तुष्टोऽहं जगदीश्वरि ।
इदानीं श्रोतुमिच्छामि स्वाधिष्ठानप्रकाशकम् ।
यदि मे सुकृपादृष्टिरानन्दघनसंचये ।
वद श्रीकुण्डलीयोगस्वाधिष्ठानविभेदनम् ।
यत्क्रमेण भेदः स्यात् तत्प्रकारविनिर्णयम् ।

श्रीआनन्दभैरव्युवाच ॰

महाकाल महावीर आनन्दसागराश्रय ।
योग्यो हि योगमार्गाणामत एव प्रकथ्यते ।
येन क्रमेण चक्रस्य भेदः स्यादमरो भवेत् ।
अमरो जितचित्तादिः क्रोधजित् पावनो वली ।
धर्माधर्मज्ञानरतो योगी भवति सज्जनः ।
परकालदर्शी विज्ञश्च क्रतुश्रद्धापरायणः ।
अहंकारविहीनो यः स योगी भवति ध्रुवम् ।
महावीरसुसंगी च अन्यदोषविवर्जितः ।

महात्मा परमब्रह्मज्ञानी भवति योगिराट् ।
विख्यातः सर्व्वदेशेच किन्तु आश्रयवर्ज्जितः ।
अविद्याग्रन्थिनिश्चेशे विवेकधर्म्मचातकः ।
चतुरो विषमज्ञानवर्ज्जितो यज्ञकृत् शुचिः ।
स भवेत् योगिनीपुत्रो योगानामधिपो भवेत् ।
यदि योगस्थितो मन्त्री वायवीशक्तिनिर्भरः ।
स एव योगी षण्मासादिति मे तन्त्रनिर्णयः ।

यो मे तन्त्राणि जानाति सदर्थज्ञान यानि च ।
स एव योगी परमो मम भक्तो न संशयः ।
यदि वायुपानरतो मन्त्री भवति साधकः ।
ततः स्वाधिस्थानं कुलवरगतं षड्दलगतं
प्रभाकारं विष्णोरतिशयपदं कामनिलयम् ।
महायोगीन्द्राणां मनसि निचयं चारुकिरणम्
शरच्चन्द्रज्योत्स्नायुतमतियनं भाव्यविषयम् ॥
यदा भावक्षेत्रे सकलसुधियो वेदपथ्या
विचारं कुर्व्वन्ति क्षितिगतरतश्रीप्रभृतयः ।
महाविष्णोः पीताम्बरनरपतेः श्यामलतनोः
प्रकाशः स्यात् स्मान्तः पटुनटवरस्याभिनिलयम् ॥
वटच्छायामध्ये निवसति यथा गोकुलकुले

हरिध्यानं कुर्यान्निरवधि महानन्दरसिकः।
स एवात्मा साक्षादिह नरवरः षोडशयुवा
महासर्पारिस्थं स्थितिकरणगं नागशमनम् ॥
मुखे वंशीनादध्वनिसुखाधरं भावयति यः
स एवात्मा नित्यो यतिरिह कुले कोमलदले।
कुलागारे सारे सरसिजसुषड्दलवरे
सुरानन्दश्रीदं दिवि द्रवनकर्त्ता रसमदम्।
सुधाकुन्तं कृष्णं परमपुरुषं भावयति को
महाविद्यासिद्धं कुलवति मनो मानयादिदम्।
मुकुन्दं श्रीकृष्णं रसदलगतं स्वागममतं
मुरारिं पापारिं नवयुवतिहत पद्मसुगतम्।
हृषीकेशं विष्णुं विषयकरणं भावयति को
स योगीन्द्रो ज्ञानी जयति सुकृती कौतुकवताम्।
रमेशं श्रीकृष्णं रसविषयहारं मानसचरं
सरस्वत्या युक्तं कुलरसमयं मुक्तिजड़ितम्।
भजेच्चैतन्यान्तं सुरतरुकरं मोक्षमतये
यतीन्द्रः सश्रीकः प्रचयति निजं भाव्यविषयम्।
पुराणं योगीन्द्रं हरिमखिलपंकामनिलयं
महासूक्ष्मद्वारं कुलवधुरतं मानकरणाम्।

विशालं कृष्णं निजरसकुले कान्तममरं
कृपासाक्षिज्ञानं गुणगुणितदेहं द्राहरहितम्।
महादैत्यं सत्यं कुवलयकरं हन्ति मरणं
अघारीशं श्रीशं शशिमुखिकराम्भोजयजितम्।
तमात्मानं कृष्णं निजकुलदले योऽपि भजति
महाशब्दोत्पन्नं प्रकृतिविकृतिं कारणाकृतिम्।
कृपासिन्धुं कृष्णं कुलवधुघ्राताऽमोदमिलितं
जगन्नाथं स्तौति क्षितिपतिरसौ योगकरणाम्।
विराटं ब्रह्माण्डं करणगमहाविष्णुममरो
विनोदं व्याकर्तुं त्रिभुवनपतिः श्रीपतिरसौ
प्रचण्डे संसारे उदयति सदा भावसदने
महामेघः श्यामः त्रिपथकरणा सागरकुले॥
अमूल्ये संसारे विषयरसना संचयविषं
सकृष्णः श्रीविष्णुः प्रकृतिसदया हन्ति सततम्।
अतः कृष्णो ध्येयः सुरनरगणैः पंचमसुखैः
कुलाम्भोजे षट्केऽमलरसदले ध्यानफलितः॥
किराती डाकिण्या नयनकमलालापमधुरं
धराधारं पूर्णं गगननिलयं कालपुरुषम्।
म- मौगम्यं रम्यं नवनयनलावण्यरसिकं

मुद्रा ध्यायेत् कृष्णं कुरुगणरिपुं यः कलयति ॥
निरालम्बः श्यामः प्रकृतियमुनातीरतरुगः।
कुलीनो गोपीभिः परिमिलितपार्श्वस्थलसुखः
प्रधानक्षेत्रज्ञः क्षितिपतिकराम्भोजयतितः।
प्रकाशात्मा नाथः प्रचयकवशाध्येय इह यः
मनोधर्मच्छन्नं त्रिविधगुणगानाश्रितकरम्।
त्रिकाण्डस्थं खण्डोद्भवनवरसं प्राणरसिकं
सदा स्तौति प्रातःसमयसफले चारुवदनं
महामोक्षक्षेत्रं कुलवधुयुतं कृष्णपरमम्।
गुणेशं राधेशं रजनिविधुगं वेदनिलयं
क्रियादक्षं सूक्ष्मं समयगुणयोगं योगयजितम्।
त्रिकोणस्थं गंगाजलगलितसारं तारकतनुं
महाकालानन्दं गगनघनदुर्लोभसजलम्।
प्रभावीरं तारं तरुणनववपुःश्रीधरवरं
वनोत्फुल्लाम्भोजामलविवचनामानकलया।
महाशोभारूपं कुलपुरुषगं व्याश्रयति यो
स योगी संसारे भवति सबलो योगनिरतः।
मनो यो व्याधाय प्रचुरफलदं कृष्णमखिलं
महाज्ञानोत्साहं गुणिगणमहारिमाणनिचयम्॥

जगत्तारं ब्रह्म निरवधि महाघोरकिरणं

यदालोकस्तौति प्रतिदिनमिहानन्दघटितम्

विकारं सर्वेषां ग्रहगणमिलनं भास्करविधोः

महावाहूलासं शतशतमहापुण्यनिकरं

कुलानन्दं विष्णुं शशिशतघटदामकिरणाम्

मनोगम्यं सूक्ष्मं त्रिगुणजडितं भावयति कः।

कृष्णभक्तिं मुदा कृष्णां ध्यात्वा कला यतिर्भवेत्।

श्रीकृष्णचरणाम्भोजे तस्य भक्तिर्न संशयः।

कृष्णब्रह्म कृष्णब्रह्म चेति ध्यानपरायणः।

स कृष्णास्तं जनं नीला ददाति मयि शंकर।

विना कृष्णपदाम्भोज स्वाधिस्थानं कुतो जयम्।

कृष्णध्यानात् महापद्मभेदं प्राप्नोति शंकर ॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्वाधिस्थानश्रीकृष्णाकिणीसाधनं नाम सप्तविंशत् पटलः ॥० —०॥

आनन्दभैरव उवाच

शृणु नाथ प्रवक्ष्यामि श्रीकृष्णसाधनोत्तमम्।

येन क्रमेण भक्तिः स्यात् कालजालवशो भवेत्।

मम पादाम्बुजे भक्तिर्भवत्येव न संशयः।

भक्तिमान् यः साधकेन्द्रो महाविष्णुं भजेद्यदि
शिवतुल्यो भवेन्नाथो मम भक्तो महीतले ।
श्रीकृष्णं जगदीश्वरं त्रिजगतामानन्दमोदात्मकम्
सम्पूर्णं त्रिगुणात्मकं गुणधरं सत्वादिदैवं परम् ।
निन्द्याथः स्थिति राज्य पाल पुरुषं पंचाननस्थायिनं
श्रीविष्णुं शमषड्दले यदि भजेल्लोकः सशक्तिः सुखी ।
आदौ कामं विसर्गं कुलवधुनियुतं कामवीजं विसर्गं
श्रीकृष्णं वारयुग्मं प्रणवयुगलकं चन्द्रिकाकाशयुक्तम् ।
ब्रह्मद्वन्द्वं भजामि प्रकृति पुरुषिकां राकिणीं तत्परे च
भूयो भूयो भजामि श्रवणगनयनं वह्निजायाविलग्नं ।
एतन्मन्त्रं जपित्वा प्रणवमिति नमोऽन्तं तथादौ मिलित्वा
श्रेयो भूयो नमः स्वास्तिभुवनसहितं दोभयेत्तत्क्षणेन ।
राजश्रीस्तस्य शीर्षे निरवधिवसुधा मन्दिरे सुस्थिरः स्यात्
कालच्छेदं प्रकृत्य प्रवसति सुसुखी ब्रह्मरन्ध्रे च काले ।
ततः प्राणदेवनाथ मम सन्तोषवर्द्धन ।
इदानीं नरसिंहस्य मन्त्रं शृणु महाप्रभो ।
कान्तावीजं समुद्धृत्य युगलं युगलं स्मृतम् ।
महानृसिंहमन्त्रे च पूजयामि नमो द्विठः ।
स्वाधिष्ठाने महापद्मे मनोनिष्पापहेतुना ।

मनो निधाय यो योगी जपेन्मन्त्रं पुनः पुनः।
एतन्मन्त्रजपेनापि सिद्धो भवति साधकः।
एतन्मन्त्रप्रभावेण भावसिद्धिः क्षणाल्लभेत्।
यः साधको भूमिसंस्थः साधयेत्तु हरेर्मनुम्।
वर्णसंख्याक्रमेणैव सिद्धिं प्राप्नोति धैर्य्यतः।
अथ वदे महादेव सर्व्ववर्णसुसाधकम्।
वर्णमालासुसंसक्तो जप्त्वा सिद्धिमवाप्नुयात्।
सिद्धमन्त्रं प्रार्थयते यदि मर्त्यो निराश्रयः।
निर्ज्जने संस्थितो भूत्वा एकाकी दीपवर्ज्जितः।
निःशङ्कः प्रजपेन्मन्त्रं स्वाधिष्ठानाब्जसंवरात्।
वशीकृतं जगत्सर्व्वं येन तत्क्रममाशृणु।
प्रणवं पूर्व्वमुच्चार्य्य मान्तवीजं ततोद्धरेत्।
वह्निवीजसमालग्नमधोदन्तस्वरान्ततम्।
नादविन्दुसमायुक्तं पुनर्व्वीरद्वयं वदेत्।
नरसिंहाय प्रान्ते पुनर्वीरत्रयं वदेत्।
देवीवीजं शक्तिवीजं स्वाहान्तं मनुमुद्धरेत्।
एतन्मन्त्रप्रयोगेन कुण्डलीवशमानयेत्।
स्वाधिष्ठाने स्थिरीभावं प्राप्नोति साधकाग्रणी।
सर्व्वेषां प्राणगो भूत्वा शीतलोऽसौ महीतले।

प्रीतं रौद्रं समं तस्य पापापापं जयाजयम्।
धर्माधर्मं सदा ज्ञानं नित्यज्ञानं समाप्नुयात्।
पुनः श्रीकर्णमन्त्रो [illegible] सर्वदेवनिषेवकाः।
यज्ज्ञात्वा देवताः सर्वा सर्वदिग्मुखपालकाः।
तत्प्रयोगं महादेव शृणु सिद्धेश्वलक्षणम्।
विना कर्णाश्रयेणापि ब्रह्मानुष्ठानकुत्रचित्।
न तुष्टा कुण्डली देवी पशुभावं विना प्रभो।
पशुभावे ज्ञानसिद्धिर्वीरभावे हि मोक्षभाक्।
दिव्यभावे समाधिस्थो जीवन्मुक्तः स उच्यते।
स्वान्तबीजं समुद्धृत्य प्राक्कं वा भस्वरान्वितम्
नादबिन्दुसमाक्रान्तं कर्णसंबोधनं पदम्।
पुनः पूर्वमनुं युक्त्वा त्र्यक्षरात्मा महामनुः।
एतन्मन्त्रत्रयं कृत्वा योगी भवति योगिराट्।
योगोऽयं परमाह्लादकारको मन्त्ररूपकः।
बहुभिः किं कथनीयं यः करोति फलं लभेत्।
ध्यायेत् श्रीगोपिकानाथं राकिणीमण्डलेश्वरम्।
जगतां सत्वनिलयं श्रीकर्णं गोकुलेश्वरम्।
स्वाधिस्थाने स्थितं श्यामं वृहद्भुजचतुष्टयम्।
शंखचक्रगदापद्ममहाशोभामनोरमम्।

सर्व्वविद्यागतं काम्यं श्रीगोविन्दं सुशीतलम् ।
महामोहहरं नाथं वनमालाविभूषितम् ।
कोटिकन्याकराम्भोज यजितं सर्व्वसंगतम् ।
किरीटिनं महावीरं वालेन्दुं चूड़यान्वितम् ।
गुंजमालाशोभितांगं श्रीनाथं परमेश्वरम् ।
पीताम्वरं सर्व्वहास्यं षटपद्मदलमध्यगम् ।
कामिनीप्राणनिलयं वसुदेवसुतं हरिम् ।
एवं ध्यात्वा षड्दले सदावक्षःस्थकौस्तुभम् ।
राजराजेश्वरं सौरिं भाव्यं श्रीवत्सलाञ्छनम् ।
स्वाधिष्ठानगतं ध्यायेे मुरारिं सिद्धिगोचरः ।
एवं ध्यात्वा पुराब्रह्मा नारायणगुणोदयः ।
मनःकल्पितद्रव्यैश्च पूजयेत परमेश्वरम् ।
षड्दलेच महापद्मे संध्याय हरिमाभजेत् ।
षोड़शोपचारयुक्तैः मानसद्रव्यसंभवैः ।
मनःकल्पितपीठेच स्थापयित्वा हरिं गुरुम् ।
योगेश्वरः कर्णापीशं राधिकारमणीश्वरम् ।
एकान्तचित्तेनारोप्य कर्णपीठे प्रपूजयेत् ।
तत्र दलाष्टकं पद्मं तत्राष्टकोणकार्णिकम् ।
वेदद्वारोपशोभंच सन्निर्माय मनोहरम् ।

पुनः पुनर्मुदा ध्याये षड्दलेषु दलाष्टकम्।
पंचोपचारैर्दशकैः श्रीविष्णुं परिपूजयेत्।
गन्धादयो नैवेद्यान्ताः पूजा पंचोपचारिका:।
आसनं स्वागतं पाद्यं अर्घ्यमाचमनीयकम्।
मधुपर्काचमनस्नानंवसनाभरणानिच।
सुगन्धसुमनोधूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश।
विष्णोराराधने कुर्यात् सर्व्वत्रविधिरेयतु।
विधिः स्यात् कृष्णविश्वेश समुद्भूतस्य सत्पतेः।
दशोपचारकथनं शृणु मे वल्लभप्रभो।
पाद्यमर्घ्यं तथाचामं मधुपर्काचमनं तथा।
गन्धादयो नैवेद्यान्ता उपचारा दशक्रमात्।
विष्णुं संपूजयेद्धीमान् हविष्याशी जितेन्द्रियः।
सर्व्वदा परमानन्दः कलिकारससेवकः।
सर्व्वज्ञानधरो वीरो विवेकी सर्व्वदर्शकः।
संभावयेत् स्वाधिस्थाने निरन्तरं महाशुचिः।
वालकः क्रीड़याव्याप्तो भावज्ञानी निरामयः।
स भवेत् कालिकापुत्रो यः कृष्णभाजनापरः। कृष्णं संचिन्तयेन्मूलकमलोर्द्धदः
स भवेत् कालिकापुत्रोऽष्टाङ्गसिद्धिगुणान्वितः।
मानसैः पूजनं कृत्वा शंखस्थापनमाचरेत्।

432

अकृत्वा मानसं यागं न कुर्य्याद्बहिरर्च्चनम् ।
मूलमन्त्रे देवताया आवरणं दैवतं यजेत् ।
देवस्य दक्षिणस्थांश्च पूर्व्वपश्चिमसंस्थितान् ।
पूजयेद्गन्धपुष्पाद्यैस्तत्तन्मन्त्रेण मन्त्रवित् ।
ततः श्रीकृष्णपादाब्जध्यानं कुर्यान्मनोलयम् ।
एवं क्रमेण तत्पद्मे स्थिरो भवति योगिराट् ।
यः करोति शुद्धभावं महामोहहरं हरिम् ।
स्थापयित्वाथ षट्पद्मे महामोक्षमवाप्नुयात् ।
यः प्रधानो गुणज्ञश्च समे शास्त्रार्थमाश्रयेत् ।
इहकाले शक्रलोके निवसत्येव योगिराट् ।
पादाम्भोजे मनो दद्यात् नाथ किंजल्कचित्रिते ।
जंघायुग्मे चारुरामकदलीकाण्डमण्डिते ।
ऊरुद्वये मत्तगजकरदण्डसमप्रभे ।
गंगावर्त्तगभीरे तु नाभौ शुद्धमलेऽमले ।
उदरे वक्षसि तथा हारश्रीवत्सकौस्तुभे ।
पूर्णचन्द्रायुतप्रख्ये ललाटे चारुमण्डले ।
शंखचक्रगदाम्भोजदोर्द्दण्डपरिमण्डिते ।
सहस्रादित्यसंकाशे किरीटकुण्डलद्वये ।
स्थाने ध्येसु [illegible]यजेन्मन्त्री विशुद्धः शुद्धचेतसा ।

433

मनो निवेश्य कर्णे वै तन्मयो भवति ध्रुवम् ।
यावन्मनोलयं याति कर्णे स्वात्मनि चिन्मये ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे श्रीकर्णस्वाधिष्ठानप्रवेशो नामाष्टत्रिंशत पटलः ॥०॥ ३८ ॥

आनन्दभैरव्युवाच

अथ नाथ प्रवक्ष्येऽहं संसारसाधनोत्तमम् ।
येन साधनमात्रेण योगी भवति तत्क्षणात ।
अनायासेन सिद्धिः स्यात यद्यन्मनासि वर्त्तते ।
त्रैलोक्यं मोहयेत क्षिप्रं त्रैलोक्यं वशमानयेत ।
स्वाधिष्ठानगतं विष्णुं सारं सारप्रदं हरिम् ।
यः स्तौति प्रत्यहं भक्त्या स्वाधिष्ठानाम्बरे स्थितम् ।
वादिलान्तवर्णयुक्तं हिमांशुशतशोभितम् ।
रामेण सहितं नित्यं जगतां साक्षिणं वरम् ।
प्रमदग्धकराम्भोज सेवितं सर्व्वसेवितम् ।
अनन्तं सत्वनिलयं वासुकिसंगमाकुलम् ।
अष्टहस्ताग्रहं श्रीदं नानालंकारशोभितम् ।
स्वाधिष्ठानगतं ध्यात्वा प्रीतलो जायते वशी ।
तत् स्तोत्रं शृणु मे नाथ यत पाठात सिद्धिमाप्नुयात

ब्रह्मादयः सुराधीशा मुनयः कुम्भकाः।
एतत् स्तोत्रं पुराकृत्वा जीवन्मुक्ता महीतले।
यतः श्रीकालिकानाथ स्तोत्रं शृणु महाफलम्
श्रीविष्णोरद्भुतकर्म्मणो ब्रह्मा ऋषिस्त्रिष्टुपछन्दः श्रीविष्णुनारायणो देवता सर्वस्तोत्रसारकवचं मन्त्रसिद्ध्यर्थे विनियोगः॥
ॐ श्रीकृष्णं जगतामधीशमनघं ध्यानादिसिद्धिप्रदम्।
गोविन्दं भवसिन्धुपारकरणं सन्तारणं कारणम्।
श्रीविष्णुं वनमालिनं नरहरिं नारायणं गोकुलम्।
योगेन्द्रं नरनाथमादिपुरुषं वृन्दावने भावये॥
मोक्षश्रीसहितं कृतान्तविकृतिं धर्मार्णवं सुन्दरम्
श्रीबालं बलराम भावविमलं नित्याकुलं सत्कुलम्।
श्रीश्यामं कनकादिहारविगलद्दामोदरं श्रीधरम्
तं वन्दे हरिमीश्वरं गुणवती मायाश्रयं स्वाश्रयम्।
वैकुण्ठे धामशेषदोषरहितं सायुज्यमोक्षात्मकम्।
नानारत्नविनिर्म्मितामलस्रजा राजेन्द्रचूडामणिम्।
शोभामण्डलमण्डिता सुरतरुच्छायाकरं योगिनम्।
विद्यागोपसुतारतं गुणमयं वाक्सिद्धये भावये॥ २
स्वाधिष्ठाननिकेतनं परजनं विद्याधरं मायिनं
श्रीनाथं कुलयोगिनं त्रिभुवनोल्लासैकबीजं प्रभुम्।

संसारोत्सवाभावनाभनिरतं सर्व्वादिदेशं सुखम्।
वन्देऽहं वरसर्पशत्रुसफरो पृष्ठे स्थिरानन्दनम्॥ ४
भावानां भवभावयोगजड़ितं जाड्यापहं भासुरं
नित्यं शुद्धगुणं गभीरधिषणामोदैकहेतुं पतिम्।
कीर्त्तिक्षेमकरं महाभयहरं कामादिदेवं शिवम्
सतत षडदलमध्यगेहरुचिरानन्दैकदेशास्पदम्॥ ५॥
वन्दे श्रीपतिमच्युतं नरहरिं दैत्यारिमित्वाकुगम्
गन्धर्व्वप्रभृतेः सुगायनरतं वंशीधरं भावदम्।
बलानामधिपं गतिस्थमचलं गोवर्द्धनाधारणम्
विश्वामित्रतपोधनादिमुनिभिः संसेवितं तैजसम्॥ ६॥
वन्दे गोविन्दपादाम्बुजमजयाजितं भक्तिमार्गे स्थितोऽहं
सत्वोतपन्नं प्रफुल्लं परगुणलासितं चारुमंजीरहारम्।
हंसाकारं वरदगरुड़ानन्दपृष्ठे निमग्नं
बन्धूकारक्तसारान्वितचरणतलं सर्व्वदा शान्तवालम्॥ ७॥
राधिकायाः प्रेमसिन्धुं नववयसि गतं गीतवाद्यादिरागं
रागोतपन्नं सुसकलगुणादं गोकुलानन्दचक्रम्।
वाणीलक्ष्मीप्रियं तं त्रिभुवनसुजनाह्लादकर्त्तारमाद्यं
वन्दे सिद्धान्तसारं गतिनातिरहितं सारसंकेतिताग्रम्॥ ८
कामं कामालकं तं विधुगतशिवसं कथासम्बोधनान्तं

वीजं कामं पुनस्तत पुरुयसुरतकं तारयित्वा भजेऽहम्।
श्रीरुयाणां करुणाकरुणां निरवधिसुखदं सुप्रकाशं प्रसन्नं
स्वाधिस्थानाख्यपद्मेऽमलमनसि गतो भावसिद्धिस्थलस्थम्॥
आकाशे चारुपद्मे रसमयवनगं रक्तवर्णप्रकाण्डं
स्वात्मारामं नरेन्द्रं सकलनतिकरं कामहन्तारमादिम्।
आद्यन्तःस्थानहीनं विधिवहगमनं सेन्द्रलीलासनाभं
भावीतसाहं त्रिसर्गं स्थिति परममदं भावये भावसिद्धै॥१०॥
सर्व्वेषां ज्ञानदानं रसदलकमले सर्व्वदात्वं करोषि
हेमानन्दं सुधाविप्रियधनगुणिनामेकयोगप्रधानम्।
मायापूर्णं प्रपूर्णं प्रचयनवरसप्रीतिदेशप्रवेशः
श्रीराज्यहेमहीने मयि धनरहिते दृष्टिपातं तवादौ॥
कालीश्रीकुण्डलिन्याः परगृहनिगतं तारकब्रह्मरूपं
मुक्तिच्छत्रप्रवेशं निधनजलसुखं भार्य्यया क्रीडयन्तम्।
संज्ञादेत्रं त्रिनेत्रं नवमणिमयसतपूरुसंस्थाभिषेकं
ध्यात्वाहं प्रणमामि सूक्ष्मकमले लोकप्रियं व्यापिनम्॥
वैकुण्ठं करुणमीडे कुरुभवविभवहेमहन्तारमन्तं
शान्तानं ज्ञानगम्यं सुनयनकमले पालयन्तो चिमागम्।
वन्द्यादिं पूतनारिं त्वघवकनरकध्वान्तसंघारसूनं

मान्यं सर्व्वेषु लोके ष्वतिशयमनसे केवलं निर्म्मलं च ॥
ओंकारं कारणाख्यं सुगतिमतिमतं मातृकामंत्रसिद्धं
सिद्धानामादिसिद्धं सुरारिपुशमनं कालरूपं रिपूणाम् ।
मूलोर्द्ध्वे षड्दलान्ते मनसि सुविमले पूरयित्वा मुकुन्दं
नित्यं संभावयेऽहं निजतनुसमतासिद्धये पूजयामि ॥
त्वं साक्षादखिलेश्वरः प्रियकरः श्रीलोकहस्तार्च्चितः
तौरणीशप्रलयात्मकः प्रियगुणी ज्ञानीत्वमेको महान् ।
यद्येवं मम पामरस्य कलुषं श्रीधर्म्महीनान्वितं
कृत्वा पारतले यदीह नियतं व्याप्त वक्षालग ॥
राधाकृष्णपदामला म्बुजतले चैतन्यमुक्ताकुलं
सर्व्वत्रादिगमागमं त्रिगमनं निर्व्वाणमोक्षास्थितम् ।
वालं वैरिविनाशनं सुखमयं कैवल्यमोक्षास्पदम्
देवं देवगणार्च्चितं वसदले आरोपयामि प्रभो ।
निर्द्दिष्टं भुवनाश्रयं यतिगतिं निर्व्वाणमोक्षास्थितं
निर्व्वाणादिकमोहदानचपलं श्रीचंचलासंकुलम् ।
वन्देऽहं परमेश्वरं सकलदैत्यानां वलप्राणहं
हंसारूढनिरञ्जनं त्रगणगतं वाणीपतिं भूपतिम् ॥
वाञ्छाकल्पलतापतिं कुलपतिं विद्यापतिं गोपतिं

श्रीविद्यापतिमादिदेववपुषं विश्वेश्वरं प्रेमगम् ।
श्रीगङ्गोद्भवकालसत्वनिकरं त्वां भास्करं भावये
सिद्धानामतिचिह्नयोगनिकरं रत्नत्वमाहौहि माम् ॥
प्रभो निःशंकेतं गुणमणिमतं श्रेयसि मतं
महान्तस्थं सुस्थं विगलितमहाप्रेमसुरसम् ।
मुदा वन्दे कृष्णं हरकरतलाम्भोजयजितं
प्रभापुञ्जं साराश्रयपदमदं कामकुशलम् ॥
महामन्त्रच्छायं रजनिमिलितध्वान्तजड़ितं
त्रिकोणस्थं कुस्थं कुगतिकुगतिं कारणगतिम् ।
प्रलीनं संस्थानं जगति जगतां धर्ममुदयं
रमेशं वागीशं विधिगतपदं शम्भुनिगतम् ॥
त्रिकालं योगानां नयनकमलं शब्दनिरतं
कुलानन्दं गोपीजनहृदयगं गोपयाजितम् ।
विधानं त्वामिन्द्रं सुकृतरमुपेन्द्रं मुररिपुं
मुदा त्वां वन्देऽहं त्वमपि चपलं मे नरहरे ॥
कुलालापश्रद्धामयमखिलसिद्धिप्रदमनं
मलातीतं नीतं सुरनरसतां प्राणभरणम् ।
विनोदं नारीणां हृदयरसिकं शोकरहितं

विराजं यज्ञानां हितमति गुणं याति शरणाम् ।
एतत सम्बन्धमानी मम कुलशिरसि स्थायिनं पातु नित्यं
गोपीनां प्राणनाथः प्रतिदिनमनिशं भालदेशं प्रपायात ।
भालाधोदेशसंस्थं समवतु सहसा राजराजेश्वरेशः
स्थितन्नो शाल्मनेत्रं सुखमाखिलभवः कु कुल्याभ संस्थम्
एतस्थं पातु शौरिः प्रतिदिनममरो लिंगवाह्यं कटिस्थं
शम्भुप्रेमाभिलाषी ममतु कुलपदं गुह्यदेशं प्रपायात ।
आनन्दोद्रेककारी सकलतनुगतं पातु नित्यं मुरारिः
दैत्यारिश्चोरुमूलं नरहरिरवता जंघमापादपद्मम ॥
एतत स्तोत्रं पठेद्विद्वान नियतो भक्तिमान शुचिः ।
स्थिरो भवति मासेन षड्दले सर्व्वसिद्धिभाक ।
इति श्रीरुद्रयामले उत्तरतन्त्रे श्रीकृष्णस्तवकवचं नाम नवत्रिंशत पटलः ॥ ० ० । ००॥

आनन्दभैरव्युवाच ।
अथ नाथ प्रवक्ष्यामि शृणु स्नाव हितो मम ।
येन क्रमेण लोकानां योगकार्य्यदृढ़ो भवेत ।
सर्व्वत्र भावनाग्रंथः सिद्धो भवति भैरवः ।

यो भवेद्भैरवो देवो भुवने हि स सर्व्वगः।
क्रियादक्षो महावीरो वीरवल्लभभा वः।
भावयित्वा वर्णमालामध्ये जप्त्वा दिवानिशम्।
हविष्याशी प्राणवायुरतो वेदान्तपारगः।
सिद्धान्तवेत्ता सर्व्वेषां शास्त्राणां निर्णयप्रियः।
गाथाज्ञानी परानन्दो विवेकी भावतत्परः।
भाववेत्ता रहस्यार्थज्ञानी कोविदवेदवित्।
वाक्यसिद्धिज्ञानपरः सत्यवादी दृढासनः।
भावयेत् षड्गतं वर्णं ध्यानं कुर्य्यात् पृथक् पृथक्।
षट्पद्मस्थो भावयेद्वै वैष्णवो ध्यानतत्परः।
वादिलान्तादरं ध्यायेन्महाविद्यानिषेवकः।
ककारं सौन्दर्य्यं सुकिरणमयं भाव्यमतुलं
मुकुन्दश्रीभक्तिप्रियमनयकं पूर्व्वकुलगम्।
विशिष्टं ज्ञानान्तं सुखरनतं कोटिकिरणम्
विभाव्य श्रीलक्ष्मीं गमयति क्वचित् कालवपुषम्॥१॥
द्विवर्णश्रीनाथं सुखयति भकारं वसदले
त्रिकोणात् पार्श्वस्थं चपलशतकं शम्भुनिलयम्।
महारक्ताकारं तकरणविधिगं भीमसकलम्

कुलागारस्थानं कुलवमणिवज्रायुतमिति ॥
यदा ध्यायेत् ज्ञानी निरवधि मुदाशोकविसरं
त्रिलोकानां स्थानं भुवनशरणं प्रातरिमुखी ।
महामोहद्वारे भवति समहान् सर्व्वजाड़ितो
विलासी सर्व्वासां नवनववधूनां प्रियपतिः ॥
मकारं रक्ताभं सुखनिलयसारं यदि भजे
दरीणांव्याहन्ता रुधिरनिकरेण सयम ।
त्रिकोणाद्द्वाङ्के निगमनभगे योगयजितो
विनोदी सौख्यानां सुरतकसभानां भुवि दिवि ॥
यकारं यो ध्यायेदमरपदवीं व्याधिरहितां
महावाणीनाथो विनयकाड्ढितं त्वकसुरतकम् ।
मुकुन्दानन्दन्ति पवनमिलितं कामकमलाम्
तदालोकोऽकामी भवति नितरां काकपवनीम् ॥
महाग्ने: संस्थानं परजलधरं सूर्य्यशतकम्
यदानन्दैर्ध्यायेत परमधनदं यन्नसुधया ।
सुधादानज्ञानी हरणाकरगं काम्यफलदम्
प्रियं भद्रे रत्याः कमलगभुजङ्गेश्वरयुतम् ॥
त्रिकोणान्ते एकस्वं विधिहारिहरस्याश्रयमितो

विधानं वह्नीनां कुल विमलं सुककरणम् ।
अकारङ्मायाखंडं खगगण मनोरञ्जनकरं
यदि ध्यायेदेको विभवविविधं याति सहसा ।
महेन्द्रस्थानाङ्गं कमलसुखदं कणानिलयं
प्रियं सिद्धक्षेत्रं यदि सुखमयं भावयति सः ।
लकारं चन्द्रस्थं विधुप्रातकरं विद्युन्निलयं
विशालाक्षी राधा मधुरवचनालाप कलितम् ।
रसामोदे पद्मे भवरकरणं शापहरणम्
स्ववामे राकिण्या नवरसमयं मोहहरणम् ॥
विभाव्य श्रीनाथं भजति स नरो ध्याननिपुणो
महामोहं प्राप्य प्रथमवयसं गमयति ।
ततो ध्येया महाविद्या राकिणी शक्तिरुत्तमा ।
श्रीविष्णुसहिता नित्यं योगैर्भावविवर्जितैः ।
अकलङ्की कुलानन्दो मन्दहास्याकृती महान् ।
स योगी परमं राज्यं प्राप्नोति नात्र संशयः ।
यावन्मूलाधारयोगं तावद्यमादिकं प्रभो ।
यमनियमासने काले योगं पंचामरान्वितम् ।
तावत्कुर्यान्महादेव यावत्तत्तात्सिद्धिमवाप्नुयात् ।

यदि पंचामरासिद्धिस्तदा यमादिसिद्धिभाक्।
पंचामरासिद्धिकाले प्राणादिवायुपंचकम्।
धृत्वा धृत्वा पुनर्धृत्वा कुम्भयेदानिशं शनैः।
शरीरे निर्म्मले जाते वायुनिर्म्मलता भवेत्।
सर्व्वरूपी महावायुर्निर्म्मलात्मानमात्मनि।
सिद्धिं ददाति योगेश यदि स्वकार्य्यमाश्रयेत्।
इति श्रीरुद्रजामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे चत्वारिंशतपटलः॥४०॥

आनन्दभैरव्युवाच।

कृतान्तसंहारविहारयोगरसाप्लुत श्रीकर शंकर प्रभो।
तवाज्ञयाहं कथयामि सिद्धये समागमानन्दरसाब्धितन्त्रम्॥
प्रेमाभिलाषी सुजनो मुनीन्द्रो जानाति तन्त्रार्थमनन्तसाधनम्।
महाप्रभाते चरणाब्जभक्तो गोविन्दशम्भोर्यदि भक्तिमान्भवेत्
षट्चक्रभेदार्थविशेषसाधनं जानाति यो वा सुजनोऽपि दुर्जनः।
स एव संसारनिषेधसाधनं सदा विहायाचलभक्तिमाप्नुयात्॥

आनन्दभैरव उवाच।

यदिवा कथिता कान्ते षड्दलप्रक्रिया शुभा।
राकिण्या मलिनं देव्याः कुण्डलिन्याः पराक्रमम्।

साद्धं [illegible] श्रीविद्यानां कालरूपिणा बहुरूपिणा ।
शुद्धनिर्म्मलसत्वेन परिवारगणैः सह ।
नः तद्धिकथितं सर्व्वं श्रीकृष्णस्य प्रकाशकम् ।
स्तवनं देव राकिण्या सहितं कृष्णसाधनम् ।
मंगलं परमं ब्रह्म साधनं ज्ञानवर्द्धनम् ।
कृष्णप्रकाश स्तवनं राकिणीशक्तिसंयुतम् ।
कथयस्व महाकालि यदि स्नेहोऽस्ति मां प्रति ।
अत्यन्तगुह्यकथनं सहस्रनाममंगलम् ।
अष्टोत्तरमहाविष्णुराकिण्या सहितं प्रिये ।
इदानीं राकिणीस्तोत्रं वद भाविनि कामदे ।

आनन्दभैरव्युवाच ।

योगेन्द्र परमानन्द सिन्धो श्रीचन्द्रशेखर ।
शृणु श्रीराकिणीस्तोत्रं परमानन्दवर्द्धनम् ।
सर्व्वत्र सुखदं प्रोक्तं सिद्धानामपि साधनम् ।
एतत् स्तवनपाठेन योगी योगदृढो भवेत् ।
वैष्णवी साधने यस्तु पश्चाचारं करोति वा ।
सर्व्वेषां साधनात् कृष्णं जातिभ्रष्टोऽपि नो भवेत् ।
समता शत्रुमित्रेषु कर्म्माकर्म्मसु तत्ववित् ।
यदि वा वैष्णवे नाथ समभावः प्रजायते ।

पंचाचारक्रमेणैव चैतन्या कुण्डली भवेत् ।
कथ्यते चैतन्यहेतोश्च शाकिन्याश्च तथा प्रभो ।
चैतन्याय षड्दलस्थदेवचैतन्यहेतुना ।
कुण्डलीवधुशाकिन्या स्तोत्रं शृणु कुलार्णव ।
आन्दोलितरसानिधौ कुलचंचलाया
मायामयी सकलदुःखविनाशरीरा ।
वीरासनस्थितिगता सुलभा मुनीनां
भाव्या प्रभातु भविका कुलशाकिणी नाम् ॥
आनन्दसिन्धुजड़िता कुखिलसारपाला
वाला कुलीननमिता दलषट्कुलस्था ।
काली कलामलगुणा धनिनां धनस्था
कर्णेश्वरी समुदयं कुलशाकिणी मे ॥
या शाकिणी त्रिजगतामुदयाय चेष्टां
संज्ञामयी कुलरता कुलवल्लभस्था ।
विश्वेश्वरी स्मरहर प्रियकर्मनिष्ठा
कृष्णप्रिया मम मुखं परिपातु देवी ॥
षड्वर्णनाथकरपद्मनिषेविता या
शाधेश्वरी प्रियकरी सुरसुन्दरी सा ।
माता कुलेशजननी जगतामनुस्था

विद्या परा त्रिपुरसा नवकामिनी या ॥
या षड्दलाश्रितसुवं परिपातु नित्यं
श्रीकुण्डलीषु विमला कुलडाकिणी सा ।
श्रीसुन्दरी कुलपरा कुलरन्ध्रवन्द्या
सन्ध्याविधिप्रमुदिता रतिकामतीर्था
श्रीदायिनी कुलगणामलभाग्यदात्री
नित्यं प्रपातु विषयं कुलषड्दलानाम् ॥
चैतन्यदाननिरतां त्रिगुणाभिरामां
श्यामां नितम्बघटसुन्दरवलयरम्याम् ।
नीलाचलस्थितिकरां वरदानहस्तां
श्रीकृष्णवामकमलोपरि पूजयामि ॥

तां राकिणीं चिरमणी शमनापहन्त्रीं
सर्वाश्रितां गगनमातरमम्बुजस्थाम् ।
पद्माननां श्रुतिभुजां गुरुजामनन्तां
शान्तां षडम्बुजदलोपरि पूजयामि ॥
शान्तिं कृपां कपटकोपविनाशमूर्त्तिं
शान्तिं शिवां परमवैष्णवपूजिताङ्घ्रिम् ।
रायां सुधाकरमयीं जगतां गुणाढ्यां
धर्मार्णवां रसदलोपरि पूजयामि ॥

448

कर्त्रीं करां सकरुणां रमणीं त्रिसर्गां
तां राकिणीं मतिदयाममलार्थचिन्ताम् ।
भ्रान्तिभ्रमोद्गमवरां स्मृतिमादिपूज्यां
भार्यां हरेरभिमुखीं परिपूजयामि ॥
याकातरं निरवधिं प्रणयासवस्था
वागीश्वरी भगवती नतिकोटिनम्रा ।
तां सा राकिणी प्रकृतितेजसि रक्तवर्णां
मयामयी सुरकलावति पातु मेऽङ्गम् ॥
कल्पद्रुमाश्रयलता फलरूपिणी या
गर्भस्थिता पुरुषकोटिः सुखं स्तुवन्ति ।
सा मे कुलेश्वरवमाहरिहक्तपूज्या
शान्तिः सदा मम धनं परिपातु राधा ॥
क्षेमंकरी वरकरी मूकरी हरिस्था ।
या सौकरी भवकरी त्रिपुरा महेशी ।
वायुस्थिता लयमयी स्थितिमार्गसंज्ञा
श्रृङ्गप्रिया सुधनदा परिपातु राधा ॥
गंगानिर्मलभावदा मम शिरोदेशं सदा रक्षतु
श्रीराधाकुलराकिणी मम कपालोर्ध्वं महावाक्प्रिया ।
मन्त्रस्था जयदा सदा कुमुदिनी भालं भ्रुवोरन्तरम्

विद्या वाग्भवकुण्डली फलवला बाला च नेत्रत्रयम्
गण्डं चण्डसरस्वती श्रुतिफलं कैलासशैलस्थिता
मध्याटं घटवासिनी शशिमुखी सूक्ष्मातिसूक्ष्माशया
जिह्वाग्रं चिबुकं रादानवधिरहा कण्ठं गलं स्कन्धयम् ।
स्कन्धेशी दशनप्रभामलमतिर्वै कुण्डबामेश्वरी ॥
नानावर्णविलासिनी तदुदरं शम्भोर्भवानी शिवा
पृष्ठं कर्म्मसु पृष्ठगा गतिकरी नित्योल्वणा भास्वती ।
पार्श्वं मे कुलमालिनी मम कटिं लिंगं नितम्बाम्बरं
कामाख्या धनदायिनी सकरुणा पादद्वयं पातु सा ॥
मातृक्रोधनिवारिणी मम शिवं षट्पद्मशोभाकरं
पातु श्रीतरुवासिनी कुलगुरुं गौरी परानन्ददा ।
चैतन्यस्थलवासिनी मम गता गोविन्दमातृप्रिया
चैतन्यं सततं प्रपातु तरणी धात्री परदेवगा ॥
धन्या पिंगललोचना म्बुजमुखी चैतन्यकर्म्मप्रिया
सर्व्वत्र प्रियमाकरोतु नियतं शक्तिः क्षमा कर्तृका ।
कीर्तिस्था मम कीर्तिचक्रनिलयं लाक्षाकशावल्लवी
नानाचक्रनिवासिनी मम जया जीवं सदा पातु माम् ॥
एतत्स्तोत्रं पठेन्नित्यं प्राणवायुवशे शुभे ।
षट्चक्रभेदसमये सदा पाठ्यं सुयोगिभिः ।

449

कुलविन्याससमये कुलचक्रप्रवेशने ।
अवश्यं प्रपठेद्विद्वान् राकिणी राधिकास्तवम् ।
त्रिसन्ध्यं भेदमाकुर्यात् पठित्वा च पुनः पुनः ।
ध्यात्वा भावपरो भूत्वा मुच्यते भवबन्धनात् ।
अचलां भक्तिमाप्नोति विश्वामित्रो यथा वशी ।
पठनात् पामरो याति ब्रह्मलोकं कुलाधिपः ।
एतत् पठनमात्रेण प्रीतलो गुणवान् भवेत् ।
अप्रकाश्यमिदं स्तोत्रं सर्वान्तविनाशनम् ।
समभावं समाहृत्य जीवन्मुक्तो भवेद्वशी ।
पंचाचाररतो भूत्वा साधयेदिति साधनम् ।
कुण्डलीयोगकाले च कुलाचारं न वर्जयेत् ।
कुलाचारविवर्जनेन महाहानिः प्रजायते ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा ।
समभावं सदा [illegible] कृत्वा कुलाचारं समाश्रयेत् ।
कुण्डली पृथिवी देवी राकिणी साधिदेवता ।
तद्देहगामिनी देवी राधिका राज्यकामिनी ।
अस्याः साधनकाले च समयाचारमाश्रयेत् ।
समभावे महामोक्ष इति तन्त्रार्थनिर्णयः ।
समभावार्थकथनं त्यक्त्वा योगी भवेत् कुतः ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्वाधिष्ठानडाकिनीस्तोत्रं नाम एकचत्वारिंशत् पटलः ॥ ४१ ॥

आनन्दभैरव्युवाच ।

कथयामि महाकाल परमाद्भुतसाधनम् ।
कुण्डली रूपिणी देवी डाकिण्या कुलवल्लभ ।
मानसं द्रव्यमानीय चाथवा बाह्यपूजकम् ।
अत्यन्तहृष्टचित्तश्च पूजयेत् सावधानतः ।
भक्त्या जपेन्मूलमंत्रं मानसं सर्व्वमेव च ।
पूजयित्वा ततो जप्त्वा होमं कुर्यात् परामृतैः ।
समांसैः पंच नैवेद्यैः सुगन्धिकुसुमैस्तथा ।
स्वयम्भुकुसुमैर्नित्यं अर्घ्यं कृत्वा निवेदयेत् ।
स्वयम्भूं पूजयेन्नित्यं मधुमांसेन शंकर ।
हुत्वा हुत्वा पुनर्हुत्वा प्राणवाय्वग्निसंगमै ।
भ्रामयित्वा पुनर्बाह्ये स्थापयित्वा पुनः पुनः ।
पुनरागत्य गमनं कारयित्वा सुखेच्छाम् ।
वाचयित्वा सुवाणीभिर्याचयित्वासवादिकम् ।
तर्पणं चाभिषेकं च तेन नासवमिश्रितैः ।

- मांसैर्मुद्रादिभिर्मत्स्यैः साज्यैः सपिष्टकैः।
चुतादिसुफलैर्वापि यद्यदायाति कौलिके।
तत्तद्द्रव्यैः साधकेन्द्रो नित्यं सन्तर्प्य संजपेत्।
ओं महाकालकण्ठनीलमणिनिभशाकिनीवल्लभ-
महावीरशाकिन्यै कैवल्यमोक्षदात्र्यै नमः। क्रूं क्रौं क्रूं क्रूँ
क्लीं श्रीं ग्रँ ह्रीं ह्रूँ ह्रैं ग्रौं ग्रौं रं रं रः स्वाहा। परमवैष्णव-
महाभैरव महाविष्णुः कुलदेवता परजन निष्कल एक-
पुरुषोत्तम वासुदेव हृषीकेश केशवनारायण दामो-
दरचन्द्रचूड़ चतुर्भुज शंखचक्रगदाधरः। एकाला शा-
किनी सूक्ष्मकुलकुण्डली राधिका वर्य्य देवता श्रीश्री-
विद्या चैतन्यानन्दमयी विश्वव्यापिका जगन्मोहिनी-
मूलात् प्रगच्छन्ती षड़ाधारभेदिनी षड्दलाकारप्र-
काशिनी मनोभवा मां मांसरुधिरादिशरीरपरि-
वारादिकं पालय पालय गोपय गोपय स्थापय स्था-
पय शत्रून् घातय घातय - ओं ह्रौं ह्रौं स्त्रौं स्त्रौं द्रौं
सकल ह्रीं श्रीं जुहोमि नमो नमः स्वाहा।
एतन्मन्त्रं पठित्वा च तर्पणं च समाचरेत्।
तर्पणान्ते चाभिषेकं सदा कुर्य्याच्च तान्त्रिकः।
मूलान्ते चाभिषिंचामि नमः स्वाहापदं ततः।

ततो हि प्रणमेद्भक्त्या अष्टांगनतिभिः प्रभो।
सहस्रनाम्ना स्तवनमष्टोत्तरसमन्वितम्।
अर्द्धाङ्गराकिणीयुक्तं राकिणीकेशवस्तवम्।
शृणु तत्सकलं नाथ यत्र श्रद्धा सदा तव।
श्रवणार्थं यदुक्तं तत् कृपया ते वदाम्यहम्।
एतच्छ्रवणमात्रेण सर्व्वपापक्षयो भवेत्।
राकिणीसंगमं नाथ स्तवनं नामपावनम्।
ये पठन्ति सदा भक्त्या श्रद्धया वा पुनः पुनः।
तस्य सर्व्वपापराशिक्षयं याति क्षणादिह।
काले काले महावीरो भवत्येवाहि योगिराट्।
संसारोत्तारणे युक्तो महाबलपराक्रमः।

अस्य श्रीमदानन्दकुलमंगलकालसुन्दरकृष्णमुकुन्दनारायणराकिणीकुलकुण्डलीमालिनसर्व्वसाधननिस्तारणाय परममोक्षाय नित्यसुखाय योगसिद्धये अष्टोत्तरसहस्रनाम्नः स्तोत्रस्य गणेशमंगलगणाधिपतिः ऋषिर्ह्रीं कुण्डलीतीच्छन्दः श्रीमत्कृष्णमहाकालपुरुषोत्तममंगलकुण्डलीसिद्धराधाराकिणीदेवता षड्दलधारादिप्रकाशषट्पद्मसिद्ध्यर्थे विनियोगः॥

ओं श्रीकृष्णो महामाया यादवोदवराकिणी।

गोविन्दो विश्वजननी महाविष्णुर्महेश्वरी ।
मुकुन्दो मालती माला विमलो विमलाकृतिः ।
रमानाथो महादेवी महायोगी प्रभावती ।
वैकुण्ठो देवजननी दहनो दहनप्रिया ।
दैत्यारिर्दैत्यमथनी मुनीशो मौनभाविता ।
नारायणो जलच्छन्ना करुणः करुणामयी ।
हृषीकेशः कौशिकी च केशवः केशिघातिनी ।
कीशोरश्चापि कैशोरी महाकालो महाकला ।
महायज्ञो यज्ञहन्ता दक्षेशो दक्षकन्यका ।
महाबली महाबाला बालको देवबालिका ।
चक्रधारी चक्रकरा चक्राङ्गश्चक्रमर्द्दिका ।
अमरो युवती भीमोऽभया देवो दिविस्थिता ।
श्रीकरो वेशदा वैद्यो गुणयोगी कुलस्थिता ।
समयज्ञो मानसज्ञा क्रियाविज्ञः क्रियान्विता ।
अक्षरो वर्णमाला च कालरूपी कुलाक्षरा ।
विशालाक्षो दीर्घनेत्रा जयदो मेघवाहना ।
शान्तः शान्तकरी श्यामा विमलश्यामविग्रहा ।
कमलेशो महालक्ष्मी सत्यः साध्वी शिशुः प्रभो ।
विद्युदाकारवदनो विद्युत्पुञ्जनिभोदरा ।

माधेश्वरो माकिनीच कुलदेवः कुलामया।
दक्षिणो दक्षिणाश्रीदा क्रियादक्षो महालया।
विशिष्टगमनो विद्या विद्येशो वाक्सरस्वती।
अतीन्द्रियो योगमता वरास्थो वरापंडिता।
करुणात्मको वाल नृपाण कमनीयः सुकोमला।
अनन्तोऽनन्तगुणादावारीनाथो विलक्षणा।
गोपालो गोपवनिता गोपी गोपकुलात्मजा।
मानी मामकरोलासा मानवो मानवात्मजा।
सर्व्वरूपी मोहनीच मायी मायाशरीरजा।
अक्षुणो वज्रदेहस्था गरुडस्थो हि गारुडी।
सत्यप्रियो रुक्मिणी च सत्यप्राणोऽमृतापहा।
सत्यप्रेमो वालसत्या कालसत्योऽमृतापहा।
सत्यकर्मा सत्यभामा सत्यरूपी त्रिसत्यदा।
शशीशो विधुवदना करुणवर्णो विशालधीः।
विक्रमो विक्रमस्थाच स्थितिमार्गः स्थितिप्रिया।
श्रीमाधवो माधवी च मधुहा मधुसूदनी।
वैकुण्ठनाथो विकला विवेकस्थो विवेकिनी।
विवादस्थो विवादेशी कुम्भकः कुम्भकारिका।
मधुपानः सुधारूपा सुधेशो देवमोहिनी।

455

प्रक्रियाधारणकोथ धान्यार्थे धान्यविग्रहा।
धवणीशो महानन्ता सानन्दो नन्दनाप्रिया।
सुप्रियो विप्रियहरा विप्रपूज्यो द्विजप्रिया।
कान्तो विधुमुखीवेद्यो विद्यावागीश्वरोऽकरा।
अकामी कामरहिता कन्तो विलचराप्रिया।
वाहनस्थोवाहनाढ्या सिद्धेशः सिद्धिदायिनी।
सिद्धिमातो विलोलाच चंचलो विषमापहा।
श्मशानवासिनीनाथो यमभूमिनिवासिनी।
यामस्थो यामयज्ञा च यवनो यवनाश्रया।
पुण्डरीको विकुण्ठस्था वैकुण्ठो बालभाविनी।
पद्मनेत्रः पद्ममाला पद्महस्तोऽम्बुजानना।
पद्मनाभिः पद्मनेत्रा पद्मस्थः पद्मवाहना।
वासुदेवो रत्नगर्भा महामानी महाङ्गना।
कारुण्यो बालगर्भाच आकाशाख्यो विभाण्डजा।
तेजोराशिस्तैजसीच भयाच्छन्नो भयप्रदा।
उपेन्द्रो वर्णजालस्था चातकस्थो विमानगा।
नगेन्द्रस्थो नागिनीच नागेशो नागनन्दिनी।
सार्वभौमो मलाकाली नागेन्द्रनन्दिनी शुभा।
कामदेवाश्रयो माया मित्रस्थो मित्रवासना।

मानभंगकरी वाराकरणेशी रिपुप्रिया।
रिपुहा वाकिनी माता सुमित्रा मित्रवादिका।
कालान्तक इला देवी पीतवासोऽम्बरप्रिया।
पापहर्त्री पापहन्त्री निष्पापः पापनाशिनी।
परानन्दप्रियो मीना मीनरूपी मलापहा।
इन्द्रनीलमणिश्यामो महेन्द्रनीलरूपिणी।
नीलकण्ठप्रियो दुर्गा दुर्गो दुर्गतिनाशिनी।
त्रिकोणमण्डलश्रीशो विमाया मन्दिरास्थिता।
मकरन्दरसोल्लासो मकरन्दरसाप्रिया।
दारुणारिनिहन्ता च दारुणारिविनाशिनी।
कलिकालफलार्थी च कलिकालफलावहा।
कालदोषास्थितो रौद्री व्रतस्थो व्रतधारिणी।
विशालाक्षो विशालाक्षा चमत्कारकरोद्यमा।
लकारस्थो लाकिनी च लांगलीशो लयान्विता।
नागस्थो नागदमनी नाकरुद्रोऽक्षरात्मिका।
नामगो नामसम्बन्धा समदेवो विशेषिका। २००
सामवेदः सामसन्ध्या सामगोपं सभाद्रिणी।
सर्वभद्रो वाणाभद्रा रेतःस्थो रेतःपालिनी।
रात्रिकारी महारात्रिः कालरात्री महानिशा।

मानदोषहरो माता मानहन्ता स्मरापहा।
चन्दनांगो नन्दपुत्री नन्दपालो विलोपिनी।
मुद्राकारो महामुद्रा मुद्रितो मुद्रिकावती।
शक्तोलांक्षा वेदलक्षो लोपामुद्रा मनोहरा।
महाज्ञानधरो वाणी बालभानहरोऽमरा।
सत्कीर्तिस्थो महाकीर्ति कुलाख्यः कुलकीर्तिका।
आसवाप्री वासनाच कुलवेत्ता सुगोपिता।
अश्वत्थवृक्षनिलयो वृक्षसारनिवासिनी।
नित्यवृक्षो नित्यलता क्रूपः क्रूपपदस्थिता।
कल्पवृक्षः कल्पलता सुकालः कालभक्षिका।
सर्व्वालंकारभूषाढ्यः सर्व्वालङ्कारभूषिता।
अकलङ्की निराहारा दुर्व्विरीक्षो निरापदा।
कामकर्त्ता कामकान्ता कामरूपी महोत्सवा।
जयन्तो वैजयन्ती च जयाख्यो जयदायिनी।
निर्जीवनो जीवमाता कुशलाक्षो विमन्दुरा।
केशधारी केशिनी च कामजः कामजाङ्कुरा।
किंकरस्थो विकारस्था मानसज्ञो मणीविणी।
मिथ्याहरो महामिथ्या मिथ्यासर्गो निराकृतिः।
नागयज्ञोपवीतस्थ नागमाला विभूषिता।

नागाख्यो नागकुलपा नायको नायिकावधूः।
नायकदो मदो नारी नरो नारायणप्रिया।
किरातवर्णो रासज्ञा तारको गुणतारि[illegible]का।
शंकराख्योऽम्बुजाकारा कृपणः कृपणा सती। ४००
देशगो देशसन्तोषा दर्शी दर्शनिवासिनी।
दर्शनज्ञो दर्शनस्था इकारदिरदा खरोऽखरा।
सुरपालो देवर्द्धा विरदो रुद्रदेवता।
श्रीवासः सर्वसुखदा सुखदो व्यासवासिनी।
वृन्दावनस्थो वृन्दा च वृन्दारण्यो वृहत्तनुः।
ब्रह्मरूपी त्रितारी च तारकाख्यो हितारिणी।
तन्त्रार्थज्ञस्तन्त्रविद्या स्वतन्त्रज्ञः स्वतान्त्रिका।
तृप्तः सुतृप्ता लोकानां तर्पणस्थो विनाशिनी।
मथुरामन्दिररतो मथुरामन्दिरासना।
मन्दिरो मन्दिरादेवी निर्मायी मायसंहरा।
श्रीवत्सहृदयो वत्सा वत्सलो भक्तवत्सला।
भक्तप्रियो भक्तगम्या भक्तो भक्ति[illegible]प्रभुः प्रभा।
जरो जराकरो वारा हविर्होमा दयः दतिः।
जयो जयावरो वारा हविर्होमा दयः दतिः।
दौर्गाणिपो विजयोल्लासा विजयो जयरूपिणी।
जयदाता दारुजाया बलिपो बालपालिका।

459

कृष्णमार्जारकरूपी च कृष्णमार्जारकरूपिणी।
घोटकस्थो हयस्था च गजगो गजवाहना।
गजेश्वरो गजाधारा गर्जो गर्जनतत्परा।
गयासुरो गयादेवी गयदर्पो गयार्पिता।
कामनाफलसिद्ध्यर्थी कामनाफलसिद्धिदा।
धर्म्मदाता धर्म्मविद्या मोक्षदो मोक्षदायिनी।
मोक्षाश्रमो मोक्षकर्त्री नन्दगोपाल ईश्वरी।
श्रीपतिः श्रीमहाकाली किरणो वायुरूपिणी।
वाय्वाहारी वायुनिष्ठा वायुवीजो यशस्विनी।
जेता जयन्ती ।५००। योगस्थो योगविद्या शिवः शिवा।
शिशिराचलदेहस्थः शिशिराचलवासिका।
समरान्तगतश्चैव समरे लक्षणोदया।
श्यामचन्द्रो वारमुख्या वारुणो वारुणीप्रिया।
वरुणो वरुणानन्दा वरुणाख्यो रतान्तरा।
वासवो वासवस्त्री च वासाख्यो वंशविग्रहा।
आखण्डलो विखण्डा च खंडस्थः खण्डखड्गिनी।
खड्गहस्तो वाणहस्ता वाणगो वाणवाहनो।
सिद्धान्तज्ञो ध्वान्तहन्त्री धनस्थो धान्यवाहिनी।
लोकानुरागो रागस्था स्थितः स्थापकभावना।

स्थानभ्रष्टः परस्था च चन्द्रामश्चन्द्रमानना।
चन्द्रोदयश्चन्द्रवर्णा चारुचन्द्रो रुचिस्थिता।
रुचिकारी रुचिप्रीतिः रुचितो रचनासना।
राजराजी राजकन्या भुवनो भुवनाश्रया।
सर्व्वज्ञः सर्व्वतोभद्रा वाचालोऽलयघातिनी।
लिंगरूपधरो लिङ्गा कलिगः कालकेश्वरी।
केवलानन्दरूपाख्यो निर्व्वाणमोक्षदायिनी।
महामेघगाढोऽमलानन्दरूपा महामेघजाली महाघोररूपा।
महामेघजालानलाकारनीलो महामेघमाला मलालोलकाली
वियद्व्यापको व्यापिकासर्व्वदेहे महापूरवीरो महाधर्म्मनीरा।
महाकालरूपी महाचण्डरूपा विवेकी सदैका कुलेशः कुलीशी।
सुमार्गी सुगीताशुचिः श्रीविनीता महार्को वितर्को सुतर्कोऽपतर्का
सुतीन्द्रो महेन्द्रा भगो भाग्यचन्द्रा चतुर्थो महार्था नगः कीर्त्तिचन्द्रा
विशिष्टो महेष्टिर्मनस्वी सुतुष्टिः महापद्मदलस्थो महासुप्रकाशा।
गलच्चन्द्रधारामृतास्निग्धदेहो गलत्कोटिसूर्य्यप्रकाशाभिलाषा। ६००
महाचंडवेगी महाचंडवेगा महामुण्डखण्डो महामुण्डखण्डा।
कुलालभ्रमच्चक्रसारप्रकारः कुलालामलाकारचक्रप्रकारा।
कुलालभ्रमस्थो कुलालप्रमाणाभ्रम नखंडा।
कुलालक्रियावान्महाघोरखण्डा कुलालप्रमाणाभ्रम नखंडा।
कुलालाक्रियावान्महाघोरखण्डा सुकालोऽतिदीक्षा।
प्रतिष्ठः प्रतिष्ठा प्रतीक्षः प्रतीक्षा महाख्यो महाख्या सुकालोऽतिदीक्षा।

महापंचमाचारतुष्टं प्रचेष्टो महापंचमप्रेमकान्तातिचेष्टा ।
महामत्तवेशो महामंगलेशा सुवेशः स्वपेशा वरोदीर्घवेशा ।
चरो वाक्यनिष्ठोऽचरस्थाकवर्गा कुलाढ्यः कुलाढ्या यतिर्यागरूपा ।
कुलापाकहन्ता महामानहन्त्री महाविष्णुयोगी महाविष्णुयोगा
क्षितिक्षोभहन्ता क्षितिक्षुब्धराज्या महार्य्यो महार्य्या धनी राज्यकाम्या ।
महारात्रिसान्द्रान्धकारप्रकाशो
महारात्रिसान्द्रान्धकारप्रवेशा ।

महाभीमगंभीरशब्दप्रशब्दो
महाभीमगम्भीरशब्दान्तशब्दा ॥

गुणी ज्ञानदाता यमो यामयात्रा
वशी सूक्ष्मवेशा खगो नागमाता ।

हिरण्याक्षहन्ता महाशत्रुहन्त्री
विनाशप्रियो वासना पापप्रिया च ॥

महाडाकिनीपो महाडाकिनीपा
महाराकिणीशो महाराकिणीशा ।

मुकुन्दो महेन्द्रा महान् भद्रचन्द्रा
क्षितित्यागकर्त्ता महायोगकर्त्री ॥

हितोऽसारहन्त्री महेशो महेशा इन्द्रा
गतिक्षोभभावापहो भावपुंजा ।

462

शशीनां समूहो विधोः कोटिरश्मिः
कदम्बाश्रितो वारमुख्या सतीनाम् ॥
महोल्लासदाता महाकालमाता
स्वयं सर्व्वपुत्रः स्वयं सर्व्वकर्त्री ।
महापापहन्ता महाभावभार्य्या
हरिः कार्त्तिकी कार्त्तिको देवसेना ॥
जयाप्तो विलिप्ता कुलाप्तो गणाप्ता
सुधाव्यालभासा क्षितीशोऽभिमाता ॥ १००
भवान् भावलक्ष्मीः प्रियः प्रेमसूक्ष्मा
धनेशो धनेशी कुलो मानभंगी ॥
कठोरोतकटानां महाबुद्धिदाता
कतिस्था गुणाढ्यो गुणानन्दविज्ञा ।
महाकौलपूज्यो महाकौलपूज्या
खगास्यो नगास्या खरः खड्गहस्ता ॥
खगोत्रः खखर्वा खरान्दोलितस्थः
खगः क्षोभनाशा हरिः कूटहाला ।
महापद्ममालाधृतो गाणपत्या
गणास्थो गभीरा गुरुज्ञानगम्या ॥
घटस्थानदाता घनाकाररूपा

भयार्थी ङबीजा ङमारी ङकर्णा ।
भवो भावमाता नरो यामयाता
चलान्तोऽचलास्थः चलन्चालिका च ॥
छलज्ञश्छलाढ्या छकारश्छकारा
जयो जीवनस्था जलेशो जलेशी ।
जगज्ज्ञापकारी जगज्जीवनीशा
यदुप्राणनाथो जगद्यादवी च ॥
झवो झर्झरीशा झणत्कारप्राढ्या
झणज्झं झनानाद झंकाररावा ।
ञचैतन्यकारी ञवैकल्यनारी
टनत्टंकहस्ता ठवेशोपविष्टा ॥
डवो डामरा डाकिनीपो डसारा
ढमेशो हि ढक्कारवस्याणबीजा ।
णवर्णा तमालस्तनुस्थाननिष्ठा
थकारार्णमालः स्थलस्थान संस्था ॥
दयावान् दयाढ्या धनीशो धनाढ्या
नवीनो नगेभा गतिर्नागहारा ।
नगेशी परः पारमेशादिपाला
फलात्मा फला फाल्गुनी फेननाशः ॥

फणाभूषणाढ्या वशी व्याप्तवश्या
भगात्मा भगस्ती महावीजमानो ।
महावीजमाला मुकुन्दो मुमुक्षा
यतिस्थो यशःस्था रतानन्दकर्त्ता ॥

रतिर्लाकिनी शीलयार्थप्रचण्डा
प्रवालांगधारी प्रवालांगमाला ।
हलो हालहेला पणः पाशताला
वशीन्द्रप्रकाशो वरस्थानवासा

शिवः श्रीधरांगः शलाकाच शीला ।
षडाधारवासी षडाधारविद्या
षडम्भोजसंस्थः षडम्भोपविष्टा ॥

महासाधनो श्रीं पविष्टोपवासी
सुषुम्नापथस्था परश्रेयसिस्था ।
हरस्थो ग्रकर्मा हरानन्दधारा
लघुस्थो लिपिस्था नयी तुष्यसंख्या ॥

अवर्णो लिवर्णा इराणाथ इशा
उरस्या पुरुस्या उरा ऊर्ध्वरूपा ।
ऋचिस्थो हि ऋग्गा लृगो दीर्घलृस्था
त्वमेको हि ऐंवीज गुर्व्वी गुणस्था ॥

सदोङ्कारवर्णोऽङ्गनैङ्कारबीजा
अङ्कारचन्द्रोह्यनङ्कारबीरा
हरीन्द्रो हरीशा हविः कृष्णरूपा
शिवो वेदभाषा च शौरिः प्रसंगा ॥
गणाध्यक्षरूपी परानन्दभक्ता
परेशी गणेशी वशी धामपूज्या ।
चको विन्दुमः प्राणवुद्धिः क्षितिस्था
स्वयं कामधेनुस्वरूपी स्वरूपा ॥
हिरण्यप्रभः श्री हिरण्यप्रभांगी
प्रभातार्कवर्णोऽरुणा कारणांगी ।
प्रभाधारिकूटा विभाकोटिधारा
धराधारकोधाविद्या शौविचार्य्या ॥
महायज्ञसंस्थो महायज्ञनिष्ठा
सदाकर्मभङ्गः सदा कर्म्मभंगा ।
किरातीपती दाकिनी कौलपुत्री
शिलाकोटिनिर्म्माण देहा विशाला ॥
कलाकंकणास्थः कलाकिंकिनीस्था
किशोरः किशोरी कुरुक्षेत्रकन्या ।
महालांगलश्री वलोद्दामकर्णः

कुलालादिविद्यामयोभावपूर्णा ।

महालाकिनीशा महाकाकिनीशो

महासुप्रकाशा परो हाकिनीशा ।

कुरुक्षेत्रवासी कुरुक्षेत्रभूति

महाभूतिभोगी महायोगिनीच ॥

कुलंकारकारी कुलांगीशकन्या

तृतीयस्तृतीया द्वितीयो द्वितीया ॥ ६००

महाकन्दवासी महानन्दकाशी

पुरग्रामवासी महापीठदेशा ॥

जगन्नाथवक्त्रः स्थलस्थोवरेण्या

हतानन्दकर्त्ता शिवानन्दकर्त्री ।

जगद्दीपकाशो जगद्दीपनीशा

महाकामरूपी महाकामपीठा ॥

महाकामपीठस्थिरो भूतशुद्धि

महाभूतशुद्धिः प्रभान्तः प्रवीणा ।

गुरुस्थो गिरिस्था गलझ्झारधारी

महाभक्तवेशा दशाद्युन्निवृत्तिः ॥

निवृत्तान्तबाला सदन्तर्गतस्था

लयस्थानगामी लयानन्दकाम्या ।

विसर्गापवर्गौ विशालाद्विसर्गौ
कुलार्णः कुलान्तार्णवस्थामलश्रीः ॥
भयानन्ददाता सदाचारगीता
लयज्ञानदाता महामेरुगाथा ।
तयोर्मूलवासी तरुण्यापदेशा
समेशः समेशा सुखी खड्गलेशा ॥
भयत्राणकर्त्ता भयज्ञानहन्त्री
जनानां मखस्थो महानन्दभंगा ।
महासत्पथस्थो महासत्पथज्ञा
महाविश्वमानो महाविश्वमाना ॥
स्वर्गेन्द्रोपविष्टो विसर्गान्तरस्था
विसर्गप्रविष्टो महाबिन्दुनादा ।
सुधानन्दभक्तो विनानन्दधात्री
महावाहनाह्लादकारी सुगाहा ॥
शिवानन्द दयानन्दकान्तिः
मतङ्गस्थदेवो मतङ्गाधिदेवी ।
महामत्तमातङ्गरूपोऽतिभीमा
तदेको महाचक्रपाणिः प्रचण्डा ॥
खलापस्खलस्थोऽविहन्त्री सपत्नी

468

शिवानन्दकर्त्ता शिखा शाकवासी।
सुशाकम्भरी वेदयोगी युगज्ञा
युगी योगगम्या दवी दीर्घकन्या ॥
शरण्यः शरण्या मुनिर्ज्ञानगम्या
सुधर्म्मः सुधर्म्मा शशी वेदजन्या।
यमी यामरामागमी ग्रामकामा
हतीशः प्रधीशा हटोहाटकन्या ॥
मलेशो मलेशी भकारी भगीवा।
चलत्खंजनस्थः खलत्खेलनस्था।
विराती किराती खलांगोऽखिलांगी
वहत्खेचरस्थो वहत्खेचरी च ॥
महानागराजो महानागमाल
हकाराईसंज्ञाहती हारमाला।
महाकालनेमिप्रहा पार्व्वती च ॥
तमिस्राहतो दुःखहत्या प्रपन्नो
विपन्ना निरस्तो गुणानन्दकन्या।
सदा दुःखहन्ता महादुःखहन्त्री
प्रभातार्कवर्णः प्रभातारुणश्रीः ॥
महापर्व्वतप्रेमभावोपपन्नो

महादेवपत्नी

महामोहनीलाप्रिया भक्तिदाता
जयानन्दभक्तिप्रदा सर्व्वदेवमाता ॥

इत्येतत् कथितं नाथ महास्तोत्रं मनोरमम् ।
सहस्रनाममयोगांगमष्टोत्तरसमन्वितम् ।
यः पठेत् प्रातरुत्थाय शुचिर्व्वाशुचिमानसः ।
भक्त्या शान्तिमवाप्नोति ह्यनायासेन योगिराट् ।
प्रत्यहं ध्यानमाहत्य त्रिसन्ध्यं यः पठेत् शुचिः ।
षण्मासात् परमो योगी सत्यं सत्यं सुरेश्वर ।
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम् ।
अपमृत्यादिहरणं वारमेकं पठेद्यदि ।
पठित्वा ये प्रगच्छन्ति विपत्काले महानिशि ।
अनायासेन ते यान्ति महाघोरे भयार्णवे ।
अकाले यः पठेन्नित्यं सुकलस्तत्क्षणात् भवेत् ।
राजत्वहरणे चैव स्वरात्तिहरणादिके ।
मासैकपठनादेव राजत्वं लभते ध्रुवम् ।
विचरन्ति महावीराः स्वर्गे मर्त्ये रसातले ।
गणेशतुल्यबलिनो महाक्रोधशरीरिणः ।
एतत् स्तोत्रप्रसादेन जीवन्मुक्ता महीतले ।

470

महानामस्तोत्रसारं धर्म्माधर्म्मनिरूपणम्।
अकस्मात् सिद्धिदं काम्यं काम्यं परमसिद्धिदम्।
महाकुलकुण्डलिन्या भवान्याः साधने शुभे।
अघनिधने चैव महापातकनाशने।
महाघोररवे काले पठित्वा सिद्धिमाप्नुयात्।
षट्चक्रस्तवनं नाथ प्रत्यहं यः करोति हि।
मानो गतिस्तस्य हस्ते साक्षिवो नतु मानुषः।
योगाभ्यासं यः करोति न स्तवं पठते यदि।
योगभ्रष्टो भवेत् क्षिप्रं कुलाचारविलंघनात्।
कुलीनाय प्रदातव्यमतएव कुलेश्वर।
कुलाचारं समाहृत्य ब्रह्मणाः क्षत्रियादयः।
योगिनः प्रभवन्त्येव स्तोत्रपाठात् सदा नराः॥०॥
इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे श्रीकल्याणाधिकोल्लासे भैरवी भैरवसंवादेऽष्टोत्तरसहस्रनामस्तोत्रं द्विचत्वारिंशत् पटलः॥४२॥

श्रीआनन्दभैरव उवाच।
वद कान्ते रहस्यं मे मया सर्व्वं च विस्मृतं।
यदकान्ते रहस्यं मे मया सर्व्वं च विस्मृतं।
महाविषं कालकूटं पीत्वा देवादिरक्षणात्।

कण्ठस्था देवताः सर्व्वा भस्मीभूता सुसंस्कृताः।
महाविषज्वालया च ममदेहस्थदेवताः।
कैवल्यनिरताः सर्व्वे प्रार्थयन्ति निरन्तरम्।
षट्चक्रभेदकथनममृतां शृणु परमं परम्।
कथित्वा मम सन्तोषं कुरु कल्याणवल्लभे।
अमृतानन्दमुदधौ सुधाभिषिक्तविग्रहम्।
कृत्वा कथय शीघ्रं मे चायुषं परिवर्द्धय।

आनन्दभैरव्युवाच।

निगूढार्थं महाकालकालेश जगदीश्वर।
भैरवानन्दनिलय कालकूटनिषेवण।
इदानीं शृणु योगार्थं मयि संयोग एव च।
श्रुत्वा चैतत् क्रियाकार्य्यं नरो योगीश्वरो भवेत्।
मनोद्भवे खचरे च सर्व्वाकार विवर्ज्जिते।
भ्रूमध्ये सर्व्वदेहे च स्थापयित्वा च मानवः।
भाव्यते चापरिच्छिन्नं ब्रह्मविष्णुशिवात्मकम्।
ममरूपं महाकाल सत्वरजस्तमःप्रियम्।
केवलं रजोयोगेन शरीरं नापि तिष्ठति।
तथा केवलयोगेन तमसा नापि तिष्ठति।
तथा केवलसत्वेन कुतो देही प्रतिष्ठति।

अतस्त्रिगुणयोगेन धारयामि नराङ्गकम्।
शनैः शनैर्विजेतव्याः सत्वरजःस्तमोगुणाः।
आदौ जित्वा रजोधर्म्मं पश्चात्तामसमेव च।
सर्व्वशेषे सत्वगुणं नरो योगीश्वरो भवेत्।
गुणवान् ज्ञानवान् वाग्मी सुखी धर्म्मी जितेन्द्रियः।
शुद्धनिर्म्मलसत्वन्तु गुणमाश्रित्य मोक्षभाक्।
सदा सत्वगुणाच्छन्नं पुरुषं कालरुव च
पश्यतीह न कदाचित जरामृत्युविवर्जितम्।
तं जनं परमं शान्तं निर्म्मलं द्वैतवर्जितम्।
सर्व्वत्यागिनमालानं कालः सर्व्वत्र रक्षति।
जले वा पर्व्वते वापि महारण्ये रणस्थले।
भूगर्त्तनिलये भीते संहारदुष्टविग्रहे।
स तिष्ठति महायोगी नित्यं सत्यं कुलेश्वर।
महायोगं शृणु प्राणवल्लभ श्रीनिकेतन।
योगार्थं परमं ब्रह्म योगार्थं परमं तपः।
ये जानन्ति महायोगं म्रियन्ते न च ते नराः।
कृत्वा कृत्वा षड्दलस्य साधनं करणसाधनम्।
ततः कुर्य्यान्मूलपद्मकुण्डलीपरिचालनम्।
मुहुर्मुहुश्चालनेन नरो योगीश्वरो भवेत्।

473

एकान्ते निर्म्मले देशे दुर्भिक्षादिविवर्ज्जिते।
बद्धैकमासनं योगी योगमार्गपरो भवेत्।
पद्मासनं सदा कुर्य्यात् बद्धपद्मासनं तथा।
महापद्मासनं कृत्वा तथा चासनभंजनम्।
तत पश्चात् स्वस्तिकार्थं च बद्धस्वस्तिकमेव च।
महास्वस्तिकमाहत्य त्रिकुलं वशमानयेत्।
भद्रासनं बद्धभद्रासनं कुर्य्यात् क्रमेण तु।
भद्राभद्रासनं कृत्वा कार्म्मुकासनमाश्रयेत्।
बद्धकार्म्मुकमेवं हि महाकार्म्मुकमेव च।
योगाभ्यासे सदा कुर्य्यात् मन्त्रसिद्ध्यादिकर्म्मणि।
चक्रासनं सदा योगी योगसाधनकर्म्मणि।
बद्धचक्रासनं नाम महाचक्रासनं तथा।
कृत्वा पुनः प्रकर्त्तव्यं बद्धयोगेश्वरासनम्।
योगेश्वरासनं कृत्वा महायोगेश्वरासनम्।
वीरासनं ततः कुर्य्यात् महावीरासनं तथा।
बद्धवीरासनं कृत्वा नरो योगेश्वरो भवेत्।
ततः कुर्य्यान्महाकाल बद्धकुक्कुटमासनम्।
महाकुक्कुटमाहत्य केवलं कुक्कुटासनम्।
मयूरासनमेवं हि महामयूरमेव च।

वह्नमयूरमाहृत्य नरो योगेश्वरो भवेत्।
एतत् सर्व्वं प्रवक्तव्यं विचार्य्य सुमनः प्रियः।
अभिषेकप्रकरणे आसनादिप्रकाशकम्।
कथितव्यं विशेषेण इदानीं शृणु षट्क्रमम्।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परशिवः शम्भो षट्शिवाः षट्प्रकाशकाः।
एतेषां षट्गुणानन्दाः शक्तयः परदेवताः।
षट्चक्रभेदनरता महाविद्यादिदेवताः।
एतासां स्तवनं कुर्यात् परदेवसमन्वितम्।
एतत्प्रकारकरणे यस्य प्रत्ययमागुगः।
क्रियानिविष्टसर्व्वत्र भावनाग्रहरूपधृक्।
स पश्यति जगन्नाथं कमलोरुगतं हरिम्।
आदौ हरेर्द्दर्शनं च कारयत्येव कुण्डली।
ततो रुद्रस्य संज्ञाया नाकिन्याः शुभदर्शनम्।
सर्व्वासां क्रमतो नाथ दर्शनं प्राप्यते नरः।
शनैः शनैर्महाकाल कैलासदर्शनं भवेत्।
क्रमेण सर्व्वसिद्धिः स्यादष्टांगयोगसाधनात्।
अष्टांगसाधने काले यद्यत्कर्म्म करोति हि।
तत्सर्व्वं पारयत्नेन शृणु सादरपूर्व्वकम्।

475

ततक्रियादिकमाहृत्य शीघ्रं योगी भविष्यसि।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे त्रिचत्वारिंशत्पटलः॥ ४३॥

श्रीआनन्दभैरवउवाच।

अथकामातुराणांच कामनिर्म्मलहेतुना।
कथयामि महादेव यत्कृत्वा कामिनीवशम्।
ततप्रकारं प्रवक्ष्यामि योगसाधनहेतुना।
मुण्डासनं समाहृत्य ऊर्द्धे पद्मासनं चरेत्।
शिरोमूले करद्वन्द्वं नियोज्य जपमाचरेत।
अथाल्प धारणां कुर्यात श्वाससंख्यां समाचरेत।
श्वाससंख्यां सदाकुर्यात सदा कुम्भकसुस्थिरः।
विना श्वाससंख्यया च कुतो योगीवरो वशी।
विना संख्याप्रयोगेन विना योगाङ्गसाधनात्।
कदाचिन्न प्रकर्त्तव्यं संख्याकुम्भकवर्जितः।
अथाल्प कुम्भकं कुर्यात खेचरप्रियकर्म्मणि।
सर्व्वकाले प्रकर्त्तव्यं सर्व्वकाले सुखी भवेत्।
आनन्दस्वल्पमाहृत्य विजयाद्यमणादिभिः।
क्रमेण भेदनं कुर्यात् ततः साधकयोगिराट्।
योगिनामपरिच्छिन्नं भावं विद्युतप्रभाकरम्।

विद्युत्कोटिसमाभासं वारिधारासमाकुलम्।
यद्येवं भूतभावाढ्यो विपाकेन पतन्ति ते।
ते यान्ति परमं स्थानं ते यान्ति कोटिराज्यपाः।
ते भोगिनो योगिनश्च ते लोकपालकाः स्मृताः।
ते महद्गुणसम्भोग्या म्रियन्ते न कदा कुतः।
ते भवन्ति महाश्रेष्ठास्ते भवन्ति सुधाधराः।
ये भेदकवर्गे युक्तास्ते मनुष्या न देवताः।
ते सर्व्वे यान्ति सर्व्वत्र ते शिवास्ते न किंकराः।
ते मे भक्ता महाकाल इति स्वागमोदयम्।
ये भजन्ति तव पादाम्भोजं भावपरायणाः।
ते भेदज्ञाः प्रभवन्ति तेषां कालो वशो भवेत्।
ये प्राणवायुसंयोगा ये प्राणपरिरक्षकाः।
आत्महत्यां प्रविहाय ब्रह्मलोकं मुदान्विताः।
यान्ति नाथ ध्यानपराः संसारार्थविवर्ज्जिताः।
अरण्ये वासिनो ये च नारण्यवासिनो नराः।
एकान्ते निर्ज्जने देशे सर्व्वविघ्नविवर्ज्जिते।
षट्चक्रभेदमाहत्य ते नराः फलभागिनः।
महाकालफलं यस्तु सदेच्छति सतां गतिम्।
स एव योगी भूमध्ये स्थित्वा सर्व्वत्रगो भवेत्।

सर्व्वदेशे सदा पूज्यः सर्व्वेशो निर्म्मलो द्वयः।
अनाद्यं नतविभवः कालाला स भवेत् क्षणात्।
एतेषां साधने शीघ्रं सिद्धिसन्ध्या सुकल्पनम्।
एतद्रूपं निजं ज्ञात्वा भेदं ज्ञात्वा निजस्थलम्।
मूलाधारं स्वाधिष्ठानं भेदज्ञानी विभेद्य च।
कुर्य्यात् परमसंदर्भं मणिपूरे विचक्षणः।
कृत्वा च दर्शनं विद्वान् श्रीकण्ठचरणाम्बुजम्।
स्वाधिष्ठानादि देवेन्द्रं शक्तियुक्तं निरञ्जनम्।
राकिणीराधिकाव्याप्तं त्रिलोकरक्षणं परम्।
परमाकाशनिलयं त्रैगुण्यवारिरूपिणम्।
वाञ्छाकल्पतरो मूलवासिनं शिववैष्णवम्।
विलोक्यानन्दहृदयोऽशंकः सर्व्वत्र दर्शनः।
कृत्वा योगी सदाभ्यासी मणिपूरं विलोकयेत्।
मणिपूरं महाचक्रं सिद्धदेवं सुधामयम्।
हिरण्यकोटिदानेन गोकोटिदानहेतुना।
कोटिब्राह्मणभोजेन यत्फलं लभते नरः।
तत्फलं लभते ध्यात्वा मणिपूरं मनोरमम्।
मणिपूरं महास्थानं योगिनामप्यदर्शनम्।
सूक्ष्मातिसूक्ष्मयोगं च ज्ञानिनां ज्ञानगोचरम्।

अप्रकाशं महागुह्यं योगं योगेन लभ्यते ।

आनन्दभैरव उवाच ।

योगार्थं यत्र कमले कोटिविद्युत्समप्रभे ।
कोटिकालाग्निमिलिते कोटिचन्द्रविनिर्म्मिते
कोटिसूर्य्यादिकिरणे मनः केन विलीयते ।
सूचीरन्ध्रे यथा सूत्रं तदेव फलदं सुखम् ।
यन्न दृष्टं श्रुतेनापि ज्ञानं न तत्र सुन्दरि ।
तत्र केन प्रकारेण मनोनिवेशनं भवेत् ।
यत्र गमनं नित्यं तस्य देशस्य यत् फलम् ।
तत्फलं किं प्रजानाति अदृष्टे गमनं पुनः ।
कुतो वा ज्ञानसम्पत्तिः कुतो वाह्यालदर्शनम् ।
कुतो वा जायते सिद्धिर्भेदने किं फलं लभेत्
तत्वं जानामि देवेशि तत्प्रकारं प्रकाशय ।

आनन्दभैरव्युवाच ।

यदुक्तं तद्धि सकलं सफलं परमेश्वर ।
तव पूर्व्वं योगधर्म्ममाश्रय शृणु तत्फलम् ।
पूर्व्वस्मरणमात्रेण जीवन्मुक्तो भविष्यति ।
जीव एव महाकालो लोकानां मोक्षबंधगः ।
स जीवो वायुरूपेण महावलपराक्रमः ।

479

गच्छति मत्यहं नित्यं सर्व्वदा च पुनः पुनः।
पुनरायाति सरणीं स्वभावेन निरन्तरम्।
नानाभावप्रियः सोऽपि नानाकारनिरूपकः।
नानाकर्म्मप्रियः शुद्धोऽशुद्धवेशधरो महान्।
कन्दर्पनिलयो योगी सयोगी परमार्थवित्।
सज्ज्ञानी निरहंकारी साहंकारी शरीरधृक्।
सर्व्वगन्धप्रियोऽदृश्यो भाववेत्ता रहस्यवित्।
स एव निष्फलः शुद्धः सदाध्यानपरायणः।
सदा चात्मनि ब्रह्माण्डे ब्रह्मणि त्वयि शंकरे।
तन्मनो विलयं याति तदा भावो महान् स्मृतः।
तद्भवः परमं ज्ञानमकथ्यं विपरीतकम्।
स्वाधीनं स्वसुखं नित्यं स्वल्पकार्य्यविवर्ज्जितम्।
अत्यन्तधर्म्मसन्धानं प्राप्य योगे भवेन्नरः।
शनैः शनैः प्रगन्तव्यं तत्र तत्र सुदर्शनम्।
तत्र तत्र महासिद्धो भूत्वा संसारपुण्यवान्।
योगिनां बहुकालस्थं मृतानां स्वल्पकालकम्।
श्वासधारणमाहृत्य बहुकालं सुखी भवेत्।
यथा वृहस्पतिः श्रीमान् यथा सूर्य्यो दिवाकरः।
तथा प्रकाशमाकुर्य्यात कोटिभिस्तोत्रनामभिः।

स्तुत्वा हुत्वा महाद्रव्यैस्तर्पयित्वा यथाक्रमम्।
अभिषिच्य पुनर्ध्यात्वा पूजयित्वा यथाविधि।
मानसोपचारद्रव्यैः सुधायुक्तैरथापि वा।
परमानन्दितो भूत्वा भावयेत पीठदेवताः।
भावयित्वा ततो जप्त्वा धर्म्माधर्म्मं विचिन्तयेत्।
देवतायां मनो योज्य स्थापयित्वा स्वपीठके।
पुनरुत्फुल्लकमलं मुद्रितं परिकारयेत्।
षड्दलं मुद्रितं कृत्वा दलाग्रे संविशेत् सुधीः।
सदानन्दः सर्व्वमयो वेदवेदान्तनामभिः।
स्तवकोटिभिरेकत्र ध्यात्वा संहारमुद्रया।
अधोमुखे दशदले कमलाग्रे नियोजयेत्।
षड्दलाग्रं महाकाल नियोज्य गमनं चरेत्।
ततो गच्छेत् प्रज्वलिते पद्मे दशदले परे।
प्रविश्य कर्णिकामध्ये तन्मयस्तत्क्षणाद्भवेत्।
तत्क्षणात् तन्मयो भूत्वा कुण्डलीचक्रसंस्थितः।
असाध्यसाधनं सर्व्वं मणिपूरस्थनिर्म्मलम्।
मणिपूरे महापीठे ध्यानगम्ये सतां प्रभो।
मनोनिवेशनं कृत्वा नरो मुच्येत संकटात्।
मनो निवेशनं कृत्वा नरो मुच्येत संकटात्।
मनो योगी मनो भोगी मनो भोक्ता मनो युवा।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
कारणं सर्व्वकार्य्याणां तद्भावं संत्यजेद्बुधः।
सर्व्वभावं विहायापि महाभावं समाश्रयेत्।
भावेन लभ्यते मोक्षो भावेन लभ्यते सुखम्।
एतद्भावं सदा कुर्य्याद्भावाद्भवति योगिराट्।
भावेन भक्तिमाप्नोति विषयाद्भावमाचरेत्।
विषयं प्रकृतिग्राह्यं सुकृतिर्ज्ञानवर्ज्जिता।
त्यक्त्वादिव्यं महापीठं मणिपूरं समाश्रयेत्।
महायन्त्रे मनो दत्वा निर्म्माणं कारयेद्बुधः।
मणिभिर्ग्रथनं कृत्वा नानामणिविशोभितम्।
स्वपीठं कुलपीठं वा लिंगपीठमथापि वा।
श्रीविद्यापीठमालिख्य विभाव्य च पुनः पुनः।
ततः प्रस्फुटिते पद्मदलाग्रे षड्दलस्य च।
स्थापयित्वा महाविद्यां पूजयित्वा सुसंयतः।
जप्त्वा च तन्मयो भूत्वा नियायमाणपूर्वके
हकाकारमूर्द्धगतं षड्दलं परिरक्षेत्।
ततश्चोर्द्धतरे स्थाने महोग्रे भवसुन्दरे।
मनो निवेशनं कृत्वा शक्तिरुद्रं समाश्रयेत्।
चैतन्यरूपिणीं शक्तिं चैतन्यं रुद्ररूपिणम्।

भद्रे भवालिकां रौद्रीं रौद्रीं प्रकाशकारिणीम्।
भक्त्या पुनः पुनर्ध्यायेत ऊर्द्ध्वरेतावशीश्वरीम्।
प्रगच्छन्ती चोर्द्ध्वमार्गे ध्येया योगिभिरेव च।
अहं देवी परानन्दा मणिपूरनिवासिनी।
तथा श्रीलाकिनीशक्तिः श्रीरुद्रस्त्वं न संशयः।
रुद्ररूपी महादेवो रुद्ररूपा सरस्वती।
सर्व्वदा ऊर्द्ध्वगामी च सा शक्तिरूर्द्ध्वगामिनी।
ऊर्द्ध्वमार्गं काशयन्तीं योगिनीं योगमातरम्।
महारुद्रं तथा ध्यात्वा मणिपूरे सुनिर्म्मले।
ऊर्द्ध्वमुखं सदा कुर्य्यान्महापद्मं मनोरमम्।
मणिपूरं महाकान्तं मणिकोटिसुनिर्म्मलम्।
कोटिकोटिशरत्पूर्णचन्द्रज्योतिः समाकरम्।
ऊर्द्ध्वमुखं समाकुर्य्यात स्वयं भावेन जायते।
यदि चोर्द्ध्वमुखं पद्मं चन्द्रमण्डलसंयुतम्।
अतिकोमलपत्रेषु भातिचात्यद्भुतं करम्।
लेपयित्वा योजयित्वा स्थापयित्वा पुनः पुनः।
प्रापयित्वा महारुद्रं त्रैलोक्यजननीं शिवाम्।
रुद्राणीं रौद्रशक्तिं च लाकिनीं लोकवादिनीम्।
रुद्राणीं रौद्रशक्तिं च लाकिनीं लोकयोगिनीम्।
कुम्भकं [illegible] प्राणवायोश्च योजनम्।

483

एकत्र मिलनं कृत्वा भावनं परिकारयेत्।
भावेन लभ्यते मोक्षो भाव एव निजप्रियः।
मनो निवेश्य तत्रस्थो कुलाराधनमाचरेत्।
तथा श्रीलाकिनीदेव्याः परमाद्भुतसाधनम्।
शृणुष्व परमानन्द भैरव प्रियवल्लभ।
मनोपदेशविधिना कोऽपि सिद्धो न संभवेत्।
ममाज्ञापनयोगेन सिद्धो भवति मानवः।
युक्तिमूलं महाभावं युक्तिमूलं हि साधनम्।
युक्तिक्रमेण कालेन सिद्धो भवति साधकः।
मम योगक्रमेणैव मम तन्त्रानुलोकनम्।
कोऽपि नाथ ब्रह्मयोगी भवत्येव न चाखिले।
सर्व्वे च योगिनः शीघ्रं प्रभवन्ति न संशयः।
स्फुटाकारदलं कृत्वा विन्यासं तत्र कारयेत्।
महायोगी कुलन्यासं विद्यान्यासं समाचरेत्।
सर्व्वन्यासं निजन्यासं व्यासजालं समाचरेत्।
मानसक्रियया व्याप्तं देहं मधुरसंप्लुतम्।
शिवस्थापनं वै ध्यावं ज्ञानचक्षुषम्।
एकाकारं मूलमन्त्रं ध्यानं तत्र समाचरेत्।

ध्यात्वाचार्घ्यं समाकुर्य्यात् कुलचक्रक्रमेण च।
आत्मानमपरिच्छिन्नं विचिन्त्य पुनरेव च
संध्यायेन्निज चैतन्य देवतां कुलदेवताम्।
पाद्यार्घ्यादिक्रमेणैव पूजयित्वा यहार्न्निशम्।
परिवारांस्ततो ध्यात्वा तत सर्व्वान् परिपूजयेत्।
धूपदीपौ ततो दद्यात् निजपूजाविधानतः।
प्राणायामद्वादशादौ कुर्य्यात साधकस्य च।
भक्त्या ध्यात्वा मनुं जप्त्वा मणिपूरस्थ देवते
जपं समर्प्य विधिना प्राणायामं पुनस्त्रयम्।
प्रणम्य स्तोत्रकवचैः स्वदेवीं हृदि चानयेत् ॥०॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सि-
द्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे
मणिपूरचक्रभेदनप्रकारो नाम चतुश्चत्वारिंशत पट-
लः ॥ ४४ ॥

आनन्दभैरव्युवाच।
मणिपूरविभेदार्थं शृणु वक्ष्यामि तत्वतः।
यं ध्यात्वा मूढलोकाश्च प्रविशन्ति महाघटे।
अमूढत्वमाप्नुवन्ति भवन्ति योगिनोऽमराः।
खेचरत्वमाप्नुवन्ति सांख्यतत्वनिषेविणः।

485

महापातकमुख्यानां नाशं शीघ्रं महारिपुम् ।
कियत्कालेऽनले देशे जले पर्वतकानने ।
कुर्वन्ति दिग्विदिक्स्थानां देवतावशमेव च ।
मणिपूरं महापीठं ध्यायेद्यः प्राणसंयमम् ।
तथा पंचाननासिद्धिं कृत्वा पूर्व्वं विभेदयेत् ।
त्रैलोक्यजननीं सत्यां शिवामाद्यां त्रियोगिनीम् ।
मूलाधारात् समुत्पत्य प्रयच्छन्ति रसाह्वदे ।
प्रकाशं षड्दलं कृत्वा प्रगच्छन्ती प्रभान्विता ।
मणिपूरे महाचक्रे त्रैलोक्यजनसाधने ।
सिद्धीनां निलये काम्ये कमनीये मनःप्रिये ।
मनःप्रिया महादेवी सर्व्वोत्कटघनकारिणी ।
खेचरी महदानन्दमण्डिता महायोगिनी ।
अनुग्रहकरी सिद्धा विभाव्या तत्र एव हि ।
आनन्दघनसन्दोहमालज्ञानं सुनिर्म्मलम् ।
मणिपूरं संविभाव्य किं न सिध्यति भूतले ।
अणिमाद्यष्टभाव्यात्म महाश्रेष्ठादिसिद्धिभाक् ।
कौलोबीरावमुख्यो वा ज्ञानीवा साधकोत्तमः ।
योगाभ्यासं यः करोति मणिपूरं समाश्रयेत् ।
मणिपूरास्थितं देवं यः स्तौति नियतः शुचिः ।

486

स्तवराजस्य पाठेन प्रबुद्धा कुण्डली भवेत्।
सा देवी परमा माया मणिपूरस्थितां शिवाम्।
प्रबुद्धां कारयत्येव ततः सिद्धो भवेन्मनुः।
सिद्धे मनौ परा प्राप्तिरिति मे तत्त्वनिर्णयः।
यदि चैतन्यमिच्छन्ति कुण्डलिन्याः पराक्रमम्।
जानाति निजदेहे च महोदयमनुत्तमम्।
तेषां चैतन्यहेतोश्च देवतानां कुलेश्वर।
महास्तोत्रं समाकुर्यात प्रत्यहं सिद्धिहेतुना।
सिद्धिकार्य्ये धर्म्मकार्य्ये मणिपूरे समाप्नुयात्।
मणिपूरनिवासिन्या भेदनं ज्ञानसाधनम्।
सहस्रनामकमलं सिद्धद्रव्यनिरूपणम्।
नित्यसिद्धिं काम्यसिद्धिं मणिपूरे समाश्रयेत्।
प्राणवद्धा स्वदेवीं पूजयेल्लाकिनीं पराम्
स्वदेवतां पूजयेद्वै मणिपूरे महालये।
मणिपूरस्थितां रौद्रीं महाशक्तिं महोदयाम्।
सर्व्वसंचारिणीं योग्यां महायोगिप्रियां पराम्।
निजदेवीपदाम्भोजपूजावत् पूजनं चरेत्।
पूजां समाप्य विधिना स्तोत्रं देव्याः समुच्चरेत्।
ततः प्राणवायुसर्दने सिद्धीनां नाशहेतवे।

487

कृतस्तोत्रं कोटिनामन्त्रह्मणा गुणकालना।
तत सर्व्वं प्रवक्ष्यामि तत प्रकाशे ज्ञानशंकर।
एतत्स्तोत्रप्रसादेन योगिनस्तेऽमलौजसः।
अहंकाघटाछन्नमहाव्याधिनिवारणाम्।
महास्तवनमेवं हि साक्षादानन्दवर्द्धनम्।
लयभक्तिप्रदं शुद्धं शुद्धानामालगोचरम्।
शिवामम्बामाद्यां दशदलगतां रुद्रमहिषीं
विशालाक्षीं सूक्ष्मां शशिशतजटाजूटमुकुटाम्।
महाविद्युतकोटिप्रियजडितपीठे त्रिनयनां
महालाकिन्याख्यां दशदलकुले भावयति कः॥ १
मृणालान्तर्ध्वान्तप्रकटतटहां हारसुभगां
कुलक्षेत्रोल्लासां चरमपददां दीपकलिकाम्।
सदानन्दाकारां पतिगुणवहां तारकमयीं
प्रभावर्णां श्यामां रुचिरवदनां भावयति कः॥ २
प्रसन्नां स्वे देहे कुलपथगतां गीतरमिताम्
परानन्दश्रेणीं नवरसनतां तामसहराम्।
महारुद्राक्षिप्तां क्षितिभयहरां चारुकिरणां
महारौद्याद्रिस्थां सकलकरुणां भावयति कः॥ ३
प्रतीक्षानन्दाब्धिप्रगवचरणां कोटिविधुगां

वियद्दुर्गां कान्तां सुखवरसुपूजाविधिरताम्।
महामूलाद्धारप्रचलनकरीं भेदनकरीं
दिवा योगाह्लादप्रियजन शिवां भावयति कः॥ ४
अयोध्यापीठस्थामरुणारमणीं प्रेमगलितां
महारौद्रीं भीमां शतशतरतिप्रेमनिकराम्।
महादुःखार्त्तानां नयनशुभगां भावविरहां
सतीं सीतामिन्द्रोत्सवनवघटां भावयति कः॥ ५
सुधाब्धेराह्लादप्रकरणसुरां सौरभकरीं
क्रियारूपां योग्यां भुवनमणिपूरप्रकृतिगाम्।
गुरोः स्थानोद्योगां शमनदहनां शीतलकरां
त्रिभिन्नां तत्वज्ञां समरहरणार्त्तिं जयति कः॥ ६
विकाराधारांगीं तरुणरविकोटिप्रियमिमां
कुलाधारां सारां परमरसधारां जयधराम्।
कृपाच्छन्नां मग्नां परमरसभाण्डे सुशुभदां
भजेद्रुद्रां रुद्रां प्राशिसुखकराह्लादनिकराम्॥ ७
रसाब्धौ विश्रान्तिं कुपितजनशान्तिं सकरुणां
त्रिलोकज्ञानस्थां मदननिलयां योगनिकराम्।
मणिद्वीपच्छायां दशदलकलां केवलभरां
भवानीं रुद्राणीं सकलमणिपूरे भजति कः॥ ८

कृपाब्धौ किं किं किं मनुगतसुतां मीनललितां
शिवाद्यां चानाद्यां सकलमणिपूरस्थलभवाम्।
हिरण्याक्षीं तन्त्रां त्रयकरणवापीम् विश्वतां
विनोदीं पंचास्यप्रियगुणधरां भावयति कः॥८९॥
महापद्माटव्यां सकलधनदानालचपलां
चलानन्दोद्रेकप्रचयरससिन्धुं भवहृदि।
हृदानन्दो ध्यायेत सकलगुणदात्रीं सुखमयीं
कलामूर्त्तां कान्तां तिमिरदहनां कोटिधनदाम्॥९०॥
दशकं यः पठेन्नित्यं श्रीविद्यां सुखदायिनीं।
ध्यात्वा हृदयपद्माधो निर्म्मलात्मा सदा पठेत्।
मणिपूरस्थितं देवं रुद्रं पश्यति योगिराट्।
रुद्राणीसहितं शम्भुं दृष्ट्वा मुक्तो भवेत् क्षणात्।
जीवन्मुक्तः स एवात्मा योगिनीवल्लभो भवेत्।
योगात्मा परमात्मा च स हि साक्षान्मुनीश्वरः।
संभित्वा मणिपूराब्जं निर्म्मलज्योतिरुज्ज्वला।
शम्भोरीश्वरयोगं तु क्रियानाथस्य श्रीपतेः।
निकटे याति देव्याश्च स्थाने योगी न संशयः।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे मणिपूर-

भेदने भैरवी भैरवसंवादे त्रितत्वा लाकिनी श-
क्तिस्तवनं नाम पंचचत्वारिंशत् पटलः ॥४५॥

आनन्दभैरव्युवाच

अथ कालक्रमं वक्ष्ये यत्काले योगिराड्भवेत्।
तत्कालं प्राणवायूनां मिलयं सूक्ष्मसंचयम्।
पुनः पुनः सञ्चयेन न्पो भवति संयमी।
क्रियायां संचरन्त्येव योगिन्यो योगमातरः।
यत्काले यत्प्रकर्त्तव्यं तन्निरूप्य कुलार्णवम्।
काले काले वशो याति परमात्मा निरामयः।
विना योगस्वरूपेण विनाजाप्येन शंकर।
विना योगस्वरूपेण ... भवति कुत्रवा।
कः सिद्धो जायते ज्ञानी योगी भवति कुत्रवा।
अभ्यासमन्त्रयोगेन शनैर्योगी भवेन्नरः।
प्रभाते ज्ञानशौचं च कुण्डलीभावनादिकम्।
तन्मध्ये चापि संकुर्य्याद्योगं पंचामरादिकम्।
ततो म[illegible]न्त्रस्नानकार्य्यं मस्तके जलसेचनम्।
सन्ध्यावन्दनकार्य्यं च ततः कुर्य्यात् पृथक् पृथक्।
तत उत्थाय सद्भूमौ शुद्धकोमलजासने।
उपविश्य सदाभ्यासी शुद्धकायासनं चरेत्।
तत्कार्य्यममर्येणा[illegible]ध्यानचैतन्यमेव च।

कुण्डलिन्याः सदा कुर्यात्तन्मध्ये जपमेवच।
आसनं सुन्दरं कुर्यात् सव्यापसव्य भेदतः।
आसनादिकमाहत्याशेषमुक्तासनं चरेत्।
मस्तकाधःकेशमध्ये हस्तं दत्वा मनुं जपेत्।
चतुरशीति च त्रिगुणमासनं भेजयं तथा।
प्रत्यासनं क्रमेणैव एतेषां द्विगुणं पुनः।
एतेषामासनादीनां वक्तव्या संख्यका पुनः।
अष्टाङ्गसाधने नाथ वक्तव्यं सर्वमासनम्।
आसनं यःकरोत्येव वज्रकायः स एव हि।
समाप्य चासनं सर्वं बद्धपद्मासने विशेत्।
चिबुकं वक्षसि श्रीमान् दत्वा कालीं विभावयेत्।
ततः पद्मासनं कृत्वा प्राणायामं समाचरेत्।
प्राणायामं षोडशकं चाथवा द्वादशादिकम्।
स्वकर्णगोचरं कृत्वा पिबेद्वायुं सदा बुधः।
ततः समाप्य तत्कार्य्यं मन्त्रयोगं समभ्यसेत्।
समाप्य मन्त्रयोगं च प्राणायामत्रयं चरेत्।
तत उत्थाय नद्यादिं विलोक्य चान्तरात्मनि।
स्नानं कृत्वा महायोगी मानसादिक्रमेण तु।
तत्रैव मानसं जापं समाप्य जपमेव च।

एवं प्राणायामं कार्य्यं कृत्वा तीरे विशेत् सुधीः।
पिधाय पीतवसनं धर्म्माधर्मौ विचिन्तयेत्।
ततः सन्ध्यावन्दनं च कृत्वा पूजाविधिं चरेत्।
सर्व्वत्र कुम्भकं कृत्वा भावयित्वा पुनः पुनः।
मणिपूरे महापीठे ध्यात्वा देवीं कुलेश्वरीम्।
पूजयित्वा विधानेन प्राणायामं पुनश्चरेत्।
ततः कुर्य्यात् साधकेन्द्रो विधिना कवचं शुभम्।
सर्व्वत्र प्राणसंयोगाद्योगी भवति निश्चितम्।
अथवा कालजालानां वारणाय महाकविः।
एतत्कार्य्यं सदा कुर्य्याद्योगनिर्वाणसिद्धये।
विना योगप्रसादेन न कालः संवशी भवेत्।
कालेन योगमाप्नोति योगाधीनं स्वकालकम्।
योगाधीनं परंब्रह्म योगाधीनं परं तपः।
योगाधीना सर्व्वसिद्धिस्तस्माद्योगं समाश्रयेत्।
योगेन ज्ञानमाप्नोति ज्ञानान्मोक्षमवाप्नुयात्।
तत्क्रमं शृणु भूचक्रे सर्व्वविद्यादिसाधनम्।
सिद्धसाधनमात्रेण योगी भवति भूपतिः।
शीघ्रं राजा भवेद्योगी शीघ्रं योगी भवेद्यतिः।
शीघ्रं योगी भवेदेषो यदि स्वधर्म्ममाश्रयेत्।

स्वधर्म्मनिष्ठता ज्ञानं मज्ज्ञानं परमालनः।
मज्ज्ञानेन भवेद्योगी योगाधीनाश्च सिद्धयः।
सिद्ध्यधीनं परंब्रह्म तस्माद्योगं समाश्रयेत्।
योगयोगाद्भवेन्मोक्षो मम तन्त्रार्थनिर्णयः।
योगी ब्रह्मा मुरारिश्च तथा योगी महेश्वरः।
तथा योगी महाकालः कौलो योगी न संशयः।
मणिपूरभेदने तु यत्नं कुर्यात् सदा बुधः।
यदि चेन्मणिपूरस्य देवता भेदको भवेत्।
सर्व्वकालं सुखी भूत्वा चिरं तिष्ठति निश्चितम्।
महाप्रभुं सुन्दरं च महामोहनिपातनम्।
मेघाभं विद्युदाभं च पूर्णतेजोमयं परम्।
मणिभिर्ग्रथितं पद्मं मणीनां पूरमेव च।
सूर्य्यकान्तचन्द्रकान्तवह्निकान्तमहोज्ज्वलैः।
इत्यादिमणिभिः सर्व्वं पूरं कान्तिगुणोदयम्।
निवीड़जलदे मेघे कोटिविद्युत्प्रभा यथा।
तत्प्रकारं भावनीयं सिद्धानां ज्ञानगोचरम्।
अत्यन्तसूक्ष्ममार्गस्थं नित्यध्यानं हि योगिनाम्।
मणिभिः शोभितं पद्मं मणिपूरं तथोच्यते।
दशकोमलपत्रैश्च समायुक्तं मनोहरम्।

डादिफान्तवर्णायुक्तं स्थिरविद्युत्समाकुलम्।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकम्।
आदौ वर्णस्वरूपकाणां ध्यानं कुर्यात् सुधामयः।
महापद्मे मनो दत्वा निर्मलं परिभावयेत्।
डादिफान्ताक्षराणां च ध्यानात् ध्यानस्थिरो भवेत्।
मनोधैर्यमुपागम्य दिव्यभक्तिं समालभेत्।
वर्णध्यानं प्रवक्ष्यामि शृणुष्व परमेश्वर।
यद्विभाव्यामरो भूत्वा चिरं तिष्ठति मानवः।
महाधैर्यक्रियां कुर्यात् वायुपानं शनैः शनैः।
यत्र यत्र मनो याति तन्मयस्तत्क्षणात् भवेत्।
पूर्व्वादिदलमारभ्य ध्यानं कुर्यात् पृथक् पृथक्।
डँ डँ डँ डाकिनीं तां मकवरतवां तारिणीं ताररूपां
ढिं ढिं ढिं डामरस्थां डमरुकुमरहे डुँकडीं डुँ मनुस्थाम्।
डुं डुं डुं डामरेशीं डिमिडिमिडिमिग ध्यान डौं रौं डुं डौं डौं
डाकं डं डः प्रडुं डं मुमुडमखुडुं डाडिमीमाश्रयामि ॥१॥
ढौं ढौं ढौं गाढटक्कारवकरसुकरां वाढमासाठमंत्रां
ढिं ढिं ढिं नागरूपां भजभजविमलानन्दचित्तप्रकाशां।
श्रीं ढं ढं वज्रटंरवारवरढमढमढं स्वाहया ढौं टबीजां
ढौं ढौं ढः काटकाप्रियपरकरुणा कामिनीं लाकिनीं ताम् ॥२॥

वाणस्थां नित्यसंस्थां कठिनवरणकर्णां वाणपाणिं
वाणीं वेसूतसवाद्यां मणिगुणकरणां सांसवीजप्रवीणाम्
वेणुस्थां शांसुमाला शुभमितिशिमिति चैतन्यमालां विलोलां
सिन्दूरारक्तवर्णां तरुणायुगमितां मालिकां भावयामि॥ ३॥
ताराताबकमन्त्रजालविमलातालादिसिद्धिप्रदा
तां तं काममतितेजसा मुनिमनोयोगे वहन्तीं पराम्।
तार्त्तीयं तुलसीतुलां तनुतटां तर्कोद्भवां तान्त्रिकां
श्रीसूर्य्यायुततेजसीं भज मनः श्रीमातरं तापसीम्॥ ४॥
यद्यस्थं स्थानसुस्थं स्थितिपथपथिको खंडकूटां यनानां
गाथां योथां विशोथां थमितिथमितिथं वाद्रिजायां स्थिरांसां
चन्द्रज्योत्स्ना स्थलस्थां स्थिरपदमथना मुज्ज्वला मासनस्थां
स्थेयां स्थैर्य्याभिरामां प्रणवतनुस्रजां चन्द्रवर्णां भजामि॥ ५
ह्रौं ह्रीं हूँ दीर्घदंष्ट्रां दशनभयकरां साट्टहासां कुलेशीं
हूं हुं हुं वह्निकान्तां दरदलितकराह्लाददीर्घोदराढ्याम्।
वेषच्छायापहन्त्री दिविदवनदशादायिनी मादरस्थां
शिष्याह्लादप्रदीप्तामखिलधननदीदीपिनीं भावयामि॥ ६
धन्यां श्रीध्यानशिक्तां धरणिधरधरां धूमधूमावतीं तां
तां धूम्राकारवक्त्रां धर गधरणीं धारयन्तीं कराब्जम्।
विद्युन्मय्यार्ककोटिं ज्वलनधरसुधां कोकिलादीसुसूक्ष्मां

496

ध्यानाह्लादैकसिद्धिं धरणधननिधेः सिद्धिविद्यां भजामि॥७

नित्यां नित्यपरायणां त्रिनयनां बन्धूकपुष्पोज्ज्वलां
कोट्यर्कायुतसंस्थिरां नवनवां हस्तद्वयाम्भोरुहाम्।
नानालङ्करणाधरणानलविधुश्रीकोटिराशिस्थितां
सानन्दां नगनन्दिनीं त्रिगुणगां नन्ने प्रभां भावये॥८॥

प्रीतिप्रेममयीं परां तपसि यां बालां प्रभापूरितां
पूर्णां पूर्णगुणोपरि प्रदलनो मांसप्रियां पंचमाम्।
व्यापारोपनिपातकापललपां पानायपीयूषपां
चित्तप्रापय पीतकान्तवसनां पौराणिकीं पार्वतीम्॥९

फें फें फें फणिवाहनो फलफलां पुल्लारविन्दाननां
फेत्कारां वरयौवनाद्विकटास्फालप्रफुल्लोन्मुखीम्।
फं फं फं फणिकंकणां फडिति मन्त्रैकान्तसिद्धःफणां
भक्त्या ध्यानमहं करोमि नियतं वाञ्छाफलप्राप्तये॥१०॥

विशुद्धाकारमध्ये तु विज्ञाली रक्तवर्णकाम्।
एवं ध्यायेद्दशावर्णान् रक्तविशुद्धलोद्भवान्।
सदा ध्यायेत कुण्डलिनीं कालिकामध्यवासिनीम्।
वरहस्तां विशालाक्षीं चन्द्रवयवलक्षणाम्।
चारुचन्दनदिग्धाङ्गीं फणिहाराविभूषणाम्।
द्विभुजां कोटिकिरणां [illegible]सिन्दूरशोभिताम्।

त्रिनेत्रो कालरूपस्थां लाकिनीं लयकारिणीं
सिद्धिमार्गसाधनाय ध्यायेद्दुर्गान् दशाम्बुदे।
चतुर्भुजां षड्भुजां च अष्टहस्तां परात्पराम्।
दुर्गां दशभुजां देवीं निजवाहनसुप्रियाम्।
सर्वास्त्रधारिणीं सर्वां हस्तद्वादशशोभिताम्।
चतुर्दशभुजां रौद्रीं तथा षोडशपाणिनीम्।
अष्टादशभुजां श्यामां हस्तविंशतिधारिणीम्।
एवं ध्यात्वा पूजयित्वा रुद्राणीस्तोत्रमापठेत्॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वर्णध्यानं नाम षट्चत्वारिंशत्पटलः॥०॥४६॥

आनन्दभैरव्युवाच

शृणु भैरव वक्ष्यामि रुद्राणीस्तोत्रमुत्तमम्।
श्रुत्वा पठित्वा देवेश धारयित्वा स्वदेहके।
महासिद्धो भवेदेव महाकालवशो भवेत्।
त्रैलोक्यरक्षणार्थाय ब्रह्मणा विष्णुना तथा।
रुद्रयुक्तां महारौद्रीं स्तुत्वा सर्वजयोऽभवत्।
ततश्रुत्वा मुनयः सर्वे योगिनो योगदर्शकाः।
सर्वे देवाः सर्वलोकाश्चाधिपाः प्राणरक्षकाः।

एतत्स्तवनमात्रेण ब्रह्मा ब्रह्मत्वमाप्नुयात्।
विष्णुर्विष्णुत्वमाप्नोति देवत्वं सर्व्वदेवताः।
इदानीं शृणु तत्स्तोत्रं मयाङ्गयोगसाधनात्।
एतत्स्तवनपाठेन चाष्टाङ्गकुलदेवताः।
वशीभूताः प्रभवन्ति सप्तस्वर्गस्थदेवताः।
अस्य महारुद्रशक्तिस्तोत्रस्य महाकालभैरव ऋषिरनुष्टु-
प्छन्दः श्रीमत्रुद्ररूपिणी देवता ह्रौं बीजं ह्रूं शक्तिः
ह्रौं स्फें कीलकं महोग्राधिदेवता सर्व्वाभीष्टसिद्ध्यर्थे
विनियोगः॥ ओं
महारौद्री रुद्राणवरवरक्रोधनिकरा-
धिकारा धर्म्माणां हरतु विषयं देहि परमम्।
विवेकं सत्पुत्रं त्वमपि जगतामादिपुरुषा
विभाकोटिग्रामस्खलनलिचला चोलनिचला॥१॥
त्वमेका त्रैलोक्यं व्यवसि सततं मे सुखभवा-
मनन्ता साचातीन्द्रियगणकला नागवसना।
श्रियं दातुं नित्यं समुदयति लक्ष्मीस्तव शिवे
शिवाह्लादानन्दा जडितमलमंगं कुरु मुदा॥२॥
महालोभं पापं हरहरहरे हीरकनिभे
विपानन्दोद्गीता ममतनुविषं वेष्टवाणी।

499

प० ४१

सुधानन्दं देहि त्वयमपि हर क्रोधमतुलं
मदं कामं मोहं कुलजननि दिव्यं वितरतम् ॥ ३

तपस्यासम्भारं त्वमपि च ददासीह गदिता
प्रदीप्ता मद्व्याप्ता भवति तवदाने मम मनः ।
प्रगृह्णाति श्रीदे जयममलभक्तिं निजशुभां
समीक्ष्यैतानेकां भुवनजनरक्षां कुरु सदा ॥ ४॥

विचार्यास्वेतन्त्रे रचयसि सुखं नित्यमिलितं
महास्वड्गप्रज्ञा विभवनकरा रुद्रदयिता ।
सुराणां संरक्षां यदि कुरु मुदा पीठनिकटे
मणिद्वीपे तेजोमयि हिमगिरिपूर्वेऽमलपद्म ॥ ५॥

महादेवे युद्धोत्सववररतात्वं कुलकला
किराती सर्व्वाणी मम कुलगतं मालयलये ।
ममज्ञानानन्दं रचय हृदये योगजननि ॥ ६

यतीनां रक्षार्थे कुल युवति विघ्ने उदयति
प्रतिष्ठा कीर्तिस्त्वं त्वमवतरसि त्रासि तिमिरात् ।
न जाने त्वत् तत्वं तरुणि महिमानं सुखमयं
महापारावारां निधिभवजले शं कुरु जयम् ॥ ७

हिरण्याह्लादस्था त्वमपि करुणासागरमयी
विधातारं विष्णुं सुरवरनरादीन् परजनान् ।

प्रपासिन्धे सिद्धा सुखभावनमंगलयकरा
किरन्ती सानन्दा किरणशतकोटिच्छदविले ॥ ८॥
त्वदीयं सुखान्तं समिच्छामि सत्या
विसर्गेन्दुवर्णात्मकं कामलास्यम्।
कृपादृष्टिपातामलं पासि सुद्रा
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ९॥
जगत्तारिणी त्वं जगद्व्यापिनी त्वं
जगज्जालरूपा जगद्धर्मकूपा ।
अनैकान्तिकत्वात्त्वमानन्दरूपा
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १०॥
विधानं जनानां कुरुत्वं त्वमीशा
कृपालुब्धचेताः प्रियानन्ददात्री ।
त्वमाज्ञाभुजस्था त्वमार्या गुरूणां
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ११
प्रभामण्डलस्था स्थितित्यागसंस्था
स्वलाम्भोजमाला दयालम्बकण्ठा ।
शिवा श्यामवर्णा महापिंगलाणी
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १२
चतुर्थश्रुतिस्था शरच्चन्द्रसंस्था

महावेदभाषात्वमेका च सारा ।
महाभक्तिभावाश्रितं मां प्रसिद्धे
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १३ ॥

जगद्धामचेष्टे जगद्बुद्धिनिष्ठे
जगद्यौवनस्था जगद्भावनास्था ।
समावर्त स्थाधौ महाघूर्णितं मां
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १४

महासृष्टिसंहारकालक्रमस्था
महामांसभक्ते सदानन्दशाक्ते ।
महाशाक्त[illegible]न्द्रपूज्येऽभवन् मां
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १५ ॥

चतुःषष्टितन्त्रार्णवाह्लादकत्वात्
महाभौतिकत्वात् महासिद्धिविद्या ।
छलाच्छिन्नदेहा छलानन्दसंज्ञा
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १६ ॥

शिवत्वं महत्त्वं समत्वामलत्वा-
दनैकान्तिकत्वं ददासि त्वमाद्या ।
सुधासागरस्था महामोहनस्था
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ १७ ॥

महासिंहपृष्ठे सदाम्भोजलक्ष्मीः
मम श्रीः शिरोमण्डलस्थे प्रपातु ।
तवानन्दसन्तानकल्पे
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २८ ॥

स्थिरा सा महाविद्युदाकारहारा
महच्चंचला चालना जन्मा ।
सदा भावनत्वात् सदाज्ञावनस्था
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २९ ।

कुलानन्दमोहा महाकौलकन्या
कुलदेवरदा कुलच्छत्रकारा ।
महाचंचलत्वान् महावायुघूर्णा
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३०

चिरंजीविनी भाविनी भूमिबीजा
भयाभावहन्त्री शरत्कोटिचन्द्रा ।
विभूतिर्भयाहारकर्त्री प्रहृष्टा
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३१

महावीरभावाश्रया भावरूपा
विशेषातिशेषे महाशेषवीरा ।
विसर्गापवर्गाश्रयान्तोज्ज्वलन्ती

त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २२

महापंचमत्वान्मदामोदकत्वात
महाकौलिकत्वादसंचारणत्वात ।
कुलप्रेमभावक्रियानिश्चलत्वात
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २३

रसासिद्धिदात्री शिवानन्दकर्त्री
महामैथुनानन्दसंभेदनत्वात ।
सुखोल्लासितत्वात तपप्राणरक्षा
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २४

जगतप्रेमभावा कुलज्ञानतत्वा
प्रियश्रीकपालं भवाधारमूर्त्तिः ।
महैश्वर्यहेतो महाराजकन्या
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २५ ॥

महामोक्षविद्या महानिर्म्मलत्वात
महापंचचूडास्यसिद्धिप्रिया च ।
महानादविन्दुप्रिया साभिरामा
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २६ ॥

महाविद्रुमाकारवर्णाभिरामा
कुलाह्लादसूत्रादिसंधनत्वात ।

महाराज्यसंसाधनासंघटत्वात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २७॥
तवाङ्घ्रिद्वयाम्भोजपूजासुखत्वात्
महाकालरूपा स्वयं सर्वविद्या ।
विकारादिसम्बन्धविश्लेषणत्वात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २८॥
शिवत्वं भवत्वं महाशैलकन्ये
प्रियत्वं परत्वं महापारणत्वम् ।
ममाधिहितत्वादनैकान्तिकत्वात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ २९
महच्चेतनादेवनादोत्वणत्वात्
असंख्या मतीनां मनोयोगमुख्या ।
विरोधापहन्त्री रिपुप्राणहन्त्री
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३०॥
चतुर्विंशतिक्रोधतत्त्वानुकूले
वियत्स्वरचन्द्रोज्ज्वले कालकण्ठे ।
सदा मां प्रपातु प्रधानार्कवर्णा
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३१॥
शुभं कामधेनुस्वरूपं स्वदेहं

सदा दर्शनश्रद्धया चारुवर्णा ।
हिमांशुप्रभा कोटिवर्णेन्दुपूर्णा
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ३२ ॥

महाकामबीजान्विता बवरायन्ती
महादोषजालं शनैरेव हन्ती ।
शिवा भद्रकाली स्वबानन्दमाला
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ३३

महाकालकूटाशिनं तीक्ष्णनेत्रं
सदा पासि शम्भुं मुदाद्रीतिवेलम् ।
भवापालनत्वादसंख्याभिरामा
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ३४

हरन्ती विषा वहन्ती फलाद्यं
रटन्ती विलोलं विनीला भ्रमन्ती ।
श्रियः पालनी बालिका बालिकात्वं
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ३५

तवानन्दहेतोः सदा श्रद्धया
पदाम्भोजमध्ये मनो योगकाले ।
परा सेव्यते कामसंद्दालनत्वात्
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ३६ ॥

506

क्षितिक्षोभनाशाय सिद्धादिविद्या
कुलाद्याखिलाद्या शिलामध्यमध्या ।
प्रयत्नं करोषि त्वयानन्ददानात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३७॥

महाधैर्य्यमाहात्म्यजं जप्यते यैः
स्तवाद्याभिधानानि कानि प्रभाते ।
तदैवादिकाले ददासीह सिद्धिं
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३८

चिरं स्थापयन्ती चिरं भासयन्ती
त्वमाख्या गुरूणां गुणानन्दविद्ये ।
सुधाकामतुष्टा क वह्निजाया
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ३९

सुखानन्दकाले फलोद्भूतचिह्ना
शिखां मध्यदेशे महासिद्धिदात्री ।
विभिन्नाविभिन्ने महारुद्रविद्ये
त्वमेका परंब्रह्मरूपेण सिद्धा ॥ ४०

महामुण्डिकात्यायनि क्रोधमूले
विवेकादिकं धर्ममादौ ददासि ।
त्रयाणां सुराणां मुदा वन्दनाय

507

त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ४१ ॥

विशुद्धा स्फुटत्वात् महाकौतुकत्वात्
तनुध्यानवत्वाद्दनैकान्तिकत्वात् ।
कुलाद्यत्वमात्वान्महालक्ष्मात्वात्
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ४२

दहन्ती रिपूणां कुलस्त्र्यदेशं
क्षणादेव सूक्ष्मा सुसूक्ष्मा सती सा ।
ममानन्ददेशं सदा पालयश्री:
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ४३

चतुर्थाश्रमस्याश्रमं पाहि रुद्रे
महोग्रप्रतापे महारौद्रिभद्रे ।
महापातकादिक्षयत्वाम्रतत्वात्
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ४४

नजानामि किंवा मरोवापि विष्णु
महाकौलिकोवा नजानाति पूजाम् ।
कुलासेवनान्ते सुरेन्द्रादिपाठात्
त्वमेका परं ब्रह्मरूपेण सिद्धा ॥ ४५ ॥

मदीयं प्रलोभं महाभद्रकाली
प्रकर्षेण कर्तुं समर्था भवत्वम् ।

पदाब्जे चरन्तु महापापसर्गे
त्वमेका परंब्रह्मरूपेण सिद्धा ॥

महावायुवश्ये महाज्ञानवश्ये
महामन्त्रजाप्यादिसिद्धिप्रसिद्धे ।
लयं देहि रुद्राणि वियालयत्वात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥

वहन्ती कपालं स्खलन्ती महार्थं
महाहेममालां समाकाशयन्ती ।
शिरोमण्डलं मेऽवदैश्यानदीशे
त्वमेका परंब्रह्मरूपेण सिद्धा ॥

प्रचण्डा प्रसन्ना भवत्तोभहेतो
विवादादियाताय शान्तिः प्रतुष्टिः ।
कियत्कालसंख्या प्रभुत्वान्तरत्वात्
त्वमेका परंब्रह्मरूपेण सिद्धा ॥

महावायुपानक्रियामुख्यकाले
कुलज्ञानदाना दिवारूपिणी त्वम् ।
प्रभुत्वं विदेहि क्षणे कामकर्त्री
त्वमेका परंब्रह्मरूपेण सिद्धा ॥

यदि श्रीववार्ये जपा कासिद्धि

विदेहीति चित्ते समाय भक्तः।
समाप्नोति शीघ्रं सदा प्रार्थ्यते यैः
सदा पठ्यते वा मुदा वारमेकम्॥
महाकालशम्भो महाकालसिद्धौ
मुदा कालवश्ये पठेदेकचित्तः।
महाभक्तिभावं लभेद्वेदमुक्तिं
महादेवभक्तिं त्रिकालेन योगम्।
मनेः पीठमध्ये महारुद्रकान्तां
महालाकिनीं कुण्डलीं भावयन्ति।
प्रकाशाय पद्मे रुहाणां जलान्ते
महायोगिनो भूतनाथा भवन्ति॥
महापुण्यलाभं स्तवं ब्रह्मसारं
महाकान्तिलाभाय पुण्याय सिद्ध्यै।
महाकालि रुद्राणि भद्राणि कर्त्री
भवानन्दमूर्तिप्रकाशाय कुर्यात्॥
किलानन्दमाहत्य संपूज्यते यैः
महादेवि चण्डे तव ध्यान निष्ठैः।
महामोक्षभावं समाप्नोति शीघ्रं
महाशुद्धरूपो महाकालरूपी॥

510

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे मणिपूरभेदनक्रमे भैरवीभैरवसंवादे रुद्रशक्तिलाकिनीस्तोत्रनाम सप्तचत्वारिंशत्पटलः ॥ ४७ ॥

आनन्दभैरव उवाच

शृणु कैलासशैलाद्रिचक्रे मण्डलसंस्थितम् ।
षट्चक्रभेदमाहात्म्यं सावधानावधारय ।
अप्रकाश्यमिदं तत्त्वं मणिपूरविभेदनम् ।
अष्टैश्वर्य्यसाधनाय जीवन्मुक्तिप्रदाय च ।
कथयामि महाकाल यज्ज्ञात्वा लमरोऽमरः ।
क्रिया साधनमात्रेण केन योगेन एव च ।
साधनादेव सर्व्वज्ञः सर्व्वार्थज्ञानवान् भवेत् ।
रुद्राणीसहितं रुद्रं ध्यात्वा संपूज्य संजपेत् ।
अथ वक्ष्ये महामन्त्रं पूजाप्रकरणं यथा ।
मणिपूरे स्थिरो मन्त्री रुद्राणीयजनं चरेत् ।
दम्पत्योर्मन्त्रमुद्धारं करोमि कालकूटप ।
प्रणवं पूर्व्वमुच्चार्य्य नमः शब्दं ततो वदेत् ।
ते पश्चान्तां समुद्धृत्य रुद्रशब्दं ततः परम् ।
रूपिण्यै परमुच्चार्य्य रुद्राणीमन्त्रमीरितम् ।

ततो महारुद्रमन्त्रं वक्ष्यामि तत्त्वतः शृणु।
प्रणवान्ते नमः शब्दान्ते नमहाशब्दमुद्धरेत।
रुद्राय पदमुद्धृत्य महारुद्रमनुः स्मृतः।
ततोऽन्यतकालरूपेण रुद्राणी मन्त्रमाशृणु।
डादिफान्तैः सर्व्ववर्गैराद्यन्तपुटितं मनोः।
सर्व्वशेषे वह्निजाया महामन्त्रोत्तमोत्तमः॥
अस्य जापनमात्रेण षट्पद्मसाधने जयी।
एवं प्रकारं रुद्रस्य चाथवा प्रकारकम्।
रुद्राणां विविधं मन्त्रं कीर्तितन्ते विनिर्म्मितम्।
मणिपूरे सदा ध्यायेत योगसाधनहेतुना।
सर्व्वत्र मानसं कुर्य्यात ध्यानपूजाविधानकम्।
प्रसादाख्यादिमनुभिर्म्मनुं जपादिभिस्तथा।
चैतन्यं कारयेत् शीघ्रं मणिपूरस्थदेवयोः।
अथ वक्ष्ये महेशस्य रुद्रस्य परमात्मनः।
प्रासादाख्यं महामन्त्रं त्रैलोक्यफलसिद्धिदम्।
सान्तं सौकारसंयुक्तं नादबिन्दुविभूषितम्।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनुः।
प्रणवं पूर्व्वमुच्चार्य्य स्वाहान्ते जपते यदि।
स्तम्भनादीनि कर्म्माणि सकरोति न संशयः।

अथवा मृत्युञ्जेतारं महामन्त्रो महामुनिः।
जपेन्मानसजापेन तज्जाप्यं
कामकर्णेन्दुभृगुः स्वर्गसमन्वितः।
अक्षमाला निगदिता मन्त्रं मृत्युं जयात्मकः।
अथवान्य प्रकारेण जपेन्मृत्युं जयात्मकम्।
मृत्युंजयं समुद्धृत्य पुनरेव विलोमतः।
द्वादशाक्षरमन्त्रोऽयं मृत्युञ्जयविधौ परः।
ध्यानं पूजा तथान्यासं शृणु वक्ष्यामि शंकर।
रुद्रमन्त्रेण पुटितं यो जपेन्मृत्युहारणम्।
तथा हि रुद्रकान्ताया मन्त्रेण पुटितं शिवम्।
जपित्वा पूजयित्वा च नरो नीरोगी भवेद्वशी।
प्रातःकृत्यादिकं कृत्वा हविष्याशी जितेन्द्रियः।
अतिसावधानपरो विधिसेवापरायणः।
स्नानसन्ध्यादिकं कृत्वा आसनाह्निकमाश्रयेत्।
समाप्य आसनं सर्व्वं पीतवस्त्रं पिधाय च।
अथवा शुक्लवस्त्रे द्वे परिधाय मनोहरे।
कोमलास्वासने गत्वा प्रक्षाल्य पादयुग्मकम्।
द्विराचम्य विधानेन पूजायां स्वस्तिकासने।
वीरासने तथा पद्मासने योन्यासने तथा।

उपविश्य निर्म्मलाला पूजामार्गपरो भवेत्।
सर्व्वाणि द्रव्यभोज्यानि मनसा कल्पितानि च।
तदलाभेऽथवालाभे मनःकल्पित शोभनम्।
करणीयं सर्व्वदैव ततो बाह्येऽपि चालयेत्।
यथालभ्यानि द्रव्याणि संशोध्य तत्र मंत्रयेत्।
ततः कुर्य्याद्विशेषेण प्राणायामं मनोरमम्।
चतुःषष्ठिमात्रया वा तथा षोडशमात्रया।
तद्द्वादशमात्रया वा संख्यया वायुमाश्रयेत्।
प्राणायामं समाप्याथ न्यासं समाचरेत्।
श्रीकण्ठादिमहावीरन्यासं कुर्यात् प्रयत्नतः।
रुद्रन्यासं प्रवक्ष्यामि मनुयोगादिसिद्धये।
एतन्न्यासादिकरणो नरो रुद्रसमो भवेत्।
सदा कुर्य्यान्महान्यासं सर्व्वसिद्धिप्रकाशनात्।
शक्तिहीनं शक्तियुक्तं महान्यासं प्रकीर्त्तितम्।
शक्तियुक्तं समाहृत्य महाशक्तो भवेद्वशी।
शक्तिहीनं तथा कार्य्यं सर्व्वविघ्नविनाशनम्।
मातृकापद्मचक्रे तु मातृकावर्णसंयुतम्।
मातृकापुटितं मन्त्रं किंवा मन्त्रेण संपुटम्।
मातृकापुटितं मन्त्रं किंवा मन्त्रेण संपुटम्।

विक्रमी सिंहतुल्यः स्यात् तं दृष्ट्वा यान्ति शत्रवः।
मौनी भूत्वा समाहूय कुलचक्रस्य भेदनात्।
मणिपूरे स्थितो भूत्वा महातेजोमयो भवेत्।
तेषां नाम प्रवक्ष्यामि पंचाशदेकसंख्यया।
पंचाशदेकशक्तीनां तथा नाम शृणु प्रभो
सर्व्वेषामभिधानान्ते ईशाय नम उच्चरेत्।
एकैकं मातृकावर्णं नाम्ना आद्ये नियोजयेत्।
शक्तियुक्तं यदा नाम ईशान्तं संत्यजेत्तदा।
भेदने शक्तियुक्तं च न्यासं कुर्यान्महायतिः।
कुशासने सिद्धिहेतौ चैलाजिनकुशोत्तरम्।
बद्ध्वैकमासनं योगी न्यासजालं समाचरेत्।
अथवा द्वीपिचर्म्मादि कोमलाद्यासनेऽपि वा।
योगाभ्यासी न्यासजालं कृत्वा सावमरो भवेत्।
भद्रकाली गृहे स्थित्वा यः करोति निरन्तरम्।
महान्यासं महादेव तत्क्षणादमरो भवेत्।
आयुरारोग्यसम्पत्तिं समाप्नोति महाश्रियम्।
स आयाति मम स्थाने न्यासयोगप्रसादतः।
न्यासधारणयोगेन मणिपूरे दृढो भवेत्।
आदौ तन्नाम वक्तव्यं पश्चात् शक्त्यभिधानकम्।

515

श्रीकण्ठश्चाप्यनन्तश्च सूक्ष्मः स्त्रिमूर्त्तिरेव च।
अमरेश्वरश्चार्घीशो भावभूतिस्ततः परम्।
अतिथीशः स्थाणुकेशो हरो भिंटीश एव च।
भौतिकः सद्योजातश्चाप्यनुग्रहेश्वरस्तथा।
अक्रूरोऽपि महासेनो निजस्वरादि षोडश।
एते देवा महारुद्राः षोडशस्वरविग्रहाः।
क्रोधीशश्चापि चण्डेशः पंचान्तकः शिवोत्तमः।
एकरुद्रस्तथा कूर्म एकनेत्रेश्वरस्ततः।
चतुराननोऽजेशश्च सर्व्वः सोमेश एव च।
लांगलीशो दारुकेशोऽर्द्धनारीश्वर एव च।
उमाकान्तेश आषाढी दण्डीशोऽत्रीश एव च।
मीलेशश्चादिमाशेषो लोहितेशः शिखीश्वरः।
छगलण्डो द्विरण्डेशो महाकालेश्वरस्ततः।
वालीशश्च भुजङ्गेशः पिनाकेशस्ततः परम्।
खड्गीशश्च बकेशश्च श्वेतो भृग्वीश एव च।
नकुलीशः शिवेशश्च संवर्त्तकेश एव च।
एते रुद्राः समाख्याताः सर्व्वकालकुलेश्वर।
यस्य नाम्नश्चान्तभागे ईशशब्दो न विद्यते।
ईशान्तं नाम संहृत्य न्यासं मौनी समाचरेत्।

कामलोभादिनाशार्थं यःकरोति निरन्तरम् ।
मातृकावर्णपुटितं मातृकामूलके न्यसेत् ।
शक्तियुक्तं सदान्यासं ततकामपाशयोजनम् ।
अथवा रुद्रशक्त्याश्च तथा रुद्रेण संपुटम् ।
निजमन्त्रेणवानाथ पुटितं मातृकास्थले ।
शक्त्या च ग्रथनं कृत्वा संसारं सन्तरेत् क्षणात् ।
ततप्रकारं शृणुप्राणनाथ शंकरवल्लभ ।
पूर्णोदरी च गिरिजा शाम्बली तदनन्तरम् ।
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा ततःपरम् ।
सुदीर्घमुखी गोमुख्या दीर्घजिह्वा ततःपरम् ।
कुण्डोदरी चार्द्धमुखी तथा विकृतमुख्यपि ।
ज्वालामुखी चोल्कामुखी सुश्रीमुखी ततःपरम् ।
विद्यामुखी तथानाथ एताश्चेश्वर शक्तयः ।

517

कार्यर्ण शक्तिविद्याश्च वक्ष्यामि पार्वतीश्वर ।
महाकाली सरस्वत्यौ गौरी त्रैलोक्यमोहिनी ।
जयन्ती चैव विद्या च मन्त्रशक्तिस्ततःपरम् ।
आत्मशक्ति भूतमाता लम्बोदरी ततःपरम् ।
द्राविणी नागरी भूयः— खेचरी चापि मंजरी ।
रूपिणी वीरिणी पश्चात काकोदरी च पूतना ।

भद्रकाली योगिनीच शंखिनी गर्ज्जिनी तथा।
कालरात्रिः कुब्जिकाच कपर्द्दिनी ततः परम्।
वज्रैजया ततोनाथ सुमुखीश्वर्य्यापि प्रभो।
रेवती माधवी चैव वारुणी वायवी तथा।
रक्षो विदारिणी चैव सुमहालक्ष्म्यथ प्रभो।
व्यापिनी चैव मयाच
सर्व्वाभरणसंयुक्ताः सिन्दूरारुणविग्रहाः।
धृतशूलकपालासिवाणशक्तिप्रखेटकाः।
महाभयकरा नित्याः सर्व्ववाहनवाहनाः।
श्रीखण्डाद्या महारुद्रा धृतशूलकपालिकाः।
खड्गखेटकशक्तीषु गदामुषलधारिकाः।
नानास्त्रधारिका नित्या वन्धूककोटिसुन्दराः।
रक्तचन्दनदिग्धांगाः पंचचूडधराः पराः।
रक्तोत्पलमहामालालंकारकरपंकजाः।
पीठन्यासं ततः कुर्य्यान्मम तन्त्रानुसारतः।
सर्व्वत्र मूलपुटितमथवा वर्णसंपुटम्।
कृत्वा पीठन्यासकार्य्यं विधानेन वदामि तत्।
ओं अनन्तायनमः नमो हृदि ततः परम्।
ओं पद्मायनमः शब्दं हृदये च ततः परम्।

ओं अं सूर्य्यमण्डलाय द्वादशात्मकलात्मने।
नमः पदं समुच्चार्य्य चान्ते च हृदये प्रभो।
ओं ओं सोममण्डलाय षोड़शकलात्मने नमः।
सर्व्वत्र हृदये कार्य्यं पीठन्यासं मनोलयम्।
ओं मं वह्निमण्डलाय दशकलात्मने नमः।
ओं अं सत्वाय नमः, ओं रं रजसे नमः तं तपसे नमः
च पूर्व्वादिकेशरेषु च। ओं अं आत्मने नमः।
ओं अं अन्तरात्मने च नमोऽन्ते शून्यवासिने।
ओं पं परमात्मने च नमोऽन्ते कालरूपिणे।
ओं ह्रीं ज्ञानात्मने चान्ते नमोऽन्ते वर्णवासिने।
पीठं शक्तेस्ततो न्यासं कुर्य्यात् साधकयोगिराट्।
हृत्पद्मस्यादि पूर्व्वादिकेशरेषु च संन्यसेत्।
ओं वामायै नमश्चान्ते ओं ज्येष्ठायै नमो वदेत्।
ओं रौद्र्यै नमश्चान्ते ओं काल्यै नम इत्यपि।
ओं कलविकरिण्यै नमः पदं ततो वदेत्।
ओं बलविकरिण्यै नमः पदं ततो वदेत्।
ओं बलप्रमथन्यै नमोऽन्ते च पुनर्वदेत्।
ओं सर्व्वभूतदमन्यै नमः पदं समुच्चरेत्।
एतान्विन्यस्य देवेश मध्ये विन्यासमाचरेत्।

519

हृत्पद्मस्य कर्णिकायां कृत्वा भावनमाचरेत्।
ओं मनोऽन्ते नमश्च तदुपरि ततो वदेत्।
ओं नमो भगवतेऽन्ते सकलपदमुच्चरेत।
गुणात्मशक्तियुक्ताय अनन्ताय पदं ततः।
योगपीठात्मने चान्ते नमः प्रान्ते समुच्चरेत।
ततः कुर्य्यान्महादेव ऋष्यादिन्यासमेव च।
रुद्रशक्त्योर्ऋषिर्विद्यात्तथा मृत्युञ्जयस्य च।
मृत्युञ्जयच्छन्दसश्च चान्यमृत्युञ्जयस्य च।
कहोडो मुनिपुत्रश्च ऋषिरस्य प्रकीर्तितः।
महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम्।
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः।
गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्तितः।
सर्व्वेषां मन्त्रतत्त्वानां छादनात् छन्द उच्यते।
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम्।
सर्व्वेषामेव जन्तूनां मारणात् प्रेरणात् तथा।
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत्।
ऋषिच्छन्दोऽपरिज्ञाने न मन्त्रं फलभाग्भवेत्।
दौर्व्बल्यं याति मन्त्राणां विनियोगमजानताम्।
न्यसेन्मूर्ध्नि ऋषिन्यासं छन्दोन्यासं मुखाम्बुजे।

देवतान्यासमाकुर्यात हृदयाम्भोरुहे सुधीः।
मूलगुह्ये वीजन्यासं शक्तिन्यासं तु पादयोः।
सर्व्वाङ्गे कीलकन्यासं शिवन्यासं समाचरेत।
शिवशक्त्यात्मकंन्यासं शिवबोढ़ां समाचरेत।
शिरसि प्राणवन्द्याय महाविद्या ऋषये नमः।
मुखे पंक्तिश्छन्दसे वै नमः शब्दं समुच्चरेत।
हृदि महारुद्राय शक्तियुक्ताय संवदेत।
देवतायै नमः शब्दं करन्यासं ततश्चरेत।
ततोऽङ्गन्यासमाहृत्य ध्यानं कुर्य्यान्महाप्रभो।
वह्निना दीर्घवीजेन मन्त्रस्यांगक्रियां चरेत।
रुद्रध्यानं प्रवक्ष्यामि ध्यानाद्भवति भूपतिः।
रुद्रं रौद्रात्मकं तं प्रकृतिपुरुषगं गूढ़गीताविधानं
शूलं खड्गं दधानं वरमभयकरं पद्ममेकं प्रचण्डम्।
सञ्चारं रश्मिजालं शशिशतकिरणं कामधेनुस्वरूपं
ध्यायेद्ध्रौं ह्रीं सशक्तिप्रणयमयतनुं सूर्य्यकोटिप्रकाशम्॥१
एवं ध्यात्वा मानसैश्च संपूज्यार्घ्यविधिं चरेत।
कृत्वार्घ्यं रुद्रमन्त्रेण पीठपूजां समाचरेत।
वामाज्येष्ठा तथा रौद्री कालिकलपदात्मिका।
विकरण्याह्वया प्रोक्ता वलादिविकरण्यथ।

वलप्रमथनी पश्चात् सर्व्वभूतदमन्यथो।
मनोन्मनीति सम्प्रोक्ताः शिवस्य पीठशक्तयः।
पूजयेद्गन्धपुष्पाद्यैः पीठशक्तिक्रमेण तु।
प्रणवादिनमोऽन्ते च पूजा कार्य्या विधानतः।
पुनर्ध्यात्वा च पाद्याद्यैरावाह्य परिपूजयेत्।
पाद्यमर्घ्यमाचमनीयं पुनराचमनीयकम्।
गन्धपुष्पविल्वदलैः प्राच्यावरणमर्चयेत्।
ॐ हृदयाय नमः इत्यादि ततः षडङ्गपूजनम्।
मध्ये चतुर्दिक्षु चैव शेषे वारद्वयं वदेत्।
इन्द्रादिलोकपालांश्च पूजयित्वा ततोऽर्चयेत्।
वज्रादींश्च महाकाल धूपदीपैर्निवेदयेत्।
नैवेद्यवन्दनं कृत्वा पानार्थं जलदानकम्।
शरीरशोधनं कृत्वा प्राणायामं ततश्चरेत्।
जपेत् शतत्रयं मन्त्री विशुद्धः शुद्धचेतसा।
अष्टोत्तरं योजयित्वा गजान्तकसहस्रकम्।
अथवाष्टोत्तरशतं जप्त्वा समर्पणं चरेत्।
प्राणायामत्रयं कुर्यात् निजमन्त्रप्रवृद्धये।
ततः प्रणाममाकुर्यात् शक्तिचैतन्यहेतुना।
नमो रुद्राय देवाय कोटिसूर्य्येन्दुमूर्तये।

सर्व्वाय ज्ञानदानाय नमस्ते शूलधारिणे ।
नमस्ते कालरूपाय कालाय वेदरूपिणे ।
वेदमार्गप्रोज्ज्वलाय शत्रुसंक्षयकारिणे ।
रौद्राय शक्तियुक्ताय शंकराय नमो नमः ।
चतुर्भुजाय देवाय महाकाशस्वरूपिणे ।
वरपद्मशूलखड्गधारिणे ब्रह्मणे नमः ।
रुद्रशक्त्यर्च्चनं कृत्वा महारुद्रेण संयुतम् ।
मणिपूरे दृढो याति सत्यं सत्यं वदाम्यहम् ।
शक्त्यर्च्चनविधिं वक्ष्ये मूलमन्त्रेण पूजनम् ।
सर्व्वत्र कारयेन्मन्त्री ऋद्धैश्वर्य्यजयाय च ।
आदौ ऋषिन्यासकार्य्यं वक्ष्यामि शृणु तत्त्वतः ।
शिरसीह रुद्रशक्तिं महाविष्णुपदं ततः ।
ऋषये नम उच्चार्य्य मुखे हस्तं नियोजयेत् ।
पंक्तिछन्दसे नमश्च हृदि हस्तं नियोजयेत् ।
महारुद्राणीति पदं लाकिनीपदमेव च ।
त्रिशक्त्यन्ते महाविद्या देवतायै नमस्ततः ।
गुह्ये क्रों पदमुच्चार्य्य निजवीजयते नमः ।
सर्व्वांगे सकलायै च वज्राय कीलकाय च ।
नमः पदं समुच्चार्य्य ऋष्यादिन्यासमेव च ।

523

रुद्रवत् सकलं कार्य्यं करांगन्यासकर्म्मणि।
आदावृष्यादिकं न्यासः करशुद्धिस्ततः परम्
अंगुलीव्यापकन्यासौ हृदादिन्यास एव च।
रुद्रशक्तिमहाषोढा न्यासं च तदनन्तरम्।
मंत्रन्यासं ततः कृत्वा व्यापकन्यासमाचरेत्।
तालत्रयं दिग्बन्धः प्राणायामस्ततः परम्।
ध्यानं कुर्याद्विशेषेण रुद्रशक्त्या महाप्रभो।
रुद्राणीं रुद्रकान्तां नवरसजड़ितां कुंकुमासक्तगात्रां
लोकेशीं षड्भुजां तां त्रिभुवनयजितां कोटिसौदामनीभाम्।
पद्मस्थां पद्महस्तां वरमभयकरां खड्गशक्तिं दधानां
ध्याये ह्रीं ह्रीं त्रिनेत्रां शरदमलशशिश्रेणीभूषामलांगीम्॥१॥
रुद्रवत् पूजनं कार्य्यं रुद्रशक्त्याश्च शंकर।
दशोपचारैः पूजा वा तथा पंचोपचारकैः।
अष्टादशोपचारैर्वा षोड़शाद्युपचारकैः।
अलाभे तु प्रकर्त्तव्यं मानसेन निवेदयेत्।
सर्व्वत्र मानसं कार्य्यं कोटिकोटिगुणं भवेत्।
पूजां समाप्य विधिना जलं दत्वा जपादिके।
प्राणायामत्रयं कृत्वा जप्त्वाष्टोत्तरकं शतम्।
सहस्रं वा मुहुर्जप्त्वा अष्टोत्तरसमन्वितम्।

जपं समर्पयेद्विद्वान् गुह्यातिगुह्यमन्त्रकैः।
प्राणायामत्रयं पश्चात् कुर्यात् साधकसत्तमः।
वन्दनं भक्तियुक्तेन कुर्य्याद्योगादिसिद्धये।
महारौद्र्यै नमस्तेऽस्तु लाकिन्यै ते नमोनमः।
शान्त्यै तुष्ट्यै नमो नित्यं श्रद्धायै तेनमो नमः।
रुद्रशक्त्यै नमो नित्यं मणिपूरनिवासिनि।
अष्टासिद्धि योगसिद्धि देहि तुभ्यं नमो नमः।
सर्व्वग्रन्थिच्छेदिकायै परब्रह्मस्वरूपिणि।
मां रक्ष पालय त्वं हि मणिपूरे नमोनमः।
प्रणम्य विधिनानेन पूजासमापनं चरेत्।
पुनस्तत्र पूजयेद्वै प्रासादाख्यं महाप्रभम्।
महामृत्युंजयं देवं मणिपूरे प्रपूजयेत्।
प्राणायामादिकं कृत्वा श्रीकण्ठन्यासमाचरेत्।
पूर्णोदर्य्यादिसहितं कृत्वा पीठं न्यसेत् सुधीः।
पीठमनुं प्रविन्यस्य ऋष्यादिन्यासमाचरेत्।
ऋषिरस्य वामदेवः पङ्क्तिच्छन्द उदीरितम्।
सदाशिवो देवताच अङ्गुलिन्यासमाचरेत्।
हां अंगुष्ठाभ्यां नमः पश्चात् ह्रीं तर्ज्जनीपदं ततः।
भ्यां नमः पदमन्ते... (partially obscured) ...आस्याद्यान्वितम्।

एवं करन्यासकार्य्यं विधानेन समाचरेत्।
शूद्रस्तु एतत् पर्य्यन्तं कार्यं होमादिकं चरेत्।
नकुर्य्यात् पार्व्वतीनाथ तथा स्त्रीलोक इत्यपि।
यदि ज्ञानी भवेद्देव स देवो नतु मानुषः।
चाण्डालादिनीचजातौ स्थितो वा ब्राह्मणोत्तमः।
ज्ञानवान् वादसंवाद वर्जितो न्यासमाचरेत्।
न्यासक्तन्मयतावुद्धिः सोऽहं भावेन पूजयेत्।
स एव ज्ञानी परमो वेदशास्त्रविशारदः।
न्यासपूजादिकं तस्य सर्व्वदा नात्र संशयः।
यावद्देहेऽप्यहं वुद्धिः तत्तन्मरणधारकः।
तद्वर्जितो मृत्युजेता न्यासपूजादिकं कुतः।
षड्दीर्घभाजा वीजेन हकारेण सविन्दुना।
करयोरंगुलीद्वन्द्वे विन्यसेत् संक्रमेणतु।
ईशाद्याः पंचमूर्त्तीश्च विन्यसेत् साधकोत्तमः।
ततः कुर्य्यान्महा देव ऊर्द्ध्वप्राग्दक्षिणोत्तरे।
मुखेषु विन्यसेन्मन्त्री चांगुलिभिः परस्परम्।
तत्तद्वीजैः प्रयत्नेन तत्तन्मूर्त्तीः प्रविन्यसेत्।
अंगुष्ठयोः शेषभागे ईशानाय ह्रौं नमः।
षड्दीर्घभाजा वीजेन हकारेण सविन्दुना

ततपुरुषमघोरंच वामदेवं ततः परम्।
सद्योजातं क्रमेणैव अंगुली द्वे परस्परम्।
विन्यसेत् साधकश्रेष्ठो नमोऽन्तो परमेश्वर।
शिरोवदनहृद्गुह्य पादेषु विन्यसेत सुधीः।
तत्तदंगुलिभिरेवं ततक्रमेण प्रविन्यसेत्।
पंचमूर्त्तीर्न्यसेन्नाथ तत प्रकारं शृणुष्व च।
ईशानादि स्वबीनस्य प्रकारेण प्रविन्यसेत।
शूद्रः कुर्य्यान्न्यासजालमेतत पर्य्यन्तमेव हि।
तत ऊर्द्ध्व प्राग्दक्षिण पश्चिमोत्तरसमुखे।
इशानस्य पंचकला ब्रह्म ऋग्वेद संयुता।
पंचपदादिकानाथ प्रणवादिनमोऽन्तिकाः।
ईशानः सर्व्वविद्यानां ओँ शशिन्यै ततः परम्।
ओं कलायै नम एवादि सर्व्वत्रैवं क्रमेण तु।
ईश्वरः सर्व्वभूतानां ओँ अंगपदकं ततः।
दायै कलायै नमश्चापि ब्रह्माधिपतिस्ततः।
ओं ब्रह्मेष्टदायै चान्ते कलायै नम इत्यपि।
ततः शिवो मेऽस्तु पदं मरीच्यै पदं वदेत।
कलायै नम एवं हि सदाशिवपदं ततः।
ओं मन्ते चांशुमालिन्यै कलायै नम इत्यपि।

दिङ्मुखे संन्यसेन्मन्त्री पूर्व्वादिक्रमयोगतः।
तत्पुरुषस्य चतस्रः कलां न्यसेत् सदावशी।
ओं तत्पुरुषाय पदं विद्महे तदनन्तरम्।
ओं शान्त्यै पदस्यान्ते कलायै नम इत्यपि।
महादेवाय शब्दान्ते धीमहीति पदं वदेत्।
ओं विद्यायै पदस्यान्ते कलायै नम इत्यपि।
ततो रुद्रः पदं पश्चात् ओं प्रतिष्ठापदं लिखेत्।
ओं कलायै नमः पश्चात् प्रचोदयात् पदं वदेत्।
ओं निवृत्यै कलायै च नमः शब्दं समुच्चरेत्।
ततोऽष्टस्थान मध्ये तु अघोराष्टकलां न्यसेत्।
हृद्ग्रीवा अंशयुगल नाभिकुक्षिषु पृष्ठके।
तथा वक्षसि चाद्या स्यौकलाः संन्यसेत् सुधीः।
ओमघोरेभ्य ओमन्ते ओमायायै शब्दमुच्चरेत्।
कलायै नम एवाथ अघोरेभ्यः पदं वदेत्।
ओं मोहायै पदस्यान्ते कलायै नम इत्यपि।
ओं घोर ओं शब्दमुच्चार्य्य क्षमायै शब्दमुच्चरेत्।
कलायै नम एवाथ घोरतरेभ्य च।
ओं निद्रायै पदस्यान्ते कलायै नम इत्यपि।
सर्व्वेत्र सर्व्वे ओमन्ते व्याधये शब्दमुच्चरेत्।

कलायै नम एवाथ सर्वेभ्यः पदमुच्चरेत् ।
ओं मृत्यवे पदस्यान्ते कलायै नम इत्यपि ।
नमस्तेऽस्तु पदस्यान्ते ओं क्षुधायै पदं वदेत् ।
कलायै नम एवाथ रुद्ररूपेभ्य एव च ।
ओं कृष्णायै पदस्यान्ते कलायै नम इत्यपि ।
वामदेवस्य देवेश त्रयोदशकलां न्यसेत् ।
एतेषु स्थानपद्मेषु तत्प्रकारं शृणु प्रभो ।
गुह्योऽण्डकोषमध्ये तु ऊरुयुग्मे ततः परम् ।
जानुद्वये तथा जंघा युगले स्फिगद्वये तथा ।
कट्यां पार्श्वयुगे चैव क्रमेण भावको न्यसेत् ।
ओं वामदेवाय नमः ओं वज्रायै ततः परम् ।
कलायै नम एवाथ ज्येष्ठायै नम इत्यपि
ओं रक्षायै पदस्यान्ते कलायै नम इत्यपि
कालाय एवान्ते पालिन्यै पदमुच्चरेत् ।
किरणाय नमोऽन्ते च प्रणवं चोच्चरेद् बुधः ।
संयामिन्यै पदान्ते च कलायै नम इत्यपि
बल ओं शब्दमुच्चार्य क्रोधायै पदमुच्चरेत् ।
कलायै नम एवाथ प्रमथाय नमस्ततः ।
ओं वाच्यै पदस्यान्ते कलायै नम इत्यपि ।

१ बुद्ध्यै

सर्व्वभूतदमनाय नम श्रीं पदमुच्चरेत्।
भूमिपदकस्यान्ते कलायै नम इत्यपि।
नम श्रीं शब्दमुच्चार्य्य मोहिन्यै पदकं स्मरेत्।
कलायै नम एवाथ उन्मनाय नमस्ततः।
श्रीं जवायै पदस्यान्ते कलायै नम उच्चरेत्।
ततोन्यासान्महा काल सद्योजातस्य ताः कलाः।
अष्टौ स्थानेषु चैतेषु सर्व्वपापनिस्तये।
पार्श्वयोस्तनयोश्चैव नासिकायां च मस्तके।
बाहुयुग्मे महावीरमणिपूरविभेदकः।
तत्प्रकारं प्रवक्ष्येऽहं सावधानावधारय।
आदौ प्रणवमुच्चार्य्य ततो मन्त्रं स्मरेत सुधीः।
सद्योजातं प्रपद्यामि श्रीं ऋद्ध्यै पदमुच्चरेत्।
कलायै नम एवाथ सद्योजाताय वै नमः।
श्रीं ऋद्ध्यै पदकस्यान्ते कलायै नम इत्यपि।
भावपदं ततः पश्चात श्रीं सत्यै पदमुच्चरेत्।
कलायै नम एवाथ अभवे श्रीं ततः परम्।
श्रीं लक्ष्म्यै कलायै नमः। पश्चान्नादिभावे पदं ततः।
श्रीं मेधायै पदस्यान्ते कलायै नम उच्चरेत्।
ततो भजस्व मां शब्दं श्रीं प्रज्ञायै पदं वदेत्।

कलायै नम एवाथ भवं ओं शब्दमुच्चरेत।
प्रभायै पदमुच्चार्य्य कलायै नम इत्यपि।
उद्भवाय नमः पश्चात ओं सुधायै नमस्ततः।
कलायै नम उच्चार्य्य न्यासोदष्टौ कलाः प्रभाः।
ईशानाद्यास्ततो नाथ भक्तः पंच कृचोन्यसेत।
पंचांगुलिषु योगेश क्रमेण कमलासनात।
प्रणवं पूर्व्वमुच्चार्य्य ततस्तत पुरुषाय च।
विद्महे पदतः पश्चात महादेवाय धीमहि।
तन्नो रुद्रः पदस्यान्ते प्रचोदयात पुनर्वदेत।
प्रणवं पूर्व्वमुच्चार्य्य ततो मन्त्रं स्मरेत सुधीः।
ईशानः सर्व्वविद्यानामीश्वरस्तदनन्तरम।
उच्चरेत सर्व्वभूतानां ब्रह्माधिपतिरित्यपि।
ब्रह्मणोऽधिपतिः पश्चात शिवो मेऽस्तु सदाशिवोम।
प्रणवं पूर्व्वमुच्चार्य्य ततस्तत पुरुषाय च।
विद्महे पदतः पश्चात महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात पुनर्वदेत।
प्रणवं पूर्व्वमुच्चार्य्य ततो मन्त्रं स्मरेत सुधीः।
अघोरेभ्यो अघोरेभ्यो घोरशब्दं समुच्चरेत।
घोरतरेभ्य एवान्ते सर्व्वतः सर्व्वशब्दकम।

531

सर्व्वेभ्योऽन्ते नमस्तेऽस्तु रुद्ररूपेभ्य एव च।
ततः प्रणवमुच्चार्य्य मन्त्रं पश्चात् स्मरेद्बुधः।
वामदेवाय शब्दान्ते नमो ज्येष्ठाय वै ततः।
नमो रुद्राय शब्दान्ते नमः शब्दं समुच्चरेत्।
कालाय नम एवान्ते कालविकरणाय च।
नमो बलविकरणाय नमो बलपदं ततः।
प्रमथनाय नमोऽन्ते च सर्व्वभूतपदं वदेत्।
दमनाय नमोऽन्ते तु नमः शब्दं समुच्चरेत्।
उन्मनाय नमश्चाथ पुनः प्रणवमुद्धरेत्।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः।
भवे भवेऽनादिभवे भजस्व मां ततः परम्।
भवोद्भवाय शब्दान्ते नमो मंत्रं मुदा न्यसेत्।
अंगुलीन्यासमाहृत्य पंचवक्त्रान्य प्रभो।
एवं क्रमेण संन्यासं कुर्य्यादेषु स्थलेषु च।
मूर्ध्नि हृद्गुह्यपादेषु न्यसेदेता ऋचो मुदा।
ततः कुर्य्यान्महाकाल नांगन्यासान्तरं शुभम्।
तत्प्रकारं प्रवक्ष्यामि सावधानावधारय।
वाग्भवं पूर्व्वमुच्चार्य्य कामबीजं ततः परम्।
रकारं शक्रसंयुक्तं दद्यात्कर्णेन्दुसंयुतम्।

चन्द्रबीजं वामनेत्रं स्वान्तवह्निविधून्नतम्।
केवलं चन्द्रबीजं तु सविसर्गं मनुं ततः।
सर्वज्ञाय पदस्यान्ते हृदयाय नमः पदम्।
अमृतपदमुच्चार्य तेजोज्वालापदं ततः।
मालिनेऽन्ते दद्याय ब्रह्मणो शिरसे ततः।
स्वाहान्तं तत्र स्वाथ ज्वलन्तं शिखिशब्दकम्।
शिखायोन्यादिवोधाय वषडित्यथ शिखायै वषडित्यथ।
वज्रिणे वज्रहस्ताय स्वतन्त्राय पदं वदेत्।
कवचाय तारशब्दं ततो मयबीजमुच्चरेत्।
सकारं बिन्दुसंयुक्तमधोदन्तसमन्वितम्।
चकारं चहकारं च दीर्घप्रणवसंयुतम्।
परतो लुप्तशब्दान्ते शक्तये पदमुच्चरेत्।
नेत्रत्रयाय शब्दान्ते वौषट् पदमुदीरयेत्।
शकारं शक्रसंयुक्तं वामनेत्रं सबिन्दुकम्।
पशुशब्दतावमन्तं अनन्तशक्तये पदम्।
अस्त्राय फडिति प्रोच्य एवं विन्यस्य योगिराट्।
मणिपूरे मनो युङ्क्त्वा ध्यायेत चैतन्यरूपिणम्।
मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पंचभिः
त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम्।

शूलं टङ्ककृपाणवज्र दहन नागेन्द्रघण्टांकुशान्
पाशं भीतिहरं दधानममिताकल्पोज्वलांगं भजे ॥१॥
एवं ध्यात्वा मानसोपचारैः संपूज्य पूजकः।
अर्घ्यस्थापनमाकुर्यान्निजमन्त्राभिशोधनम्।
शैवोक्तपीठमन्वन्तां पीठपूजां ततश्चरेत्।
पुनर्ध्यात्वा समावाह्य चावाहनादिमुद्रया।
पंचपुष्पाञ्जलिदानं पर्य्यन्तं परिपूजयेत्।
पंचपुष्पांजलिं दत्वा वर्णार्चनमाचरेत।
शिवावरणदेवांश्च पूजयेत ततक्रमं शृणु।
ऐशान्यां पूजयेद्विद्वान ईशानाय नमस्ततः।
पूर्व्वे ओं ततपुरुषाय नमः शब्दं समुच्चरेत्।
दक्षिणे ओं अघोराय नमः शब्दं समुच्चरेत्।
उत्तरे ओं वामशब्दं देवाय नम उच्चरेत।
पश्चिमे प्रणवं पश्चात सद्योजाताय स्वाहि।
नमोऽन्तं पूजनं कृत्वा सर्व्वसिद्धीश्वरो भवेत।
ईशानादिचतुष्केषु निवृत्यादीन प्रपूजयेत्।
प्रणवान्ते निवृत्यै च नमश्चान्ते ततोऽर्चयेत।
एवं प्रतिष्ठा विद्यां च शान्तिं संपूज्य यत्नतः।
प्रणवादिनमोऽन्तेन शान्त्यन्तपदेन च।

योजयित्वा महापूजाविधौ कुर्य्यात समर्चनम।
दशदलस्य मध्येतु विभाव्याष्टदलं सुधीः।
तत्रैव पूजनं कुर्य्यादष्टांगयोगसिद्धये।
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च।
पूजयेद्देवदेवेशं गन्धपुष्पाक्षतादिभिः।
अनन्तेशं पूजयेद्वै तथा सूक्ष्मेशमेव च।
शिवोत्तमेशं संपूज्य एकनेत्रेशमेव च।
एकरुद्रेशमेवं हि त्रिमूर्तीशं ततोऽर्चयेत।
भक्त्या समर्चयेत्तत्र श्रीकण्ठेशं शिखण्डिनम
तद्वाह्यपत्रिकासु उत्तरादिक्रमेण तु।
उमाद्या देवताः पूज्याः प्रणवादिनमोऽन्तिकाः।
उमादेवीं समभ्यर्च्य तथा चण्डेश्वरीं ततः।
नन्दिनं च महाकालं गणेशं वृषभं तथा।
भृंगरीटस्कन्दपुत्रौ तद्वाह्ये क्रमतोऽर्चयेत।
इन्द्रादीन लोकपालांश्च गन्धपुष्पैः समर्चयेत।
वज्रादींश्च क्रमेणैव पूजयेत साधकोत्तमः।
धूपदीपादिनैवेद्यपानार्थं पुनराचमनम।
संहारमुद्रया चांगे स्थापयेद् रुद्ररूपिणम।
विसर्जनान्तं तत्कर्म [illegible] कम।

समाप्य विधिनानेन पूजाकर्म्म समापयेत।
प्रत्यहं मानसं जापं होममर्च्चनतर्पणे।
वर्द्धयेत साधकश्रेष्ठो भक्तिभावपरायणः।
पंचलक्षजपेनास्य पुरश्चरणमिष्यते।
एवं ध्यात्वा जपेन्मन्त्रं पंचलक्षमधुप्लुतैः।
प्रसूनैः करवीरोत्थै रथवा जुहुयात सुधीः।
सर्व्वदा मानसं कार्य्यं द्रव्यालाभेऽपि संचरेत।
तद्दशांशं प्रजुहुयात तद्दशांशं च तर्पणम।
तद्दशांशं चाभिषेकं दशांशं विप्रभोजनम।
एवं जपं साधनं च पुरा नारायणेन च।
कृत्वा सर्व्वमलमयः शीतलो योगिराड् भूत।
यः करोति साधनानि सोऽचिरादमरोऽभवत।
पूजादौ पूजाप्रान्ते च पूजामध्ये क्रमेण तु।
प्रणमेत साधकश्रेष्ठो वारणात पापभूपतेः।
नमः परमकल्याण नमस्ते विश्वभावन।
नमस्ते पार्व्वतीनाथ उमानाथ नमोऽस्तु ते।
विश्वात्मने विचिन्त्याय गुणाय निर्गुणाय च।
धर्म्माय ज्ञानमोक्षाय नमस्ते सर्व्वयोगिने।
नमस्ते कालरूपाय त्रैलोक्य रक्षणाय च।

536

त्रैलोक्यघातकायैव चितेशाय नमोऽस्तु ते।
सद्योजाताय देवाय नमस्ते शूलधारिणे।
कालान्तकाय कालाय चैतन्याय नमो नमः।
कुलात्मकाय कौलाय चन्द्रशेखर ते नमः।
उमाकांत नमस्तुभ्यं योगीन्द्राय नमो नमः।
सर्व्वाय सर्व्वपूज्याय ध्यानस्थाय गुणात्मने।
पार्व्वती प्राणनाथाय नमस्ते परमात्मने।
एतत् स्तोत्रं पठित्वा च स्तौति यः परमेश्वरम्।
याति रुद्रकुलस्थाने मणिपूरं विभिद्यते।
एतत् स्तोत्रप्रपाठेन तुष्टो भवति शंकरः।
खेचरत्वपदं नित्यं ददाति परमेश्वरः।
ततो वक्ष्ये महादेव मृत्युंजयविधानकम्।
यत्कृत्वा परमं ब्रह्ममयो भवति साधकः।
मृत्युंजयस्य मन्त्रं वै जपते यदि मानुषः।
कोटिवर्षशतं स्थित्वा लीनो भवति ब्रह्मणि।
सर्व्वव्यापकरूपेण सतिष्ठति सदाशिव।
तत्प्रकारं प्रवक्ष्यामि सावधानावधारय।
आदौ पूजां विधानानि वक्ष्यामि सारनिर्णितम्
श्रीकण्ठपूर्णादर्ग्याश्च न्यासं चाद्ये समाचरेत्।

ततोहृदयमध्येतु हस्ताङ्गुलिषुमुद्रया।
तत्वं न्यस्यच देवेश तत प्रकारं प्रवक्ष्यते।
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेनच
योजयित्वान्यसेन्मन्त्री मन्त्रभावपरायणः।
आधारशक्तिमेवंहि प्रकृतिं तदनन्तरम्।
कूर्म्ममनन्तं तत पश्चात पृथिवीं क्षीरसागरम्।
श्वेतद्वीपं ततः पश्चान्मणिमण्डपमेव च।
कल्पवृक्षं ततो नाथ विन्यसेन्मणिवेदिकां।
रत्नसिंहासनं तत्र हृदयाम्भोजमण्डले।
दक्षवामस्कन्धभागे वामोरौ दक्षिणे तथा।
मुखे वामपार्श्वभागे नाभौच दक्षपार्श्वके।
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च।
सर्व्वत्र न्यासमाकुर्य्यात्तेषां नाम शृणु प्रभो।
क्रमेण सर्व्वं कर्त्तव्यं क्रमभंगं नचाचरेत्।
धर्म्मं ज्ञानं चवैराग्यमैश्वर्य्यं तदनन्तरम्।
अधर्म्ममपिचाज्ञानमवैराग्यं ततः परम्।
अनैश्वर्य्यं क्रमेणापि विन्यसेत साधकोत्तमः।
पुनर्व्वीरं हृदम्भोजे न्यसेदेकमनाः सुधीः।
अनन्तं पद्ममेवं तु सूर्य्यमण्डलम् तथा।

द्विषट्कलात्मना सार्द्धं मं सोममण्डलं तथा।
षोडशकलात्मकं चैव वंवह्निमण्डलं तथा।
दशकलात्मना सार्द्धं सं सत्वं तदनन्तरम्।
रंवीजं रजसं तत्र तंवीजं तम एव च।
आं आत्मानं न्यसेन्मन्त्री अं अन्तरात्मनेनमः।
पंवीजं परमात्मानं मायाज्ञानात्मने नमः।
इत्यन्तं विन्यसेद्देव मन्त्रसिद्धिमवाप्स्यसि।
मणिपूरे महासिद्धिं सर्व्वसिद्धिमवाप्नुयात्।
यः करोति सदान्यासं ध्यानपूजापरायणः।
वामां ज्येष्ठां तथा रौद्रीं कालीं कलपदादिकाम्।
विकरणाह्वया युक्तां वलाविकरणीं तथा।
वलप्रमथनीं चैव न्यसेत् साधकसत्तमः।
ततः सर्व्वभूतदमनीं मनोन्मनीं ततो न्यसेत्।
तदुपरि न्यसेन्नाथ ओं नमो भगवते पदम्।
सकलगुणात्मशक्तिं चान्ते युक्ताय पदमावदेत्।
अनन्ताय पदस्यान्ते योगपीठात्मने पदम्।
नमोऽयं महामन्त्रः सर्व्वोपरि न्यसेत् सुधीः।
ततो नाथ समाकुर्यात् साधको गतभीः स्वयम्।
ऋष्यादिन्यासमाकुर्यात् तत्प्रकारं शृणु प्रभो।

शिरसि पदमुच्चार्य्य कहोड़ ऋषये नमः।
तदुपरि ततोनाथ महाविष्णु पदं ततः।
ऋषये नम इत्युक्ता मुखे देवीपदं वदेत्।
गायत्रीछन्दसे पश्चात् नमः शब्दं समुच्चरेत्।
हृदि मृत्युञ्जयायैव देवतायै नमः पदम्।
ऋषिः कहोड़ो देवस्य गायत्रीछन्द ईरितम्।
मृत्युञ्जयो महादेवो देवतास्य प्रकीर्त्तितः।
करांगन्यासकौमार्य्यात् षड्दीर्घभाजया सह।
सकारेण महाकाल तत्प्रकारं शृणु प्रभो।
समं गुह्याभ्यां चान्ते च नमः शब्दक्रमेण तु।
एवं कराङ्गुलीन्यासं कुर्य्यादेव महाप्रभो।
षड्दीर्घ भाजा बीजेन सकारेण सबिन्दुना।
करांगन्यासमाकुर्य्यात् कुलतन्त्रक्रमेण तु।
ततो ज्ञानं समाकुर्य्यात् शुभ भाव परायणः।
इन्द्वर्कानललोचनं स्मितमुखं पद्मद्वयान्तस्पदं
मुद्रापाश मृगाक्ष सूत्रविलसत् पाणिं हिमांशुप्रभम्।
कोटीरेन्दु गलत् सुधाप्लुत तनुं हारादिभूषोज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये॥१॥
...त्।
एवं ध्यात्वा ... सोपचारैर्देवं प्रपूजयेत्।

अर्घ्यस्थापनमाकल्य तत्तन्मन्त्रेण साधकः।
पूजयेत पीठमनुभिस्तत्तन्मन्त्रेण साधकः।
पुनर्ध्यात्वा समावाह्य मूलमन्त्रेण मन्त्रवित।
पाद्यादिभिः पूजयेद्वै गन्धपुष्पादिशोभितैः।
पंचपुष्पांजलिं दत्वा परिवारान् प्रपूजयेत।
केशरेष्वग्निनिर्ऋतिवायवीशानेषु पूजयेत।
मध्ये दिक्षु च तन्मन्त्रैः सांवीजं तत्र चोच्चरेत।
हृदयाय नमश्चान्ते सींवीजं तदनन्तरम्।
शिरसि स्वाहया सार्द्धं सूंवीजं तदनन्तरम।
शिखायै वषडित्यादि सैंवीजं तत्र चोच्चरेत।
कवचाय पदस्यान्ते तारवीजं समुच्चरेत।
सौंवीजं पूर्व्वमुच्चार्य नेत्रत्रयाय इत्यपि।
वौषडन्ते मध्ये पदं चतुर्दिक्षु ततः पदम्।
सः चान्तेऽस्त्राय प्रान्ते फडित्येवं समर्च्चयेत।
षडङ्गानि पूजयित्वा तद्बहिः प्रतिपूजयेत।
इन्द्रादीन लोकपालांश्च वज्रादींश्च तथा प्रभो।
धूपदीपादिनैवेद्यं पाद्यादीनि प्रदापयेत।
विधिनावन्दनं कुर्यान्मृत्युञ्जयसुतोषणात।
विसर्ज्जनान्तं यत्कर्म्म समाप्य विधिनामुना।

संहारमुद्रया देव हृदये चानयेद्बुधः।
प्रसन्नहृदयो भूत्वा चरणोदकमापिवेत्।
एतन्मन्त्रेण देवेश सर्व्वसिद्धिमवाप्नुयात्।
पिबामि चरणद्वन्द्वाम्भोजनिःसृतकं भजे।
अमरत्वं सदा देहि मृत्युञ्जय नमोऽस्तु ते॥

इति श्रीरुद्रजामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे शिवमन्त्रप्रकाशो नाम अष्टचत्वारिंशत्-पटलः॥४८॥०=

542

श्रीआनन्दभैरव उवाच

श्रुतं च साधनं पुण्यं महारुद्रस्य सुन्दरि।
मणिपूरे प्रकाशं च कथितं ज्ञाननिर्णयम्।
अकस्मात् सिद्धिसम्प्राप्तिं नुतिं वद महाप्रियाम्।
यस्य श्रवणमात्रेण पाठेन योगिनीवशः।

श्रीआनन्दभैरव्युवाच।

परमानन्द देवेश योगानामधिप प्रभो।
स्तोत्रं रुद्रस्य वक्ष्यामि सारात् सारं परात्परम्
यज्ज्ञात्वा योगिनः सर्व्वे षट्चक्रपरिभेदकाः।

आकाशगामिनः सर्व्वे स्वर्गमोक्षाभिलाषकाः।
महादेवसमाभूत्वा देवाश्च स्वर्गभोगिनः।
सर्व्वरत्नाकरं स्तोत्रं ये पठन्ति निरन्तरम्।
ते यान्ति ब्रह्मसदनं सिद्धमुख्या महीतले।
भजामि शम्भुं सुखमोक्षहेतुं
रुद्रं महाशक्तिसमाकुलांगम्।
रौद्रात्मकं चारुहिमांशुशेखरं
कालं कुलेशं स्वमुखाय शंकरम् ॥ १
मृत्युञ्जयं जीवनरक्षकं परं
शिवं परंब्रह्मशरीरमंगलम्।
हिमांशुकोटिछविभासधानं
भजामि पद्मद्वयमध्यसंस्थितम् ॥ २
सर्व्वात्मकं कामविनाशमूलं
तं चन्द्रचूडं मणिपूरवासिनम्।
चतुर्भुजं ज्ञानसमुद्रयाढ्यं
शेषं मृगाक्षं गुणसूत्रमालम् ॥ ३
धरामयं तैजसमिन्दुकोटिं
वायुं जलेशं गगनात्मकं परम्।
भजामि रुद्रं कुललाकिनीगतं

सर्वाङ्गयोगं जयदं सुरेश्वरम् ॥ ४

शुक्रं महाभीमलयं पुराणं
प्राणात्मकं व्याधिविनाशमूलम् ।
यज्ञात्मकं कामनिवारणं गुरुं
भजामि विश्वेश्वरशंकरं शिवम् ॥ ५

वेदागमानामतिदेशमूलं
तदुद्भवं तद्रहितं परापरम् ।
कालान्तकं ब्रह्मनिरूपणाप्रियम्
भजामि शम्भुं गगनादिरूपम् ॥ ६

शिवामयं शब्दमयं विभाकरं
भास्वत्प्रचण्डामलविग्रहं तम् ।
ग्रहास्थितं ज्ञानकरं करालं
भजामि शम्भुं प्रकृतीश्वरं हरम् ॥ ७

छायाकरं योगकरं सुरेन्द्रं
मत्तं महामत्तकुलोत्सवाढ्यम् ।
निधिं योगकलानिधिं निधिं
योगेश्वरं योगकलानिधिं निधिं
योगेश्वरं भजामि ॥ ८॥
निधानवक्तारमहं भजामि ॥ ८॥

हेमाचलालंकृतशुद्धवेशं वराभयादाननिधानमूलम् ।
भजामि कान्तं वनमालशोभितं चाम्लानपद्मासनमालिनं कुलम् ॥ ९

स्वयं प्रधानं पुरुषेश्वरं सुरं
शिवाभवह्लादवितारिणं भजे ।
भावप्रियं प्रेमकलाधरं शिवं
गिरीश्वरं चारुपदारविन्दम् ॥ १०

ध्यानप्रियं ज्ञानगभीरयोगं
भाग्यास्पदं भाग्यमयं सुलक्षणम् ।
शूलायुधं शूलविभूषितांगं
श्रीशंकरं मोक्षफलप्रियं भजे ॥ ११

नमोनमो रुद्रगणेभ्य एवं
मृत्युञ्जयेभ्यः कुलचंचलेभ्यः ।
शक्तिप्रियेभ्यो विजयादिभूतये
शिवाय धन्याय नमोनमस्ते ॥ १२

भाव्यं त्रिशूलं वरसूक्ष्मभावं
विशालनेत्रं तनुमध्यगामिनम् ।
महाविपद्दुःखविनाशबीजं
श्रद्धादयाशान्तिकरं भजामि ॥ १३

पुरान्तकं पूर्णशरीरिणां गुरुं
स्मरारिमाद्यं निजतर्कमार्गम् ।
अनादिदेवं दिविदोषघातिनं

भजामि पंचाक्षरपुण्यसाधनम् ॥ १४

दिगम्बरं पद्ममुखं कुकर्त्वं
स्थितिक्रियायोगनियोजनं भयम् ।
भवात्मकं भद्रप्रादीरिणं शिवं
भजामि पंचाननमर्कवर्णम् ॥ १५ ॥

भयामयं पंकजदामकोमलं
दिग्व्यापिनं दण्डधरं सुरेश्वरम् ।
त्रिपत्रकं त्र्यक्षरबीजभावं
त्रिपद्ममूलं त्रिगुणं भजामि ॥ १६

विद्याधरं वेदविधानकार्यं
कायागतं गीतनिनादतोषम् ।
नित्यं चतुर्वर्गफलादिमूलं
वेदादिसूत्रं प्रणमामि योगम् ॥ १७ ॥

वेदान्तवेद्यं कुलशास्त्रविज्ञं
क्रियामयं योगसुधर्मदानम् ।
भक्तेश्वरं भक्तिपरायणं वरं
भक्तं महामुक्तिकरं भजाम्यहम् ॥ १८

गम्यागमं गतागतं गम्यगमस्यभावं
शाबद्विधोः कोटिकलावतंसम् ।

546

भावात्मकं भावमयं सुखासुखं
भजामि भर्गं प्रथमारुणाप्रभम् ॥ १९

विन्दुस्वरूपं परिवादवादिनं
मध्याह्नसूर्य्यायुत सन्निभं नरम् ।
विभूतिदानं निजयोगदानं
दानात्मकं तं प्रणमामि देवम् ॥ २०

कुम्भापनं शत्रुनिकुम्भघातिनं
दैत्यारिभीषं कुलकामिनीपतिम् ।
प्रीत्याम्बिर्हि चिन्त्यमचिन्त्यवाग्भवं
प्रभाकराह्लादकरं भजामि ॥ २१

त्रिमूर्तिमूलाय जयाय शम्भवे
हिताय लोकस्य सुधाजुषे मुदा ।
नमो भवाख्यन्न विघातिने ते
नमो नमो विश्वशरीरधारिणे ॥ २२

तपः फलाय प्रकृतिग्रहाय
गुणात्मने सिद्धिकराय योगिने ।
नमः प्रसिद्धाय दयार्णवाय
वांछाफलोत्साह विवर्द्धनाय ॥ २३

शिवममरमहंतं पूर्णयोगाश्रयं तं

547

धराणिधरकराद्यैः वध्यमानं त्रिसर्गं
विषमममणयातं म्रत्युम्रत्युं जनेषां
विधिगणपतिमध्ये पूजये भावयामि ॥२४॥
एवं स्तोत्रं पठेद्विद्वान् मणियोगपरायणः।
नित्यं जगन्नाथग भावयित्वा पुनः पुनः।
मणिपुरे वायुनिष्ठो नित्यं स्तोत्रं पठेद्यदि।
जीवन्मुक्तश्च देहान्ते परं निर्व्वाणमाप्नुयात् ॥०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे रुद्रम्रत्युंजयस्तवनं नाम नवचत्वारिंशत्पटलः॥४६॥०—

548

आनन्दभैरवुवाच

षट्चक्रभेदनार्थाय सर्व्वसिद्धिसुसिद्धये।
वक्ष्यामि लाकिनी देवी स्तोत्रं परमदुर्लभम्।
यत्पाठाद्तिसन्तोषं प्राप्नोति यतिरीश्वर।
तत्क्रियासारस म्पन्नं स्तवनं लाकिनीप्रियम्।
अस्य श्रीलाकिनीस्तोत्रस्य महाविष्णुकहोड ऋषिर्गायत्रीछन्दो महासिद्धिर्म्रत्युञ्जय महारुद्रलाकिनीसरस्वती देवता मणिपूरग्रन्थि भेदने जपे विनियोगः।
श्रीं वीजाद्यद्रवमूर्त्तिमार्त्तिहननीं मर्यां जयां वुद्धिदां

दीनानामपराधकोटिहननीं संज्ञामणिं योगिनीम् ।
तामाद्यामनुरागिणीं गुणगणामोदैकहेतुस्थलाम् ।
स्थित्यन्तःकृतकौतुकीं सवरदे वन्दे मुदालाकिनीम् ॥१॥
हेरम्बार्चनसिद्धिदा हृदयगता कोटिप्रभाभास्करा
साकारा किरणोज्ज्वला सुखमयी वेदध्वनिप्राणिनी ।
कोणाकोणिललक्षणा तरुभवा कल्याणया संश्रया
त्वं चैका वरवर्णिनी सभवतु श्रीलाकिनी किंकिनी ॥२॥
केयूरामलहारभालसुभगाधीरासनस्थायिनी
भार्या रुद्रपतेः प्रवालविमला रक्तोत्पलस्रग्धरा ।
माता योगरता परापरपदा साध्वी रसाच्छादिता
त्वं मां पाहि कृपामयी रसगतं मृत्युञ्जयश्रीधरे ॥३॥
आकाङ्क्षाकुलसैन्यका क्षयकरी शत्रुप्रमादे दया
भक्तानामतिदुःखहा शशिमुखी योन्याननाकामुकी ।
कामस्था मम कामदोषशतकं शीघ्रं हन द्वेमदा
जीवन्मुक्तिपदं विदेहि समरे स्वर्गद्रुहस्य प्रियम् ॥४
त्वं पंचाननपूजिता त्वमसिता त्वंकालविद्यागतिः
त्वं सत्या सुखस[illegible]त्यवाक्यकलिता त्वं केवलानन्दा ।
त्वंलाक्षात्वमरूपिणी त्वममरात्वं लिंगसंहारिणी
त्वं सादाद मृतप्रदा त्वमजरात्वं लाकिणी पाहि माम् ॥५॥

नानामंगलधर्मराज्यजड़िता संसारबोधाश्रया
लिंगस्थाचलपुत्रिका नरगृहे संकाशयन्ती शिवा।
मालिंगं यदि रुद्रनाथ विपथव्याभेदनं संगमं
शीघ्रं कारय मोक्षभावममलं कोटीरचन्द्रोज्ज्वलम् ॥६॥
चन्द्राभाकरवर्णाश्रया जयति या षट्‌चक्रछायामुमा-
मायामोहमहोदयोदयति या कृष्णाक्रियामोहिनी।
लक्ष्मीनीलकलेवरा मम मनोः पूर्वं सदा रक्षतु।
श्रीविद्यामयदायिनी त्वमपि सा मे नाभिमूलोदया ॥७॥
मात्रामुद्रामखिलनिलया मालिनी मन्त्रविद्या
विश्वेशानी शयनरहिता शीतवातातपस्था।
सत्यासत्यावचनसुभगा गौरि मातात्वमेव।
प्राणान् रक्षप्रमथकिरणामाश्रये त्वामनन्ताम् ॥८॥
सिद्धासिद्धा शशिधरकला केवलाम्भोजसंस्था
स्थित्वानन्दानयनसुचला मोक्षमध्यप्रकाशा।
नित्यश्रद्धागतिपथकरा कर्त्तृकामानकर्त्री
नाभ्यम्भोजं भज भज भजे त्वामखंडप्रतापे ॥९॥
पीतापीतापवनगमना धारणाध्यानयोगा।
कालाकालाकलिकुलकला निष्कलाद्याकलापा।
कृष्णानन्दा मदनकुहरा केकरा शांकरी मा

त्वं श्रीधात्री वरणकमलं नाभिमूले प्रपद्ये ॥ १०
श्वेताश्वेता करुणशतकरा भावनाज्ञानसिद्धिः
प्रीताप्रीता परमगठनाचारणामारणाया
त्वं सा विद्याविधिवुधधरा धारणाज्ञानगम्या
रम्यारम्यावसननिरता नीरदा पातु नाभिम् ॥ ११
मन्दोद्गन्धप्रियतमलता नीरवालावहन्ती
देवादेवापरचरगता भुक्तिमुक्तिप्रकाशा ।
कौलाकौला कुपितनयना झनझनावातमुग्धा
मुग्धामुग्धा मतिधनपतेर्नाभिसंस्थैव नाभिम् ॥ १२ ॥
हंसीसिंहासनगतपादा चक्रविद्या मुमुक्षा
श्रीविद्या त्वं नवविलचरा सुन्दरी रक्तवर्णा ।
स्वर्णाम्भोजोपरि शुभमहाचक्रमध्ये प्रतिष्ठा
सर्वाच्छन्ना परिजनदयानाभिपद्मं प्रपद्ये ॥ १३ ॥
ब्रह्मानन्दा नृपतिगणमहापूजया शोभिताङ्गी
श्रीश्रीविद्या सकलविभवा भावनीया महेन्द्रैः ।
सिद्धस्थाने मणिमयगृहे मूलसिंहासनस्थे
पद्मे चाष्टान्वितयुगदले रुद्ररूपे समाह्वे ॥ १४ ॥
योगज्ञानं विविधविभवं वेदविद्याप्रकाशं
मे चाष्टाङ्गं समवतु मुदा षोडशी भैरवीस्था ।

551

चन्द्रोल्कात्वं भवभयहरा शोकतापापहन्त्री
नाभेरब्जे उदयति सुरी यस्त्वमीशे प्रपद्ये ॥ १५ ॥ असंगतम्

सुष्ठिस्थालं विभवकरणे शीतले शीतशैले
मात्रादर्थप्रचयचयना पार्वणी पर्वपूरा ।
विद्युत्पूरं ममसुखमयं पाहि पंचानना या
त्वं सा देवी शुभमणिगृहे शीतलत्वं विधेहि ॥ १६ ॥

कल्लोलानां सकलविषयच्छेदिनी चार्णमाता
नानालाक्षारुणकिरणा गोपपूज्या गिरीज्या ।
मातस्त्वं मे सुमणिभवने पाहि मूल्या भवानी
वाणस्थानाश्रयजयकरा चाद्रिमाचान्नपूर्णा ॥ १७ ॥

552

चन्द्रोल्लासावयवसुखदा दीर्घकेशी विशाला
त्वन्मातङ्गी गजमुनिमता मालिकात्वं प्रचण्डा ।
ज्योत्स्नाजाले उदयति सदा रक्तभासप्रभासा
त्वं मे रुद्रं हरिहरतनुं नाभिमूले प्रपद्ये ॥ १८ ॥

वाणीनाम्ना रचयति वचः सुन्दरी वर्णनस्था
स्थित्यन्तस्था चलतनुधरा धामसंधामभासा ।
बोधानन्दप्रकटिततनुर्भवीं परिणीज्ञानमुग्धा
मातस्त्वं मे मणिमयगृहं पाहि सर्वाङ्गवेशे ॥ १९ ॥

वेधाचार्या मलरहित रजा चन्द्रनालिप्तदेहा

विश्वेशानी भगवति शिवे त्वं हि पापोरुरूपा।
जाता प्राम्भोजे टिल शिवगता मोक्षदा मानसस्था
चित्तं शुभ्रं प्रकुरु विषयच्छेदनं छेदिनीत्वम् ॥ २०॥
मणिमयकुलगेहे कोटिविद्युत्प्रकाशाऽ-
भयवरमपि देहि क्रोधविघ्ने मयित्वम्।
सकलसुखविभोगे पालय प्राणरूपं
चरणतलविलग्नं मामनाथं परेशि ॥ २१॥
भुवनगठनहेतोः कायशक्त्या विलासात्
विधिमुखपरमार्थं मानुषादित्रिसर्गम्।
मम मणिकुलपद्मे नित्यरूपाभिधानं
जयति खलु तदाभ्रे स्तोत्रसारप्रकारम् ॥ २२॥
तव तु चरणपद्मे लाकिनी देवकन्ये
विरचय मनुशास्त्रं सिद्धमन्त्रप्रकारम्।
वह वह भवभावं त्राहि मां चन्द्रगेहे।
कठिनहृदयनाशं शांकरि त्वं कुरुष्व ॥ २३॥
कमलवनसमीपेऽरण्यमध्येऽतिगुह्ये
विषयविषविनाशं कौलिके त्वं विहत्य।
तव निजमणिपीठे स्थापयित्वा निदानं
हर हर दयिते त्वं [illegible] दोषषट्कं विवादम् ॥ २४॥

553

घोरे सान्द्रान्धकारे मम निजकुलदृग् दानकर्त्री प्रपञ्चे
वाञ्छा कल्पद्रुमस्था त्वमिह दशदलामाति भागा वभागा।
त्वं काली लांगलस्थालयकरराघटा मध्यगा मातृकाल्वं
भीमा भीत्यापहन्त्री हरपददलालोकिनी नाभिसारा॥ २५॥
एतत् स्तोत्रं पठेद्विद्वान् योगज्ञानी निराश्रयः।
महाशून्यगतो धीरो विभवायामृताय च।
भोगमोक्षौ करे तस्य चाहिके योगिराड् भवेत्।
परे याति महादेवी पादपद्मे न संशयः।
ऐहिके चिरजीवित्वं ददाति कामदायिनी।
मणिपूरे स्थिरो याति कुलमार्गप्रसादतः।
कुलमार्गे लयस्थानैलयं विश्वेश्वरीपदम्।
तनुयान्मणिपूरस्था देवता पश्यति ध्रुवम्।
पूजान्ते प्रपठेत स्तोत्रं भक्तिभावपरायणः।
शीघ्रमेव हि योगी स्यात् कुलमार्गप्रसादतः॥
इति श्रीरुद्रजामले उत्तरतन्त्रे महातन्त्रोद्दीपने
सिद्धमन्त्रप्रकाशे भैरवीभैरवसंवादे लाकिनीशक्ति-
स्तवनं नाम पंचाशत्तमः पटलः॥ ५०॥

आनन्दभैरव्युवाच

अथ कान्त प्रवक्ष्यामि सिद्धसाधनमुत्तमम् ।
येन साधनमात्रेण नरो योगी भवेद्ध्रुवम् ।
शरीरं त्रिविधं प्रोक्तं उत्तमाधममध्यमम् ।
तत्रैव त्रिविधं स्वर्गं स्वर्गपातालभूतलम् ।
सप्तस्वर्गं तथा नाथ सप्तभूतलमेव च ।
सप्तपातालमेवं हि सप्तद्विसप्तसंख्यकम् ।
तन्मध्ये त्रिविधं भावं दिव्यवीरपशुक्रमम् ।
दिवि तिष्ठन्ति वीरास्तिष्ठन्ति भूतले ।
पशवः सन्ति पाताले क्रमशः क्रमशः प्रभो ।
सर्व्वत्र द्विगुणाछन्नं सत्वरजस्तमादिकम् ।
सत्वगुणं स्वर्गमध्ये त्रिवर्णाः सेवापरायणाः ।
तदा सर्व्वे हृष्टाः स्वर्गे भूतले च रजोगुणम् ।
ब्रह्मसेवापराः सर्व्वे ब्रह्मज्ञानिन एव च ।
पाताले शिवसेवाश्च शिवरूपिण एव च ।
तमोगुणात पशोर्भावमधो दृष्टिं समाप्य च ।
ततो विहाय तज्ज्ञानं वीरो भवति साधकः ।
वीरभावे ज्ञानदृष्टिं ब्रह्मसिद्धिः समाप्य च ।
देवता भवति क्षिप्रं सत्वे निर्म्मलभावके ।
स्थिरो भूत्वा महादेवो भवत्येव क्रमेण तु ।

आकाशगामिनी सिद्धिः क्रमशो भवति ध्रुवम्।
मूलाधारस्य चाधोवै पातालतलवासिनः।
तदूर्द्धं ब्रह्मलोकेतु भूतलादिनिवासिनः।
तदूर्द्धे सत्वनिलयं स्वाधिष्ठानं हि दैवतम्।
विधिविद्याप्रकाशं च परदेवस्य सत्पदम्।
तदूर्द्धे सर्वरूपं च सर्वज्ञानाश्रयं परम्।
परस्थानं महादेव मणिपूरं मनोहरम्।
रुद्रशक्त्यात्मकं चक्रं श्रीविद्याचक्रमण्डलम्।
लाकिनी परमा माया महारुद्रेण सेविता।
मणिपूरप्रकाशाय रुद्रशक्तिर्विभाति च।
सर्व्वज्ञानानन्दमयं सर्व्वसिद्धिप्रकाशकम्।
महासूक्ष्मशब्दमयं कुण्डलीज्ञानसाधनम्।
यस्याः साधनमात्रेण योगी भवति भैरवः।
प्रकारत्रयसेवायां महासिद्धीश्वरो भवेत्।
सर्व्वे च पशवः सन्ति तलवद्भूतले नराः।
तेषां ज्ञानप्रकाशाय वीरभावः प्रकाशितः।
वीरभावं गुरोः प्राप्य क्रमेण देवता भवेत्।
यत्काले वीरभावादिसिद्धिं प्राप्नोति मानवः।
तत्कालनिर्णयं वक्ष्ये वीरादेवत्वमाप्नुयात्।

मासैकाकयणी सिद्धिर्द्विमासे वाकपतिर्भवेत्।
मासत्रयेणासे योगात् जायते सुखलाभः।
एवं चतुष्टये मासि भवेद्दिक्पालगोचरः।
पंचमे पंचवाणः स्यात् षष्ठे रुद्रेण संप्राप्यः।
वीरभावं समाश्रित्य सर्व्वदा योगमाश्रयेत्।
पशोरधीनं देवेश वीरभावं मनोहरम्।
वीराधीनं दिव्यभावं वीरो योगी भवेद्ध्रुवम्।
योगाधीनं दिव्यभावं दिव्येन रुद्रदर्शनम्।
रुद्रदर्शनमात्रेण जीवन्मुक्तो भवेद्ध्रुवम्।
जीवन्मुक्तिपदं प्राप्य किं न सिध्यति भूतले।
मनोनिवेशमाहत्य पशुभावाश्रितो नरः।
वीरभावं समाश्रित्य चादौ योगं समाश्रयेत्।
सर्व्वदा चाभ्यसेद्योगं मन्त्रन्यासपरायणः।
योगसिद्धिर्ज्ञानसिद्धिर्मोक्षसिद्धिस्ततः परम्।
यदि मोक्षमिहेच्छन्ति पशवः शास्त्रमोहिताः।
मम ज्ञानं वीरभावं चाश्रित्य योगमाप्नुयात्।
योगाभ्यासस्य चादौ च शरीरं परिशोधयेत्।
आदौ पंचामराः कार्याः सर्व्वकार्याणि राश्रयाः।
केवलं योगमाश्रित्य सदा पंचामरी भवेत्।

इति प्रकारं महाकाल पंचामराभिधानकम् ।
नेती दन्ती तथा धौती नउडलीक्षालनं तथा ।
एक प्रकारमेवं हि कथितं परमेश्वर ।
दन्ती नेती तथा धौती नेउडली क्षालनं क्रमात् ।
एवं वा नित्यमाकुर्यात योगशास्त्रसमृद्धये ।
पंचामरासाधनानि काले कुर्यान्निजाक्रियाम् ।
औषधी पंचकं ग्राह्यं पंचयोगसुसिद्धये ।
विल्वपत्रं जपापत्रं तुलसी श्यामपत्रकम् ।
निर्गुण्डीपत्रमेवं तु दूर्वाग्रंथिवलेन च ।
एषां प्रकृतनामानि वक्ष्यामि शृणु शंकर ।
अमरा विल्वपत्रं तु चामरा विजयादलम् ।
अमरलताग्रंथिदूर्वा निर्गुण्डी चामरेश्वरी ।
अमा श्यामतुलसी पंचामरास्तत्रकद्भवाः ।
कथिता योगसिद्ध्यर्थे तत्प्रमाणं क्रमात् शृणु ।
पंचतोलकमानन्तु विजयापत्रमेव च ।
अन्येषां तोलकं चैकं संशोध्य भक्षणं चरेत् ।
एतद्भक्षणयोगेन पंचयोगे जयी भवेत् ।
पुनस्तेषां महाकाल मनुं वक्ष्यामि तत्वतः ।
सकलं चामरायोगं मन्त्रेणानेन भक्षयेत् ।

558

तावद्द्वयं समुद्धृत्य कूर्युगं तदनन्तरम्।
विसर्गविन्दुसंयुक्तं तत पश्चात अमृतामुखी।
भवरां हारय द्वन्द्वं योगसिद्धिं ततः परम।
देहि देहि पदस्यान्ते स्वाहान्तं मन्त्रमुत्तमम।
एतन्मन्त्रेण चोतपाद्य मन्त्रयित्वा प्रभक्षयेत।
एतत-काण्डस्य मंत्रं तु तत्रैव परियोजयेत।
निर्गुण्डी मन्त्रमात्रं तु शृणु वक्ष्यामि भैरव।
कामवीजत्रयं पश्चात कालीवीजत्रयं तथा।
सर्व्व योगं ततः पश्चात साधय द्वयमेव च।
अमृतत्वं मायधाद्वांते समर्पय द्वयं तथा।
स्वाहान्त मनुना चाथ चोतपाद्य भक्षणं चरेत।
विल्वपत्रं प्रगृह्णीयात तन्मन्त्रं शृणु कौलिक।
लज्जावीजं कामवीजं शान्तिवीजं ततः परम।
ब्रह्मवीजं शक्तिवीजं पश्चात सुन्दरि चावदेत।
मां स्थापय महायोगे पालय द्वयमेव च।
शंकरप्रेमगलिते स्वाहान्तं प्रणवादिकम।
शृणु श्रीविजयापत्रं शोधनं हि चतुर्विधम।
चतुर्वर्णस्वमन्त्रेण परिशोध्य कुलागतम।
ततक्रमं परिवक्ष्यामि सावधानावधारय।

प्रणवं पूर्व्वमुच्चार्य्य देवीवीजं ततः परम।
श्रीवीजं मन्मथं वीजं लज्जावीजद्वयं क्रमात।
क्रमेण चसमुद्धृत्य विजये ज्ञानमुद्धरि।
योगमोक्षप्रदे पश्चात कायशोधनि पावनि।
मम पश्चात कायासिद्धिं देहि देहि ततः परम।
स्वाहान्तं मन्त्रमुद्धृत्य संशोध्य चापि भक्षयेत।
एकीकृत्य महादेव चैतन्मन्त्रेण मन्त्रयेत।
अमृतेऽमृतशब्दान्तोद्भवे पदं ततः परम।
अमृतवर्षिणि शब्दान्तेऽमृतं तदनन्तरम।
आकर्षय द्वयं पश्चात सिद्धिं देहानलप्रिया।
एतन्मन्त्रेण संशोध्य सावधानेन भक्षयेत।
न्यूनाधिकं न कर्त्तव्यं शनैरभ्यासमाचरेत।
यावत प्रमाणमक्षः स्यात प्रमाणं चाधिकं नच।
एतद्भोजनमाहत्य पयःपानं समारभेत।
तत प्रकारं शृणु प्राणनाथ ईश्वर शंकर।
मरीचवीजं संशोध्य दग्धशोधनमारभेत।
एतत प्रकारं द्विविधं तत प्रकारं वदाम्यहम।
वाञ्छाकल्पतरोर्मूले गुरुं ध्यात्वा पुनः पुनः।।
मानसोपचारद्रव्यैः पूजयित्वा विशेषतः।

मरीचं तोलकार्द्धं तु शोधयेन्मनुनामुना ।
श्रीकण्ठबीजमुद्धृत्य पृथ्वी बीजत्रयं तथा ।
घोराघोरतरे पश्चात मरीचकुलसुन्दरि ।
द्विठान्तोऽयं मनुः प्रोक्तस्तत पश्चाद्दुग्ध शोधनम ।
आदौ मरीचं भुंक्त्वा च दुग्धपानं महाबलम ।
चर्वयित्वा मरीचं तु दुग्धपानं महामनु ।
कण्ठबीजं समुद्धृत्य कामेश्वरी मनुं ततः ।
शिवबीजत्रयं पश्चात कण्ठे गोरसवासिनि ।
योगविग्रहमुद्धृत्य मयकामप्रसारिणि ।
तत पश्चाद्योगसिद्धीनां मीश्वरि क्षेत्रवासिनि ।
शरीरं वशमन्तो तु चानयद्वयमेव च ।
विघ्नानवारय युग्मं तु स्वाहान्तोऽयं महामनुः ।
द्वादशवारमुच्चार्य चाथवा पंचवारकम ।
वारत्रयं सदा शोध्य स्तवं स्तावं विधिः स्मृतः ।
यदि पिबेत खेचरत्वं तदा दुग्धं द्विवारकम ।
यदि चेत केवलं दुग्धं तदा प्रस्थं चतुर्द्दश ।
लघ्वाहारी महाज्ञानी पंचाममादियोगवित ।
मणिपूरे मनोयोगं समाहृत्यामरो भवेत ।
चतुर्व्वर्गाः करे तस्य यो मनोः पीठमाश्रयेत ।

561

562

आनन्दभैरव उवाच

मणिपूरभेदनार्थं मनोयोगसुसिद्धये।
खेचरादिमहायोगसिद्धये सर्व्वसिद्धये।
मृत्युञ्जयस्य देवस्य रुद्रशक्त्याश्च दर्शनात्।
तथा पीठस्थिरार्थाय कालजालवशाय च।
सहस्रनामबीजानि चाष्टोत्तरशतानि च।
मृत्युञ्जयस्य लाकिन्याः स्तोत्रं मकारकूटकम्।
कथयस्व वरारोहे यदि स्नेहोऽस्ति मत्प्रति।
ज्ञानदे परमेशानि शरीरं मम रक्षतु॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्र-प्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे मणिपूरभेदप्रकाशो नामैकपंचाशत्तमः पटलः॥ ० ॥

आनन्दभैरव्युवाच

अथ संभेदनार्थाय वक्ष्ये षट्पंकजस्य च।
महारुद्रस्य देवस्य श्रीश्रीमृत्युंजयस्य च।
लाकिनीशक्तिसहितं सहस्रनाममंगलम्।
अष्टोत्तरशतं व्याप्तं निगूढं तवसिद्धये।
धारयित्वा पठित्वा च श्रुत्वा वा नाममंगलम्।

श्रृणुष्व परमानन्द योगेन्द्र चन्द्रशेखर ।
तवाशु प्रणयात् सर्व्वं सर्व्वसम्पत् प्रियाप्तये ।
मणियोगसुसिद्ध्यर्थं सावधानावधारय ।
अस्या श्रेत्तरशतसहस्रनाममंगलस्य महाविष्णुकहोर-
ऋषिर्गायत्री छन्दो रुद्रमृत्युंजयो लाकिनी सरस्वती देव-
-ता सर्व्वाभीष्टमणिपीठयोगासिद्ध्यर्थे विनियोगः॥
ओं मृत्युंजयरुद्राणी लाकिन्यादि सरस्वती ।
मृत्युंजेता महारौद्री महारुद्रसरस्वती ।
महारुद्रो मृत्युहरो महामणिविभूषिता ।
महादेवो महावक्त्रो महामया महेश्वरी ।
महावीरो महाकालो महाचण्डेश्वरीश्वरा ।
महावातो महाभद्रो वीरभद्रा महान्तरा ।
महाचण्डेश्वरो नीलो मणिपूरप्रकाशिका ।
महामत्तो महामात्रो वीरासनसमास्थिता ।
मायावी मारहन्ता च मातङ्गी कमलेश्वरी ।
मृत्युहारी मुनिश्रेष्ठो मनोहारी मनोजवा ।
मण्डलस्थोऽमरानन्दो मान्या मोहनमौलिनी
मत्तवेशो महावालो महावाला महालया ।
मारीहारी महामारी मदिरामत्तगामिनी ।

×ला....

563

महामायाश्रयो मौनी महानन्दामृतप्रिया।
मुद्रापी मदिरापीच सामयोगा महोदया।
मांसपी मीनभक्षश्च मोहिनी मेषवाहना।
मणिभंगप्रियो मान्यो महाधन्या महावला।
महारणेश्वरो मुख्यो महाविद्या महीयसी।
महाशूलधरो मन्ता महावाणी महाकुला।
मलयाद्रिनिवासीच मतिर्माला मनःप्रिया।
मायापतिर्महारुद्रो मरणापहकामिनी।
मालाधारी शंखमालो मंजरी मांसभादिणी।
महालक्षणसम्पन्नो महालक्षणलक्षणा।
महाज्वली महावेगी मोषली मुषलप्रिया।
महारवो मालिनीनाथो मन्दराद्रिनिवासिनी।
लिंगिना मन्दारस्थश्च मानभंगा मनःस्विनी।
महाविद्यापतिर्मध्या मध्यपर्व्वतवासिनी।
मदिरापो मन्दहवो मदना मदनासना। २००
मदनस्थो मददोत्रो महामणिनिवासिनी।
महान् महात्मा मांगल्यो महामंगलधारिणी।
मायाहीनशरीरश्च मनोहरतनूद्भवा।
मायाशक्तिपतिर्मोहो महामोहविनाशिनी।

569

महाचित्तो निर्मलात्मा महतामायुषि स्थिता।
मत्तकुञ्जरपृष्ठस्थो मत्तकुञ्जरगामिनी।
मकरो मकरानन्दो मकरी मकपूजिता।
मणिपूज्यो मौनरूपी मेदोमांसविभोजनी।
महाकामी महावीरो महामहिषमर्द्दिनी।
महिषासुरबुद्धिस्थो महिषासुरनाशिनी।
महिषस्थो महेशस्थो मधुकैटभनाशिनी।
मधुनाथश्च मधुपो मधुमांसादिसिद्धिदा।
महाभैरवपूज्यश्च महाभैरवपूजिता।
महाकान्तिप्रियानन्दो महाकान्तिस्थितामरा।
मालाकौटिधरो माली मुण्डमालाविभूषिता।
मण्डलो ज्ञाननिरतो मणिमण्डपवासिनी।
महाविभूतिक्रोधस्थो मिथ्यादोषसरस्वती
मेरुस्थो मेरुनिलयो मैनाकानुजरूपिणी।
महासेनासनो मेरुमर्द्दिनी मेघवाहना।
मंजुघोषो मंजुनाथो मोहमुद्गरधारिणी।
मेद्रस्थो मणिपीठस्थो मूलरूपा मनोहरा।
मंगलार्थो महायोगी मत्तदेहसमुद्भवा।
मतिस्थाता मनोमानी मनोन्माता मनोन्मनी।
मन्दबुद्धिहरो मृत्युर्मृत्युहंत्री मनःप्रिया।

महाभक्ता महाशक्ता महाशक्तिर्मदात्मिका।
मणिपूरप्रकाशश्च मणिपूरविभेदिनी।
मकारकूटनिलया मणिमालामनोहरी।
मातृका मातृकावर्णा मातृकाबीजमालिनी।
महातेजा महावह्निर्मन्दहास्या मधुप्रिया।
मधुमांससमुत्पन्ना मधुमांसविहारिणी।
मैथुनानन्दनिरता मैथुनालापमोहिनी।
मुरारिप्रेमसन्तुष्टा मुरारिकरसेविता।
माल्यचन्दनदिग्धाङ्गी मालिनीमंत्रजीविका।
मन्त्रजालस्थिता मन्त्री मन्त्रिणां मन्त्रसिद्धिदा।
मन्त्रचैतन्यकारी च मन्त्रसिद्धिप्रिया सती ॥ २००
महातीर्थप्रिया मोक्षा महासिंहासनस्थिता।
महाक्रोधसुस[illegible]म्पन्ना महती बुद्धिदायिनी।
मरणाज्ञानरहिता महामरणनाशिनी।
मरणोद्भूतहन्ता च महानिद्रान्विता मुदा।
महामोदकरी मत्ता महापुरनिवासिनी।
महाकौलिकपालश्च महादैत्यनिनाशिनी।
मार्त्तण्डकोटिकिरणा स्थतिलक्ष्मी स्थतिस्थिता।
महाशैलासना मायी महाकालगुणोदया।

566

महाजयो महारुद्रो महारुद्रा महारुणा।
मनोवर्णस्थो मारथो महातरुणरूपिणी।
मुण्डमालाधरो माद्यो माद्यपुष्पस्रजा मला।
मंगलप्रेमभावस्थो महाविद्युत्प्रभाचला।
मात्राधारी मतस्थैर्यो मतभेदप्रकाशिनी।
महापुराणवेत्ता च महापौराणिकाम्रता।
मौनविद्यो महाविद्यो महाधननिवासिनी।
मयवासी मयसंस्थो महाशैत्या महोरगा।
महाफणिधरो मात्रो मातृकागन्धवासिनी।
महाविभूतिदानाढ्यो मेरुवाहनवाहना।
महाह्लादो महामित्रो महामैत्रेयपूजिता।
मार्कण्डेयसिद्धिदाता मार्कण्डेयायुरीक्षिता।
मार्कण्डेयो मृकुप्रीतो मातृकामण्डलेश्वरी।
मानसस्थो मनोदाता मनोधारणतत्परा।
मयदानवचित्तस्थो मयदानवचिन्तिनी।
महद्गुणधरानन्दो महानन्दविहारिणी।
महेश्वरास्थितिमूलो मूलविद्याकुलोदया।
मायापो मोहनोन्मादी महागुरुनिवासिनी।
महाशुक्लाम्बरधरो मलयागुरुधूपिता।

मधुपेशी मधूल्लासो माध्वीरससमाश्रया ।
महागुरुर्महादेहो महोत्साहो महोल्वणा ।
मधुपंकजसंस्थाता मध्याम्बुजविनोदिनी ।
मारीभयहरो मल्लो मल्लग्रहविरोधिनी ।
महाखण्डनलग्नस्थ मदघूर्णितलोचना ।
महासद्योजातकालो महाकापिलवार्णिनी ।
मेघवाहो महावर्त्तो मनसा मणिधारिणी ।
मरणाश्रयहन्ता च महागुर्वी गणास्थिता ।
महापद्मस्थितो मन्त्रो मन्त्रविद्यानिधीश्वरी । ३००
मकरासनसंस्थाता महामृत्युनिरासिनी ।
मोहनो मोहिनीनाथो मत्तमंगलवासिनी ।
महाकालकुलोल्लासो महत्कामादिनाशिनी ।
मूलपद्मनिवासी च महामूलफलोदया ।
मासाख्यो मासनिलयो मंगलस्था महद्गुणा ।
मायाच्छन्नहरो मीनो मीमांसागुणवासिनी ।
मीमांसाकारको माथी मार्जारसिद्धिदायिनी ।
मेदिनीवल्लभो मो मेदिनीज्ञानमोदिनी ।
मौषलीशो मृषार्थस्थो मनःकल्पितकेशरी ।
मानसश्रीधमोज्ञापो मन्दहासशोभिता ।

मैनाको मेनकापुत्रो मयास्कन्नामहत्क्रिया।
महाक्रियाचललो मायोडो मण्डलासनशोभिता।
मायाधारणकर्त्ता च महादोषविनाशिनी।
मुक्तकेशो मुक्तदेहो मुक्तिदामुक्तिमालिनी।
मुक्ताहारधरो मुक्तो मुक्तिमार्गप्रकाशिनी।
महामुक्तिक्रमाच्छन्नो महोच्चगिरिवासिनी।
मूषलाद्यस्त्रहस्तश्च महागौरीमनः क्रिया।
महाधनी महामानी मनोन्मत्तमनोलया।

569

महारणगतो मान्तो महावीणादिनादिनी।
महाशत्रुनिहन्ता च महाभ्रजालमालिनी।
शिवो रुद्रो वनाशानाक्तिर्ता मोदवर्द्धिनी।
चन्द्रचूडाधरो वेदो वेदोन्मत्ता महोज्ज्वला।
विलसत्कोटिचन्द्राभो विधुकोटिमनोदया।
अग्निज्वालाधरो वीरो ज्वालामालासहस्रधा।
मंगाप्रियकरो धर्मी महाधार्मिकतत्परा।
धर्मध्वजो धर्मकर्त्ता धर्मगुप्तिः प्रसन्नधीः।
महाविद्रुमपूरस्थो विद्रुमाभा रतप्रभा।
पुष्पमालाधरो मान्यो शत्रूणां कुलनाशिनी।
कोजागरविसर्गस्थो वीजमालाविभूषिता।

बीजकुन्तो बीजपूरो बीजाभा विघ्ननाशिनी।
विश्रिशो विधिमोदस्थो वेदाङ्कपरिपूरणी।
किरातिनीपतिः श्रीमान् विद्या विद्वज्जनप्रिया।
वर्गस्थो वर्गसम्पर्का वर्गमालाविभूषिता।
महाक्रमगतः शूरो विलसत्कोटिचन्द्रभा।
महाकुमारनिलयो महाकामकुमारिका।
कालजालक्रियानाथो विकला कमलासना।
खण्डबुद्धिहरो भावो भवभीतिहरामरा।
असंख्याको रूपसंख्यो नामसंज्ञादिपूरणी।
कमलाद्यासनः कोपः किंकिणीजालमालिनी।
चन्द्रायुतमुखाम्भोजो विभायुतसमानना।
कालबुद्धिहरो बालो भगवत्यम्बिकाण्डजा।
अखण्डस्थश्चाण्डवाह्यस्थो विवादरहितानुता।
पंचमाचारकुशलो महापंचमलालसा।
विकारशून्यो दुर्धर्षो द्विपदा मानुषक्रिया।
मयदानवकर्मस्थो विधातृकर्मशोधिनी।
कालिकालक्रियारूढो वायवी घर्घरध्वनिः।
सर्व्वसंचारकर्त्ता च सर्व्वसंचारकर्तृका।
मन्दमन्दगतिप्रेमो मन्दमन्दगतिस्थितिः।

570

साट्टहासो विधुकला चाघोरघोरयातना ।
महानरकहर्त्ता च नरकादिविपाकहा ।
पंचरश्मिसमुद्भूतो नागादिबलघातिनी ।
गरुडासनसंपूज्यो गरुडप्रेमवर्द्धिनी ।
अश्वत्थवृक्षनिलयो वटवृक्षतलस्थिता ।
चित्रांगोऽथ प्रभाबुद्धिः प्रपंचसारसंगतिः ।
स्थितिकर्त्ता स्थितिच्छायो विशदाछत्रधारिणी ।
दाडिमाभासकुसुमो दाडिमोद्भवपुष्पिका ।
द्राक्षो द्रविडदेशस्थो रतिकालापवर्द्धिनी ।
रत्नगर्भो रत्नमाला रत्नै[illegible] इवागतिः ।
प्रसिद्धः पावनी पृच्छा सुस्थः स्वर्गपरावरा ।
खेचरः खेचरी खस्थो महाखड्गधराव्यया ।
किशोरभावखेलस्थो विरवलादिप्रकारिका ।
महाशब्दप्रकाशश्च महाशब्दप्रकारिका ।
चारुहासो विपद्धन्ता शत्रुमित्रगणास्थिता ।
वज्रदण्डधरो व्याघ्रो वियतखेलनखंजना ।
गदाधरः शीलधारी शक्तिकूपेरगावला । ५००
रसनासनकारी च रसनारसनाप्रिया ।
महाविद्याधरो गुप्तो विशेषगोपनक्रिया ।

571

गुप्तगीता गायनस्थो गुप्तशास्त्रफलप्रदा।
योगविद्या पुराणश्च योगविद्याविभाकला।
एककाली द्विकालश्च त्रिकालफलदेतुजा।
अष्टादशभुजो रौद्रो भुजगा विघ्ननाशिनी।
विद्यागोपनकारी च विद्यासिद्धिप्रदायिनी।
विजयानन्दगो मन्त्रो महाकाली महेश्वरी।
भूतिदानरतो मार्गो महद्गीताप्रकाशिनी।
वेश्याद्यावेशसन्तानो मंगलाभकुलान्तरा।
द्विभुजो वेदबाहुश्च षड्भुजा कामचारिणी।
चन्द्रकान्तो माल्यधरोऽकालं तिलकरागिणी।
त्रिभंगदेहानिकरो विभंगस्था विनोदिनी।
त्रिकूटस्थः स्थिरावस्थः त्रशरेणु स्तिकालजा।
एकवक्त्रो द्विवक्त्रश्च वक्त्रशून्या शिशुप्रिया।
श्रीविद्यामन्त्रजालस्थो विज्ञानीशः कुलेश्वरी।
घटासनगतो गौरी गौरवी गौरिकाचला।
गुरुज्ञानगतो गन्धो गन्धभोग्यागिरिध्वजा।
छायामण्डलमध्यस्थो विकटापुष्करानना।
कामाख्यो निरहंकारः कामरूपस्वपांगजा।
सुलभो दुर्लभोऽदीणा सूक्ष्मातिसूक्ष्मरूपिणी।

श्रीवीजजापकोऽकूरो विमोहगुणनाशिनी।
अकुलो निष्कुलोल्लासो विमुक्तपा सरस्वती।
अनन्ताधारनिलयो विहंगगणगामिनी।
अच्युतेशः प्रकाण्डस्थः प्रचण्डफणिवाहिनी।
अभ्रान्तो भ्रान्तिरहिता भ्रान्तौ भ्रान्तिप्रतिष्ठिता।
अव्यर्थो व्यर्थवाचस्थो विश्वसा पांकयान्विता।
यमुनापतिपः पीनो महाकालवशापहा।
जम्बुद्वीपेश्वरः पारः पारापारस्तुताशिनी।
वज्रदण्डधरोऽशान्तो मिथ्यागतिरतीन्द्रिया।
अनन्तशयनोऽन्यूनः परमाह्लादवर्द्धिनी। ६००
सिताश्रनिलयो व्याख्यो वसन्तकालसुप्रिया।
विरजान्दोलितो द्विन्नो विशुद्धगुणमण्डिता।
अश्विनेशः पल्लवेशः पवनाशनभक्षिणी।
अपामार्गकृतस्नाना सुधारसफलान्तरा।
फलवीजधरो दौर्गो दारापालनपल्लवा।
पिप्पलादो कणाश्वाथ विख्यातिर्वादिवल्लभा।
संहारविग्रहो विप्रो विपन्नाकाररूपिणी।
कालिकामाननः कल्यः कालिकामानलापहा।
कामानलो वियत्कामी कुकाम्या कामरूपिणी।

अबलापोनाबलापो विक्रूशा कंसनाशिनी।
हठातकारगतोऽचामी नाचामा विनयप्रिया।
सर्व्वकालसुखाकुन्तो जिताजितगुणोदया।
भास्वत्किरीटी रींकारी ककराशीतलातुरा।
अमूल्यबलदानाढ्यो दिवारात्रिक्लिखगड्जा।
मारबीजमहामानो हरबीजादिसंस्थिता।
अनन्तवासुकीशानो लाकिनी काकिनी कृशा।
कटिध्वजो वहद्गर्भ श्वाम्रुगडारणवारिडिका।
उमेशो बलमालेशो विकुम्भगणपूजिता।
निकुम्भपूजितः कर्णो विष्णुपत्नी सुधालिका।
अन्तःकालहरोऽकुन्तो महाकुन्तास्त्रधारिणी।
ब्रह्मास्त्रधारकः त्रिशो वनमालाविभूषिता।
एकादशो द्वादशश्च षोड़शान्तरसंभवा।
अतिगम्भीरवातस्थो महागंभीरवाद्यगा।
त्रिविधात्मा त्रिदेशात्मा तृतीया त्राणकारिणी।
कियत्कालचलानन्दो विहंगमगणासना।
गीर्व्वाणो बाणहस्तश्च बाणहस्ता विधुच्छला।
वि[illegible]धुधर्म्मोज्ज्वलोदारो वियज्जननकारिणी।
विवासाध्यासपूज्यश्च नवदेशी प्रधानिका।

विलोलवदनोऽवासो विरामामोदकारिणी।
हिरण्यहारभूयाङ्गः कलिङ्गवाञ्छिनीशगा।
अनन्यदीक्षावरदश्च क्षितिक्षोभविनाशिका। ७००
क्षणदेवप्रसादाङ्गो वशिष्ठादिकृतीश्वरी।
रेवातीरनिवासी च गंगातीरनिवासिनी।
गंगेशः पुष्करेशश्च व्यासभार्या विशेषिका।
अमलानाथसंज्ञश्च रामेश्वरसुपूजिता।
रमानाथप्रभुः प्राप्तिः कीर्तिः श्रद्धाभिधानिका।
लम्बोदरप्रेमकामो लम्बोदरकुलप्रिया।
अर्द्धदेहो व्यालमालो लोचनायुतधारिणी।
अव्यर्थवंचनप्राज्ञो विद्यावागीश्वरी तथा।
अक्षासनस्रुतिः प्राणः कलिङ्गनगरेश्वरी।
अतिगुह्यभवज्ञानी गुप्तचक्रालिकाव्यया।
मणिनागगतो गन्ता वागीशानी बलप्रदा।
कुलाशनगतोऽनाशो विनाशानाशसुप्रिया।
विनाशकुलमूलस्थः संहारकुलकेश्वरी।
निराकारगुणाविप्रेन्द्रो महदाश्चर्यचित्रिणी।
आशुतोषगुणाच्छन्नो मदविह्वलमन्थरा।
विरूपाक्षो लेलिहश्च महामुद्राप्रकाशिनी।

575

मयादशाहरो रुद्रो मकरन्दसुबिन्दुगा।
छत्रचामरधारी च छत्रदात्री त्रिपीठगा।
इन्द्रजालकोविधाता च ध्यानदानादकारिणी।
कुण्डली परमानन्दा मधुपुष्पसमुद्भवा।
बिल्ववृक्षास्थितो रुद्रो नयनाम्बुजवासिनी।
हिरण्यगर्भः कौमारो विरूपाक्षा क्रतुप्रिया।
श्रीवृक्षनिलयः श्यामो महाकुलतरूद्भवा।
कुलवृक्षस्थितो विद्वान् हिरण्या रजतप्रिया।
कुलपः प्राणपः प्राणपंचचूडधराधरा।
उष्णती वेदिकानाथो धर्माधर्मविवेचिका।
शीतलाशः प्रीतहीनो मनःस्थैर्यकरीक्षया।
कुहिस्थः क्षणभंगस्थो गिरिपीठनिवासिनी।
सर्द्धकायः प्रसन्नात्मा प्रसन्नवनवासिनी।
प्रतिष्ठेशः प्राणधर्मो ज्योतीरूपा भगुप्रिया। ८००
धर्मध्वजपताकेशो बलाकावंशवर्द्धिनी।
मेरुः शृंगगतो धूर्तो धूर्तमत्तबलस्पृहा।
सेवासिद्धिप्रदोऽनन्तोऽनन्तकार्यविभेदिका।
तारिणी मनुजालज्ञो विराटपीठवासिनी।
विच्छेदच्छेदभेदस्थ छलशास्त्रप्रकाशिका।

चारुकान्तालंकृतश्च तप्तहाटकरूपिणी।
परानन्दरसज्ञानी रससन्तानमन्त्रिणी।
प्रतीतः सूक्ष्मशक्तश्च प्रसङ्ग संगतिप्रिया।
अमायासागरोद्भूतो वन्ध्यादोषविराजिता।
जितयमाकुलवतो व्यापिका मदवारुना।
व्याघ्रचर्म्माम्बरो योगी महापीनावरप्रदा।
वरदाता सारदाता ज्ञानदानन्दवाहिनी।
चारुवेश्मधरो मायो विशालाक्षी दिगम्बरा।
ताडुंगमार्गनिर्म्माता मानवस्तांगमोहिनी।
पंचालवेशसम्भूतो विशुद्धेश्वर [illegible] वल्लभा।
किरातपूजितोऽव्याधो मनुचिन्तापरायणा।
शिववाक्यगतो रामो भृगुरामकुलेश्वरी।
स्वयम्भुकुसुमाच्छन्नो विधिविद्या प्रकाशिनी।
प्रभाकरतनूद्भूतो विशल्यकरणीश्वरी।
जगतीश्वरसम्पर्को योगविज्ञानवासिनी।
उत्तमो मध्यमो व्यासो वाच्यावच्यवरांगना।
आंबीजवादबोधाढ्यो मन्त्रोद्धारकारिणी।
कर्णासिद्धान्तसंस्थानो युद्धसाधनचर्चिका।
मथुरासुन्दरीनाथो मथुरापीठवासिनी।

पलायनविशून्यश्च प्रकृतिप्रत्ययस्थिता।
प्रकृतिप्राणनिलयो विकृतिज्ञाननाशिनी।
सर्व्वशास्त्रविभेदश्च मत्तसिंहासनासना।
इतिहासप्रियो वादी विमलामलरूपिणी।
मणिसिंहासनस्थश्च मणिपूरजयोदया।
भद्रकालीजपानन्दो भद्राभद्रप्रकाशिनी।
श्रीभद्रो भद्रनाथश्च भयभंगविहिंसिनी।
आलारामो विधेयात्मा शूलपाणिप्रियाननी।
अतिविद्याहृदाभ्यासो विशेषविधिदायिनी।
अजरामरकान्तिश्च कान्तिकोटिधरामुखा।
पशुपालः पद्मसंस्थो सुश्रीः पाशुपतालया।
सर्व्वास्त्रधारको हर्त्ता ज्ञानिनी ज्ञानवर्द्धिनी।
द्वितीयानाथ ईशार्द्धो वादधारणमोहिनी। ६००
मृगमांसाशनो भीमो भीमनेत्रा भयानका।
शिवज्ञानक्रमो दक्षो क्रियायोगपरायणा।
कुलस्थो दानसम्मानो हनुमत्पार्व्वतीपरा।
प्रियानन्दो दिवाकर्त्ता निशानिषादघातिनी।
अस्त्रहस्तो विलोलाक्षो मनःस्थापनकारिणी।
अस्थहस्तो विलोलाक्षो मनःस्थापनकारिणी।
मृदुपुत्रो मृदुच्छत्रो विभांगकुलनन्दिनी।

अन्तरिक्षगतो मूलो मूलसूत्रप्रकाशिनी।
अभीतिदाननिरतो विधुमालामनोहरी।
चतुर्मुखो जाह्नवीशो धनिकन्याकुतूहली।
शिशुपालरिपुप्राणो विदेशपदरक्षिणी।
विलक्षणो विधिज्ञाता मलहन्त्री त्रिविक्रमा।
त्रिकोणनिलयोऽन्यूनो निम्ननाभिर्नगेश्वरी।
नवीनगुणसम्पन्नो नरकन्याकुलाचला।
त्रिविधेशो विसंकेतो विज्वराज्वरदायिनी।
अतिधार्मिकपुत्रश्च चारुसिंहासनस्थिता।
स्थापको गुणवर्गाणां सतां सिद्धिप्रकाशिनी।
सिद्धप्रियो विलासाख्यो ध्वंसकर्त्री निरंजना।
शक्तीशो विकलेशश्च क्रतुकर्मफलोदया।
निष्फलेशो वियद्गामी ललिता वृद्धवाहना।
मलयाद्रितपःक्षेमः क्षयकर्त्री रजोगुणा।
द्विवर्णको द्वारपालो बालविघ्नविनाशिनी।
मायापद्मगतो मानी मारीविद्याविलासिनी।
हिंगुलादस्थितः सिद्धो विदुषां वादसाधिनी।
श्रीपतीशः श्रीकरेशः श्रीविद्या भुवनेश्वरी।
मतिप्रथमजो धन्यो मिथिलानाथपुत्रिका।

579

रामचन्द्रप्रियः प्राप्तो रघुनाथकुलेश्वरी।
धर्म्माधर्म्मगतो धीरो रसा दुर्गा गिरीश्वरी।
राजराजेश्वरो वालो रतिपीठगुरान्तरा।
कामरूपपरोल्लासो विदग्धा कामरूपिणी।
अतिथीशः क्षुब्धभर्त्ता नानालंकारशोभिता।
नानालंकारभूषांगो नरमाला विभूषणा। १०००
जगन्नाथो जगद्व्यापी जगतामिष्टसिद्धिदा।
जगतकामो जगज्जापो जयन्ती जयदायिनी।
जयकारो जीवकारी जयदा जीवनी जया।
जयो गणेशः श्रीदाता महापीठनिवासिनी।
विषमः सामवेदस्थो यजुर्वेदाश्रया गया।
त्रिकालगुणगम्भीरो द्वाविंशतिकराम्बुजा।
सहस्रवाहुः सारस्थो भावगा भावभाविनी।
भवनादिकरो मार्गो विनीता नयनाम्बुजा।
सर्व्वज्ञानरवण्डकोऽखण्डो सर्व्वज्ञानाभिकारिणी।
जिताश्रयो जितरिपुः कलंकगुणवर्ज्जिता।
निराधारो निरालम्बो विषयाज्ञानवर्ज्जिता।
अतिविस्तारवदनो विवादस्खलनाशिनी।
आर्य्यानाथः शोभनाशी रिपूणां कुलवाञ्छिता।

आश्रयो भूमिवर्गाणां चारुकुण्डलमण्डिता ।
अतिवृद्धिधरोऽसूक्ष्मो रजनीध्वान्तनाशिनी ।
ज्योत्स्नाजालकरो योगी वियोगगामिनी युगा ।
युगगामी योगगामी जयदानकरी शिवा ।
संज्ञावुद्धिकरो भावो भवभूतिविमोहिनी ।
सुन्दरः सुन्दरानन्दो रतिका रतिसुन्दरी ।
रतिज्ञानी रतिमुखो रतिनाथप्रकाशिनी ।
वहुरूपी वोधमात्रो विनोदा द्वैतवर्जिता ।
भूरिभारहरानन्दो भूरिसन्तानदायिनी ।
यज्ञसाधनकर्त्ता च सयज्ञः पंचमकुला ।
कोटिकोटिचन्द्रतेजाः कोटिकोटिरविच्छटा ।
कोटिकोटिचंचलाभो द्विकोव्ययुतचंचला ।
कोटिसूर्यच्छद्देहः कोटिकोटिरविप्रभा ।
कोटिचन्द्रकान्तिमणिः शतकोटीन्दुकान्तगा ।
विलसत्कोटिकालाग्निः कोटिकालानलोपमा ।
कोटिवाह्निगतो वह्निजाया द्विठोद्भवा ।
महातेजो वह्निराशिः कालाग्निहारधारिणी ।
कालाग्निरुद्रो भगवान् कालाग्निरुद्ररूपिणी ।
कालाग्निरुद्रो भगवान् कालाग्निरुद्रमोहिनी ।

कालाभा कालिकालाभा कालिकालकुललाकिनी।
मृत्युजित् मृत्युजेता च मृत्युंजयमनुप्रिया।
महामृत्युहरो मृत्युरूपमृत्युविनाशिनी।
जयो जयेशी जयदो जयदा जयवर्द्धिनी।
जयाकारो जयधर्म्मा जगज्जीवनरक्षिणी।
सर्व्वजित् सर्व्वरूपी च सर्व्वदा सर्व्वभाविनी।

श्रीं श्रीं श्रीं

इत्येतत् कथितं नाथ महाविद्याभिधानकम्।
शब्दब्रह्ममयं साक्षात् कल्पवृक्षस्वरूपकम्।
अष्टोत्तरसहस्राख्यं शतसंख्यासमाकुलम्।
त्रैलोक्यमंगलस्तोत्रं सिद्धिविद्याफलप्रदम्
सकलं निष्फलं साक्षात् कल्पद्रुमफलान्वितम्।
योगिनामात्मविज्ञानमात्मज्ञानकरं परम्।
यः पठेत् भावसम्पूर्णो मिथ्याधर्म्मविवर्जितः।
रुद्ररूपी स्वयं भूत्वा महायोगी भवेद्ध्रुवम्।
अकस्मात् सिद्धिमाप्नोति चाधमां मान्यदायिनीम्।
राजलक्ष्मीं धनैश्वर्य्यं मतिधैर्य्यं हयादिकम्।
कुञ्जरं सुन्दरं वीरं पुत्रं राज्यसुखं जयम्।
राजराजेश्वरत्वं च दिव्यवाहनमेव च।

अकेशं पंचमां सिद्धिं ततः प्राप्नोति मध्यमाम्।
अत्यन्तदुःखहननं गुरुत्वं लोकमण्डले।
देवानां भक्तिभावं च दिव्यभावं सदासुखम्।
आयुर्वृद्धिं लोकवश्यं पूर्णकोषं हि गोधनम्।
देवानां वाक्यश्रवणं प्रत्यक्षं च प्रकालके।
दीर्घदृष्टिं भयात्यागं चाल्पकार्य्यविवर्ज्जितम्।
सदा धर्म्मप्रियत्वं च धर्मज्ञानं महागुणम्।
विवेकांकुरमानन्दं श्रीवाणी सुकृपान्वितम्।
तत उत्तमयोगस्थां सिद्धिं प्राप्नोति साधकः।
अत्यन्तशुद्धिमजज्ञानं मायार्थभूतिवर्ज्जनम्।
एकान्तस्थानवसतिं योगशास्त्रनियोजनम्।
सर्व्वाकांक्षाविशून्यत्वं दैवतैकान्तसेवनम्।
खेचरत्वं सर्व्वगतिं भावसिद्धिं सुरप्रियाम्।
सदा रौद्रक्रियायोगं विभूत्यष्टांगसिद्धिदम्।
दृढज्ञानं सर्व्वशास्त्रे कवित्वं रससागरम्।
एकभावं द्वैतशून्यं महापदनियोजनम्।
महागुणवती विद्यापतित्वं शान्तिमेव च।
प्राप्नोति साधकश्रेष्ठो यः पठेद्भावनिश्चलः।
त्रिकालमेककालं वा द्विकालं वा पठेत् सुधीः।

583

शतमष्टोत्तरं चास्य पुरश्चर्य्याविधिः स्मृतः।
पुरश्चरणमाहत्य पठित्वा च पुनः पुनः।
अष्टैश्वर्य्ययुतो भूत्वा मनोगतिमवाप्नुयात्।
सर्व्वत्रकुशलव्याप्तं यः पठेन्नियतः शुचिः।
षट्चक्रं मणिपीठं च भित्वानाहतगो भवेत्।
अनाहतं ततो भित्वा विशुद्धसंगमो भवेत्।
विशुद्धपद्मं भित्वा च शीघ्रं द्विदलगो भवेत्।
द्विदलादि महापद्मं भित्वैतत्स्तोत्रपाठतः।
चतुर्वर्गक्रियां कृत्वा चान्ते निर्व्वाणमोक्षभाक्।
योगिनां योगसिद्ध्यर्थे सर्व्वभूतदयोदयात्।
निर्व्वाणमोक्षसिद्ध्यर्थे कथितं परमेश्वर।
एतत्स्तवनपाठेन किं न सिध्यति भूतले।
कुलाकुलक्रमेणैव साधयेद्योगसाधनम्।
योगान्ते योगमध्ये च योगाद्ये प्रपठेत्स्तवम्।
कृत्तिकारोहिणीयोगे आर्द्रायां मिथुने तथा।
श्रवणायां मेषलग्ने कुजे कुहूसमाकुले।
संक्रान्त्यां शनिवारे च कुलवारे पुनर्वशी।
संध्याकाले लिखेत्स्तोत्रं ध्यानधारणयोगवित्।
भूर्ज्जपत्रे लिखित्वा च कण्ठे शीर्षे प्रधारयेत्।

अथवा रात्रियोगे च कुलचक्रे लिखेत् सुधीः।
सर्व्वत्र कुलयोगेन पठित्वा सिद्धिमाप्नुयात्।
एतन्नाम्ना प्रजुहुयात् कालिकाहुतिदानवत्।
तद्दशांशक्रमेणैव हुत्वा योगीह सर्व्वदा।
मणिपूरे ह्रदे भूत्वा रुद्रशान्तिकपालभेत्॥ ७०

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे महारुद्रमृत्युञ्जयलाकिन्यष्टोत्तरशतसहस्रनामविन्यासो नाम द्विपंचाशत्तमः पटलः॥ ५२॥

आनन्दभैरव उवाच

कथयस्व वरारोहे मणिपूरमनुक्रमम्।
यज्ज्ञात्वा मुनयः सर्व्वे चाष्टसिद्धिमवाप्नुयुः।
प्रजपन् गच्छति क्षिप्रमनयासे वाहते।
मन्त्रार्थं मन्त्रचैतन्यं निजाविग्रहरक्षणम्।
तत्पराबरधर्म्मिस्त्वं विचार्य्य वक्तुमर्हसि।

श्रीआनन्दभैरव्युवाच

महाभैरवकालाग्ने मनुज्ञानामलाशया।
कथयामि तव स्नेहादतिकोमलसाधनम्।

मन्त्राणामर्थचैतन्यं विविधानि शृणु प्रभो।
मणिपूरे ह्यनायासे यत्प्रसादात् स्थिरो भवेत्।
एतत्करणमात्रेण योगी भवति निश्चितम्।
कोटिकोटिमन्त्रजालं तदर्थकोटयः स्मृताः।
एतन्मध्ये सारभागं कथयामि कुलार्णव।
सर्वत्र समभावेन संस्मरेन्मन्त्रमुत्तमम्।
शरीरमपरिच्छिन्नं ब्रह्माण्डं सचराचरम्।
मूलादिमणिपूर्वान्तं त्रिगुणं मनुरूपकम्।
वर्णमालामुपादाय मुहुर्मुहुर्जपेत् सुधीः।
पूर्णतेजोमयीं ध्यायेत् कोटिकालाग्निरूपिणीम्।
स्वदेवतां सदा ध्यायेत् स्थित्वादिब्रह्मरन्ध्रके।
तन्मूर्तिमपरिच्छिन्नां षट्स्थाननिवासिनीम्।
गभीराङ्गीं घनानन्दां सुधासागरवाहिनीम्।
ज्ञानाहुतिदानतुल्यां ब्रह्मरन्ध्रे विभावयेत्।
मूलरन्ध्रे गुणं ध्यायेत् कोटिकालानलोज्ज्वलाम्।
ज्वलन्तध्यानमाचर्याद् दूर्ध्वं प्रस्वाप्रभाकरम्।
सुधारसामोदमुग्धं हव्याग्निसदृशोज्ज्वलाम्।
ललाटे चिन्तयेत् कान्तं पूर्णेन्दुकोटिमङ्गलम्।
विगलद्रसपुञ्जं तु तद्रसात् प्रोज्ज्वलाननम्।

स्थिरवायुस्थिराकारं मन्त्रार्थं चेति भावयेत।
अथवा शुद्धसंकाशं पूर्णचन्द्रमयूखगम।
मूलादिब्रह्मरन्ध्रान्तं मूलं ध्यात्वा पुनः पुनः।
विचिन्तयेत सूक्ष्मरूपां महागुर्वीं स्वदेवताम।
मन्त्रार्थं चेति तज्ज्ञानं तज्ज्ञानान्मोक्षमाप्नुयात।
मन्त्रार्थज्ञानमात्रेण सिद्धिनिर्वाणमाप्नुयात।
न स्थूलं नातिसूक्ष्मं गुणमयवपुषं विश्वनाथं सुशक्तिं
सानन्दानन्दचित्तं कालिफलमचलं चंचलं शुक्लरक्ताम।
पीनापीनादिरूपं त्रिगुणगुणसमं मूलपद्मादिरन्ध्रे
विश्वालानं कुलाख्यं मनुगुणजडितं भावयेत सिद्धिलोकः॥
चतुःषष्टितन्त्रे त्रिगुणजननीं ध्याननिपुणां
महामंत्राकारां भुवनकरुणां बोधविषये।
महाविद्यामायां मनुमयरसाच्छन्दतनुगा-
मवाप्यानन्दाब्धौ कुलपथि भजन्तीह रसिकाः॥
समस्तां शून्याद्यां रजतघटनाद्यायगणमयं
विसर्गं बिन्दुस्थं रविशशिकलावह्निकिरणाम।
जगद्व्यापाराङ्गं भवविरहितं भावजडितं
विकाराधाराहं दशदलविमले स्थापयति धीः॥
सुरासुरभयप्रदं तरुणरूपशोभाकरं

587

मनोहरकलेवरं सकलदेहसंज्ञापनम् ।
भजन्ति मुनयो नृपा ऋषय इन्द्रदेवादयो
दशच्छदनिकेतने प्रकृतिदेहमध्यस्थितम् ॥
प्रचण्डचरणाश्रयं ध्वनिकलापसंव-
र्महोत्कटतपःप्रियं भजति चाशुतोषं शिवम् ।
निधाय हृदिपंकजे किमपि नाभिमूलेऽपि वा
विभावगुणभावनं परिकरोति योगी महान् ॥
स्वकीयगुणसत्वके कठिनचित्तसंज्ञार्पणं
चतुर्भुजकलेवरं दशदलाब्ज इन्दीवरे ।
मनोहरहरं हरं परमसारमाद्यात्परं
प्रकल्प्य परमेश्वरे प्रभावरूपमारोपयेत् ॥
विरक्तमति निर्मलं कमलहारमान्याश्रयं
शिवं प्रातकभास्करं सकलपद्ममध्येऽपि वा ।
भुजायुतधरं धराधरधरं हि मुद्राधरं
भजन्ति कुलकामिनीपतय ईशवेशास्पदाः ॥
सदा चरणपंकजे त्रिफलहानिमुद्राप्तये
कृपामयमलद्वयं मतिगसत्वसंभावनम् ।
सदैकगुणभावनं परमदेवदेवस्य वा
त्रिलोकजननीपते रमलमेव कुर्याद्वशी ॥

एवं कृत्वा निरालम्बो विश्वालयध्यानवान्नरः।
अकस्माग्मन्त्रचैतन्यं प्राप्नोत्यात्मविनिर्णयम्।।
इति श्रीरुद्रजामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे मन्त्रार्थचैतन्यन्यासो नाम त्रिपंचाशत्तमः पटलः ।। ५३ ।।

आनन्दभैरव्युवाच

आनन्दसागराम्भोजमध्यस्थ परमप्रिय।
इदानीं कालजालादिवारणं शृणु भैरव।
संपूज्य संध्यया कुम्भं वायुं स्वाभाविकीपलिम्।
कुम्भयित्वा स्वभावेन चिरकालं सुखी भवेत्।
शनैः शनै रेचयित्वा सर्व्वदा तद्गतो भवेत्।
कालजालवशो याति तत्क्षणान्नात्र संशयः।
विना वायाकुंचनेन भुवि सिध्यति को जनः।
वायुचालनमात्रेण सूक्ष्ममार्गोद्गमेन च।
सिध्यत्येव महायोगी कालजालवशो भवेत्।
कालवशं न करोति मीहादति सुखाश्रयात्।
कालभक्षो भवेत् सो हि म्रियते नात्र संशयः।

मणिपूरे मनोदत्वा देवतां साधयेत् सदा।
स्तोत्रध्यानं नामयुग्मं पठित्वा च पुनः पुनः।
मनोयोगं च सर्व्वत्र वायुना कारयेद्बुधः।
कुम्भयित्वा रेचयित्वा धारयित्वा पुनः पुनः।
सर्व्वकालवशं नीत्वा जितात्मा चामरो भवेत्।
लोभमोहौ वर्ज्जयित्वा कामक्रोधादिपातकम्।
सर्व्वदा वायुपानं च कृत्वा रहसि संयमी।
नित्यं वायुसाधनानि षट्चक्रभेदनाय च।
शनैः शनैर्वारयेद्वै चिरजीवित्वसाधनात्।
यदि न चिरजीवी स्यात् कालात्मा वायुसेवकः।
षट्चक्रभावसिद्धान्तज्ञानी मृत्युवशो भवेत्।
अतः कुर्यात् शिवज्ञानं वायुसंसिद्धिकारणम्।
तत्क्रियासाधनार्थाय चादौ पंचामरविधिम्।
कुर्यात् साधकमुख्यस्तु निजकायप्रसाधनात्।
नेति योगं तदा कुर्यात् यदा भवति संयमी।
धौतीयोगं सदा कुर्यात् यदा भवति संयमी।
नेउलीयोगमाकुर्यात् यत्र लोको न विद्यते।
दन्तीयोगं सदा कुर्यात् यदा मोक्षक्रियारतः।
तदा चालनमाकुर्यात् यदा तृष्णाविवर्ज्जितः।

590

तृष्णानाशे भवेन्मोक्ष इति मे योगनिर्णयः।
विशेषेण प्रवक्ष्येऽहं शृणु कैलासपावन।
एतत्कार्यं पुरा कृत्वा दिवि देवा मुनीश्वराः।
कायसिद्धिं मुदा कृत्वा छायामायाविवर्जिताः।
चिरजीविन एवापि कमलाश्रीसमन्विताः।
तत्तद्भेदान प्रवक्ष्यामि साधनात् कायभक्षणात्।
यः करोति महादेव कायसाधनमुत्तमम्।
समायाति ममानन्दसदने नात्र संशयः।
प्रभाते च समुत्थाय ब्राह्मे काले फलोदये।
सहस्रारे गुरोः पादपंकजध्यानमाचरेत्।
विचिन्तयेत् ततः श्रीमान् गुरुरूपां सरस्वतीं।
स्वदेवतां परानन्दरसिको योगवुद्धिमान्।
प्रणम्य शिरसा नित्यं शौचं कार्यं समाचरेत्।
शौचक्रियाक्रमेणैव सिद्धाः शुचिगुणान्विताः।
प्रागच्छेत् शौचकार्यार्थं घटमानं जलं नयेत्।
मृत्तिकाप्रस्थमानं च नीत्वा शौचं समाचरेत्।
कुम्भनं सप्तदशकं वर्चेत्यागं पुनः पुनः।
ततस्तर्जन्याचालोड्य वामहस्तस्य शंकर।
गुदरन्ध्रे समायोज्य क्षालनं हि पुनः पुनः।

यावदा विश संख्यागं निःशेषरा मलत्रयम्।
तावत् सृतपयसा क्षाल्य शोधयेदुदरं सुधीः।
यावन्न जायते सौख्यं तावत् कालं समाचरेत्।
तत उत्थाय विधिना मृत्तिकाशौचमाचरेत्।
येन क्रमेण विष्ठाया गन्धनाशोऽपि जायते।
पादद्वयं समाक्षाल्य चान्तःशौचं समाचरेत्।
तत क्रिया सकलं वक्ष्ये शृणु योगेश्वर प्रभो।
सूक्ष्मवस्त्र सुसम्भूतं डोरकं सूक्ष्मरन्ध्रके।
नासिकाया दृढ़तरं कृत्वा कोमलं चातिनिर्म्मलम्।
शनैः शनै नियोज्याथ जिह्वामूले निवेशयेत्।
जिह्वामूलात् समादाय वारद्वादशकं सुधीः।
मन्दमन्द घर्षणं तु कृत्वा भेदं समानयेत
मायात्रयेण बीजेन देवीबीजत्रयेण च।
रमाबीजत्रयेणापि योगिन्यै नम इत्यपि।
एतन्मन्त्रेण योगीन्द्रो नेति योगं समाचरेत्।
शिरःशुद्धं समाकृत्य कण्ठशोधनमाचरेत्।
ततो वक्षःशोधनं तु ततो नाभेश्च शोधनम्।
क्रमेण कुर्य्यात् कार्य्यार्थे तत्प्रकारं शृणु प्रभो
क्रमेणा कुर्य्यात् कार्य्यार्थे ततोदकानिषेचनम्।
धौती क्रियां समाकुर्य्यात् ततोदकानिषेचनम्।

592

सूक्ष्मवस्त्रं सूक्ष्मसूत्रं चाष्टाङ्गुलप्रमाणकम्।
द्वात्रिंशद्धस्तमानं तु पूर्णसंख्या उदीरिताः।
मन्त्री प्रथमतः कुर्याच्चतुरङ्गुलवस्त्रकम्।
दीर्घे पंचहस्तमानं तप्तोदकसमान्वितम्।
भक्षयेत् शेषजिह्वाग्रे संस्थाप्य वसनं शुभम् सुखम्।
तर्जनीमध्यमां गुष्ठमुद्राभिर्भक्षयेत् सुधीः।
क्रमेण भक्षयेन्नित्यं दीर्घं च प्रसवे तथा।
एतन्मन्त्रेण देवेश पूर्वोक्तमनुना तथा।

सर्वत्र पूर्वमन्त्रेण संशोध्य बीजमुच्चरेत्।
शक्तिबीजत्रयं पश्चात् कामबीजत्रयं तथा।
लक्ष्मीबीजत्रयं पश्चात् महाधौतनिवासिनि।
मे नाड़ीमलमन्ते तु क्षालय द्वयमेव च।
भर्यावद्धे ततः पश्चादुदरे सन्निवेशयेत्।
शनैर्निवेशमाकृत्य यावत् सर्वं प्रजायते।
एतद्योगप्रसादेन वायवी सुकृपा भवेत्।
ततः कुर्यात् साधकेन्द्रो विग्रहहेमकारणात्।
नेड़ुलीपरमं योगं गात्रदृढानिबन्धनम्।
घूर्णायमानमाकुर्यादुदरं परमेश्वर।
सर्वदा चासनं कुर्यात् प्राणवायुप्रधानकम्।

वामे घूर्णितमाहत्य दक्षिणे घूर्णितं भवेत्।
एवं क्रमेण देवेश पुटपाके सदाचरेत्।
एतन्मन्त्रेण देवेश शुभासन दृढो भवेत्।
ब्रह्मवीजत्रयं पश्चात् कालीवीजत्रयं ततः।
देवी प्रणवयुग्मं तु गात्रस्थायै नमो द्विठः।
तदन्ते नाड़िकादीनां क्षालनं परमाद्भुतम्।
वक्षःस्थानां महाकाल दन्तीयोगेन कारयेत्।
जगमानं दन्तकाष्ठं निर्म्मलं सुन्दरं नतम्।
दन्तकाष्ठं क्षालयेद्वै मनुना साधकाग्रणीः।
श्यामावीजत्रयं पश्चात् भैरवीवीजकं त्रयम्।
मर्द्दिनीवीजयुगलं दन्तकाष्ठनिवासिनि।
मे हृदग्रार्थिं छेदयेति द्वितयं वह्निसुन्दरी।
क्रमेण विधिनानेन गलरन्ध्रे निवेशयेत्।
यावन्नाभेरधो याति यावत् सुखमयो नरः।
तावद्दन्तीयोगकार्य्यं प्रभाते सर्व्वकार्य्यकम्।
एतदन्ते ततः कुर्य्यान्नाड़ीक्षालनमेव च।
तन्मन्त्रं शृणु वीरेन्द्र चामरत्व प्रदायकम्।
आदौ प्रणवमुद्धृत्य दीर्घप्रणवयुग्मकम्।
भुवनेशीवीजयुग्मं चन्द्रवीजत्रयं तथा।

वाग्भवत्रयमुद्धृत्य वह्निवीजत्रयं ततः।
श्रीवीजं मन्मथं लक्ष्मीं श्रीतले तदनन्तरम्।
स्वोदरनाड़ीमूलं मे मलं ज्ञालय युग्मकम्।
स्वाहान्तमनुना नित्यं ज्ञालयेन्नाड़िकाधमाः।
यावत्तृष्णानाशकः स्यात तावतकालं समाचरेत।
यावदुत्तम शक्तिर्न त्रिदण्डावधि धारणे।
तावन्न जायते नाथ ज्ञालनं सुखसाधनम्।
यदि भाग्यवशाद्देव त्रिदण्डवायुकुम्भकम्।
स्वयमेव समायाति नाड़िकाक्षालनं शुभम्।
यावत सम्भाविलालापं मधुपानं निरन्तरम्।
पादाम्भोज निःसृतन्तु परमानन्दवर्द्धनम्
ततसुखेनापविच्छिन्नं संज्ञाननिर्म्मलेन च।
चिदानन्दस्वरूपेण आनन्दाश्रुविलोचनम्।
तदाहि हृदयग्रन्थि भेदनं देहि वर्द्धनम्।
तथा हि पुलकस्थैर्य्यं देहावेशस्थितं तदा।
तदा षट्कंच सिद्धानां ज्ञानं चैतन्य निर्म्मलम्।
चिदानन्दमयो भूला तृष्णाज्ञानविवर्जितः।
जीवन्मुक्तः परानन्दरसिकः प्रणयाप्रियः।
स्थिरचेता महायोगी भवत्येव न संशयः।

आस्तिको देवभक्तश्च निद्रावादविवर्जितः।
स स्वात्मा महाज्ञानी भवत्येव न संशयः।
पंचयोगं समाहृत्य नेत्यादिकमनुत्तमम्।
स्नानं कुर्याद्विधानेन तीर्थराजनिकेतने।
इडागंगाजले वापि पिंगलायमुनाजले।
सुषुम्नायां सरस्वत्यां त्रिषु पुष्करकोटिषु।
तथापि वाह्यस्नाने तु सर्वांगे मस्तकं विना।
सप्तवारं समासिञ्चेन्मस्तकं वाह्यवारिणा।
मार्ज्जनेनापि मनुना मूलमन्त्रेण वा पुनः।
ततोऽङ्गं मार्ज्जयित्वा च सन्ध्यावन्दनमाचरेत्।
ऊर्द्ध्वाधस्तोजसं विन्दुनादमण्डलसंपुटम्।
सन्ध्यावन्दनमाहृत्य महौषधीं प्रभक्षयेत्।
मूलमन्त्रेणाभिमन्त्र्य पंचद्रव्यं कुलेश्वर।
अतः कुर्यान्महापूजां स्वस्वमन्त्रोक्तसाधिताम्।
षट्चक्रार्थं ततो ध्यायेत् यदुक्तं विधिना प्रभो।
कुण्डल्यादि महापूजा सहस्रनाममंगलम्।
अत्यगुह्यकथनं सत्वभक्तिप्रकारकम्।
भित्वा भेदं सदा कुर्यात् मणिपीठस्थदेवयोः।
ध्यानं ज्ञानं स्तवं नित्यं यजनं नामकीर्त्तनम्।

चैतन्यकद्दलाकिन्या तथा मृत्युंजयस्य च
नित्यं गुरुमयं ध्यात्वा सर्व्वगामिनमीश्वरम्।
चिरजीवी महायोगी भवत्येव न संशयः॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे मणिपूरभेदो नाम चतुःपंचाशत्तमः पटलः॥०॥५४॥

आनन्दभैरव उवाच।

परापरविभेदं च निगूढ़ज्ञानसाधनम्।
इदानीं शृणु धर्म्मज्ञ पंचामरादिसाधनम्।
षट्चक्रपद्मभेदार्थो यत्क्रमाज्जायते न्नणात्।
अमरश्चामराचैव सर्व्वसिद्धिप्रदायिका।
ब्रह्मज्ञानसाधनी च ब्रह्मानन्दप्रकाशिनी।
अमरलता तथा ध्येया दूर्व्वसंज्ञाप्रतिष्ठिता।
सिद्धामराचानिर्गुण्डी सर्व्वसिद्धिप्रदायिनी।
नीलामरा ततो ग्राह्या नीला तुलसी संज्ञिता।
अमरुः समया पत्रं चामरा विल्वपत्रिका।
शिवप्रिया सदा पूज्या पूर्व्वोक्तावा समाश्रयेत्।
एतद्भक्षणमन्त्राणि शृणु कैलाशभूपते।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च क्रमतो जया।

597

तत्तन्मन्त्रेण संशोध्य भक्षयेन्मनुनामुना।
सर्व्वासामभयादीनां भक्षणे समुदीरिता।
प्रणवं दीर्घप्रणवं कपिले ज्ञानसाधिनि।
भययोगं साधयेति युगं स्वरेण संपुटम्।
शाखासमूहसंपूर्णे महौषधीनिवासिनि।
मामकममरं देवि कुरुयुग्मं ततो द्विठः।
अभयाख्यनमन्त्राणि शृणुष्व पार्व्वतीश्वर।
यस्य स्मरणमात्रेण नरो नारायणो भवेत्।
शिववाङ्गिहरेलोके बिल्वपत्रस्य भोजनात्।
श्रीवीजत्रयमुद्धृत्य वाग्देवीत्रितयं ततः।
लक्ष्मीकामेश्वरीवीजं रमाकामत्रयं त्रयम्।
सिद्धबिल्वे शिपरमे निगूढतत्ववासिनि।
यामैकध्यानतत्त्रेऽन्ते नियोजययुगं द्विठः।
एतन्मन्त्रेण वीरेन्द्रो विधितत्वास्यमुद्रया।
एतन्मन्त्रेण वीरेन्द्रो विधितत्वास्यमुद्रया।
शोधयित्वा पुनर्नाथ चामरलतां शोधयेत्।
दूर्व्वा देवि त्रिभुवने अमृतत्वप्रदायिनि।
आधिच्छेदभेदकारि प्रणवाद्ये परे रमा।
ततोहि विष्णुवीजं च किंकिंवीजं समुद्धरेत्।
गजराजेश्वरीवीजं श्रीवीजत्रीणि वै विषम्।

सुधारवण्डे मामिहान्ते सिद्धिमेव पदं लिखेत्।
देहि देहि नमः स्वाहा प्रान्तमुच्चार्य शोधयेत्।
एतद्वत्तमामात्रेण चिरकालं सुखी भवेत्।
सर्व्वसंयोगमात्रेण सिद्धो भवति साधकः।
सिद्धामदाशोधनं तु शृणु श्रीचन्द्रशेखर।
सिद्धामदा च निर्गुण्डी त्रिषु लोकेषु गोपिता।
एतत् प्रधानमूलं च पत्रं वा भक्षयेत् सुधीः।
मूलाभावे दलं भोज्यं पत्राभावेतु मूलकम्।
आनयेत् साधकश्रेष्ठः शोभनेन दिनेन तु।
तदा भवति सिद्धश्च कौलानां नियमो नहि।
कौलिके सर्व्वसिद्धिश्च कौलिके योगसाधनम्।
कुलाचारविहीनानां योगो भोगादिकं कथम्।
विना योगेन भोगादि संचयो जायते कथम्।
योगसंचयमात्रेण भोगसाधनमालभेत्।
तद्योगं परमं ज्ञानं ज्ञानामृतनिषेवणम्।
विषयाह्लादभोगादि रनायासेन वर्द्धते।
शरीरिणामादिकार्य्यं शरीरस्य प्रभो प्रियम्।
शीतलामृतरूपाढ्यं व्यक्ताव्यक्तप्रकारकम्।
आदिसाधनमेवं हि कथितं स्नेहहेतुना।

5599

वलभ प्राणरक्षार्थे शोकाकवारणायच।
पुनस्तु कथये तेऽहं निर्गुण्डी शोधनं मनुम।
श्रीं निर्गुण्डि महामाये महासत्व निवासिनि।
आयुरारोग्य जननि ब्रह्मरन्ध्र निवासिनि।
मदीयं सफलं कार्यं पुर्ड कुरु युगं ततः।
नान्तयुग्मं विन्दुनादविभूषितं वाकतेजसम।
चतुर्दशस्वरव्याप्तं भयुग्मं विन्दुभूषितम।
लक्ष्मीवीजत्रयं पश्चात उमावीजत्रयं लिखेत।
वज्रकायं देहि देहि शब्दान्ते वाह्निसुन्दरी।
एतन्मन्त्रेण संशोध्य भक्षयेत साधकोत्तमः।
ततोऽमरो भवेत क्षिप्रं नात्रकार्या विचारणा।
तुलसी शोधनं वक्ष्ये शृणुस्व परमेश्वर।
यत कत्वा च निरोगी स्याद्वलवांश्च जितेन्द्रियः।
प्रणवं वै वाणी देवी सत्वज्ञान निवासिनी।
कामवीजत्रयान्ते तु मां रक्ष युगलं द्विठः।
एतच्छोधन माहात्य भक्षणं यः करोति हि।
कायासिद्धिर्भवेत्तस्य ध्यानधारणयोगिनः॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षटचक्रप्रकाशे भैरवी भैरवसंवादे पंचामरद्रव्य-

600

शोधनं नाम पंचपंचाशत्तमः पटलः ॥ ५५ ॥

आनन्दभैरव्युवाच

कथयामि तव स्नेहात् कायवश्यविशेषणात् ।
हठयोगः प्रकथित इदानीं शृणु तत्क्रमम् ।
मणिपूरस्थितं रुद्रं त्रैलोक्यपरमाक्षरम् ।
कथयामि शिवानन्द साधकानां मंगलम् ।
स्वाधिष्ठानोर्द्ध्वदेशे च परमानन्दसागरम् ।
नाभिमूलं मेघजालमध्यविद्युल्लताकुलम् ।
रहस्यातिरहस्यं च योगिनामतिसागरम् ।
तन्नाभिमूलदेशे च नीलपद्मं महत्प्रभुम् ।
तद्दलाग्रे सदा भान्ति डादिफान्ताक्षराणि च ।
तद्बाह्ये शोभितं रूपं त्रिकोणमण्डलस्य च ।
प्रभातसूर्य्यसंकाशं शिखाकारनिरञ्जनम् ।
विचिन्तयेन्मेषपृष्ठवाहनं चारुणाकृतिम् ।
चतुर्ब्बाहुं त्रिनयनं चारुदेहधरं परम् ।
तत्क्रोडे भाति रुद्रेशः सिन्दूरारुणविग्रहः ।
रुद्ररूपी त्रिनेत्रश्च सृष्टिसंहारकारकः ।
विभूतिभूषितांगश्च लोकानामिष्टदो विभुः ।
तस्य वामे सदा भाति लाकिनी परदेवता ।

चतुर्भुजा महादेवी त्रिनेत्रा सौख्यदायिनी।
श्यामांगी पीतवसना विचित्रालंकृतामरा।
सर्व्वसिद्धिप्रदा माता सर्व्वत्र सर्व्वपालिका।
सदा रक्षतु मां देवी विद्याभिः कुलकालिका।
एवं ध्यात्वा पूजयित्वा जपयोगस्तवादिभिः।
ततः सिद्धो भवेन्मन्त्री मणिपूरप्रसादतः।
मणिपूरफलं वक्ष्ये समासेन शृणु प्रभो।
कोटिवर्षशतेनापि फलं वक्तुं न शक्यते।
मणिपूरानन्तरं हि प्रवक्तव्यमनाहतम्।
स्तोत्रं ध्यानं समाधेयं सहस्रगुणशंकरम्।
फलमत्यन्तगुह्यं च स्वहृत्पद्मोपलाब्धिकम्।
आत्मज्ञाने मोक्षसिद्धिं प्रेमभक्त्यादिलाभकम्।
संहर्त्ता जालसंघानां पालकः कमलापतिः।
अकस्माज्ज्ञानसन्दोहं लक्ष्मीं प्राप्नोति योगिराट्॥१०॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्ध-मन्त्रप्रकरणे षट्चक्रप्रकाशे भावसंकेतनिर्णये भैरवीभैरवसंवादे मणिपूरभेदविन्यासो नाम षट्पंचाशत्तमः पटलः॥५६॥

आनन्दभैरव्युवाच ।
अथातः संप्रवक्ष्यामि विवेकगुणलक्षणम् ।

वर्णध्यानानन्तरं हि पूजनं तत महत्फलम् ।
पूजयालभते पूजां विवेकं भावसंभवम् ।
काकिनीश्वरसंयोगं भावं परमदुर्लभम् ।
यजनं काकिनी देव्या ईश्वरस्यापि भावनम् ।
पूजाभावे महासिद्धिर्जायते तत्क्षणात् शिव ।
भावेन लभ्यते पूजा विवेकं पूजयालभेत ।
विवेकं ब्रह्मभावं तु प्राप्नोति कोटिजन्मनि ।
अथवा लभ्यते शीघ्रं तवापि मदनुग्रहैः ।
तत् प्रकारं शृणु प्राणवल्लभ त्रिपुरेश्वर ।
यस्य विज्ञानमात्रेण भवेत् परमभावकः ।
विचिन्तयेद्वर्णपार्श्वे चतुर्दिक्षु क्रमेणतु ।
सिद्धेश्वरान् योगयुक्तान् महापुरुषसंज्ञितान् ।
ब्राह्मणं परमं हंसं रुद्रं विश्वेश्वरं प्रभुम् ।
मृत्युञ्जयं महाकालं नीलकण्ठं सुरेश्वरम् ।
श्रीविष्णुं कमलानाथं पंचचूडं कुमारकम् ।
चन्द्रसूर्य्यौ प्रजानाथं दक्षं मुनीन्द्रमेव च ।
प्रचेतारं मरीचिंच कश्यपं पुलहं तथा ।

वशिष्ठं च भृगुं चैव गौतमं कपिलं मुनिम्।
पुलस्त्यं च क्रतुं चैव प्रह्लादं कर्द्दमं तथा।
अथर्व्वाङ्गिरसावपि च वालिखिल्यान् मरीचिपान्।
मनसं चान्तरीक्षं च विद्याश्च पवनं विभुम्।
तेजसं च द्रुमं चैव महीं स्पर्शं च शब्दकम्।
तथा रूपं रसं गन्धं प्रकृतिं च विकारकम्।
यच्चान्यत्कारणं सर्व्वं भुवः क्षेमं चराचरम्।
तत्पार्श्वगामिनो देवा सेन्द्राः संभान्ति नित्यशः।
अगस्त्यश्च महातेजा मार्कण्डेयश्च वीर्य्यवान्।
जमदग्निर्भरद्वाजः संवर्त्तश्च्यवनस्तथा।
दुर्वासाश्च महाभाग ऋष्यशृंगश्च धार्म्मिकः।
सनत्कुमारो भगवान् योगाचार्य्यो महातपाः।
असितो देवलश्चैव जैगिषव्यश्च तत्ववित्।
ऋषभो जितशत्रुश्च महावीर्य्यस्तथा मुनिः।
आयुर्व्वेदस्तथाष्टांग एते भान्ति सुमूर्त्तयः।
चन्द्रमाः सहनक्षत्रैरादित्यश्च गभस्तिभिः।
वायवः क्रतवश्चैव संकल्पप्राण एव च
मूर्त्तिमन्तो महात्मानो महाव्रतपरायणाः।
एते चान्ये च बहवः ईश्वरं समुपासते।

एताः पार्श्वे चिन्तनीया वर्णानां साधकोत्तमैः।
तत्पार्श्वस्थः प्रभाकोटिधारकः प्रतिभाति च।
अर्थो धर्म्मश्च कामश्च हर्षो द्वेषः तपोमदः।
तत्र गन्धर्व्वमुख्याश्च सहिता ‍ प्सरसस्तथा।
विंशतिः सप्त चैवान्ये लोकपालाश्च सर्व्वशः।
शुक्रो वृहस्पतिश्चैव वुधोऽङ्गार एव च।
शनैश्चरश्च राहुश्च ग्रहाः सर्व्वे तथैव च।
मन्वोरथन्तरं चैव हविमान वसुमानपि
आदित्याः साधिराजानो नानारूपैरुपागताः।
मरुतो विश्वकर्म्मा च वसवश्च कपालिनः।
तथा पितृगणाः सर्व्वे सर्व्वाणि च हवींष्यथ।
ऋग्वेदः सामवेदश्च यजुर्वेदस्तथा विधिः।
अथर्व्ववेदश्च तथा सर्व्वशास्त्राणि चैव हि।
इतिहासोपदेशश्च वेदाङ्गानि च सर्व्वशः।
ग्रहा यज्ञाश्च सोमाश्च दैवतानि च सर्व्वशः।
सावित्री दुर्गतरणी वाणी सप्तविधा तथा।
मेधा धृतिः स्मृतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा।
सामानि स्तुतिशास्त्राणि गाथास्तु विविधास्तथा।
भाष्याणि तर्कयुक्तानि देहवन्ति विभान्ति च।

नाटका विविधाः काव्याः कथाख्यायिककारिकाः।
तत्र तिष्ठन्ति ये पुण्या ये पुण्या गुरुपूजकाः।
क्षणा लवा मुहूर्त्ताश्च दिवारात्रिश्च सर्व्वतः।
अर्द्धमासास्तथा मासा ऋतवः षट्वर्षशंकर।
संवतसराः सप्तयुगा मासा रात्रिश्चतुर्विधाः।
कालचक्रं वयाद्दिव्यं नित्यमक्षयमव्ययम्।
धर्म्मचक्रं तथा चापि नित्यमास्ते महेश्वर।
अदितिर्दितिर्दनुश्चैव सुरसा विनता इरा।
कालका सुरभी देवी शरमाचाथ गौतमी।
प्रभा कद्रुश्च वै देव्यो देवतानां च मातरः।
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रा षष्ठी तथापरा।
पृथिवी गांगता देवी ह्रीः स्वाहा कीर्त्तिरेव च।
सुरा देवी शची चैव तथा पुष्टिररुन्धती।
सम्बुद्धिराशा नियतिरिड़ा देवी रतिस्तथा।
एताश्चान्याश्च वै देव्य उपतस्थुर्बलान्विताः।
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि।
विश्वे देवाश्च साध्याश्च पितरश्च महर्षयः।
राजर्षयस्तत्र भान्ति हरिश्चन्द्रादयः प्रभो।
सर्व्वे हेमकुण्डलिनः सर्व्वालङ्कारभूषिताः।

भावका गीतवाद्यादिनिःस्वनैर्मग्नदेहिनः।
भावयन्ति महेशानीं काकिनीं परमेश्वरीम्।
वर्णरूपां नित्यकलां महेश्वरपतिव्रताम्।
ईश्वरं भावयन्त्येते पूजयन्ति निरन्तरम्।
वेष्टिताः सुन्दरकरा अष्टसिद्धिसमृद्धिगाः।
एताः पूज्या महाकालवर्णपार्श्वचराः स्मृताः।
प्रसीदनाथ स्वामीति नाम्ना मनसि पूजयेत्।
वर्णेश्वरप्रियानन्दां काकिनीं पूजयाम्यहम्।
इति मन्त्रेण वै पूज्या वर्णरूपा सरस्वती।
तदा प्रसन्ना सिध्यन्ति श्रीकाकिन्यां कलौयुगे॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे काकिनीश्वरवर्णपार्श्वचरयजनं नाम सप्तपंचाशत्-पटलः॥ ५७॥

श्रीआनन्दभैरव उवाच

अथाशुसिद्धिमाहात्म्यं शृणु श्रीचन्द्रशेखर।
मन्त्रोद्धारं तथान्यासं कवचांगस्तवप्रियम्।
स्तोत्रं सहस्रनामाख्यं अष्टोत्तरमनुप्रियम्।
काकिनीध्यानमखिलं सालोक्यादिपदप्रदम्।

यस्य करणमात्रेण शिवो भवति मानुषः।
वृक्षबीजाद्भवेद्वृक्षः प्रज्ञायाश्च फलोदयः।
यथा तथैव मन्त्राणामुदयो बीजयोगतः।
बीजन्तु परमं ज्ञानं बीजाधीनं चराचरम्।
बीजमाश्रित्य सर्व्वेन्द्राः प्रतिभान्ति महौजसः।
कोटिसूर्य्यप्रतीकाशाः प्राणस्थानमिवाश्रिनः।
केचाप्ययुतसूर्य्याभाः शतसूर्य्यसमप्रभाः।
केचिद्द्वादशसूर्य्याभाः केजनाश्चैकभाः सुराः।
कोऽपि नानामणिदीप्तिः कोऽपि चन्द्रसमप्रभः।
कोऽपि श्रीकान्तकिरणः शंखचक्रगदाधरः।
एते बीजसमुद्भूता निर्वीजाः पंचदेवताः।
ब्रह्मा विष्णुशिवानन्दभैरव प्राणदेवताः।
ब्रह्मा ब्रह्मस्वरूपेण श्वासमार्गप्रवेशकः।
विष्णुर्वैष्णवतत्वेन कुम्भकान्तर्गतप्रभः।
शिवः संहाररूपेण महाप्रलयगः प्रभुः।
आनन्दभैरवः श्रीमान मूलज्ञानी परात्परः।
मूलाम्भोजात ब्रह्मरन्ध्रं यावत्तत्र प्रवेशिका।
प्राणविद्यास्वरूपेण बीजरूपा सनातनी।
सा भाव्या योगिभिर्नित्यं योगांगैरभिगीयते।

योगशास्त्रं विना नाथ के जानन्ति महर्षयः।
अत्यन्तसुखसाध्या सा योगज्ञेया मनोजवा। हर्षार
नानारूपधरहद्रूपा श्वासोच्छ्वासप्रकाशिनी।
हृदयाम्भोजमध्यस्था ईश्वरस्थानवासिनी।
काकचंचुप्रकाशाच सर्व्वभूतहृदिस्थिता।
सर्व्वेषां ज्ञानकर्त्रीच सर्व्वानन्दकरीहृदि।
सा देवी काकिनी देवी ईश्वरी परमा कला।
विभाव्या कोटिसूर्य्याभा कोटिचन्द्रसमानना।
तस्या मन्त्रं महामन्त्रं ब्रह्ममन्त्रं हि योगिनाम्।
श्मशानाथकुलानन्द भैरव्यादिमनुं मुदा।
एतन्मन्त्रप्रसादेन परात्मानं वशं नयेत्।
दीर्घप्रणवमुद्धृत्य वामनेत्रं समुद्धरेत्।
मायान्तो वाग्भवं वीजं कामवीजं समुद्धरेत्।
कामवीजं तथोच्चार्य्य नमोऽन्ते वह्निकामिनी।
एतन्मन्त्रप्रसादेन भवेत् कालवशः क्षणात्।
अत्यन्तसुखमाप्नोति भयज्ञानापहा भवेत्।
कामेन पुटितं मन्त्रं वाग्भवेनापि वा प्रभो।
स्वमन्त्रं पुटितं कृत्वा सिद्धिः स्यादचिरादिह।
अथान्यमंत्रं वक्ष्यामि सावधानोऽवधारय।

69

भद्रकालीं समुद्धृत्य किंकिनीबीजमुत्तमम्।
बालाबीजं समुद्धृत्य महैश्वर्य्यै नमो द्विठः।
केवलं मूलमन्त्रेण पूरितं मूलमन्त्रकैः।
पूजयेत् परया भक्त्या हृदयाम्भोजमण्डले।
अप्रकाश्यमिदं मन्त्रं सर्व्वतन्त्रेषु गोपितम्।
लक्षजापेन सिद्धिः स्यात् हृदयाब्जे स्थिरो भवेत्।
अकस्माद्दीपकलिकाकारं बीजं प्रपश्यति।
ततो भवेन्महायोगी ईश्वरीमन्त्रसाधनात्।
ध्यानं वक्ष्यामि पूजाया गुह्याद्गुह्यतरं परम्।
ध्यात्वा पाद्यादिभिर्नाथ मनःकल्पितपुष्पकैः।
पूजयेत् परया भक्त्या मन्त्रध्यानपरायणः।
शशधरशतकोटिश्रीमयूखप्रभाया
सुरतरुगुणशोभा निर्म्मलावेदहस्ता।
अरुणकिरणमाला हारमाला विलोला
हृदयकमलमध्ये श्रीश्वरीं तां भजामि॥
एवं सर्व्वस्वरूपां तां विभाव्य हृदयाम्बुजे।
पुनः पुनः पूजयेद्वै त्रैलोक्योद्भवपुष्पकैः।
अवश्यं सिद्धिमाप्नोति पूजायोगप्रभावतः।
आयुरारोग्यजननं पूजनं सुमहत्फलम्।

ततोजपेन्महामन्त्रं वर्णमालाक्रमेण तु।
प्राणायामं ततः कृत्वा न्यसेत सर्वांगमध्यके।
मातृकाग्रंथिनिकरे न्यासं पूर्वोक्तनामभिः।
यदुक्तं पूर्वपटले तेषांनामभिरेव च।
विन्यस्य मन्त्रपुटितं मन्त्रन्यासं ततश्चरेत्।
काकिन्या अष्टशक्तीनां नाम्ना विन्यस्य मस्तके।
काकजिह्वा ह्विकारोऽशी काकाख्या काकिनीध्वजा।
काकिनीकालमालाच काकचंचुप्रकाशिनी।
कोकिला चाष्टशक्तीनां नाम्ना विन्यस्य मस्तके।
कण्ठकूपे न्यसेत् पश्चात् षोडशस्वरसंपुटम्।
हृदये विन्यसेन्नाथ कादिद्वादशसंपुटम्।
संविन्यस्य विधानेन नभोमन्त्रेण संपुटम्।
डादिफान्तं प्रविन्यस्य कादिलान्तं मूलिंगके।
मूलाधारे मूलमन्त्रपुटितं वादिशान्तकम्।
विन्यस्य व्यापकन्यासं कृत्वांगानि निवन्ययेत्।
ततः प्राणायाममेकं कृत्वा प्रणाममाश्रयेत्।
ततस्तोत्रं पठेद्धीमान् ततसर्वं शृणु शंकर।
हविष्याशी वशीभूत्वा साधयेदिह सिद्धये॥०
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्र-

कवचे षट्चक्रप्रकाशे भैरवी भैरवसंवादे काकिनीसिद्धि-
साधनं नामाष्टपंचाशतपटल:॥५८।

आनन्दभैरव्युवाच

ज्ञानेश्वरी शुभकरी परिभावनीया
योगेश्वरैर्हरिहरैर्गुरुभिर्महेन्द्रैः
तां काकिनी जननीं परमेशपत्नीं
संस्तौमि चारुहृदयाम्बुजपीठमध्ये ॥१॥
एकाकिनीं निजगतां मतिनाशकाले
तां लाकिनीं समरवारणकालपत्नीम्।
त्वं साक्षिणी भुवनभंगविधौतु कान्ते
काकमहिषीं वरदां भजामि॥२॥
भूय
एकाकिनीं सकलधारणकालयोगे
अधार्यदेहसमये सति काकिनीं त्वाम्।
वाय्वासने मनस आशुविकारनाशे
काकेन्द्रचंचुलचलितामहमेव मीडे॥३॥
भावोदये प्रणायिनीं भवदुर्गतौच
आह्लादयोगविभवे भुवनेश्वरीं ताम्।
मन्दारहारकविरे परमेश्वरीत्वं
रक्तां कुकप्रथमभास्करमाश्रयामि॥४॥

चन्द्रोदये सुखमयी द्युतिकोटिदीप्ता
गीर्व्यागमे सुमतिभिः सुमनांसि शुद्धाः ।
सा त्वं सुखानुभवभावविपूजनीये
मातां कुरु प्रथमभास्करमंघ्रिमीडे ॥ ५ ॥
ते पादपंकजमजस्रमहं भजामि
आनन्दविन्दुविमलासनभावपुंजे ।
यज्ञावती विमलमाल्यसुशोभितांगे
श्यामेऽवतात्वरममावसमूहदात्री ॥ ६ ॥
पंचानने दशभुजे कमलास्त्रयुक्ते
विद्येऽभये भयहरे नवहारभूषे ।
प्रेतासने त्रिनयने जननी त्वमेव
वन्देऽहं ते चरणपंकजमाश्रयामि ॥ ७ ॥
श्रीसुन्दरि प्रभातरश्मिशिरो देवमातः
तारेश्वरी त्वमपि मन्त्रविनाशकाले ।
यद्येकभक्त इतिहासपुराणवक्ता
नित्यानुरक्तो [illegible]हह पादसरोजमीडे ॥ ८
ते श्रीपदं भुवनसारमनन्तसेव्यं
योगास्पदं कतिभिमाश्रयमेकयोगम्
सर्वे भजन्ति निजमोक्षफलाय नित्यं

दीनोऽहमम्ब भुवनेषि मुदाश्रयामि ॥९॥

त्रैलोक्यपूजितपदे हृदयाम्बुजस्थं
चित्तप्रकाशकमशेषसुखानुभूतम्।
मायाश्रयं सकलसिद्धिनिदानरूपं
मञ्जीरहारनिरतं वरमाश्रयामि ॥१०॥

कोटीरहारकमलप्रियमाल्यशोभे
शोभाकरे स्थिरतरा भव मे हृदब्जे।
भूमण्डले हि बलवान् कृतकृत्य एव
त्वामीश्वरीं हृदि मुदा सुखमाश्रयामि ॥११॥

नित्ये पुरा भजति योगसुसिद्धयेऽसौ
शम्भुर्गिरीश इति चेश्वरपार्श्वगामी।
सायुज्यनाथपदवीं गत ईशकान्ते
एकाकिनीं कुललताङ्घ्रियुगं किमन्यैः ॥१२॥

ध्यायन्ति योगिन इहाद्यसमूहशैल-
संहारहेतु
वित्तोत्सवाय विभवाय जयाय भूमे
दीनोऽहमाशु विभजामि पदं श्रियस्ते ॥१३॥

कर्णोस्थिते विमलपीततनिभे सुरक्ते

वर्णाश्रमे त्वम भगवत् दीनमेकम् ।
पुत्रं तवैव चरणाम्बुजसेवकं तं
नीलाम्बुजे स्थिततरं कुरु कामदात्री ॥ १४

सर्वेश्वरी प्रियकरी भवभावहन्त्री
नानाध्वनि प्रणतकामदुघे विचित्रे ।
रत्नाम्बरे सुखपदे यदि देहि दास्यं
त्वं चारुवर्णगलिते पदमाश्रयामि ॥ १५

615

रत्नाकरे सकरुणेऽरुणकोटिवर्णे
स्वर्णादिनिर्मितस्रजा परिशोभितांगी ।
त्वं काकिनी यदि कटाक्षनिपातमेकं
सर्वं कुरुष्व खलु मोक्षपदानुमोदी ॥ १६

आद्यप्रवालविमलेऽमलमाल्यशोभे
सूक्ष्मेऽतिसूक्ष्मनिकरे करुणानिधाने ।
बालेऽबले प्रचपले चमले प्रलापे
योगेशि पादकमलं कुलमाश्रयामि ॥ १७ ॥

श्रीषोडशी स्वरतरा स्वरखड्गहस्ते
स्वरेश्वरि प्रखरवाक्यमुखाद्यवक्त्रे ।
स्वर्णोरहारुचिरे स्वलहान्ति तुभ्यं
नित्यं नमो नम उपेन्द्रगिरीन्द्रसेव्ये ॥ १८ ॥

गीतागते गुरुरते गुरुनाशिनी त्वं
गात्रेश्वरी गतिहरे गणनाथसेव्ये ।
गायन्ति ते चरणपंकजसारगीतं
भक्तप्रचण्डकलुषादनुपेक्षणीयम् ॥ १९

दीर्घस्वरे घनरवे घनघोरनादे
घोराननेनवघने पटले घटानां ।
घोरास्पदे घटगते घटशून्यकर्त्री
त्वं काकिनी भगवतु क्षितिदोषजालात् ॥२०॥

श्रानुस्वरे स्वरहरे तनुरूपविद्ये ।
संयोगिनि प्रबलशत्रुविनाशभूते ।
रक्षेति रक्षकरणां कुरु देहि मोक्षं
चरणं भजे ते ॥ २१
चण्डिप्रचण्डनयने

छत्रप्रदे छलहरे छदवासिनी त्वं
छन्नाङ्किते हृदयपंकजछद्मयोगे ।
त्वां पूजये जयधरे यदुनाथजन्ये
जाये जयं यदि विदेहि पदं भजामि ॥ २२

झंझे झलन झलदितीह रिपुं पिबन्ती
त्वं कौशिकी सकलदेहविशोधिनी त्वं ।
नित्येऽनुनासिककरे सकलार्थदे त्वं

वर्णाश्रमे त्वमभयावतु दीनमेकम् ।
पुत्रं तवैव चरणाम्बुजसेवकं तं
नीलाम्बुजे स्थिततरं कुरु कामदात्री ॥१४
सर्वेश्वरी प्रियकरी भवभारहन्त्री
नानाध्वनिप्रणतकामदुघे विचित्रे ।
रत्नाम्बरे सुखपदे यदि देहि दास्यं
त्वं चारुवर्णगलिते पदमाश्रयामि ॥१५
रत्नाकरे सकरुणेऽरुणकोटिवर्णे
स्वर्णादिनिर्म्मितस्रजा परिशोभितांगी ।
त्वं काकिनी यदि कटाक्षनिपातमेकं
सर्वं कुरुष्व खलु मोक्षपदानुमोदी ॥१६
आद्यप्रवालविमलेऽमलमाल्यशोभे
सूक्ष्मेऽतिसूक्ष्मनिकरे करुणानिधाने ।
बालेऽबले प्रचपले चमले प्रलापे
योगेशि पादकमलं कुलमाश्रयामि ॥१७॥
श्रीषोडशी स्वरतरा खरखड्गहस्ते
खण्डेश्वरि प्रखरवाक्यमुखाब्जवक्त्रे ।
खर्जूरहाररुचिरे खलहन्त्रि तुभ्यं
नित्यं नमो नमउपेन्द्रगिरीन्द्रसेव्ये ॥१८॥

615

गीतागते गुरुवते गुरुनाशिनी त्वं
गात्रेश्वरी गतिहरे गणनाथसेव्ये।
गायन्ति ते चरणपंकजसारगीतं
रक्ष प्रचण्डकलुषादनुपेक्षणीयम्॥ १९
दीर्घस्वरे घनरवे घनघोरनादे
घोराननेनवघने पटले घटानां।
घोरास्पदे घटगते घटशून्यकर्त्री
त्वं काकिनी समवतु क्षितिदोषजालात्॥२०॥
ङानुस्वरे स्वरहरे तनुरूपविघ्ने।
संयोगिनि प्रबलशत्रुविनाशभूते।
रक्षेति रक्षकगणां कुरुदेहि मोक्षं
चण्डप्रचण्डनयने चरणं भजे ते॥२१
छत्रप्रदे छलहरे छदवासिनी त्वं
छन्नाक्षिते हृदयपंकजछद्मयोगे।
त्वां पूजये जयधरे यदुनाथजन्ये
जाये जयं यदि विदेहि पदं भजामि॥२२
झंझे झलन झलदितीह रिपुं पिबन्ती
त्वं कौशिकी सकलदेहविशोधिनी त्वं।
नित्येऽनुनासिककरे सकलार्थदे त्वं

रक्षां कुरुष्व विपदे कुलपुञ्ज गुंजे ॥ २३

टंकारगेऽहहमनेऽटलनेऽट्टहासे

ठकारिणी शठतया परिनिस्थितात्वम ।

सिंहस्थ पृष्ठ निलये स्थिरयोगभावम

हृतपंकजे कुरु सदा सकलार्थदात्रि ॥ २४

एतत स्तोत्रं पठेद्विद्वान ध्यानन्यासपरायणः ।

विभाव्य स्तौति योगीशः सयोगी मोक्षभाग्भवेत ।

हृतपंकेरुह मध्यस्थं सपश्यति जगत्त्रयम ।

अष्टसिद्धियुतः शीघ्रं जीवन्मुक्तो भवेन्नरः ॥

इतिश्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षटचक्रप्रकाशे भैरवीभैरवसंवादे काकिनीस्तोत्रविन्यासो नाम नवपंचाशत पटलः ।५९।

श्रीआनन्दभैरव उवाच

वदकान्ते परमानन्दे रहस्यं कुलसुन्दरि ।

यस्य विज्ञानमात्रेण भवेद्गंगाधरो हरः ॥

ईश्वरस्य स्तवं ब्रह्म परं निर्वाणसाधनम ।

शोभाकोटियोगिनपते र्योगेन्द्रस्य परापतेः ।

ईश्वरं केन मानान्ति ब्रह्मविष्णुशिवादयः ।

तस्य स्मरणमात्रेण महावाग्मी च मृत्युजित्।
स श्रीवेदान्तसिद्धान्तं तं भजन्ति महर्षयः।
देवा मनुष्या गन्धर्व्वास्तं भजन्ति महेश्वरम्।
अकालमृत्युहरणं सर्व्वदा सर्व्वतोमुखम्।
सदा तस्य स्तवं दिव्यं श्रोतुमिच्छामि शंकरि।

आनन्दभैरव उवाच

कौल त्वं शृणु शंकरप्रियकरं स्तोत्रं तदीशस्य च
श्रीनाथाय नमः कुलेश परम प्राणेश तुभ्यं मुदा।
आनन्दाय नमो भवाय पतये लोकेश्वराय श्रीं नमः
भूतेशाय गणाधिपाय पतये श्रीशूलिने ते नमः॥ १
कान्ताय प्रभवाय योगपतये योगेश्वराय श्रीं नमः
मंकाराय कवीश्वराय महते नित्याय नित्यं नमः।
स्वाधिष्ठानविभेदकाय हरये मूलाब्जसंभेदिने।
स्वाधिष्ठानविभेदकाय हरये मूलाब्जसंभेदिने।
नाभेरम्बुजभेदिने हृदयपद्मोद्भेकायैं नमः॥ २।
नाभेरम्बुजभेदिने हृदयपद्मोद्भेकायैं नमः॥ २।
कान्ताय प्रबलाय मारवपिने नित्यं नमो भास्वते
कान्ताय प्रबलाय मारवपिने नित्यं नमो भास्वते
मोदाय प्रमथेश्वराय कवये खट्वाङ्गहस्ताय ते।
मोदाय प्रमथेश्वराय कवये खट्वाङ्गहस्ताय ते।
भक्तिश्रीनिधये महेन्द्रखचरामायाश्रयायैं नमः।
भक्तिश्रीनिधये महेन्द्रखचरामायाश्रयायैं नमः।
विज्ञानाय शिवाय सूक्ष्मगतये गूढाय मूर्त्यै नमः॥ ३।
विज्ञानाय शिवाय सूक्ष्मगतये गूढाय मूर्त्यै नमः॥ ३।
सर्व्वज्ञाय जयाय भूतपतये भूतेश्वराय प्रभो

पंचास्याय हराय देवपतये गौरीश्वराय श्रिये ।
भोगायान्तरगामिने हरिहरायानन्दविद्रूपिणे
कल्याणाय भगाय शुद्धमतिभिर्नित्यं नमस्ते नमः ॥ ४
गोविन्दप्रियवल्लभाय विधये ब्रह्मादिकोत्पत्तये
उत्पत्तिस्थितिसंहृतिप्रकृतये वाह्याय विश्वेश्वर ।
तुभ्यं काल नमो नमः प्रलयप्रोगोल्लासिने भूभृते
विख्याताय गिरीन्द्रपूजितविभो भूताधिपायानिशम् ॥ ५ ॥
गौरीशाय गणार्च्चिताय मनवे मान्याय भूवासिने
भूतीतसाह महीशनाथ शशिचूडाय प्रधानायते ।
नित्यं नित्यपलाकुलाय फणिचूडाय प्रबुद्धाय ते
तेजःशान्तिपते सतां मतिमते निर्व्वासमे ते नमः ॥ ६ ॥
शोभाकोटियुताय चन्द्रकिरणाह्लादाय शुद्धाय ते
तुभ्यं नाथ नमो नमः प्रणमतामानन्दसिन्धूत्सव ।
हेरम्बाश्रयकार्तिकेशजनकानन्दप्रियाय प्रभो
पित्रे सर्व्वमुखाय सर्व्वपतये श्रीनीलकण्ठेश्वर ॥ ७
त्रिब्रह्मार्पितभूतये सुरतये श्रीभास्वते योगिना-
मानन्दोदयकारिणे कुलपते ते नाथ तुभ्यं नमः ।
ब्रह्मानन्दकुलाय रौप्यगिरये सौन्दर्य्यसंसिद्धये
सर्व्वानन्दकराय संपरतमामाद्याय सत्यं नमः ॥ ८

619

काशीशं कौशिकीशं स्वरतरकिरणं कारणाख्यं सुखाख्यं
गौरीशं गं गिरीशं गुरु श्रीणिलिङ्गं गरं गं।
घोराख्यं मञ्जुघोषं घनगणघटितं घोरसंघट्टनादं
चार्वीशं वायनेशं घनहृदि घटया भीम्यं घोटकेशम्॥९॥
नन्दीभ त्वं विशालो वसति तव करे स्थावरो जंगमो वा
भूताध्यक्षोऽवशिष्टः स्वपरिजनकुले सर्व्वदा पाहि शंभो।
भक्तिज्ञानं न दातुं चपलमतिजने लेखयासं विलोला
लोकातीतोऽकलङ्की विधुशतमुकुटः श्रीपदाम्भोरुहान्ते॥१०
धूर्त्तः शौरिः प्रशान्तो विमलमधुरसामोदमानोऽप्रमत्तो
मायामोहापदेकासुरमदद्रवनो दानसम्मानदाता।
त्वं नाथ श्रीपदाम्भोरुहविमलतनो ते कथं नाथ वक्षः
पूर्व्वास्यो दक्षिणास्यो धनपतिवदनः पश्चिमास्यो मुनिस्त्वम्॥११
भेदी सिद्धान्तविद्याधरनिधिकरणः कारणोऽनन्तशक्तिः
यं साक्षात कामधेनुः स च धनपतिपः सर्व्वभोगानुरागी।
पादाम्भोजे हि नित्यं सरसगिरिसुतानाथते योगिपल्लम्
चित्तं मे चंचलाख्यं शशिधरककरशो वाकपते योगसिद्धौ॥१२
कपर्दी श्रीखड्गासिवरगदया भेदभुजगी विजयः।
घनच्छायाशंकोऽचरचरचरणा
जयी जेता जातेर्जयमनुकरोतु प्रियतनो

ज्वलज्ज्वालो वातेन्नगाधर इह क्रोध इति मे ॥ १३
मुद्राज्ञाचक्रान्तर्गतविवरमाच्छन्नजटिलः
प्रतिज्ञाभंगस्थः कटकशतकोटिप्रकटितः।
कुठारास्त्रक्रोधी कमठकटवासी कठिनहा
ककाबाद्यैर्वैरी छिदशकरमालोऽवतु सदा ॥ १४
सुधारवण्डाहुत्यास्तवनपठनेनप्रियकरं
पदाम्भोजं वेत्ति प्रचयति सुभाग्यं कुलपतेः।
प्रधानो भूखण्डे जयति यदि मृत्युंजयपदं
विनोदं भूयोगं पठति सहसाप्रेमतरलः ॥ १५
यद्येवं प्रपठेदिदन्तु नियतं कौलावलीसंमतम्
स्तोत्रंनाम रहस्यकं भववरानन्दैकचित्तस्थलम्।
योगेन्द्रावगतित्वयुक्तफलदं सर्वेश्वरत्वप्रदं
चन्द्रादित्यसमागते परपदाह्लादैकमात्रंलभेत् ॥ १६
ते शम्भो यदि पादाम्भोरुहमंगलवल्लिका।
पूज्यते योगिभिर्नित्यं निर्व्वाणगुणसिद्धये।
अन्यैर्विचारकोटीभिः किमन्यत् सप्रयोजनम्।
किं न सिध्यति भ्रूमध्ये शिवशक्तिप्रसादतः ॥ ०॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने
सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवा-

621

-दे अनाहतपद्मेश्वरस्तवनं नाम षष्टितमः पटलः ॥६०॥

आनन्दभैरव उवाच

वद कल्याणि कामेशि त्रैलोक्यपरिपूजिते।
ब्रह्माण्डानन्तनिलये कैलासशिखरोज्वले।
कालिके कालरात्रिस्थे महाकालनिषेविते।
शब्दब्रह्मस्वरूपे त्वं वक्तुमर्हसि सादरात्।
सहस्रनाम योगाख्यमष्टोत्तरमनन्त
अनन्तकोटिब्रह्माण्डसारं परममंगलम्।
ज्ञानसिद्धिकरं साक्षादत्यन्तानन्दवर्द्धनम्।
संकेतशब्दमोक्षार्थं काकिनीश्वरसंयुतम्।
परानन्दकरं ब्रह्म निर्व्वाणपदलालितं।
स्नेहादतिसुखानन्दाद्दो श्रोतुं वरानने।
इच्छामि सर्व्वदा मातः जगतां सुरसुन्दरि।
स्नेहानन्दरसोद्रेकसंवन्धात कथय द्रुतम्।

आनन्दभैरव्युवाच

ईश्वर श्रीनीलकण्ठ नागमालाविभूषित।
नागेन्द्रचित्तमालाढ्य नागादि परमेश्वर।
काकिनीश्वरयोगाढ्यं सहस्रनाममंगलम्।

अष्टोत्तरं विभाकारं कोटिसौदामनीप्रभम्।
आयुरारोग्यजननं शृणुष्वावहितो मम।
अनन्तकोटिब्रह्माण्डसारं नित्यं परात्परम्।
साधनं ब्रह्मणो ज्ञानं योगिनां योगसाधनम्।
सर्व्वज्ञगुह्यसंस्कारसंसारादिफलप्रदम्।
वाञ्छासिद्धिकरं साक्षात महापातकनाशनम्।
महादारिद्र्यशमनं महैश्वर्य्यप्रदायकम्।
पठेद्यः प्रातरि प्रीतो मध्याह्नेऽस्तमिते रवौ।
नमस्कृत्य जपेन्नाम ध्यानयोगपरायणः।
काकिनीश्वरसंयोगं ध्यानं ध्यानगुणोदयम्।
आदौ ध्यानं समाचर्य्य निर्म्मलोऽमलचेतसा।
ध्यायेद्देवीं महाकालीं काकिनीकालरूपिणीम्।
परानन्दरसोन्मत्तां श्यामां कामदुघां पराम्।
चतुर्भुजां खड्गचर्म्मवरपद्मधरां हराम्।
शत्रुक्षयकरीं रत्नालंकारकोटिमण्डिताम्।
तरुणानन्दरसिकां पीतवस्त्रां मनोरमाम्।
केयूरहारललितां ताडङ्गद्वयभूषिताम्।
ईश्वरीं कामरत्नाख्यां काकचञ्चुपुटाननाम्।
सुन्दरीं वनमालाढ्यां चारुसिंहासनस्थिताम्।

623

हृत्पद्मकर्णिकामध्ये कोटिसौदामनीप्रभाम्।
एवं ध्यात्वा पठेन्नाम मंगलानि पुनः पुनः।
ईश्वरं कोटिसूर्याभं ध्यायेत हृत्कमले परम्।
चतुर्भुजं वीररूपं लावण्यभावसंभवम्।
श्यामं हिरण्यभूषांगं चन्द्रकोटिसुशीतलम्।
अभयं वरदं पद्मं महाखड्गधरं विभुम्।
किरीटिनं महाकायं स्मितहास्यप्रकाशकम्।
हृदयाम्बुजमध्यस्थं नूपुरैकपशोभितम्।
कोटिकालानलं दीप्तं काकिनीदक्षिणास्थितम्।
एवं विचिन्त्य मनसा योगिनं परमेश्वरम्।
ततः पठेत सहस्राख्यं वदामि तत् शृणु प्रभो।

अस्य श्रीकाकिनीश्वरसहस्रनामस्तोत्रस्य ब्रह्मा ऋषिर्गायत्री छन्दो जगदीश्वरकाकिनी देवता निर्वाणयोगार्थसिद्ध्यर्थे विनियोगः॥ ओं

ईशानः परमेश्वरी।
त्वमीश्वरः काकिनीशा
ईश्वरीशः कुलेश्वरी।
ईशा [illegible] कामश्वेरी शानी
सुकपार्दिनी।
ईशो मोक्षः कामधेनुः कपर्दी
काव्यप्रकाशिनी।
कौलः कुलीनान्तरगा कविः
करुणामयी।
कलादेशः सुकविता कारणः

कंचुपत्रेक्षणः काली कालः कौलाधनीश्वरी।
किरातरूपी कैवल्या केवलः कमलासना।
कर्णाटेशः सुकर्णाटी कालिपः कलिकास्फुटा।
कौशोरः कौसलासिता केशवेशः कुलेश्वरी।
केशकिंजल्कजटिलः कामराजकुतूहला।
करकोटिधरः कूटा क्रियाक्रूरः क्रियावती।
कष्टहा कुष्ठहन्त्रीच कटकस्थः कुलावती।
कंचुवक्त्रः कालमुखी कोटिसूर्य्यः कराननना।
कम्रकल्पः समृद्धिस्था कल्यान्तस्थः कुलाचला।
कुलपः कौलपा काशा सुकान्तः कान्तिवासिनी।
सुकृतिः शांकरी विद्या कलनः कलनाश्रया।
कर्कन्दुस्थः कौलकान्ता कुलीनः कौलिकाकुला
कुमारः केशरी विद्या कामहा कुलपण्डिता।
कल्पेशः कमनीयांगी कुशलः कुशलावती।
केतकीपुष्पमालाढ्यः केतकीकुसुमान्विता।
कुसुमानन्दमालाढ्यः कुसुमामलमालिका।
कवीन्द्रः काव्यसंभूता कलमञ्जीररञ्जिनी।
कुशासनस्थः कौशल्या कुलपः कल्पपादपः।
कल्पवृक्षः कल्पलता विकल्पः कल्पगामिनी।

कठोरस्थः काकनिभा कवलः कालवासिनी।
कालकूटाश्रयानन्दः कर्कशा शाकवाहिनी। काश
कटधूमाकृतिश्छाया विकटासनसंस्थिता।
कायाधारी कूपकरी कवरीरतिगः कृशा। १००
कलगम्भीरनादन्तो विकलालापमानसा।
प्रकृतीशः सतप्रकृतिः प्रकृष्टकविराशीश्वरी।
भगवान वारुणीवर्णो विवर्णोवर्णरूपिणी।
सुवर्णवर्णो हेमाभा माता महेन्द्रपूजिता।
महात्मा महतीशानी महेशो मत्तगामिनी।
महावीरो महावेगा महालक्ष्मीश्वरो मतिः।
महादेवो महादेवी महानन्दो महाकला।
महाकालो महाकाली महावालो महावला।
महामान्यो महामाया महाधन्यो महाधनी।
महामानो महामाला महाकाशो महाकशा।
महायागो महायज्ञा महाराजो महारजा।
महाविद्यो महाविद्या महामोदो महामखी।
महारात्रो महामात्रि महाधीरो महायशाः।
महाक्षेत्रो महाक्षेत्रा कुरुक्षेत्रः कुरुप्रियः।
महाचरणो महोग्राच महामतो महामतिः।

महावेशो महावेदा महोत्साहो महोत्सवा।
महाकल्पो महाकल्पा महायोगी महागतिः।
महाभद्रो महाभद्रा महामूर्द्धो महाचला।
महावाक्यो महावाणी महायज्ञा महाज्वरा।
महाभूतिर्महाकान्ता महाधर्म्मी महारसा।
महामहोग्रो महिषी महाभाग्यो महाप्रभा।
महाक्षेमो महानाया महामायो महाबला।
महेन्द्रपूजितो माता विभाण्डो मण्डलेश्वरी।
महाविकालो विकला प्रणतस्य स्तलातला।
कैवल्यदाता कैवल्या कौतुकस्थो विकर्षिणी।
बालापतिर्बालपत्नी वलरामो बलांगना।
अवलेशः कालवीरा प्राणेशः प्राणरक्षिणी।
पंचमाचारगः पंचापंचमः पंचमीश्वरी। २००
प्रपंचपंचरमणा निष्प्रपंचः कृपामयी।
कामरूपी कामरूपा कामः क्रोधविवर्जिता।
कामात्मा कामनिलया कामाख्यः कामचंचला।
कामपुष्पाधरोऽमाला कामा कामेशः कामपुष्पिनी।
महामुद्राधरो मुद्रा समुद्रः काममुद्रिका।
चन्द्रार्द्धकृतभालाभो विद्युत्कोटिमुखाम्बुजा।

चन्द्रकोटिप्रभाधारी चन्द्रज्योतिःस्वरूपिणी।
सूर्य्याभो वीरकिरणा सूर्य्यकोटिनिभो विभा।
मिहिरेशो मानकान्तिर्वन्तगामी निराश्रया।
प्रजापतीशः श्रीकन्या दक्षिणः कुलरोहिणी।
सुप्रचेताः प्रचेतस्या व्यासेशो व्यासपूजिता।
काश्यपेशः काश्यपेशी भृगुपो भार्गवेश्वरी।
विशिष्टप्रियभावस्थो वशिष्ठाराधिता परा।
पुलस्त्यपूजितो देवः पुलस्त्यचित्तसंस्थिता।
अगस्त्याचोऽगस्त्यमाता प्रह्लादेशो वलीश्वरी।
कर्द्दमेशः कर्द्दमाद्या बालको बालपूजिता।
मनःस्थश्चान्तरीक्षस्था शाद्ज्ञानी सरस्वती।
रूपातीतो रूपशून्या विरूपो रूपमोहिनी।
विद्याधरेशो विद्येशी वृषस्थो वृषवाहना।
रसज्ञो रसिकानन्दा विरसो रसवर्जिता।
मौनः सनतकुमारेशी योगाचार्य्येश्वरप्रिया।
दुर्व्वासाः प्राणनिलयः सांख्ययोगसमुद्भवा।
असंख्येयो मांसभक्षा सुमांसाशी मनोरमा।
नरमांसविभोक्ता च नरमांसविनोदिनी।
मीनरक्तप्रियो मीना मीनभुक् मीनादिशी।

रोहिताशी मत्स्यगन्धा मत्स्यनाथो क्षमापहा।
पार्व्वती प्राणनिकरो विधिदेवाधिपूजिता।
विधात्ववरदो वेद्या वेदो वेदो यमा रमा।
श्यामेशोऽसितवर्णा च चासितोऽसितरूपिणी।
महामत्तासवाशी च महामत्तासवप्रिया।
आसवाद्योऽमलादेवी निर्म्मलासवपोऽमरा।
विवत्तो मदिरामत्ता मत्तकुञ्जरगामिनी।
मणिमालाधरो माला मालके पः प्रसन्नधीः।
जरामृत्युहरो गौरी गायनस्थोऽजरामरा।
सुचंचलोऽतिदुर्धर्षा कराठस्थो हृदगता सती।
अशोकः शोकरहिता मन्दरस्थोऽतिमन्त्रिणी।
मन्त्रमालाधरानन्दो मन्त्रयन्त्रप्रकाशिनी।
मन्त्रार्थचैतन्यकरो मन्त्रसिद्धिप्रकाशिनी।
मन्त्रज्ञो मन्त्रनिलया मन्त्रार्थो मन्त्र
सुमन्त्रो मन्त्रजालस्था मन्त्रमालोऽतिसिद्धिदा।
मन्त्रवेत्ता मन्त्रसिद्धिर्मन्त्रस्थो मान्त्रिकान्तरा।
वीजस्वरूपो वीजेशी वीजमालोऽतिवीजिका।
वीजात्मा वीजनिलया वीजगो वीजमालिनी।
वीजध्यानो वीजयज्ञा वीजाद्यो वीजसुन्दरी।

वीजतातो वीजमाता वीजज्ञो वीजशालिनी।
महावीजधरो वीजा वीजाद्यो वीजवल्लभा।
मेघमालो मेघमाला वनमाली हलायुधा।
कृष्णाजिनधरो रौद्रा रुद्रो रुद्रगणाश्रया।
रौद्राश्रयो रौद्रकर्त्री रुद्रालोकप्रदप्रभा।
विलासी पर्व्वगानांच सर्व्वाणी सर्व्वसम्पदाम्।
नादेशः प्रधानेशी रावणो रावणेश्वरी।
कर्णेश्वरः केशवेशी कर्णावर्णोऽतिचंचला।
रामेश्वरो राघवेशी वाणेशो वाणपूजिता।
भवानीशो भवानी च भवेन्द्रो भववल्लभा।
भवानन्दोऽतिसूक्ष्माख्या भवभूतिर्भवेश्वरी। ४००
भवच्छायो भवानन्दा भवभीतिहरो वला।
भवाज्ञानी भावमाला महाजिह्वोऽतिवासना।
लोभापहा लोभकर्त्री प्रलोभो लोभवर्द्धिनी।
मोहातीतो मोहमाता मोहजालोऽमलावती।
मोहमुद्गरधारी च मोहमुद्गरधारिणी।
मोहान्वितो महामुग्धा कामेशः कामिनीश्वरी।
कामलोपकरोऽकामा सतकामोऽकामनाशिनी।
हंसमुखो हंसनेत्रा पद्माभोऽम्बुजलोचना।

पद्ममालः पद्ममाला श्रीदेवो देवरञ्जिणी।
असितोऽप्यसिता चैव आह्लादो नागमालका।
नागेश्वरः शैलमाता नगेन्द्रेन्द्रो नगांगजा।
नारायणेश्वरः कीर्त्तिः सतकीर्त्तिः कीर्त्तिवर्द्धिनी।
कार्त्तिकेयः कार्त्तिकी च विकर्त्ता महनाश्रया।
विरक्तो गरुडारूढा गरुडस्थोऽहि गारुडी।
गरुडेशी गरुमयी गुरुदेवो गुरुप्रदा।
गौरांगेशो गौरकन्या गंगेशः प्रांगनेश्वरी।
प्रतिष्ठेशो विशालाच निरालोको निरिन्द्रिया।
प्रेतवीजस्वरूपश्च प्रेतालंकारभूषिता।
प्रेमगोऽप्रेमहल्ली च हामिन्द्रो हवलत्तरणा।
कालेशः कलिकेशानी कौलिकेशश्च कामिनी।
कलमञ्जीरधारी च कलमंजीरमोहिनी।
करालवदनः काली कैवल्यादानदः कथा।
कमलापालकः कुन्ती कैकेयीशः सुतः कला।
कालानलः कुलज्ञा च कुलगामी कुलाश्रया।
कुलधर्म्मास्थितः कौला कुलमार्गः क्रियान्तरा। ५००
कुलजिह्वो कुलानन्दा कण्ठाः कण्ठातनूद्भवा।
कण्ठेशः कण्ठमाहिषी काकस्थः काकचंचुका।

631

कालधर्म्मः कालरूपा कालः कालप्रकाशिनी।
कालज्ञः कालकन्या कालेशः कालसुन्दरी।
खड्गहस्ता खर्परस्था खगगः खड्गखाङ्गिनी।
खलवुद्धिहरः खेला खंजनेशः सुखाङ्गिनी।
गीताप्रियो गायनस्था गणपालो गुहाश्रया।
गर्गप्रियो गयाप्राप्तिर्गगस्थोऽहि गतीरिणी।
गारुडेशोऽहि गंधर्व्वी गतीशो गर्हवाङ्गिजा।
गणगन्धर्व्वगोपालो गणगन्धर्व्वगो गता।
गभीरनादसंभेदो गभीरकोटिसागरा।
गतिस्थो गाणपत्यस्था गगनाद्यो गिरांतनुः।
गन्धद्वारो गन्धमाला गन्धाढ्यो गन्धनिर्गमा।
गन्धमोहितसर्व्वांगो गन्धचंचलमोहिनी।
गन्धपुष्पधूपदीपनैवेद्यादिप्रपूजितः।
गन्धागुरुसुकस्तूरीकुंकुमाक्ता विमण्डिता।
गोकुलामधुरानन्द पुष्पगन्धध्यानरतस्थितः।
गन्धमादनसंभूतपुष्पमाल्यान्तरास्थिता।
रत्नाद्यशेषालंकारमालामण्डितविग्रहः।
स्वर्णाद्यशेषालंकारहारमालाविमण्डिता।
कवरीवायुतप्रख्या रक्तलोचनपंकजः।

जवाकोटिकोटिशतचारुपंकजलोचना।
घनकोटिसमानास्यपंकजालोलविग्रहः।
घर्घरध्वनिसानन्दकाव्याम्बुधिमुखाम्बुजा।
घोरचित्रसर्पराजमालाकोटिशतांगभृत।
घनघोरमहानादगचित्रमालाविभूषिता।
घण्टाकोटिमहानादसानन्दलोलविग्रहः।
घण्टाडमरु त्रादिध्वानानन्दकराम्बुजा।
घटकोटिकोटिशतसहस्रसंगतासनः।
घण्टाशंख पद्मचक्रवराभयकराम्बुजा।
घातुकोटिप्रभुकोटीनां कुम्भादीनां तथासताम।
घातिनीदैत्यघोराद्यसंघानां हसतां तथा।
चार्वाकशतसंघातचतुराननपंकजः।
चंचलाननसर्व्वार्थसर्व्वे वाग्वादिनीश्वरी।
चन्द्रकोटिसुनिर्म्माणमालालक्षितकराभृत।
चन्द्रकोटिसमानास्यपंकेरुहमनोहरा।
चन्द्रज्योत्स्नायुतप्रख्यहारभूषितमस्तकः।
चन्द्रबिम्बसहस्राभायुतभूषितमस्तका।
चारुचन्द्रकान्तमणिमालहारयुतांगभृत।
चन्दनागुरुकस्तूरीकुंकुमासक्तमालिनी।

633

चण्डमुण्ड महामुण्ड युत निर्व्वाणमाल्यभृत।

चण्डमुण्ड घोरमुण्ड निर्वाणकुल मालिनी।

चण्डाट्टहार घोराढ्यवदनाम्भोज चंचला।

चलत खंजन नेत्राम्भोरुह मोहित शंकरा।

चलदम्भोजनयनानन्द पुष्करमोहितः।

चलच्चन्द्रभासमान विग्रह स्वेदचान्द्रिका।

चन्द्रार्द्ध कोटि किरण चूड़ामण्डलमण्डितः।

चन्द्रचूड़ाम्भोजमाला प्रोत्त मांग विमण्डिता।

चलदर्कसहस्राभा ब्लहारविभूषितः।

चलर्ककोटि प्रात मुखाम्भोज भयापहा।

चारुबलासनाम्भोज कर्णिका मध्य संस्थितः।

चारुद्वादश पत्रादि कर्णिका सुप्रकाशिका।

चमत्कार गटंकार धनुर्व्वाण कराम्बुजः।

चतुर्व्वेदगाथकादि स्तुति कोटि सुसिद्धिदा।

चलदम्बुजनेत्रार्क वह्नि चन्द्रत्रयान्वितः।

चलत सहस्रदपङ्के रुहादि प्रकाशिका।

चमत्काराट्टहासाढ्या स्मित पंकज राजितः।

चमत्कार महाघोर साट्ट टट्टहास शोभिता।

छायासहस्रसंसार शीतलानिल शीतलः।

छुतपद्ममुक्तारागमणिसिंहासनस्थिता ।
छलकोटिदैत्यरागमुण्डमालाविभूषितः ।
छिन्नादिकोटिमंत्रार्थज्ञानचैतन्यकारिणी ।
छिद्रमार्गमहाध्वान्तग्रंथिसंभेदकारकः ।
छुरिकास्त्रादिब्रह्मास्त्रमहास्त्रकोटिधारिणी । ६००
छागमांसादिसंभक्षरसामोदप्रवाहगः ।
छेदनादिमहोग्रास्त्रभुजवामप्रकाशिनी ।
जयाख्यादिमहाशास्त्रज्ञानार्थसुप्रकाशकः ।
जयागणहृदम्भोजबुद्धिज्ञानप्रकाशिनी ।
जनार्दनप्रेमभावमहायनसुखप्रदः ।
जगदीशकुलानन्दसिन्धुपंकजवासिनी ।
जीवनाह्लादजनकः परमानन्दयोगिनाम् ।
जननी योगशास्त्राणां भक्तानां पादपद्मयोः ।
झंझापवननिर्घातमहोल्कापातकारणः ।
झर्झरीधुधुरीवीणावेणुशंखप्रवादिनी ।
झणतकाराद्यसंहारकरदण्डविशालधृक् ।
झल्लरीनायिकाद्यादिकराम्भोजनिषेविता ।
टंकारभावसंहारमहाजगधरानुधृक् ।
टंकासिपाशुपतेषु च कर्मकार्मुकधारिणी ।

टलनानलसंघट्टपट्टाम्बरविभूषितः।
टुणुनि किंकिनीकोटिविचित्राध्वानिगामिनी।
ठंठंठं मनुमूलान्तः सुप्रसन्नप्रबोधकः।
ठंठंठः प्रखराह्लादनादसंवादवादिनी।
ठंठंठः कूर्म्मपृष्ठस्थः कमठाकारभासनः।
ठंठंठंवीजवह्निस्था ह्यलवग्रविभूषिता।
डामरप्रकराह्लादसिद्धविद्याप्रकाशकः।
डिण्डिमध्वानिमधुरवाणीयुङ्मुखपंकजा।
डंडंडः स्वरकल्यादिमारणान्तः प्रकाशकः।
ढक्कारवाढाडमरुताररसप्रखराश्रया।
ढोंढोंढों ढौकढक्केशवह्निजायामनुप्रियः।
ढंढंढंढंढौं ढंढंढः कल्येस्वाहेतिवासिनी।
तारकब्रह्ममन्त्रस्थ श्रीपादपद्मसारकः।
तारिण्यादिमहामन्त्रसिद्धिसर्व्वार्थसिद्धिदा।
तारिण्यादिमहामन्त्रसिद्धसारवित।
तन्त्रमन्त्रमहामन्त्रवेद्याद्यागमसारवित।
तालवेतालदेताल श्रीतालादिसुसिद्धिदा।
तरुकल्पलतापुष्पफलवीजप्रकाशकः।
तिन्तिड़ीतालहिन्तालतुलस्यादिकुलांगजा।
थकारकूटकुन्देन्दुमालामण्डितविग्रहः।

६३७
प० ६२

स्थलस्था प्रस्थपथगा स्थलाक्षित्यन्ता प्राङ्कुरा ।
दरीकुञ्जगृहामाली वनमालादिभूषिता
दारिद्र्यदुःखदलनी कालानलशतोपमा ।
दृशासाहस्ररन्ध्राम्भोरुहशोभितविग्रहः ।
दासाभयवराह्लादमहामोदकवीरधक ।
मदिरादिपंचतत्त्वनिर्वाणज्ञानसाधिनी ।
यजमानक्रियायोगविभोगफलदायकः ।
यशःसहस्रकोटिस्थगुणादा गायनतत्परा ।
रणामध्यस्थकालाग्निक्रोधाधारसुविग्रहः ।
राकिणी लाकिनी शक्तियोगादिकाकिनीकला ।
लक्षणायुतकोटीन्दुललाटतिलकान्वितः ।
लाक्षावन्धूकसिन्दूरवर्णा लावण्यलालिता ।
वातायुतसहस्रांगघूर्णायमानभूधरः ।
विवस्वतप्रेमभक्तिस्था रणाद्वन्द्वमुनिर्म्मला ।
श्रीसीतापतिशुद्धांगव्याप्तेन्द्रनीलसन्निभः ।
शीलनीलाप्लुतानन्दसागरप्रेमभक्तिगा ।
षडपंकेरुहदेवादिसु   काशः प्रबोधनी ।
षडूर्म्मिस्थः षडाधारः प्रसन्नहृदयाम्बुजा ।
श्यामप्रेमकलावद्धसर्व्वांगकुलनायकः ।

637

विषमास्थो विषानन्दविषयाशी विषापहा।
विषयातीतभावस्था विषयानन्दघातिनी।
विषयाच्छादनास्तस्थो विषयाज्ञाननाशिनी।
संसारछेदकच्छाया कमनीय भवान्तरा।
संसारार्थप्रवर्त्तेश्च संसारपारिवर्तिका।
संसारमोहहन्ता च संसारार्णवतारिणी।
संसारघटकः श्रीदा संसारध्वान्तमोहिनी।
पंचतत्वस्वरूपश्च पंचतत्वप्रबोधनी।
पार्थिवः पृथिवीशानी पृथुपूज्यपरायणी।
वरुणेशो वारुणी च करिदेशो जलोद्गमा।
अजस्थो जीवनस्था च जलभुक जलवाहना।
तेजःकान्तः प्रोज्वलस्था तेजोराशिस्तु तेजसी।
तेजोऽस्तै स्थैजसोमाला तेजःकीर्तिः सुरश्मिगाः।
पवनेशश्चानिलस्था परमाला निरान्तरा।
वायुपूरककीरी च वायुकुम्भकवाङ्गिनी।
वायुच्छिद्रकरो वाता वायुर्निर्गम आशुगा।
वायुच्छिद्रकरो वाता वायुनिर्गम आशुगा।
कुम्भकस्थो रेचकस्था पूरकस्थोऽतिपूरणी।
वायाकाशाधाररूपी वायुसंचारकारिणी।
वायुसिद्धिकरी दात्री वायुयोगीनवायुगा।

आकाशपूरको आह्ली आकाशान्तगतः खगा।
आकाशकुम्भकानन्दो गगनाह्लादवर्द्धिनी।
गगनाच्छन्नदेहस्थो गगनाभेदकारिणी।
गगनादिमहासिद्धो गगनग्रंथिभेदिनी।
कालकर्मा महाकाली कालयोगीच कालिका।
कालरुद्रोऽकालहन्त्या कालदेवोऽतिकालगा।
कालब्रह्मस्वरूपश्च कालतत्वार्थरक्षिणी।
दिगम्बरो दिक्पतिस्था दिगम्बरा गताम्बरा।
दिक्पालस्थो दिक्प्रसन्ना दिग्बलो दिक्कुलेश्वरी।
दिगाधारो दिग्धकुला दिग्धरो दिक्पतीश्वरी। ८००
आत्मार्थो व्यापितात्मज्ञा चात्मज्ञानीवचात्मिका।
आत्मीयश्चात्मवीजस्था चान्तरात्मविमोहिनी।
आत्मसन्धानकारीच आत्मानन्दस्वरूपिणी।
आत्मयज्ञो महात्मज्ञा महात्मात्मप्रकाशिनी।
आत्मविकारहन्ताच विद्यात्रयाद्विदेवता।
मनोयोगकरो दुर्गा मनःप्रत्यक्ष ईश्वरी।
मनोभवनिहन्ताच मनोभवविवर्द्धिनी।
मनश्चान्तरीक्षयोगे निराकारगुणोदया।
मनोनिराकारयोगी मनोयोगेन्द्रसाक्षिणी।

639

मनःप्रतिष्ठो मनसा मानप्रेशो मनोगतिः।
नवद्रव्यानिगूढार्थो नवेन्द्रियनिवासिनी।
नवीनगुणकर्माऽदिसाकारः खड्गगामिनी।
अत्युन्मत्ता महाचारी वायवीशो महानिशा।
सर्वपापापहन्त्री च सर्वव्याधिनिवासिनी।
द्वारदेवीश्वरः प्रीतिः प्रलयाग्निः करालिनी।
भूधराङ्गणतातश्च भूधराङ्कधिरप्रदा।
काकावलीशः सर्वेशी काकपुच्छधरो जया।
अजितेशो जितानन्दा वीरभद्रः प्रभावती।
अन्तर्नाड़ीगतप्राणो वैष्णविकगुणोदया।
रत्ननिर्माणभीः कोटिसिंहस्थो रथगामिनी।
कुलकोटीश्वरान्यस्तु वासुदेवनिषेविता।
आधारविरहज्ञानी सर्वाधारस्वरूपिणी।
सर्वज्ञः सर्वविज्ञान मार्कण्डेयेन
विन्ध्येशो विन्ध्यशैलेशी वारणेशप्रकाशिनी।
अनन्तभुजराजेन्द्रोऽनन्तासुरनाशिनी।
आशीर्वदनवरदोऽनुग्रहानुग्रहाक्रिया।
प्रेतासनसमासीनो मेरुकुंजनिवासिनी।
मणिमन्दिरमध्यस्थो मणिपीठनिवासिनी।

सर्व्वग्रहगणः प्रेती विद्याविद्याप्रकाशिनी ।
प्रचण्डनयनानन्दो मञ्जीररवरंजिनी ।
कलमञ्जीरपादाब्जो रणन्मृत्युपरायणा ।
कुलमालाव्यापितांगो कुलेन्द्रकुलपण्डिता ।
वालिकेशो रुद्रचण्डा वालेशः प्राणवालिका ।
कुमारीशः काममाता मन्दिरेशः सुमन्दिरा । ८००
अकालजननीनाथो वित्ताला सुप्रियंकरी ।
वेदाख्यो वेदजननी वैराग्यस्थो विरागगा ।
स्मितहासास्यकमलः स्मितहास्यविमोहिनी ।
दन्तुरेशो दन्तुरा च दन्तीशो दशनप्रभा ।
दिग्दन्तीहि दिग्दशना भक्ष्यभुक्चर्व्वणप्रिया ।
मांसप्रधानभोक्ता च प्रधानमांसमाद्विणी ।
मत्स्यमांसमहामुद्रा रजोरुधिरसुप्रियः ।
सुरामांसमहामीनमुद्रामैथुनसुप्रिया ।
कुलद्रव्यप्रियानन्दो मद्यादिकुलसिद्धिदा ।

प्रसन्नहृदयाम्भोजः प्रसन्नहृदयाम्बुजा ।
प्रसन्नवरदानाढ्यः प्रसन्नवरदायिनी ।
प्रेमभक्तिप्रकाशाढ्यः प्रेमानन्दप्रकाशिनी ।

प्रभाकरफलोदयः परसूक्ष्मपुरप्रिया ।
प्रभातरविराशिजः प्रथमभानुशोभान्विता ।
प्रचण्डरिपुमन्मथः प्रचलितेन्दुदेहप्रभा ।
प्रभापटलपाटलः प्रचयधर्म्मपुञ्जार्च्चिता ॥
सुरेन्द्रगणपूजितः सुरवरेशसंपूजिता ।
नरेन्द्रकुलसेविता नरपतीन्द्रसंसेविता ।
नगेन्द्रगणनायको गणपतीन्द्रदेवाम्बुजा
भवार्णवगतारको जलधिकर्णधारप्रिया ॥
सुरासुरकुलोद्भवः सुरारिपूज्यसिद्धिस्थिता
सुरारिघनघातकः सुरगणेन्द्रसंसिद्धिदा ।
बलिकुलनतत्परः सुरवरादिसिद्धिप्रदा
प्रियांगजकुलार्थदः सुतधनापवर्गप्रदा ॥
शिवश्च शिवकाकिनी हरहराच भीमः सभा ।
क्षितीश इषुरक्षका शमनदर्पहन्तादया ।
गणेश्वर उमावती हृदयपद्मभेदी गतिः
गणेश्वर उमावती हृदयपद्मभेदी गतिः
कृपाकरललाटगः सुसममार्गसंचारिणी ॥
श्मशानतटनिर्घट प्रचटहाटकालंकृता ।
हठात शठमनस्तटस्मरकपाटसंछेदकः ।
स्मरानलविवर्द्धनप्रियवसन्तसह्ययवी

विराजितमुखाम्बुजः कमलमंचसिंहासना ॥
भवो भवपतिप्रभा भवपतिश्च भाव्या बुधैः
क्रियेश्वर इलावती तरुणांगो हिताभारती ।
मुनीन्द्रमुखसिद्धिदः सुरमुनीन्द्रसिद्धायुधी
सुरारिहरदेहगाखिलभुवनाखिलाशक्रिया ॥
द्विकः कनककाकिनीकनककाकतुंगः किला
किलालकमलाकुलः कुलकलाकोमालोऽमला ।
सुभक्तमतिसाधकप्रभृतियोगयोग्योचिता
विवेकगतमानसप्रभुपरादिहस्ताचिता ॥ १०००
त्वमेव कुलनायकः प्रणययोगविद्येश्वरी ।
प्रचण्डगणगो नगा भुवनदर्पहारी हरा ।
चराचरसहस्रगः सकलरूपशक्तिस्थिता
स्वनामग्रहपूरकः स्वगुणनामसंपूरणी ॥ ८
इति ते कथितं नाथ सहस्रनाममंगलम् ।
अत्यद्भुतं परानन्दरससिद्धान्तदायकम् ।
मातृकामन्त्रघटितं सर्वसिद्धान्तसागरम् ।
सिद्धिविद्यामहोल्लासमानन्दगुणसाधनम् ।
दुर्लभं सर्वलोकेषु यामले तत्-प्रकाशितम् ।
तवस्नेहवशान्मोदमोहितानन्दभैरव ।

643

कुत्रापि नापि कथितं स्वसिद्धिहानिशंकया।
भवादियोगसिद्धान्तसिद्धये मुक्तिमुक्तये।
प्रेमाह्लादवसेनैव दुर्लभं तत्प्रकाशितम्।
येन विज्ञानमात्रेण भवेत श्रीभैरवेश्वरः।
एतन्नाम शुभफलं वक्तुं नच समर्थकः।
कोटिवर्षशतेनापि यत्फलं लभते नरः।
तत्फलं योगिनामेकक्षणाल्लभ्यं भवार्णवे।
यः पठेत प्रातरुत्थाय दुर्गग्रहनिवारणात्।
दुष्टासुरभयेनापि महाभयनिवारणात्।
ध्यात्वा नामजपेन्नित्य मध्याह्ने च विशेषतः।
संध्यायां रात्रियोगे च साधयेन्नामधारणम्।
योगाभ्यासे ग्रन्थिभेदे योगज्ञाननिरूपणे।
पठनाद्योगसिद्धिः स्यात ग्रन्थिभेदो दिने दिने।
योगज्ञानप्रसिद्धिः स्याद्योगी स्यादेकचित्ततः।
देहस्यादेववश्याय महामोहप्रशान्तये।
स्तम्भनायारिसैन्यानां प्रत्यहं प्रपठेत शुचिः।
भक्तिभावेन पाठेन सर्व्वकर्म्मसु सुक्षमः।
भक्तिभावेन पाठेन सर्व्वकर्म्मसु सुक्षमः।
स्तम्भयेत परसैन्यानि वारैकमत्र पाठतः।

वारद्वयं प्रपाठेन वशयेत् भुवनत्रयम्।
वारत्रयं पठेद्यस्तु पण्डितोऽपण्डितोऽपि वा।
शान्तिमाप्नोति परमां विद्यां भुवनमोहिनीम्।
प्रतिष्ठां च ततः प्राप्य मोक्षं निर्व्वाणमाप्नुयात्।
विद्वेषयेद्दर्शनेन् शीघ्रं चतुरावर्त्तनाद्ध्रुवम्।
पंचावृत्तिप्रपाठेन शत्रुमुच्चाटयेत् क्षणात्।
षड़ावृत्त्या साधकेन्द्रः शत्रूणां नाशको भवेत्।
आकर्षयेत् सुरद्रव्यं सप्तवारं पठेद्यदि।
एवं क्रमगतं ध्यात्वा यः पठेदतिभक्तितः।
स भवेत् योगिनीनाथो महाकल्पद्रुमोपमः।
ग्रंथिभेदे समर्थः स्यान्मासमात्रं पठेद्यदि।
दूरदर्शी महावीरो वलवान् पण्डितेश्वरः।
महाज्ञानी लोकनाथो भवत्येव न संशयः।
मासैकेन समर्थः स्यान्निर्व्वाणमोक्षसिद्धिभाक्।
प्रपठेद्योगसिद्ध्यर्थं भावकः परम[illegible]प्रियः
शून्यागारे भूमि[illegible]गर्त्ते मण्डपे शून्यदेशके।
गंगागर्भे महारण्ये चैकान्ते निर्जनेऽपि वा।
दुर्भिक्षवर्ज्जिते देशे सर्व्वोपद्रववर्ज्जिते।
श्मशाने प्रान्तरेऽश्वत्थमूले वटतरुस्थले।

इष्टकामय गेहेवा यत्र लोको नवर्त्तते।
तत्र तत्वानन्दरूपी महापीठस्थलेऽपिवा।
दृढासनस्थः प्रजपेन्नाममंगलमद्भुतम्।
ध्यानधारणाशुद्धात्मा न्यासं पूजापरायणः।
ध्यात्वा स्तौति प्रभाते च मृत्युजेता भवेद्ध्रुवम्।
अष्टांगसिद्धिमाप्नोति चामरत्वमवाप्नुयात्।
गुरुदेवमहामन्त्रभक्तो भवति निश्चितम्।
तस्य शरीरे दुःखानि न भवन्ति कुरिश्वयः।
दुष्टाः ग्रहाः पलायन्ते तं दृष्ट्वा योगिनं वरम्।
यः पठेत् सततं मन्त्री तस्य हस्तेऽसिद्धयः।
तस्य हृत्पद्मलिंगस्थ देवाः सिध्यन्ति चापराः।
युगकोटिसहस्राणि चिरायुर्योगिराड् भवेत्।
सकुलीनो निराकारो ब्रह्मा विष्णु शिवः सच।
सनित्यः कामसिद्धिस्थः सजीवन्मुक्तिमाप्नुयात्॥०

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे दृष्प्ररशक्तिकाकिन्याष्टोत्तरसहस्रनामस्तोत्रविन्यासो नामैकषष्टितमः पटलः॥६१॥

आनन्दभैरव उवाच

आनन्दभैरव उवाच आनन्दभैरवगुरुदेवयोः।
अथ नाथ प्रवक्ष्येऽहं काकिनीगुरुदेवयोः।

मन्त्रोद्धारस्तवज्ञानं येन सिद्धो भवेद्यदि।
एतत्स्तवनपाठेन सहस्राख्यान्तसन्निधु।
राजत्वं लभते सद्योऽथवा योगीच सस्यदि।
यथा जनकराजाच विषये गुरुभक्तिमान्।
महासिद्धो महाज्ञानी तथा भवति साधकः।
सुरा नागा रुद्रगणाः सर्व्वे विद्यार्थसाधकाः।
योगज्ञानी तथा सिद्धः खेचरा यज्ञरादसाः।
मुनयः क्रोधवेताला स्तथा च सुरेश्वरादयः।
एतत्-शुभस्तवेन्द्रेण स्तुत्वा सर्व्वे सुसिद्धिगाः।
ओं पूर्णः पूर्णेन्दुविद्याननकमलकटाक्षेदणात् पापहारी
हारीधाता विधाता समवति नवतान योगयोग्यान महेन्द्रान्।
संप्राप्तिप्राणयोगी निरवधिवरदानन्दगोप्तासवीरो
वालोमृत्युञ्जयस्य प्रभुरिति भयहा पातुमे गुप्तदेहम्॥१॥
कामक्रोधापहन्ता जनयति भव भारतान पातिपृथ्वीं
यो यो भावस्ययोगी मम कुरु सफलं सर्व्वदा शं करोतु।
ततक्रोडे लोकचक्रं डिमतुलतुलना सन्निभं भाति सूक्ष्मम
ततश्रीनाथाङ्घ्रिपादद्वयमजरहरं भावयेत हृतसुकंजे॥२॥
मायामोहे विवेकी शतकितवरिपुच्छेदकः प्रेरकः को
वाराणीगुह्यान्ततन्त्रावनि भव मनुजो यो मही मण्डलस्थः।

647

लोकातीतोऽतितीव्रो जयजय करुणानाथ दाता तपस्वी
मन्त्रोद्धारार्थ गुह्यं समवति य इह प्राणनाथं तमीडे ॥ ३॥
तावांस्तेजोऽपि गुर्व्वी हृदि जयकमलेऽन्तो सरस्वत्यथर्व्वी
वाग्देवी देवतायै नम इति मनुना मोहितो वाकपतीशः॥
मन्त्रार्थो दीपनाख्यो विजयजयशखा कोटिभिर्वेष्टितोवा
बालार्कानन्दरश्मिप्रचयशतमुखः पातु मां दुःखजालात ॥ ४॥
कल्याणगः सं गलां गाननविमल सखा कोटिभीराजितो यो
मन्त्राचैतन्यहर्त्ता प्रणवमथ शिवं तव सदान्ते शिवं च।
ध्यात्वा माहेश्वरायोँनम इति जपनान्तो महेच्छाधिपः स्यात
कालीपुत्रः सख त्वमल यवरदः सेवते यः समुक्तः॥ ५॥
हंसप्राणादिहन्ता त्वमखिलवरदस्त्वं निदानप्रधानः
शान्तीशस्त्वं प्रतिष्ठः प्रणव शिव सदा भद्रमाहेश्वराय।
अन्ते तूर्ब्बैर्नमोऽन्तो मनुमिह जपते संपदे दीर्घभंगा
आनन्दाब्धौ त्वमेको गुरुरिह चपलं चापलं मां प्रपाहि॥ ६
आनन्दोद्रेककारी त्वमपि सकरुणासागरो भक्तिदाता
दाता विद्याधरीणां त्वमसुररिपुः पार्व्वती प्राणनाथः।
तारं विम्बाधराढ्यं तमुखविधुगतं मन्त्रमेकाक्षरान्तं
तारान्तं च्यहरं तव प्रजपति यदि यो योगिराट् भूतले स्यात॥ ७
सम्पूर्णास्यं सुसिद्धो हरहरिपुमधुरं चन्द्रबिन्दुस्वरूपं

जप्त्वा नित्यं विलोम प्रणव स्मृतिहरं वह्निकान्ता तदन्ते।
एतद्रूपं पदं यो भजति धरगतं हेममंजीरनादं
मां रक्षानन्दचित्तं विजयरवकुलानन्दरः प्राणगस्ते॥ ८
उच्चाटे मोहने वा प्यरिवधसमये शान्तिपुष्ट्यादिवश्ये
ते मन्त्रान् योजयित्वा जपति यदि सुधीः श्रीपदाब्जावलम्बी।
सिध्येत् षट्कर्मसारं परमगुरुगतः सम्भवेत् कल्पशाखी
राजेन्द्रः सर्व्वलोके धनपतिसदृशः शम्भुनाथप्रसादात्॥ ९॥
स्वान्ते शक्राधिरूढं विधुनयनयुतं कामबीजं त्रिशक्तिं
चाद्यान्ते श्रीं शिवायोंनमवधुमिलितं यो जपेन्नाथमन्त्रम्।
ते नाम्ना योजयित्वा कुलपथनिरतः साधकः श्रीवरेण्यः
किं तस्यासाध्यसिद्धिर्जगति स सुखी योगमार्गी भवेत् सः १०
सर्व्वातीतो विहारी पदगतिरहितः सर्व्वगामी विरामी
हस्ताभावो विनेता निरवधिवरदः सर्व्वरूपी विरूपी।
मन्त्रज्ञस्त्वं सुमन्त्री मनुमयसमयः संशयासारहन्ता
मन्ता विश्वेश्वरीणां परपशुपतयेऽन्ते नमः पातु मन्त्रम्॥ ११
योगी भोगी विरोगी त्वमतुलविभवः संभवः पंचचूडो
वाणीशेषः प्रियेशः शशिग्रथितस्रजा शोभितांगो ह्यनङ्गः।
कामो मायारमेशः प्रथमदिनकरश्रोणिशोभातिलिप्तो
मे सर्व्वाङ्गं प्रपायादमलकमलगः क्रोधगामोऽवलोकम्॥ १२॥

एतत् श्रीशंकरस्तोत्रं यः पठेन्नियतः शुचिः।
संवत्सरात् भवेत् सिद्धिः सर्व्वज्ञानप्रदायिनी।
शुचौ वाप्यशुचौ वापि स्तौति भक्त्या यः साधकोत्तमः।
स सर्व्वयातनोन्मुक्तो योगी ग्रंथिविभेदकः।
अकस्मात् सिद्धिमाप्नोति प्रेमानन्दसुभक्तिदाम्।
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः।
न स्नानं न तपः कार्यं न पूजादिविधानकम्।
केवलं स्तवपाठेनानाहते सुस्थिरो भवेत्।
चिरजीवी वीतरोगी वीतसंसारभावनः।
पठित्वा धारयित्वा च योगभ्रष्टो न संभवेत्।
अनायासे योगसिद्धिं प्राप्नोति परमां श्रियम्॥
इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे ईश्वरस्तोत्रविन्यासो नाम द्विषष्टितमः पटलः॥ ६२॥

आनन्दभैरव उवाच

वद कल्याणि कामेशि त्रैलोक्यपरिपूजिते।
ब्रह्माण्डानन्तनिलये कैलासशिखरोज्ज्वले।
कालिके कालरात्रिस्थे महाकालनिषेविते।

शब्दब्रह्मस्वरूपेण वक्तुमर्हसि सादरात्।

आनन्दभैरव्युवाच।

परापरविभेदञ्च निगूढज्ञानसाधनम्।
इदानीं शृणु सर्व्वज्ञ दौर्गचण्डिकामुत्तमाम्।
येन विज्ञानमात्रेण नरो मुक्तिमवाप्नुयात्।
चण्डिकां हृदये न्यस्य स्मरणं यः करोत्यपि।
अनन्तफलमाप्नोति देवीचण्डिप्रसादतः।
रविवारे यदा चण्डी पठेद्यत्न समाहितः।
सहस्रावृत्तिपाठस्य फलं जानाति सुव्रत।
कुजवारे जगद्धात्रीः पठेद्यामलसम्मताम्।
शतावृत्तिफलं तस्य बुधे लक्षफलं ध्रुवम्।
शुक्रे देव जगद्धात्री चण्डिपाठेन शंकर।
ज्ञेयं तुल्यफलं भर्गवारे चण्डिसमाहितः।
शनिवारे जगद्धातः कोट्यावृत्तिफलं लभेत्।
अत एव जगद्धात्रीं यश्च चण्डीं समभ्यसेत्।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्।
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम्।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः।
धनं धान्यं प्रवालं च राजवस्त्रविभूषितम्।

चण्डिस्मवणमात्रेण कुर्यात सर्व्वं महेश्वर।
घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी।
चतुर्वक्त्रा महामाया महादेवविभूषिता।
रक्तदन्ता वरारोहा माहिषासुरमार्द्दिनी।
तारिणी जननी मुक्ता दुर्गा चाण्डिका चण्डविक्रमा।
गुह्यकाली जगद्धात्री चण्डीच जामलोद्भवा।
श्मशानवासिनी देवी घोरचण्डी भयानका।
शिवा घोररुद्रचण्डा महेशगणभूषिता।
प्रमथैर्भूषिताकृष्णा चामुण्डा मुण्डमार्द्दिनी।
रणखण्डा चण्डघण्टा रणावासवरप्रदा।
तारिणी भद्रकालीच शिवा घोरा भयानका।
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा।
मङ्गला जननी चण्डी महाक्रुद्धाऽभयङ्करी।
विमला भैरवीं निद्रा जातिरूपा मनोहरा।
कृष्णा निद्रा क्षुधा माया शक्तिर्माया मनोहरा।
तस्यै देव्यै नमस्तस्यै सर्व्वरूपेण संस्थिता।
प्राणप्रिया जातिमाया निद्रारूपा महेश्वरी।
या देवी सर्व्वभूतेषु सर्व्वरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः।

कालकी पूर्णा तन्त्रा महात्रिपुरसुंदरी॥ विद्याश्री
दक्षिणविद्या चण्डिकाल विमर्दिनी ह्रीं दुर्गा महाघोरा: चंडहस्ता प्रचंडिका॥म
हेश्वरगणादेवी भैरवी चाण्डविक्रमा ॥

ध्यानं॥ दृष्ट्वा प्रमत्तमहिषासुरदानवौ ले लीनेस्म मत्तजगतां हरियोग

निद्रा॥ तर्जैसुरारिमधुकैटभयोगमुद्रे हारिद्र दुःखहरणो मलं नमस्ते॥

एतां चण्डीं जगद्धात्रीं ब्राह्मणास्तु सदा पठेत।
नान्यस्याः पाठको देव पठने ब्रह्महा भवेत।
नारदः पाठकश्चैव कैलाशे रत्नभूषिते।
वैकुण्ठे ब्रह्मलोके च देवराजपुरे शिवे।
यः शृणोति धरायां च मुच्यते सर्व्वपातकैः॥
ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम्॥
श्वश्रूगमनपापं च कन्यागमनपातकम्।
सुतस्त्रीगमनं चैव यद्यत पापं प्रजायते।
परदारकृतं पापं तत्क्षणादेव नश्यति।
जन्मजन्मान्तरात पापात गुरुहत्यादिपातकात।
मुच्यते मुच्यते देवी गुरुपत्नीषु संगमात।
वचसा मनसा पापं यत पापं ब्रह्महिंसने।
मिथ्यायां चैव पापं च तत पापं नश्यति क्षणात।
श्रवणं पठनं चैव यः करोति धरातले।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत।
ये करिष्यन्त्यवज्ञां वै रुद्रजामलचण्डिकाम्।
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत।
अश्रद्धां ये च कुर्व्वन्ति ते च पातकिनां वराः।
रौरवं रक्तकुण्डं च कृमिकुण्डं मलस्य वै।

नमस्ते विविधे रुद्रगामामृतकम्
गमनगतिकम्

653

शुक्रस्य कुराडं स्त्रीरक्तं यानि तेऽ पाचिरेण वै ।
ततः पितृगणैः सार्द्धं विष्ठायां जायते कृमिः।
शृणु देव महादेव चराडीपाठं शृणोति चेत्।
गयायां चैव यत्पुरायं काश्यां विश्वेश्वराग्रतः।
प्रयागे मुराडनं चैव हरिद्वारे हरेर्गृहे ।
तुल्यपुरायं भवेद्देव सत्यं भर्ग शिवप्रिय ।
त्रिगयायां त्रिकाश्यां वै यच्च पुरायं समुस्थितम्।
तच्च पुरायं तच्च पुरायं तच्च पुरायं न संशयः।
भवानीच भवानी च भवानीत्युच्यते बुधैः।
भकारस्तु भकारस्तु भकारः केवलः शिवः।
वाणी चैव जगद्धात्री वरारोहा भकारकः।
प्रेतवद्देव विश्वेश भकारः प्रेतवत्सदा।
आरोग्यत्वजयं दुःखनाशनं सुखवर्द्धनम्।
धनं पुत्रं जयारोग्यं कुष्ठं गलितनाशनम्।
अर्द्धङ्गरोगान्मुच्येत दद्रुरोगाच्च सर्व्वदा।
सत्यं सत्यं जगन्नाथ महामाये शिवे शिवे।
चराडे चराडे महाघोरे चरािडके व्याधिनाशिनि ।
मन्दे दिने महेशानी विशेषफलदायिनी।
सर्व्वदुःखात्प्रमुच्येत भक्त्या चराडीं शृणोति यः।

654

ब्राह्मणो हितकारी च पठेन्नियतमानसः।
संगमं संगमं ज्ञेयं मंगलं जयमङ्गलम्।
भौमैर्बुद्धिपुत्रपौत्रैश्च कन्यादासादिभिर्युतः।
तत्वज्ञानं च निधने काले निर्व्वाणमाप्नुयात्।
महादानोद्भवं पुण्यं तुलहिरण्यके यथा।
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि सः।
निर्व्वाणमेति देवेश महास्वस्त्ययनं हितत्।
सर्व्वत्र विजयी यस्तु श्रवणाद्रुद्रदो यतः।
मुच्यते च जगद्धाता राजराजाधिपो भवेत्।

655

महाचण्डी शिवा घोरा भयानकवरप्रदा।
कांचनी कमलाविद्या महारोगविमर्द्दिनी।
गुह्यचण्डी घोरचण्डी चण्डी त्रैलोक्यदुर्लभा।
देवानां दुर्लभा चण्डी रुद्रयामलसंमता।
अप्रकाश्या महादेव प्रियवारणमर्द्दिनी।
मत्स्यप्रिया मांसरता मत्स्यमांसवलिप्रिया।
मदमत्ता महानन्दा भूतप्रमथसंगता।
मध्यभागा महावामा धान्यदा धनवलदा।
राज्यप्रदा महादेव तथा विषयवर्द्धिका।
मुक्तिदा सर्व्वदा चण्डी महाविपद्विनाशिनी।

इमां चण्डीं पठते मनुष्यः शृणोति भक्त्या परमं शिवस्य।
चण्डीं धरण्यां मतिपुण्ययुक्तो भक्त्या च गच्छेद्भवमन्दिरं शुभम्।
यद्यन्मनोरथं भर्ग करोति धरणीतले।
रुद्रचण्डि प्रसादेन किल सिध्यति भूतले।
रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा।
रुद्रभक्ता रुद्ररूपा वस्त्रभासमन्विता।
शिवचण्डा महाचण्डा शिवप्रीतिगणान्विता।
भैरवी परमा विद्या महाविद्या च षोडशी।
सुन्दरी परमापूज्या महात्रिपुरसुन्दरी।
गुह्यकाली भद्रकाली महाकालविमर्द्दिनी।
कृष्णा कृष्णस्वरूपा सा जगन्मोहनकारिणी।
अतितन्त्रा महालज्जा सर्व्वसंगमदायिका।
घोरतन्त्रा भीमरूपा भीमा देवी मनोहरा।
वगलावगला सिद्धिदायिका सर्व्वदा शिवा।
स्मृतिरूपा कीर्त्तिरूपा वह्निरूपा मनोहरा।
विष्णुप्रिया शक्रपूज्या योगीन्द्रैरपि सेविता।
विष्णुप्रिया शक्रपूज्या योगीन्द्रैरपि सेविता।
भयानकमहादुःखदेवी भयविनाशिनी।
चण्डिका शक्तिहस्ता कौमारी सर्व्वकामदा।
वाराही च वराहस्य इन्द्राणी शक्रपूजिता।

चामुण्डा नारसिंहीच न्दसिंह शत्रुनाशिनी।
इति सत्यं महेशानि सत्यं सत्यं वदाम्यहम्।
नैव शोकं नैव रोगं नैव दुःखभयं तथा।
आरोग्यं मंगलं नित्यं करोति शुभमंगलम्।
महेशान वराभीते ब्रवीमि सत्यमुत्तमम्।
अभक्ताय न दातव्यं धामयागाधिकं शुभम्।
मम भक्ताय शान्ताय शिवविष्णुप्रियाय च।
दद्यात् कदाचिद्देवेश सत्यं सत्यं महेश्वर।
अनन्तफलमाप्नोति रुद्रचण्डीप्रसादतः।
अश्वमेधसहस्राणि वाजपेयशतानि च।
तुष्टाश्च पितरो देवास्तथा च सर्व्वदेवता।
भर्गायस्यमयज्ञानं रुद्रयामलपुस्तके।
मन्त्रमन्त्रसंज्ञानं करोत्यपि नराधमः।
अत एवं महाबाहो किं वक्ष्ये तव सन्निधौ।
लक्ष्मीदयाधिका चण्डी श्रवणात् पठनाज्जनः।
तत्त्वमसीतिवाक्येन मुक्तिमाप सुदुर्लभाम्।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सि-
द्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे रु-

द्रचराडी स्तावन विन्यासो नाम त्रिषष्टितमः पटलः॥६३॥

आनन्दभैरव उवाच

नदकान्ते परानन्दे वाराहिकुलसुन्दरि।
यस्य विज्ञानमात्रेण शत्रवो नाशमाप्नुयुः।

श्री आनन्दभैरव्युवाच।

परापरविभेदज्ञ निगूढज्ञानसाधनम्।
इदानीं शृणु सर्व्वज्ञ शत्रूणां नाशनं परम्।
अस्त्रास्त्रं संप्रवक्ष्यामि सद्यः प्रत्ययकारकम्।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम्।
यस्य स्मरणमात्रेण परमोऽपि स्थिरायते।
प्रणवं स्थिरमायां च ततश्च वगलामुखि।
तदग्रे सर्व्वदुष्टानां ततो वाचं मुखं पदम्।
स्तम्भयेति पदं पश्चात् जिह्वां कीलय कीलय।
बुद्धिं नाशय ह्रीं ओं स्वाहा।
षट्त्रिंशाद्दरी विद्या सर्व्वसम्पत्करी मता।
वाह्निर्हरीन्द्रयुक्माया स्थिरमाया प्रकीर्त्तिता।
प्रातः कृत्यादिकं कृत्वा ऋष्यादिन्यासमाचरेत्।
शिरसि नारद ऋषये नमः। हृदि वगलामुखी देवतायै नमः।
लिंगे ह्रीं वीजाय नमः। पादयोः स्वाहा शक्तये नमः।

[ततः करांगन्यासौ। ऐं ह्लीं ऐं गुष्ठाभ्यां नमः।
वगलामुखि तर्जनीभ्यां स्वाहा, सर्व्वदुष्टानां मध्यमा-
भ्यां वषट् वाचं मुखं स्तम्भय अनामिकाभ्यां हुं। जिह्वां
कीलय कीलय कनिष्ठाभ्यां वौषट्। वुद्धिं नाशय ह्लीं ऐं
स्वाहा करतलकरपृष्ठाभ्यां फट्। एवं ऐं ह्लीं हृदयाय
नमः। वगलामुखि शिरसे स्वाहा। सर्व्वदुष्टानां शिखायै
वषट्। वाचं मुखं स्तम्भय कवचाय हुं। जिह्वां कीलय
कीलय नेत्रत्रयाय वौषट्। वुद्धिं नाशय ह्लीं ऐं स्वहा क-
रतल पृष्ठाभ्यां फट्] *

युग्मवर्णैस्तु सप्ताष्ट शेषार्णैश्च तनूद्भवैः।
करशाखादिषु तनोः करांगन्या समाचरेत्।
अथ वक्ष्ये महादेव ध्यानं परमदुर्लभम्।
मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बरां कनकमाल्यविभूषितांगीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥१॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम्।
गदाभिघातेन च भास्वरेण पीताम्बराढ्यां द्विभुजां नमामि॥२

* एतत्र मूलं। वक्ष्यमाणवाक्यस्य वैशद्यकरणार्था विवृतिः।

659

ध्यात्वैवं पूजयेद्देवीं यथा विभव विस्तरैः।
यथा शक्ति जपं कत्वा स्तोत्रंच प्रपठेत्ततः।

चलत कनककुण्डलोल्लासित चारुगंडस्थलीं
लसत् कनक चम्पकद्युतिमदिन्दु विम्बाननाम्।
गदाहत विपक्षकां कलितलोल जिह्वां चलां
स्मरामि वगलामुखीं विमुख मन्त्र स्तंभिनीम्॥१॥
पीयूषोदधि मध्य चारु विलसद्रक्तोत्पले मंडले
तत् सिंहासन मौलि पातित रिपुप्रेतासनाध्यासिनीम्।
स्वर्णाभा करपीडितारि रसनां भ्राम्यद्गदां विभ्रमा
इत्थं ध्यायति यान्ति तस्य सहसा सद्योऽथ सर्वापदा।
देवित्वच्चरणाम्बुजार्च्चन कृते यः पीतपुष्पांजलिं
भक्त्या वामकरे निधाय च मनुं मंत्री मनोज्ञाक्षरम्।
पीठध्यानपरोऽथ कुम्भकवशाद्बीजं स्मरेत् पार्थिवं
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात्॥२॥
वादी मूकति रंकति क्षितिपति र्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति।
गुर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रिणा मंत्रितः
श्रीनित्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः॥४

660

मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते

मन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं तु चित्रं न ते।

मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे

तन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनः॥५॥

दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणम्

भूभृद्भीशमनं चलन्मृगदृशां चेतःसमाकर्षणम्।

सौभाग्यैकनिकेतनं मम दृशः कारुण्यपूर्णेक्षणम्

मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः॥६॥

मातर्भञ्जय मद्विपक्षवदनं जिह्वां चलां कीलय

ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं स्तम्भय।

शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौरांगि पीताम्बरे

विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे॥७

मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये

श्रीविद्ये समये महेशि बगले कामेशि वामे रमे।

मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे।

दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम्॥८।

संरम्भे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये

विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम्।

वश्येवा स्तम्भनेवा रिपुवधसमये निर्जनेवा वनेवा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः। ९
नित्यं स्तोत्रमिदं पवित्रमिह तद्देव्याः पठित्वादरात
धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा गले।
राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रादिकम
ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिराः सिद्धयः॥ १०
त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी
योषाकर्षणकारिणी जनमनःसंमोहसन्दायिनी।
जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा॥ ११
विद्यां लक्ष्मीं सर्व्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्व्वसाम्राज्यसिद्धिम्।
मानं भोगो वश्यमारोग्य सौख्यं
प्राप्तं तत्तत भूतलेऽस्मिन्नरेण॥ १२॥
प्राप्तं गदितं परमेश्वरि।
~~तत्कृतंजपमन्त्राहं~~ गदितं परमेश्वरि।
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते।
ब्रह्मास्त्रमिदमाख्यातं त्रिषु लोकेषु विश्रुतम्।
गुरुभक्ताय दातव्यं नदेयं यस्य कस्यचित।
पीताम्बरां द्विभुजांच त्रिनेत्रां गात्रकोज्ज्वलाम्।

662

शिलामुद्गरहस्तां च स्मरेत्तां वगलामुखीम्।

॥ श्रीं ॥

इति श्रीरुद्रजामले उत्तरतन्त्रे महा-
तन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्र-
प्रकाशे भैरवीभैरवसंवादे वगलामुखी-
स्तोत्रविन्यासो नाम चतुःषष्टितमः
पटलः

समाप्तमिदं रुद्रयामलतन्त्रम्।